உ

நமசிவாயாய

प्रत्यङ्गिरा सपर्या सर्वस्वम्

(नागरलिपि)

பிரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்

தேவீபிரத்யங்கிரா, பைரவர் முதலான தெய்வங்களின், மந்திரங்கள், புரச்சரணவிதிகள், யந்திரம், பூஜை, யாகம் செய்முறைகள், அஷ்டகர்மபிரயோக விதிகள், கவசம், ஸஹஸ்ரநாம துதிகள் 1000,108 நாமாவளிகள், பிரார்த்தனைகள் உள்ளடக்கியது.

தொகுப்பாசிரியர்

சிவஸ்ரீ. வி. சோமசேகர சிவாசார்யார் M.A.,

2020 சார்வரி வருஷம், சரத்கால கார்த்தீகமாஸ சிவராத்ரிதினம்,
ஸ்ரீ பிரத்யங்கிரா மஹாசாந்தி யாகம் - நாள் **13.12.2020.**

வெளியீடு சிவாசார்யர் அறக்கட்டளை (பதிவு) மற்றும்
சிவஸ்ரீ ஸாம்பமூர்த்தி சிவாசார்யார் டிரஸ்ட் (பதிவு)
207/101 தம்புசெட்டி தெரு, சென்னை-1.

உ

நமச்சிவாப்யாம்

प्रत्याङ्गिरा सपर्या सर्वस्वम्

(नागरलिपि)

பிரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்

தேவீபிரத்யங்கிரா, பைரவர் முதலான தெய்வங்களின், மந்திரங்கள், புரச்சரணவிதிகள், யந்திரம், பூஜை, யாகம் செய்முறைகள், அஷ்டகர்மபிரயோக விதிகள், கவசம், ஸஹஸ்ரநாம துதிகள் & 1000 & 108 நாமாவளிகள், பிரார்த்தனைகள் உள்ளடக்கியது.

தொகுப்பாசிரியர்

ஆகம ப்ரவீணர், வ்யாகரண சிரோமணி, சைவாகமக்ஞ சூடாமணி, சைவாகம வித்வான்,
வ்யாகரண விசாரதா, சிவாகம ஸார்வபௌம:, சிவஸம்வித் ஸபர்யா பாராவாரீணர்,
சிவாகம அருட்செல்வர், ஸம்ஸ்கிருத சேவாரத்தினம், சிவாகம வாசஸ்பதி,
வாஸ்து வித்தகர், சைவாகமஶ்ரீ: , ஆகம கல்பத்ரும:,
ஆகம வித்தகர், சிவாகம வித்யாரத்னம், சாக்தயாக சாம்ராட்,
வைதிகசைவ ரக்ஷாமணி, சிவபாத பத்மபூஷணம், சிவாகமக் கலாநிதி
சைவாகம பரீக்ஷாதிகாரீ, யாக ஸர்வஸாதக திலகம், சாஸ்தா உபாஸகர், அகோரசிவம் என்கிற

சிவஶ்ரீ. விஜய. சோமசேகரசிவாசார்யார் M.A.,

குருமுதல்வர். சைவாகம கலாசார வித்யாகேந்திரம், சென்னை–1.

2020 சார்வரி வருஷம்
சரத்கால கார்த்தீகமாஸ சிவராத்ரி தினத்தில்
ஶ்ரீ பிரத்யங்கிரா மஹா சாந்தியாகத்தில் வெளியிடப்பட்டது.

நாள் 13.12.2020

வெளியீடு
சிவாசார்யர் அறக்கட்டளை (பதிவு) மற்றும்
சிவஶ்ரீ ஸாம்பமூர்த்தி சிவாசார்யார் டிரஸ்ட் (பதிவு)
207/101 தம்புசெட்டி தெரு, சென்னை–1.

நூல்விளக்கக் குறிப்பு

நூலின்பெயர், தலைப்பு	:	**பிரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்**
நூலின் துறை	:	பகவதி பிரத்யங்கிரா உபாஸனாகல்பம்
நூலின் வகை	:	சாக்தஸமய மாந்த்ரீக அனுஷ்டானம்
நூலின் பொருள்	:	பிரத்யங்கிராதேவியின் அருள்பெறும் வழிகள்
நூலின் மொழி	:	ஸம்ஸ்கிருதம்
நூலின் எழுத்து	:	நாகர எழுத்துமட்டில்
தொகுப்பு & வடிவமைப்பு	:	சிவஸ்ரீ.வி.சோமசேகர சிவாசார்யர்
நூலின் பதிப்புரிமை	:	நூலாசிரியருக்கே உரியது.
நூல் அளவு	:	8.5" x 5.5"
அச்சிட்ட எண்ணிக்கை	:	500 பிரதிகள்
முதற்பதிப்புகாலம், ஆண்டு	:	டிசம்பர் 2020
நூல் பதிப்பு எண்.	:	முதற்பதிப்பு
நூலின் பக்கங்கள்	:	560 பக்கங்கள்
வெளியீடு	:	சிவாசார்யார் அறக்கட்டளை, சென்னை–01.
வெளியீட்டு நூல்வரிசை	:	28
நிதியளித்த நிறுவனம்	:	ஸ்ரீஸாம்பமூர்த்தி சிவாசார்யார் டிரஸ்ட்.
வெளியீட்டு விழா	:	பிரத்யங்கிரா மஹாசாந்தி யாகம்
வெளியிட்ட நாள்	:	சரத்காலகார்த்தீகசிவராத்ரி, 13 டிசம்பர் 2020
கணிணி அச்சுபதிப்பு	:	கிரிஜாகணேஷ், அண்ணாநகர், சென்னை.
அச்சகம்	:	ஓம் டிஜி ஒர்க்ஸ், சென்னை–40.
புத்தகம் கிடைக்கும் இடம்	:	அறக்கட்டளை & நூலாசிரியர்அகம்.
நூலைபெறத் தொடர்புக்கு	:	98402 99352 | 99402 01849
புத்தகத்தின் விலை	:	**விலை ரூ.600/-**

All rights relating to this work rest of the copyright. Except for reviews and quotations, use or republication of any part of this work is prohibited under the copyright act, without prior written permission of the writer of this book.

Chief Editing - Layout & Compiled by : V. Somasekara Gurukkal M.A.,

पुस्तकमुद्रण विवरणम्

ग्रन्थनाम	-	प्रत्यङ्गिरा सपर्या सर्वस्वम्।
कोशविभागः	-	शाक्तसमय उपासना पद्धतिः।
पुस्तकभेदः	-	तान्त्रीक प्रयोग सङ्ग्रहग्रन्थः।
पुस्तकविषयः	-	प्रत्यङ्गिरादेव्याः उपासनाङ्ग विषयाः
विषयभाषा	-	संस्कृत भाषा
पुस्तकाक्षरम्	-	नागरलिपिमात्रम्
पुस्तकसंपादकः - लेखकः	-	वि.सोमशेखर शिवाचार्यः
मुद्रणाधिकारः	-	लेखकाधीनः
पुस्तकमानं	-	8.5 x 5.5
मुद्रितकोशसङ्ख्या	-	सहस्रम् 500 पुस्तकानि।
मुद्रितकालः	-	2020 शार्वरिसंवत्सरः
प्रकाशनम्	-	प्रथमप्रकाशनम्
पुस्तकपुटसङ्ख्या	-	560 पुटानि
प्रकाशकः	-	श्रीसाम्बमूर्ति शिवाचार्य धर्मस्थापनम्
प्रकाशितग्रन्थमाला	-	सङ्ख्या 28
प्रकाशनमूल्यदाता	-	शिवाचार्यट्रस्ट् चेन्नै
प्रकटनोत्सवः	-	श्री प्रत्यङ्गिरा महाशान्ति यागः
प्रकाशितकालः	-	शार्वरिवर्षकार्तीक कृष्ण चतुर्दशी
प्रकटनदिनाङ्कः	-	13-12-2020
मुद्रितकरसेवा	-	गिरिजागणेशः, चेन्नै
मुद्रणालयम्	-	ओं डिजि ओर्क्स - चेन्नै-40.
पुस्तकप्राप्तिस्थानम्	-	धर्मस्थापनम् & गृहम्, 101, तम्बुचेट्टितेरु, चेन्नै
दूरभाषणसङ्ख्या	-	98402 99352 । 99402 01849
पुस्तकमूल्यम्	-	रूपा **600.00**

ॐ

शिवाभ्यांनमः

प्रत्यङ्गिरा सपर्या सर्वस्वम्

(नागरलिपि)

संपातकः संशोधकश्च

चेन्नपुरी १. शिवाचार्या धर्मस्थापनीय शैवागमकलाचार विद्याकेन्द्र प्रांशुपाला ध्यापकेन – आगमप्रवीणः, व्याकरणशिरोमणिः, शैवागमज्ञ चूडामणिः, व्याकरणविशारदा, संस्कृतसेवारत्नम्, शैवागमश्रीः, आगमकल्पद्रुमः, वैदिकशैवरक्षामणिः, शिवपादपद्मभूषणं -शिवागमकलानिधिः, इत्यादि बिरुदभाजा, शिवश्री.विजय – **सोमशेखर शिवाचार्येण** ग्रन्थेभ्यः सङ्कलीकृत्य विलिख्य संशोध्य **परिष्कृतम्**



प्रकाशकः

चेन्नपुरी-1. शिवाचार्य धर्मस्थापनाध्यक्षैः
ति-सा-कालिदास शिवाचार्यैः,
शिवश्री साम्बमूर्तिशिवाचार्य धर्मस्थापनाध्यक्षैः
Dr.ति.सा.षण्मुख शिवाचार्यैश्च चेन्नपुर्यां प्रचालिते,
श्रीमहाप्रत्यङ्गिरामहाशान्तियज्ञे
(13-12-2020) **प्रकाशितम् ।**

क्रैस्तवाब्दाः २०२० मूल्यम् रू.६००

நூலின் உள்ளடக்கம்

1. நூல் விளக்கக்குறிப்பு
2. ஆதிசைவசம்ப்ரதாய குருவந்தனம்
3. தீபவந்தனம்
4. கோமாத்ருமந்தனம்
5. இஷ்டதேவதாவந்தனம்
6. பவானீ ப்ராதஸ்மரணம்
7. பவானீ பஞ்சகம்
8. தேவீதுதிகள்
9. காளீ ப்ராதஸ்மரணம்
10. ஸ்ரீமுகம் (வாசீசசிவாசாரியார்)
11. உபோத்காம் (ஸம்பாதகீயோக்தி)
12. தொகுப்பாளருரை
13. ப்ரஸ்தாவிகம்
14. ஆசியுரைகள்
15. மகிழ்வுரை
16. சிவாசார்யசரிதம்
18. வெளியீட்டுரை
19. நூலின் பொருளடக்கம்
20. நூல்
21. வாழ்த்துப்பா
22. நூலாசிரியரின் வெளியீடுகள்

आदिशैव संप्रदाय सन्तान आचार्यप्रणतिः

1. **परमशिव वन्दनम्**

नमो ब्रह्मपदार्थाय लोकानां सिद्धिहेतवे।
सच्छिदानन्दरूपाय शिवाय परमात्मने।।

2. **सप्तगुरु वन्दनम्**

सदाशिव मनन्तं च श्रीकण्ठं पुनरम्बिकाम्।
गुहं विष्णुं च धातारं गुरुन् सप्त समाश्रये।।

3. **गुरु वन्दनम्**

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः।

4. **दक्षिणामूर्ति वन्दनम्**

गुरवे सर्वलोकानां भिषजे भवरोगिनाम्।
निधये सर्वविद्यानां दक्षिणा मूर्तये नमः।।

5. श्रीकण्ठाचार्य वन्दम्

श्रीकण्ठ वंशोदधि पूर्णचन्द्रं श्रीकण्ठ शास्त्रार्थविदं मुनीन्द्रम्।
श्रीकण्ठ भावाञ्चित यज्ञसूत्रं श्रीकण्ठ माचार्य महं भजामि।।

6. शिवादिदेशिक वन्दनम्

शिवं शक्तिं गणाधीशं गुहं वागीश्वरीं क्रमात्।
दूर्वाससं अहं वन्दे पैङ्गळाद्यांश्च देशिकान्।।

7. पाशुपताचार्य वन्दनम्

दूर्वास कौशिक विरिञ्चि मृगण्डुपुत्र -
देवेन्द्र बाण हरि शक्ति दधीचि रामान्।
कण्वात्रि भार्गव बृहस्पति गौतमादीन्पु
ण्यानिमान् परम पाशुपतान् नमामि।।

8. वंशगुरु वन्दनम्

शुद्धस्फटिक सङ्काशान् मन्दस्मित मुखाम्बुजान्।
व्याख्यापुस्तक संयुक्तान् शिवज्ञान प्रबोधकान्।।

गुरुन् परापरान् सर्वान् गुरुवंश क्रमागतान्।
अस्माद् आचार्यपर्यन्तान् वन्दे देशिकपुङ्गवान्।।

9. सुन्दरमूर्तिगुरुवन्दनम्



केयूर कुण्डल किरीट विभूषिताङ्गं -
हस्तोत्पलं कटिकरं धृतराजवेषम्।
रुद्राक्ष रुद्रजप भूति ललाट भाजं
ध्यायेत् त्रिभङ्ग शिवसुन्दर मूर्तिं रुपम्।।

10. अष्टादश पद्धत्याचार्य वन्दनम्

दूर्वासा: पिङ्गळश्चैव उग्रज्योति स्सुबोधक:।
श्रीकण्ठो विष्णुकण्ठश्च विद्याकण्ठ स्तथैव च।

रामकण्ठो ज्ञानशिवो ज्ञानशङ्कर एवच।
सोमशम्भु र्ब्रह्मशम्भु: त्रिलोचनशिव स्तथा।

अघोरशिव एवाथ प्रासादशिव एव च।
रामनाथशिव श्चैव ईशान शिव एव च।

वारुणाख्य शिवश्चैवा (अ) ष्टादशाचार्यपुङ्गवा:।
एतै र्दिव्यै श्शिवाचार्यैः पद्धति:परिभाषिता।।

तेभ्यो नित्यं नमो दिव्य देशिकेन्द्रेभ्य एवच।
सिद्धान्त मार्गदर्शिभ्यो आचार्येभ्यो ऽस्तु मे नति:।।

11. विद्यामातृमण्डलवन्दनम्

त्वं काळी त्वं च तारा त्वमसि गिरिसुता सुन्दरी भैरवी त्वं
त्वं दुर्गा छिन्नमस्ता त्वमसि च भुवना त्वं हि लक्ष्मी शिवा त्वम्।
धूमा मातङ्गिनी त्वं असि च बगळा मङ्गळादि स्तवाख्या
क्षन्तव्यो मेऽपराध: प्रकटि तवदने कामरुपे कराळे।।



मङ्गळदीप ज्योतिस्तुतिः (दीपवन्दन स्तोत्रम्)

मङ्गळे मङ्गळाधारे माङ्गल्ये मङ्गळप्रदे।
मङ्गळार्थे मङ्गळेशि मङ्गळायै नमो नमः।। 1

सर्वमङ्गळ माङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बिके गौरि नारायणि नमोस्तुते।। 2

शुभं भवतु कल्याणि आयु रारोग्य सम्पदाम्।
शत्रुबुद्धि विनाशाय दीपज्योति र्नमोऽस्तुते।। 3

दीपलक्ष्मि महाविद्ये दीपदुर्गे सुचिन्मये।
दीपमेधे महाप्रज्ञे दीपकाळि नमोऽस्तुते।। 4

आदिपूज्ये दीपलक्ष्मि गुरुमूर्ति स्वरूपिणि।
ज्ञानदे चाधिभूतेशि दीपज्योति र्नमोऽस्तुते।। 5

सुवर्ण वृद्धिं कुरुमे गृहे श्रीः सुधान्य वृद्धिं कुरु मे गृहे श्रीः।
कल्याण वृद्धिं कुरु मे गृहे श्रीः विभूति वृद्धिं कुरु मे गृहे श्रीः।।

प्रणवप्रणतिः (ओंकारवन्दनम्)

ओंकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः।
कामदं मोक्षदं चैव ओङ्काराय नमो नमः।। 1

ईशानस्सर्वविद्याना मीश्वरो निखिलात्मनाम्।
जयत्वखण्ड सर्वज्ञो जगदादिगुरु श्शिवः।। 2

वन्दे विश्वाधिकं शान्तं अनादिनिधनं शिवम्।
निष्कळं निष्कळङ्कञ्च शक्तिं ज्ञानक्रियात्मिकाम्।। 3

सोम मानन्द संपूर्णं सोमार्धकृत शेखरम्।।
दक्षिणाभिमुखं देवं दक्षिणामूर्तिं माश्रये।। 4

गुरुं गणपतिं स्कन्दं साम्बं च परमेश्वरम्।
वन्दे वाणीं महालक्ष्मीं इष्टकाम्यार्थ सिद्धये।। 5

नत्वा गुरुपदद्वन्द्वं शोधित्वा शास्त्रजालकम्।
प्रत्यङ्गिरायाः पूजायाः विधानं प्रोच्यतेऽधुना।। 6



गोमातृ स्तुतिपञ्चकम्

नमो देव्यै महादेव्यै सुरभ्यै च नमो नमः।
गवां बीजस्वरुपायै नमस्ते जगदम्बिके।। 1

नमो राधाप्रियायै च पद्मांशायै नमो नमः।
नमः कृष्णप्रियायै च गवां मात्रे नमो नमः।। 2

कल्पवृक्ष स्वरूपायै सर्वेषां सन्ततं परम्।
श्रीदायै धनदायै च वृद्धिदायै नमो नमः।। 3

शुभदायै प्रसन्नायै गोपदायै नमो नमः।
यशोदायै कीर्तिदायै धर्मज्ञायै नमो नमः।। 4

सर्वकामदुहे देवि सर्वतीर्था भिषेचिनि ।
पावनि सुरभि श्रेष्ठे देवि तुभ्यं नमोऽस्तुते।। 5

इदं स्तोत्रं महत् पुण्यं भक्ति युक्तश्च यःफठेत्।
स गोमान् धनवान् चैव कीर्तिमान् पुत्रवान् भवेत्।। 6

इष्टदेवता वन्दनम्

गणेश स्तुतिः

ओं ओं ओं काररूपं त्र्यह मिति च परं यत्स्वरूपं तुरीयं -
त्रैगुण्या तीत नीलं कलयति मनस स्तेज सिन्दूर मूर्तिम्।
योगीन्द्रै ब्रह्मरन्ध्रैः सकल गुण मयं श्री हरेन्द्रेण सङ्गं
गं गं गं गं गणेशं गजमुख मभितो व्यापकं चिन्तयामि।।

श्री गुरुपादुका स्तोत्रम्

उर्ध्वाम्नाय गुरोः पदं त्रिभुवनौं काराख्य सिंहासनं –
सिद्धाचार समस्त वेद पठितं षड्वक्र संचारिणम्।
अद्वैत स्फुर दग्नि मेक ममलं पूर्णप्रभा शोभितं –
शान्तं श्रीगुरु पादुकां भज मनः चैतन्य चन्द्रोदयम्।।

गुरु स्तोत्रम् (सद्गुरुप्रणतिः)

नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्वमस्यादि लक्ष्यम्।
एकं नित्यं विमल ममलं सर्वधी साक्षिभूतं –
भावातीतं त्रिगुण रहितं सद्गुरुं तं नमामि।।

पार्वतीपति स्तुतिः

हे नीलकण्ठ वृषभध्वज पञ्चवक्र
लोकेश शेषवलय प्रमथेश शर्व।
हे धूर्जटे पशुपते गिरिजापते मां
संसारदुःख गहनात् जगदीश रक्ष।।

वागीश्वरी स्तुतिः (भारती)

अमल कमल संस्था लेखिनी पुस्तकोद्यत् –
कर युगल सरोजा कुन्द मन्दार गौरा।
धृत शश धर खण्डो ल्लासि कोटीर पीठा-
भवतु भव भयानां भङ्गिनी भारती नः।।

क्षेत्रपाल स्तुतिः

यं यं यं यक्षरूपं दश दिशि वदनं भूमि कम्पाय मानं
सं सं सं संहारमूर्तिं शुभमकुट जटा शेखरं चन्द्र बिम्बम्।
दं दं दं दीर्घकायं विकृत नख मुखं चोर्ध्व रोमं करालं
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्र पालम्।।

प्रत्यङ्गिरोद्भव सूक्तियुत नटेश्वर स्तवः

युक्ते भग्नोरुकायं नरहरिवपुषं गण्डभेरुण्डरूपी -
भूत्वा गर्जन्त मग्रे शरभ खगपति र्यस्य फालाग्निकुण्डात्।
उग्र प्रत्यङ्गिराख्यां दश शतवदनां काळिका माशु सृष्ट्वा -
तस्याः जिह्वाग्र वह्निं सुतरुवत् अन्यत् कुञ्चिताङ्घ्रिं भजे ऽहम्।।
(कुञ्चिताङ्घ्रिस्तवे उमापतिशिवाचार्यः)

श्रीकृष्ण स्तुतिः

लक्ष्मीसहायं कल्पद्रु तलरञ्जित गोकुलम्।
बर्हापीडं घनश्यामं महः किञ्चित् उपास्महे।।

श्रीशास्तु स्तुतिः

भूतेशं विश्वगोप्तारं विष्णु शङ्कर नन्दनम्।
शास्तारं सर्वलोकानां प्रभुं वन्दे सदा ऽर्यकम्।।

बटुकनाथस्तुतिः

करकलित कपालः कुण्डली दण्डपाणिः
तरुण तिमिर नील व्याल यज्ञो पवीती।
क्रतु समय सपर्या विघ्न विच्छेद हेतुः
जयति वटुक नाथः सिद्धिदः साधकानाम् ।।

कुण्डलिनीशक्तिस्तुतिः (रुद्रयामले)

आधारे परदेवता भवनताधः कुण्डली देवता-
देवाना मधिदेवता त्रिजगता मानन्द पुञ्ज स्थिता।
मूलाधार निवासिनी त्रिरमणी या ज्ञानिनी मालिनी –
सा मे मातृ मनुस्थिता कुलपथा नन्दैक बीजानना।।

ईश्वरी जगतां धात्री ललिता सुन्दरी परा।
कुण्डली कुलरूपा च पातु मां कुलचण्डिका।।

काशी देवनाथ स्तुतिः

विश्वेशं माधवं डुण्डिं दण्डपाणिं च भैरवम्।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम्।।

कालभैरव स्तुतिः

पाणिभ्यां परितः प्रपीड्यसुदृडं निश्चोद्यनिश्चोद्यच-
ब्रह्माण्डं सकलं पचेलिमरसा ळोचैःफलाभं मुहुः।
पायं पाय मपायतः त्रिजगतीं उन्मत्तवत्तै रसैः -
कृत्यं ताण्डव डम्बरेण विधिना पायान् महाभैरवः।।

श्री काळिका स्तुतिः

मालिका तिमिर कुन्तलान्त घन भृङ्ग मङ्गळ विराजिनीं -
चूळिका शिखर मालिका वलय मल्लिका सुरभि सौरभाम्।
वालिका मधुर खण्ड मण्डल मनोहरानन सरोरुहां -
काळिका मखिल नायिकां मनसि भावयामि परदेवताम्।।

भद्रकाली स्तोत्रम्

या शम्भो र्धूळिताङ्गी भुजग परिवृता व्याघ्र चर्मोत्तरीया –
निर्मांसी मांस भक्षी विगत नरशिरो बन्धमाला कराळी।
चामुण्डा रक्तकर्णी शवशय निरता वद्धमुण्ड प्रचण्डा –
निशशङ्का कोटराक्षी भय दुरित हरी भद्रकाली प्रसन्ना।।

भगवती प्रातस्मरणम्

प्रात: स्मरामि शरदिन्दु करोज्वलाभां
सद्रत्नवन्मकर कुण्डल हारभूषाम्।
दिव्यायुधोर्जित सुनील सहस्त्रहस्तां
रक्तोत्पलाभ चरणां भवतीं परेशाम्।। 1

प्रात र्नमामि महिषासुर चण्डमुण्ड
शुम्भासुर प्रमुख दैत्य विनाश दक्षाम्।
ब्रह्मेन्द्र रुद्र मुनि मोहनशील लीलां
चण्डीं समस्त सुरमूर्तिं मनेक रूपाम्।। 2

प्रात र्भजामि भवता मभिलाष दात्रीं
धात्रीं समस्त जगतां दुरिताप हन्त्रीम्।
संसार बन्धन विमोचन हेतु भूतां
मायां परां समधिगम्य परस्य विष्णोः।। 3

भवानी पञ्चकम् (आदिशङ्करविरचितम्)

न मन्त्रं नो यन्त्रं तदपि न जाने स्तुति महो
न चाह्वानं ध्यानं तदपि च न जाने स्तुति कथा:
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मात: त्वदनुसरणं क्लेशहरणम्। 1

विधे रज्ञानेन द्रविण विरहेणा लसतया
विधेया सख्यत्वात् तवचरणयो र्याच्युति रियम्।
तदेतत् क्षन्तव्यं जननि सकलोत्तारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।। 2

पृथिव्यां पुत्रा स्ते जननि बहव स्सन्ति सरला:
परं तेषां मध्ये विरल तरलोऽहं तव सुत:।
त्वदीयोऽयं त्यागस्समुचित मिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।। 3

जगन्मात र्मात स्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविण मपि भूय स्तव मया।
तदाऽपि त्वं स्नेहं म निरुपमं यत् प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।। 4

स्वपाको जल्पाको भवति मधुपाकोपम गिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकै:।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जन: को जानीते जननि जपनीयं जपविधौ।। 5

चिता भस्मालेपो गरळ मशनं दिक्पटधरो
जटाधरी कण्ठे भुजगपति हारी पशुपति:।
कपाली भूतेशो भजति जगदीशैक पदवीं
भवानि त्वत्पाणिग्रहण परिपाठी फलमिदम्।। 6

काळी प्रातस्मरणम् (कालीपञ्चश्लोकी)

प्रात: स्मरामि भवभीति हरां सुरेशीं
काळीं कृपार्द्र नयनां नव मेघ वर्णाम्।
सूर्येन्दु वन्हि नयनां भृकुटी कराळां
सृक्क प्रवाह रुधिरां नरमुण्ड मालाम्।। 1

प्रात: स्मरामि जगतां मभिलाष दात्रीं
धात्रीं समस्त जगतां धृतवाक् प्रदात्रीम्।
पञ्च त्रिकोण निलयां कुल सामरस्यां
दिव्यौघ शक्ति निकरैः स्थितिभिःपरीताम्।। 2

प्रात: स्मरामि शवरूप शिवोपविष्टां
मार प्रयुद्ध निरतां करकाञ्चि भूषाम्।
मुण्डाऽभयं वर मसिं दधतीं कराब्जे
कर्णावतंस शवयुग्म किशोर भूषाम्।। 3

प्रात: स्मरामि वसुपत्र सरोजमध्ये
ब्राह्म्यादि मातृ वसु भैरव भैरवीभि:।
इन्द्रादि वज्र कीर्णैं क्षिंति गेहबीजं
स्वाङ्ग षडङ्ग युवतीं दधतीं त्रिनेत्राम्।। 4

प्रातस्स्मरामि पितृकानन मध्यसंस्थां
देवर्षिवन्द्य शवमुण्ड शिवा परीताम्।
मायां महाशवधरां शिवरूपिणीं तां
कालानुबद्ध हृदयां जननीं पराम्बाम्।। 5

ये श्लोक पञ्चक मिदं पठन्ति प्रभाते
काळीं स्मरन् अनुदिनं भुविभार नम्राम्।
विद्याविलास सुख भूरियशश्च लब्ध्वा
चान्ते प्रयान्ति शिवलोकं अनन्यभक्ता:।।

ओं नमश्शिवाभ्याम्



श्रीमुखम्

श्री चेन्नैपट्टन निवासिनः, द्राविड तमिल्देश राजधान्यास्समीपस्थ ईश्वरक्षेत्राख्ये काञ्चीमण्डलान्तर्गते तिरुमलिसै ग्रामे सञ्जातैः - चेन्नै महानगर पूर्वसमुद्रतीरे मुक्तियाल्पेट्टैनामकस्थले – विराजमान कालिकाम्बा मन्दिरान्तस्थ श्रीचक्रराज निलयायाः कालिकाम्बायाः अनवरतं अर्चनासक्त मानसैः एतदालय आचार्यप्रवरैः श्री.ति-षण्मुखशिवाचार्य अनुग्रहादेशानुसारेण, तज्ज्येष्ठकुमारैः शिवश्री-वागीश शिवाचार्यैः चेन्नैपट्टणे तम्बुश्रेष्टिवीथ्यां प्रवर्तमाने श्री साम्बमूर्ति शिवाचार्य धर्मस्थापन निर्वाहकेभ्यः ग्रन्थप्रकाशकेभ्यः क्रियते भगवत्याशीः।

चेन्नै महानगरे- श्री कालिकाम्बालये प्रतिवर्षं प्रचलिते प्रत्यङ्गिरास्त्र महाशान्तिक नवदिन महायागे पद्धतिरूपेण अनुष्ठितान् – प्रत्यङ्गिराम्बायाः उपासन विषयान् सङ्गृह्य – शैव शाक्त तन्त्रेभ्यः प्रत्यङ्गिरादेवी उपासकानां मन्त्रसाधकानां यथावदनुष्ठानाय –शिवागमप्रवीणेन शिवश्री विजय- सोमशेखर शिवाचार्येन सङ्कलितोऽयं "प्रत्यङ्गिरासपर्यासर्वस्वं" इत्याख्यो ग्रन्थः भगवत्याः प्रत्यङ्गिरा मातृयज्ञ महाशान्तिकर्माणि सर्वैः यथावत् अनुष्ठातुः अनुष्ठापयितुश्च अत्यन्त मुपकाराय कल्पेतेत्याशास्महे।

इत्थम्
ष.वागीश शिवाचार्यः
अम्बाआशीर्वादः

चेन्नैपट्टणं – मयूरपुरी.
शार्वरि कार्तीक शिवरात्री.
13-12-2020

शिवमस्तु

ஓம் நமச்சிவாய்யாம்

ஆசியுரை

தருமமிகு சென்னை பட்டணவாசியும், தமிழ்நாட்டின் தலைநகரருகில் உள்ள சிவனார் திருத்தலமாய் காஞ்சீபரமண்டலத்தில் உள்ள திருமழிசை என்னும் கிராமத்தில் தோன்றியவரும், சென்னை மாநகரில் கீழக்கடற்கரையில் முத்தியால் பேட்டை எனும் தலத்தில் விளங்கும் ஸ்ரீகாளிகாம்பாள் ஆலயத்தில் அருள்தரும் ஸ்ரீசக்ரராஜ மஹாமேருவில்வசித்தருளும் ஸ்ரீகாளிகாம்பாளை எப்பொழுதும் வழிபடுவதில் ஈடுபடும் மனமுடையவரும் இவ்வாலயத்தின் மூத்த ஆசார்யருமான சிவத்திரு. திருமழிசை ஷண்முகசிவாசாரியரின் அருளாணையுடன் அவரது மூத்தனயராகிய சிவஸ்ரீ வாகீச சிவார்யரால், சென்னையில் தம்புசெட்டித்தெருவில் இயங்கிவரும், ஸ்ரீசாம்பமூர்த்தி சிவாசார்ய அறக்கட்டளை நிர்வாகிகள் நூல்வெளியீட்டாளர்கள் பொருட்டு பகவதியின் ஆசிகள் வழங்கப்படுகிறது.

சென்னைமாநகரில் ஸ்ரீகாளிகாம்பாள் கோயிலில் ஆண்டுதோரும் நடைபெற்றுவருகிற, **பிரத்யங்கிராஸ்த்ர மஹாசாந்தி** எனும் ஒன்பது நாள் நடைபெறும் பெருவேள்வியில், செய்முறைவழி நூலாக பின்பற்றப்படுகிறவைகளும், பிரத்யங்கிராதேவீ உபாஸனைக்கான செய்திகளும் சேகரிக்கப்பட்டு, உபாஸகர்களுக்கும் மந்திர ஸாதகர்களுக்கும் முறைப்படி பின்பற்றுவதற்காக சைவாகம சாக்த தந்த்ர நூல்களிலிருந்து

ஆகமப்ரவீணர் சிவஸ்ரீ விஜய ஸோம சேகர சிவாசார்யரால்
தொகுக்கப்பட்டுள்ளதான
"ப்ரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்"

எனப்படுகிற இந்நூல், பகவதி ப்ரத்யங்கிராம்பாளின் மாத்ருசாந்திப் பெருவேள்வியில் அனைவராலும் வழிபாட்டை செய்திடவும் செய்வித்திடவும் மிகவும் உபயோகமாக இருக்கும் என்று ஆசீர்வதிக்கிறோம்.

இங்ஙனம்,

தி.ஷ.வாகீசசிவாசார்யார், அம்பாள் ஆசீர்வாதம்
சென்னை மயிலாப்பூர்

சார்வரி கார்த்திகை சிவராத்ரி
13.12.2020

சுபம்

उपोद्घातः (संपादकोक्तिः)

महदिदं प्रमोदस्थान मास्तिकानां विशिष्य च प्रत्यङ्गिरोपासन चिकीर्षूणां यत्-अद्य चेन्नैपट्टणे मण्णाडि नामस्थले तम्बुचेट्टिवीथ्यां प्रवर्तमाने श्रीसाम्बमूर्तिट्रस्ट् इत्याख्य धर्मस्थापन निर्वाहकैः शैवशाक्त तन्त्रोक्तविधि विशिष्टाः प्रत्यङ्गिरायाः मन्त्रपुरश्चरण क्रियाकलापाः यजन यागादि प्रयोगाश्च नागरलिप्यां "प्रत्यङ्गिरा सपर्या सर्वस्वम्" इति ग्रन्थः मुद्रितः प्रकाशितः इति।

तन्त्रपटलादिषु प्रमाणभूत मूलवाक्यावलोकनेनैव यागपूजादि कृत्यकरणं नैव शक्नोति न सुकरं भवेत् । तस्मात् पद्धतिरूपेण अनुष्ठानयोग्यः प्रयोगग्रन्थः आवश्यकः भवति। अस्मिन् ग्रन्थे लोकोपकारक सर्वोत्कृष्टफलप्रदायकाः महाशान्ति यागक्रियाक्रमः सपरिवारायाः प्रत्यङ्गिरायाः मन्त्रपुरश्चरणविधयः, काम्यविषयाष्टकर्मणां प्रयोगकारिकाश्च, प्रत्यङ्गिरा चक्रार्चन, धारण, प्रयोगाः सर्वेऽपि साकल्येन सुस्पष्टं निरूपिताः सन्ति। अपिच दक्षिणाम्नायदेवतानां भैरवादि मूर्तीनांच, रूपध्यानानि, मूलमन्त्र मालामन्त्रादीनि, मन्त्राणां जपविधिः, जप्य कवचादि स्तोत्राणि च प्रदर्शितानि। सौम्य रौद्र भेदत्वात् शैवागम शाक्त तन्त्रयोः तत्र तत्र किञ्चिदिव वैलक्षण्यं दृश्यते।

नैमित्तिक काम्य क्रियानुसारेण, देवालय गृहमण्टप स्थानान्तरेषु विशिष्य मन्त्र तन्त्र क्रिया भावना द्रव्यादीनां योग्यतांशं गुरूपदेशेनैव ज्ञेयाः इति सप्रमाण मुदीरित मस्ति। परन्तु देशाचार शिष्टाचारा ननुसृत्य, तन्त्रवाक्यानुष्ठानविषये निर्दिष्टतन्त्राणां अवलोकनं सुकरं भवति। किञ्च अत्र मुद्रिताः मन्त्रोद्धार जप पूजा हवन कर्मणां कारिकाः अपि अनुष्ठातॄणां उपदेशकानां च अत्यन्त मुपयुज्यन्ते।

तत्र तत्र संभावित संशय निराकरणपूर्वकं प्रयोग क्रियाक्रमस्य अत्र प्रतिपादनात् तन्त्रान्तर सादृश्य वैसादृश्ययो रपि सप्रमाणं अत्र निरूपणाच्च मन्त्रतन्त्र क्रियाधिकारिणां प्रत्यङ्गिरास्त्र प्रायश्चित्त महाशान्तिकरणे - काम्य प्रयोगेषु च पुस्तक मिदं महते प्रयोजनाय कल्पेतेत्यत्र नैव संशय लेशो ऽपि।

सर्वथा सर्वेषां अत्यन्तं उपकारकमिदं पुस्तकं समीचीनतया रीत्या प्रकाशितवतां श्रद्धाळूनां शिवार्चार्य धर्मस्थापन निर्वाहकाणां –एतन्मुद्रण प्रकाशनविषये सर्वदा बहुधा उपकृतवतां सर्वेऽपि आस्तिकाः मन्त्र साधकाः पूजकाश्चाधमर्णा भवन्तीति शम् ।

शिवाचार्य ट्रस्टनिर्वाहकाः &
प्रत्यंगिरायाग भक्तसभाजनाश्च

इत्थम्
विजय सोमशेखर शिवाचार्यः
(आगम, व्याकरण शिरोमणिः)



உ
குருவருள் துணை

தொகுப்பாளருரை

சென்னை பட்டிணத்தில், மண்ணடியில் தம்புசெட்டித்தெருவில் இயங்கிவரும் ஸ்ரீசாம்பமூர்த்தி சிவாசார்யார் டிரஸ்ட் நிர்வாஹிகளால், சைவ சாக்ததந்திர நூல்களின் விதிமுறைகளுடன் கூடிய பிரத்யங்கிரா மந்திர புரச்சரணக்ரியைகள், பூஜை வேள்வி முதலானவற்றின் செய்முறைகள் யாவும் நாகரலிபியில் பிரத்யங்கிராஸபர்யாஸர்வஸ்வம் என்ற நூலாக அச்சிடப்பட்டுவெளிவந்துள்ளது என்பது எல்லா ஆஸ்திகர்களுக்கும் முக்கியமாக பிரத்யங்கிரா தேவீ உபாஸகர்களுக்கும் மிகவும் மகிழ்ச்சிக்குரியவிஷயமாகும்.

தாந்த்ரிக நூல்களின் படலங்களில் மூலசான்றுகளைக் உரைகளைக் காண்பதால் மட்டும் செயல்களைச் அனுஷ்டிப்பது என்பது சுலபமல்ல. ஆதலால் இத்தகைய பிரயோக புஸ்தகம் மிக அவசியமாக உள்ளது.

இந்த நூலில் உலக நன்மைகளான அனைத்திலும் சிறந்த பலன்களை அளிக்கவல்ல பெருஞ்சாந்திப் பெருவேள்விச் செயல்முறை சுற்றுதெய்வங்களுடன் கூடிய பிரத்யங்கிராதேவியின் மந்திரபுரச்சரணவிதிமுறைகள் விருப்பப்பயனடையச் செய்யும் எண்வகை செயல்பாடுகள் (அஷ்டகர்மப்ரயோகம்) பற்றிய செய்முறைகள், பிரத்யங்கிரா யந்திரமந்திரங்கள் தாரணங்கள் அணியும் முறைகள், அனைத்தும் ஒன்றிணைத்து தெளிவாக நிரூபிக்கப்பட்டுள்ளன. மேலும் தக்ஷிணாம்னாய தெய்வங்களின் மூலமந்திரங்களும், பைரவர், வீரபத்ரர், சரபர், சாஸ்தா முதலானோரின் மூலமந்திரங்களும் உருவத்தியானங்கள், மாலாமந்திரம் முதலானவைகள், ஜபமுறைகள், கவசம் ஸஹஸ்ரநாமம் முதலான ஜபிக்க வேண்டிய முக்கியதுதிகள் யாவும் இதில் காணப்படுகின்றன. சாந்தநெறி ரௌத்திரநெறி என்ற இருவகையால் சைவாகமங்கள் சாக்ததந்த்ரங்களிடையே ஆங்காங்கு சிறிதளவு மாற்றம் காணப்படுகிறது. ஒன்றைக்குறித்துச்செய்யப்படுகிற

நைமித்திகச் செயல் மற்றும் விருப்பச் செயல்களுக்கு ஏற்ப தேவாலயம், வீடு, மண்டபம், பிற இடங்களில் அதற்கு ஏற்ற மந்திரம், கிரியை, பாவனை, விதிமுறை, பொருட்கள், இவற்றின் தகுதிகள் ஸத்குருவின்வாயிலாக அறியப்படுவது அவசியம். என்பது இதில் சான்றுகளுடன் கூறப்பட்டுள்ளது. ஆனால் இவை தேசவழக்கம் முன்னோர் நடைமுறைகளுக்கு ஏற்றவாறு மூலநூல் கூற்றுகளை பின்பற்றும் விஷயத்தில் குறிப்பிட்ட நூல்களை உற்றுநோக்குவது நன்மையளிப்பதாகும்.

மேலும் இங்கு அச்சிடப்பட்டுள்ள, மூலமந்திரங்கள் தோற்றமுறைமை, எழுத்து எண்ணிக்கை, ஜபிக்கும் முறை பூஜைமுறை, ஹோம திரவ்யவிதிமுறை இவைகளைக் கூறிடும் செய்முறைக் கூற்றுகள் யாவும், மந்திரத்தை தீக்ஷைபெற்று அநுஷ்டிப்போருக்கும் உபதேசிப்போருக்கும் மிகவும் உபயோகமாக பயனுள்ளவையாக விளங்குவன ஆகும்.

மேலும் ஆங்காங்கு ஏற்படும் ஐயங்களை நீக்கும் வகையில் இதில் செயல்முறையாக பிரயோகங்கள் கூறப்பட்டுள்ளதால் பிற நூல்களுக்கு உள்ள ஒற்றுமை வேற்றுமைகள் சான்றுடன் இங்கு காட்டப்பட்டுள்ளதால், நூல் மந்திரம் கிரியை இவற்றில் அதிகாரம் உள்ளவர்களுக்கு, பிராயச்சித்தமாக செய்யத்தக்க பிரத்யங்கிராஸ்த்ர சாந்திஹோமத்திற்கும், வசியம் முதலிய எட்டுவகையான விருப்பப்பூசைகளுக்கும், பின்பற்றுவதற்கு இந்நூல் மிகவும் பயனளிப்பதாக விளங்கும் என்பதில் சிறிதளவும் ஐயமில்லை.

எல்லாவகையிலும் எல்லோருக்கும் மிகவும் உதவிகரமாக விளங்கும் இந்நூல் சிறந்த முறையில் வெளியிடப்படுவதற்கு ஆதரவும் ஈடுபாடும் கொண்டுள்ள சிவாசார்யர் அறக்கட்டளை அமைப்பு நிர்வாகிகளுக்கும், இந்நூலை அச்சிடவும் வெளியிடவும் பலவகையில் உதவிய அனைவருக்கும், ஆஸ்திகமக்களும், மந்திரம் கிடைக்கப்பெற்றஸாதகர்களும், பூஜகர்களும் நன்றிக்கடப்பாடுடையவர்களாகிறார்கள். என்றும் இன்பம் பெறுக வாழ்கவளமுடன்.

சிவாசார்ய அறக்கட்டளை உறுப்பினர்கள்.
பிரத்யங்கிரா பக்த ஜன ஸபையினர்

இங்ஙனம்

விஜய. சோமசேகரசிவாசார்யர்
(ஆகமப்ரவீணர். வியாகரணசிரோமணி, சென்னை)

சிவமயம்

மஹா சாஸ்தாரம் விச்வகோப்தாரம் சரணம் ப்ரபத்யே.

ஸ்ரீமதாசார்ய குருப்யோ நம:

நூலாசிரியர்

ஆகம ப்ரவீணர், வ்யாகரண சிரோமணி, சைவாகமக்ஞ சூடாமணி, சைவாகம வித்வான், வ்யாகரண விசாரதா, சிவாகம ஸார்வபௌம:, சிவஸம்வித் ஸபர்யா பாராவாரீணர், சிவாகம அருட்செல்வர், ஸம்ஸ்கிருத சேவாரத்தினம், சிவாகம வாசஸ்பதி, வாஸ்து வித்தகர், சைவாகமஸ்ரீ: , ஆகம கல்பத்ரும:, ஆகம வித்தகர், சிவாகம வித்யாரத்னம், சாக்தயாக சாம்ராட், வைதிகசைவ ரக்ஷாமணி, சிவபாத பத்மபூஷணம், சிவாகமக் கலாநிதி, சைவஸமய ஸேவாரத்னம், சைவாகம பரீக்ஷாதிகாரீ, யாக ஸர்வஸாதக திலகம், சாஸ்தா உபாஸகர், அகோரசிவம் என்கிற

சிவஸ்ரீ. விஜய. சோமசேகர சிவாசார்யார் M.A.,

குருமுதல்வர், சைவாகம கலாசார வித்யாகேந்திரம், சென்னை–1.

கௌரவ ஆலோசகர், சிவாசார்யர் அறக்கட்டளை (பதிவு), சென்னை–1.

குருமுதல்வர்	:	சைவாகம கலாசார வித்யாகேந்திரம், சென்னை1.
சாக்தாலய ஆகமஆசார்ய விஜயம்	:	மஹாசக்திபீடம். திருவடிசூலம். தேவீஸ்ரீ கருமாரியம்மன் க்ஷேத்ரம். (மாதம் இருமுறை). (2009-2017)
முதல்வர்-ஆலோசகர்,ஆகமநூல் எழுத்தர்	:	சைவாகம கலாசார வித்யாகேந்திரம், சிவாசார்யார் அறக்கட்டளை, (பதிவு) சென்னை1. (2009-2016)
உயர்நிலைக்குழு கௌரவஆகம ஆலோசகர்	:	அ.இ.ஆதிசைவ சிவாசார்யார்கள் சேவாசங்கம், (பதிவு) சென்னை. (2013-2016) (முன்னாள் இணைச்செயலாளர்)
ஆலய அர்ச்சகர்-(இந்துமதகுரு பதிவாளர்)	:	கனடா, டோரண்டோ. ஹிந்து டெம்பிள் சொசைட்டி. (கணேஷ் டெம்பிள்). (1992-1996).
ஆகமசிரோமணி. (முன்னாள் ஆகமபோதகர்)	:	தமிழ்நாடு மாமல்லபுரம் அரசினர் கட்டிட மற்றும் சிற்பக் கலைக்கல்லூரி (1987-1992).
சிவாகமபண்டிட், முன்னாள் ஆகம அத்யாபகர்	:	சென்னை சேத்துப்பட்டு. மஹரிஷி வேதபாடசாலை. தர்மப்ரதிஷ்டான்.(1981-1986).

प्रास्तविकम्

महाविद्ये महामाये महाकालि महामते।
महाऽसुर वधोद्युक्ते भद्रकालि नमोऽस्तुते।।

इतःपूर्वं अस्माभिः कालीपूजाप्रभावम् इत्याख्यं पुस्तकं द्राविडतमिलिप्यां मुद्रयित्वा बहुविध कालीमूर्तिनां महिमाप्रदर्शनपूर्वक महाकालीपूजाविधानं स्तोत्रादिभिस्सहितं प्रकाशितम्। अधुना अथर्वणभद्रकाल्याख्यायाः प्रत्यङ्गिराभगवत्याः शैवशाक्त तान्त्रिकग्रन्थानवलोक्य प्रत्यङ्गिरायाः संपूर्णा उपासनापद्धतिः प्रत्यङ्गिरासपर्या सर्वस्वम् इति नाम्ना पुस्तकरूपेण सम्पाद्यमुद्रिता।

एतत् पुस्तकसम्पातने मम पितामहसकाशात्प्राप्तं वीरभद्रभद्रकालि मण्डपपूजाख्यां प्रतिष्ठापद्धतिप्रयोगरूपं हस्तलिखित पत्रकोशमेकम्, दक्षिणभारत अर्चकसङ्घप्रकाशितं नवयामल सङ्ग्रहानुसारं शैवागमप्रयोगरूपं भद्रकालीप्रतिष्ठाविधिः इत्याख्यं पुस्तकं उत्तरभारतीय काशीक्षेत्रचौखाम्बा प्रकाशितं श्रीदक्षिणकालीसपर्यापद्धति, काली रहस्यं, महानिर्वाणतन्त्रं, रुद्रयामलं, कालीतन्त्रम् कामिकागमउत्तरभागपुस्तकं इत्यादिकं आधारतया विषयसंग्रहणे उपयुक्तानि पुस्तानि। इत्थं पूर्वाचार्यैः प्रदर्शिताध्वान मनुसृत्य पुस्तकमिदं अस्माभिः सङ्कलितम्। रघुवंशमहाकाव्ये कालिदास महाकविना मणौवज्रसमुत्कीर्णेसूत्रस्येवास्ति मेगतिः इत्युक्तवत् पूर्वसूरिभिः शाक्तमूर्तीनां उग्रमूर्तीनां आराधने यद्यदाचरितं तन्येवकृत्यानि, अस्मिन्पुस्तके प्रत्यङ्गिरास्त्र महाशान्तिहोमकर्माणि क्रियाक्रमणिकया उदीरितानि वर्तन्ते। शाक्ततान्त्रिक पद्धतिमनु सृत्य, प्रत्यङ्गिराचक्रार्चनाप्रयोगोऽपि कारिकया, जप्तव्य मन्त्रभेद स्तवभेदै स्सह अस्मिन् पुस्तके, मन्त्रिणां मन्त्रसाधकानामनुष्ठानायमुद्रितः। प्रत्यङ्गिरायाः सहस्रनामावलिः पुस्तकत्रयेषु विविधमासित्। रुद्रयामळे भैरवोक्तस्तोत्रानुसारं नामावलिषु सहस्रे न्यूनमेव दृश्यते। मूलस्तोत्रव्यतिरिक्तना मानि नक्षत्राकारेणे प्रदर्शितानि वर्तन्ते। पूर्वाचार्य पुस्तकानुसारं मुद्रितानामावलिः। मूलश्लोकाः लुप्ताइवभाति।

भगवतापरमेश्वरेण नाम्नां सहस्रं उदितमिति निर्दिष्टंअस्ति अन्वषणीयानि इतर नामानि। रुद्रयामल मूलतन्त्रात् ज्ञातुंशक्यते। अस्याःभगवत्याःशैवागमेषु प्रत्यङ्गिरास्त्रमिति हेतिरूपं उदीरितम्। पूजाविधानं तु भद्रकाली विधानेन पूजनीया

इतिचोदितं वर्तते। श्रीवैखानसागमे मरीचिसंहितायां अस्या:परिवारस्थाने ध्यान रूपंगद्यं उच्यते तत्र धात्री इति नामप्रदर्शितं वर्तते। अपि च मार्कण्डेयादि पुराणेषु प्रत्यङ्गिराया: धात्री, काली, उग्राकृत्या इत्यादिनामानि निर्दिष्ठानिसन्ति। तदुक्तं देवी माहात्म्येसप्तसत्यां

जयन्ती मङ्गळा काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवाधात्री स्वाहा स्वधानमोऽस्तुते।।

इत्याख्यं स्तोत्रमन्त्रं अस्या: नामानि नवधा उत्त्वा जपपूजाहोमतर्पणादीनां मन्त्रपल्लवैस्सह स्तोत्ररत्नं दृश्यते। किञ्च मार्कण्डेयपुराणे

महाकाल्या महाकाले महामार्या स्वरूपया।
सैव काले महामारी सैव सृष्टि र्भवत्यजा।। (सप्तशती)

शाक्ततन्त्रे महानिर्वाणतन्त्रे तु देव्या: गुणक्रियानुरूपेणैव मूर्ति: उच्यते–

अरूपाया: कालिकाया: कालमातुर्महाद्युते:।
गुणक्रियानुरूपेण क्रियते रुपकल्पना।। इति।

त्रिगुणात्मस्वारूपिणी प्रत्यङ्गिरा अथर्वणवेदसूक्ते उग्रकृत्या इति नाम्ना उच्यते। शैवागमाभिज्ञोऽपि – ''एकैवार्थत ईशशक्ति रमितायाऽनेकरूपा शिवा'' इति - अन्यत्र च सिद्धन्तसारावल्यां त्रिलोचनाशिवायार्यै: ''शक्ति: चित्तनुरीश्वरस्यकरणं ज्ञेयेषु कार्येषुतत् भेदैस्सोपहिता प्रयाति गुणतो भेदंकिया ज्ञानत:।'' इति पद्ये उदीरिता पराशक्ति:। दुष्टनिग्रहकर्मणि – शिष्टानां संरक्षणे च उग्ररूपा उग्रकृत्या महामाया इति काली प्रत्यङ्गिरा ज्ञेया। अन्यत्र च शिवशक्त्या:पार्वत्या: क्रोधसम्भवा इति च प्रोच्यते।

एकैव शक्ति: परमेश्वरस्यभिन्ना चतुर्धा विनियोग काले।
भोगे भवानी त्वनने तु विष्णु: कोपे चकाली समरेषु दुर्गा।।

इत्युक्तरीत्या- त्रिजगति दुष्टानां दुष्कृत्यानि अधर्मकार्याणि अवलोक्य यदाक्रुद्धा तदा तत्कोपादाविर्भूता देवता कालीतिनामलभते।

मन्त्रशास्ते तु ''बभार रूपमपरं तमसा केवलेन हि'' इत्युच्यते। तमोगुणात्मिका महामायाख्या मधुकैटभसंहत्री प्रोक्ता। सैव ब्रह्माण्डपुराणे ललितास्तुतौ

"इच्छाशक्तिज्ञानशक्तिः क्रियाशक्ति स्वरूपिणी" इति उच्यते। पर शक्त्यादीनां, आदिशक्ति इच्छाक्रियाज्ञानशक्तीनामुद्भवं तु शैवागमे वातुलशुद्धाख्ये तन्त्रे क्रमेण सहस्रांशात् उद्भूताः इति उच्यते। अपिच परशक्तेर्दशांशेन शिवसादाख्य सम्भवः इतिवातुलागमोक्त्याच अन्यत्र-

वह्नेरुष्णवत् शक्तिः अविनाभाविनीविभोः।

शक्तिहीनश्शिवोनास्ति शिवहीना न शक्तिका।।

इत्याद्यनेकागमवचनैः शिवशक्तिरिति शरभेश्वर सहकारिणी इति प्रत्यङ्गिरा ज्ञेया। शाक्ततन्त्रेषु विशिष्य रुद्रयामळतन्त्रे तु प्रत्यङ्गिरा भैरवेन मनसि उपास्यमाना इति – भैरवपत्नी इति च अवगम्यते। वामदेवश्रुतिमन्त्रोक्तवत् काल इति कालविकरण इति नामाभिधस्य शिवस्य कालस्यशक्ति कालीति वा-कलयतीति काली इति व्युत्पत्या वाउत्पादयति परिपालयतिइति, कालस्य कलनात् कालीति,कालसंक्रसनात्काली इति सर्वेषामादिरूपिणी इति शाक्ततन्त्रेषुउदिता विराजते।अपि च काल्याः कृष्णवर्णत्वमेव उत्तमं विद्यते। अस्मिन् वर्णविषयेऽपि कृष्णवर्णी बृहद्रूपी इति अथर्वणसूक्त्योत्या कृष्णवर्णा – कालीनाम्नी रक्तवर्णाससुन्दरीनाम्नी इतिकालीतन्त्रात्ज्ञायते। देवाणां उपकारकरणाय यदा देवी आविर्भवति तदा सा उद्भूतेति उपचारेणोच्यते – एतदुक्तं मार्कण्डेयपुराणे तु –

देवानां कार्यसिद्ध्यर्थं आविर्भवति सा यदा।

उत्पन्नेति तदा लोके सा नित्याऽपि अभिधीयते।। इत्युच्यते।

तत्रैव शक्रादिस्तवे देवी त्रिजगतामाधार शक्तिरिति जगज्जननीति स्तूयते – आधारभूता जगतस्त्वमेका - विश्वस्यबीजं परमाहिमाया। इति। रुद्रयामळतन्त्रे दशविद्यारहस्ये – पार्वतींप्रति भैरवेन प्रत्यङ्गिरायाः रहस्य प्रभावः प्रोक्तः। तद्यथाहि। भैरव उवाच –

एतत् गुह्यतमं लोके न कस्य कथितं मया।
तथापि तव देवेशि भक्त्या गुह्यं वदाम्यहम्।

या देवी लोकमातेति महामाहेश्वरी शिवा।
प्रत्यङ्गिरेति विख्याता षड्विंशति सुवर्णिका। (मन्त्रस्वरूपिणी)

सृजते सकलं विश्वं बिभर्ति परमाम्बिका।
अन्ते सहायकर्त्री च संहरिष्यति तामसी।।

गुणत्रयवती विद्या महादारिद्र्य वारिणी।
तस्याः पञ्चाङ्ग मीशानि पटाम्यह महर्निशम्।।

जपे विद्यां सर्वमेतां वर्म नाम सहस्रकम्।
स्तवं मन्त्रमयं देवि पटामि परमेश्वरीम्।

तत्प्रसादात् अहं देवि त्रैलाक्यप्रभुरीश्वरः।
भैरवो भैरवादेशः सृष्टि स्थिति लयात्मकः।। इति।

एतेन वाक्येन भैरवोऽपि प्रत्यहं प्रत्त्यङ्गिरां पठित्वा त्रैलोक्य प्रभुत्वं प्तवान्। इति ज्ञायते। भैरवोक्त्या प्रत्यङ्गिरा एव लोकमाता, महामाहेश्वरी, शिवा, सृष्टिस्थित्यन्तकारिणीति सुनिश्चयेन ज्ञातुं शक्यते। तस्मादेव ब्रह्माण्डपुराणे ललितासहस्रनामावलीषुमध्ये मार्ताण्डभैरवाराध्या इति वर्तते। अपिच सहस्रशीर्षवदना, सहस्राक्षी,सहस्रपाद भद्रप्रिया, भद्रमूर्तिः क्रोधसम्भवा इत्याद्यनेक नामानि रौद्रस्वरूपनिर्देशनद्वारा महाप्रत्यङ्गिरामेव शरण्यत्वेन द्योतयति इतिज्ञेयः।

इमां प्रत्यङ्गिरां भैरवेश्वरः गुणत्रयवती, विद्या, महादारिद्र्यवारिणी, इति प्रोक्तत्वात्, (आद्या महाविद्या)अस्माभिः शरण्या कालिरेव उपासनीया नान्या इति। अस्याः मन्त्रस्य जपपूजाहोमतर्पणादिभिः अस्माकंदारिद्र्यनिवारणद्वारा धनादिसर्वसमृद्धिःजायेत इति निश्चयेन वक्तुंशक्यते। अपिच प्रत्यङ्गिरादेवी स्वाश्रितानां अवनतजनताभिमकतिवितरणशीला, दुष्टग्रहविनाशिनी, सर्वदुष्टानां संमर्दिनी,सर्वपापक्षयङ्करी सर्वदोष प्रमोचिनी सर्वसौभाग्यजननी, सर्वेषांबलपुष्टिकरी, वाञ्चितार्थप्रदायिनी नानाविधशत्रुकृत्य शत्रुबाधा शत्रुकुलविनाशिनी इति भैरवेश्वरेणैव रुद्रयामलतन्त्रे प्रत्यङ्गिरा पञ्चाङ्गस्तोत्रे एवं सर्वोत्कृष्टफलदा इत्युच्यते।

पटलं पद्धती वर्म तथा नामसहस्रकम।
स्तोत्राणि चेति पञ्चाङ्गं देवतो पासने स्मृतम्।

इतिमन्त्रशास्त्रवचनात् अस्याः परदेवतायाः प्रत्यङ्गिरायाःपटलं, कवचं, सहस्रनामं, पद्धति,स्तोत्रं इत्येतत्पञ्चाङ्गविधिं, अष्टकर्मप्रयोगविधानादिकं,

दीक्षाजपहोम नियमादीनां लक्षणादि सर्वमपि अस्मिन् पुस्तके संपाद्य मुद्रितमस्ति। किञ्चपूजाङ्ग पूजाद्रव्य होमद्रव्यादिकं पुष्पार्चं नोपयुक्ताः अष्टोत्तरशतसहस्र नामावळयश्च, भैरवसिंहवटुकादीनां दक्षिणाम्नाय देवतानां मन्त्रभेदाश्च संकलितास्सन्ति एवंप्रत्यङ्गिरायाः उपासकोपयुक्तसर्वविषय निधिभूत मिदंपुस्तकं सार्थक्यनाम्ना सर्वेषामुपकारकं भवेत्। प्रत्यंगिरासपर्यासर्वस्वमिति ।

प्रत्यङ्गिराविद्यायाः जपफलं तु दशविद्यारहस्यरव्ये ग्रन्थे उच्यते हिप्रभावविशि ष्टमिदुम्।

भोगदा सुखदा देवी राज्यदा धन्दा तथा।

सिद्धि मुक्तिप्रदा विद्या परा सायुज्यदायिनी इति।

प्रत्यङ्गिरा महाविद्यायाः पुरश्चरणविधिना जपहोमतर्पण भोजन मार्जनादि कर्मकुर्वतां

मन्त्रिणां नितरामुत्कृष्टं फलं रुद्रयामळे उच्यते।

सर्वधा सर्वदा नित्यं महाविद्यां जपेत्सुधीः।

दशांशं होमयेत्तत्र तर्पये त्तद्दशाम्शतः।

भोजये त्तदद्दशांशेन मन्त्री किं किं न साधयेत्।

मूर्खो वागीशतां याति निर्धनो धनवान् भवेत्

महा दारिद्र्य युक्तो ऽपि भवेत् वैश्रवणोपमः।

इह लोके भवेद्द भोगी परत्र त्रिदिवं भजेत्।

अयमेव प्रत्यङ्गिराप्रभावः इद मेव प्रत्यङ्गिरारहस्यं पुस्तकम् दर्शयति।श्री महाप्रत्यङ्गिरेयं भगवती महाविद्या षडाम्नायदेवतानां मध्ये - विशिष्य शिवस्य उत्तरानन वामदेवमुखोद्भूतानां दक्षिणाम्नायदेवतानां मध्ये पाशुपताद्यस्त्र शस्त्रादि विशिष्ट भैरवस्य महिषी महाभैरवीति विश्वविरव्याता विराजते। अपिच - दक्षिणम्नाये –महामाया, वटुक, शास्ता, अघोर, शरभ, वीरभद्रादि रौद्रमूर्तीनां मन्त्रोद्धाराः तेषां उपासनाक्रमाश्च दृश्यन्ते। तद्यथा – अवगम्यतेहि। सौभाग्यविद्या बहळा वाराहीवटुकस्तथा।श्री तिरस्करणी प्रोक्ता महामाया प्रकीर्तिता।। अघोरं शरभं खङ्गरावणं वीरभद्रकम्। रौद्रं शास्ता पाशूपता द्यस्त्रशस्त्रादि भैरवाः। वामदेव

मुखोद् भूता: कोटिमन्त्रा: वरानने। पूर्वपीठस्थिता देवि दक्षिणाम्नाय देवता:।। इति तन्त्रवाक्यात्ज्ञायते। किञ्च–शैवागमसिद्धान्त प्रतिष्ठामहातन्त्राख्ये श्रीमत्कामिकागमे उत्तरभागे त्रयस्त्रिंशतितमे काम्ययोगविधानपटले –पाशुपतास्त्रस्थाने विकल्पेन प्रत्यङ्गिरास्त्रशान्तिहोम: प्रायश्चित्त कर्मरूपेण विहितो वर्तते – तत्रैव – प्रायश्चित्तपटले – शान्तिहोमप्रभेदविषये – प्रायश्चित्ताङ्गराहोम: उपदिष्ट: दृश्यते। भगवता परमेश्वरेण स्वकीय शिवास्त्रं पाशुपतास्त्रं वा हित्वा, प्रत्यङ्गिरास्त्रं प्रपूजयेत् इति सुस्फष्टतया प्रोक्तत्वात् अतुल्यवीर्या ज्ञायते। अगणितमहिमा - देव्यास्त्रविद्या – अप्रमेया अमोघा –गुरुमुखादेवैषा विद्या ज्ञेया नान्यथा –इतितन्त्रेषु सुनिश्चितं वर्तते। एतन्मन्त्रसाधकानां गुरुभक्ति: स्त्रीकुले देवीभावनाच अन्त्यन्त मावश्यकी निश्चयेन भवितव्या। परन्तु एषा विद्या गुरुप्रसादात् पुरश्चरण विहीनापि सिद्ध्येत् नात्रसन्देह:। कालिकार्चे नतत्परा: सर्वसिद्धिमन्तोन्ते देवाभवेयु: इति कालीतन्त्र मुद्गिरति सर्वसिद्धिमवाप्नाति खेचरो जायते तुस:। इति।

नवाह सप्ताह पञ्चाह पुरश्चरण होमविधि: दृश्यते। अगस्त्य महर्षिणा -कृष्णाष्टमी समारभ्य यावत्कृष्णचतुर्दशी देवींध्यात्वा जपेन्मत्रं अयुतानां चतुष्टयम्। इति सप्ताह पुरश्चरणविधि: अगस्त्यमुनीन्द्रे नाभिहित: अस्या: प्रत्यङ्गिरामहविद्या सिदिद्धयुक्ता: स्तम्भन, मोहन, मारणाकर्षण वशीकरणोच्चाटन शान्तिक पौष्टिकाख्यानां अष्टकर्मणां प्रयोगेषु अधिकारिणो भवन्ति।। प्रत्यङ्गिरोपासका नां सर्वमपि सिद्धं भवति। श्रीमहाभारत ख्ये वैदिकसंस्कारप्रधाने अस्मद् देशे दैविकभौतिक तापद्वयस्य निवारणार्थं सुदूर तमप्राचीनकालात् जनै: देवताया: उपासना मन्त्रसाधना च समाश्रिता वर्तते। उपासनद्वारा अस्मदाचार्या दुरूहकार्याणि च सहजस्थितिं सम्पादितवन्त: आसन्। एतदुपासनद्वारा, अस्माकं लौकिककामनापूर्ति:, समस्त द:खेभ्य: आत्यन्तिक निवृत्तिरूपां मुक्तिं च जायेते। तन्त्रशास्त्रेषु प्रोक्ता उपासना उपासकस्य एकस्मिन् करे भुक्तिं, अन्यस्मिन् करे मुक्तिंच ददाति। एतस्मिन् कलिकाले कल्पवृक्षस्वरूपिणी एका कालिका मात्र एव। एषा कालिकादेवी,अनादि अनन्त अजर सर्वव्याप्त, सर्वस्वरूपा, चराचरजगद् व्यापिनी - वर्तते। सर्वं शक्तिमय मेव।

सर्वरूपमयी देवी सर्वदेवीमयं जगत्।

अतोहं विश्वरूपां तां नमामि परमेश्वरीम्।

तदुक्तं उपनिषदि च अहं ब्रह्मस्व रूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगत्। शून्यं च अशून्यं च। अह मानन्दानानन्दौ। अहं विज्ञाना विज्ञाने। अहं ब्रह्माब्रह्माणी वेदितव्ये। अहं पञ्चभूता न्यपञ्चभूतानि। अहमखिलं जगत्। इति।जीवानां अज्ञानान्धकारध्वंसिनी। तस्मादेव भगवती सर्वैरपि आराधनीया।

महाकष्टमय भवसागरतारणे एकमात्र उपायः महाकाली आराधन मेव। एकप्रकरणे सुरथराजानं प्रति मेधामुनिः स्वयंकर्म भक्तिः तथा ज्ञानं इति त्रिविध कामनानां प्राप्तये इदमेव उपायत्वेन उपदिशति। तद्यथाहि-

तामुपैहि महाराजशरणं परमेश्वरीम्।

आराधिता सैव नृणां भोग स्वर्गापवर्गदा।।(मार्कण्डेयपुराणे)

अस्मिन् काले मनुष्याणां समस्तवृत्तयः भोगप्रधानाःविद्यन्ते।वृत्तयोऽपि समस्त संस्कारात् अन्तःकरणेन्द्रियरूपैः अज्ञानावरणग्रस्ताः वर्तन्ते। अस्यां स्थित्यां महाकाली एकैव तारणाधारा।

कलौयुगे कालिकाएव संरक्षिणी। तस्मादुच्यते ''कलौ चण्डी विनायकौ'' इति। एतत् दुःख प्रवृत्तिमूलक संसारे स्वात्मज्ञानप्राप्तये कालिकासपर्याएव सर्वेषां साधनभूता इत्यत्र न कोपि सन्देहः। दशमहाविद्याख्यासु देवीमूर्तिषु मध्ये प्रथमतया परिगणिता आद्यामहाकाली एव पराशक्तिः इति ज्ञेया। एषा शिवशक्तिरेव त्रिभुवनस्वामिनी भूत्वा सृष्टिस्थिति प्रळयकर्त्री च सर्वाभीष्टफल प्रदायिनी त्रिभुवनेश्वरी तस्मात् सर्वैरपि उपास्या। आद्यन्तरहित ब्रह्मस्वरूपिणी भगवती काली महाभैरवीति विद्यमाना राजते।

सपर्योचितकालस्तु तन्त्रेषु कृष्णाष्टम्यां अमावास्या काली पूजा उत्कृष्टफलदा इत्युक्तं कालीतन्त्रे। अन्यत्र च कामाख्यतन्त्रे तु कार्तिकेतु विशेषेण अमावास्या निशार्धके।

तस्यां च पूजयेत् देवीं भोगमोक्ष प्रदायिनीम्।। इत्युच्यते।

व्योम केशसंहितायां तु तुलामासीय अमावास्या उत्कृष्टतयोच्यते।

तुलार्के यस्त्वमायां हि निशार्धे घोर दक्षिणाम्।

पूजयेत् विधिवत्भक्त्या सर्व सिद्धेश्वरो भवेत् ।। इत्युक्तम्

कुलार्णतन्त्रे चतुर्दशीयुता अमावास्या ग्राह्या इति मध्यरात्र व्यापिनी प्रतिपत्सम्बन्धरहिता अमावास्या श्रेष्ठा इत्युच्यते।

अर्धरात्रे महेशानि अमावास्या यदा भवेत्।

चतुर्दशी यदा ग्राह्या चामुण्डा पूजने सदा।

इति आहत्य दिवौकसां निशाकाले शरदृतौ तुलामासीया वा वृश्चिकमासीया वा अमावास्या युत चतुर्दशी ग्राह्या इति ज्ञेयम् भवति। तदुक्तम् तन्त्रे -

शरत्काले च देवेशि दीपया वा दिने तथा।

अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः ।। इतिकामाख्येतन्त्रे)

कालिकातन्त्रेच एवं उक्तत्वात् काल्यार्चने शरत्कालवैशिष्ट्यं ज्ञातुं शक्यते। किञ्च -

शरत्कालीन पूजां ये कर्तांशे भक्ति भाविताः।
तेषां दारान् सुतान् भोगान् वित्त मारोग्य मुन्नतिम्।
तुष्टा दास्याम्यहं शम्भो खलोंके वसतिं सदा।।

इति बृहत्सारवचनात् काल्याः शरत्कालार्चन फल विशेषाः पूजायाः मुख्यतां धृडयति । कालीवर्गे कालीप्रभावः श्रेष्ठाप्रत्यङ्गिरा। इमां ऋग्वेदः उग्रेति उग्रकृत्येति नाम्ना नवभिः वर्गैः अष्टचंत्वारिंशतऋग्भिः सूक्तमन्त्रैः स्तौति। अथर्वणवे दः तस्मात् कारणादेवैषा अथर्वणभद्रकाली इत्यभिहिता। लोकैः।

अस्याः मन्त्रप्रभावः नितरामुत्कुष्टः। अथर्वणवेदः दशमकण्डे उग्रकृत्यां सूक्तेनस्तौति। ऋग्वेदीयाः अथर्वणवेदमन्त्राश्चः मन्त्रसाधकानां शत्रुक्षयं, रिपुकुलनाशं, पराभिचारकृत्यध्वंसनं च प्रार्थयन्ति। उदाहरणतया – यो नो रयिंदुच्श्चरितासोइतिमन्त्रः, यां कल्पयन्तीति मन्त्रः, एते शत्रुकृत्यानि तेभ्यएव प्रतिगमनाय प्रेरयन्ति। निर्दोषान्धर्ममार्गस्थान् साधुजनान् संरक्षति प्रत्यङ्गिरा मन्त्रः। तस्मात् दोषरहितेभ्यो कदापि न प्रयोजयेत् अतः प्रत्यङ्गिरा मन्त्रास्सर्वे

सावधानेन जाग्रतया सुनिश्चयेनैव अन्येभ्यो प्रयोक्तव्या साधकेन। शक्ति शब्दार्थस्तु देवीभागवते - ऐश्वर्यस्य पराक्रमस्य या धात्री सा शक्ति रित्युच्यते । धात्रीनाम समस्तधारिणी इति ज्ञेया । ऐश्वर्यवचनशक्तिःपराक्रम एव च।

तत् स्वरूपा तयो र्धात्री सा शक्तिः परिकीर्तिता। कालीरहस्याख्ये ग्रन्थे उदीरितः। इति एवं कालीशब्दार्थस्तु

आदिविद्या महादेवी महाकालस्य वल्लभा।
काल सङ्ग्रसनात् काली सर्वेषा मादिरूपिणी।

इति सर्वव्याधीनां शन्तिः जपहोम देवार्चनादिभिः भवेदिति। रुद्रयामळतन्त्रे, आयुर्वेदे च उच्यते – यथाहि आयुर्वेदे

जन्मान्तर कृतं पापं व्याधिरूपेण बाधते।
तच्छान्ति रौषधै र्दानै र्जप होम सुरार्चनैः।। इति

रुद्रयामलस्य वनस्पतिकल्पोक्तरीत्या बिल्ववृक्षपञ्चाङ्गैः प्रत्यङ्गिरादि दिव्यास्त्रमन्त्रैः यदा प्रायश्चित्तात्मकं औषधादिभिः कृतं शान्ति होमादिकं विहित दानादिकं च क्रियेत तदा रोग दोष व्याधीनां शान्तिर्भविष्यति इत्यवगन्तव्यम्।

प्रत्यङ्गिराशान्तिहोमोपयुक्तदिव्यौषधवनस्पतिद्रव्याणि अनेनस्तोत्रेणस्तव्यानि भवन्ति।

मूले ब्रह्मा त्वचि विष्णुः शखासु च महेश्वरः।
पत्रे पत्रे देवनाथो वृक्षराज नमोऽस्तु ते।। इत्यादि।

पञ्च अमरवस्तूनि इति दूर्वा, विजया, (भांग) बिल्वपत्र, निर्गुण्डी कृष्णतुलसी एतानि पञ्चद्रव्यानि रुद्रयामलोक्तानि पञ्चअमरत्वदायकवस्तूनि। अपिच'

पञ्चतिक्तं मुखे क्षिप्त्वा जपं कृत्वा समर्पयेत्।
तस्याहं सकलां पृथ्वीं ददामि पुरुषोत्तम।।
कौलं च पञ्चतिक्तं स्यात् कौलं कुलसमुदभवम्त
स्मात् देयं प्रयत्नेन देव्याश्चोद्भव मिच्छता।
एला जातीफलं चैव कर्पूरं च लवङ्गकम्।

जातिपत्रं तथा देवि पञ्चतिक्तमिदं प्रियम्।। इतिवचनानुसारं प्रत्यङ्गिदेव्यार्चनावसरे पूजकः पूजापद्धत्यां "ताम्बूलादि सुरभितवदनः" इति उक्तरीत्या सुगन्धित ताम्बूलभक्षणकरणानन्तरं देवीपूजां मन्त्रजपं च यदि क्रियेत उत्कृष्टफलदा भवेदिति रुद्रयामलात् ज्ञायते। तस्मादेव "ताम्बूलपूरितमुखी" इति कौलमार्गतत्परसेविता इति च ब्रह्माण्डपुराणान्तर्गत ललितानामस्तुतौ उद्घोष्यते। रुद्रयामलग्रन्थः तन्त्रशास्त्राणां विश्वकोशः विराजते। केचनसाधकाः त्वरित फलप्राप्तये साधनायाः दुष्कर मार्गं अवलम्बन्ति। तदनुचितं। रुद्रयामलतन्त्रोक्त उपासनामार्गः अतिसरलतमः मार्गः। सर्वैरपि अनुष्ठातुं सरलतया सुलभतया भाति। तादृशानां रुद्रयामलोक्त प्रत्यङ्गिरायाः सहस्रनामकवचादिस्तोत्राणां नित्यपारायणेनैव मनोरथपूर्तिः जायेत।

कलौ काली कलौ काली कलौ काली वरप्रदा।

कलौ काली कलौ काली कलौ काली तु केवला।।

कलौ काली महाविद्याकलौ काली च सिद्धिदा। इत्याद्यनेकविध तान्त्रिकवचनैः महाकाली – अथर्वणभद्रकाली प्रत्यङ्गिराकाली उपास्या इति ज्ञायते। शैवतन्त्रे विभागेषु भैरवमप्येकं मतं उत्कृष्टं रौद्रं विद्यते। तस्य परमेश्वरस्यभैरवस्यमहिषी प्रत्यङ्गिरा इत्युच्यते। अङ्गिरसादि महर्षिभिः अनेकैः आराधितत्वात् एषा आथर्वणी भद्रकाली प्रत्यंगिरा इति भगवता कथिता। अस्याः प्रत्यङ्गिरायाः उपासनाय साङ्गोपाङ्गसपर्यापद्धति सलक्षण कारिकयासह अनुपलब्धा वर्तते। कानिचन पुस्तकानि विनैव लक्षणं प्रमाणरहितानि, भाषान्तर संसर्गात् शब्दशुद्धिरहितानि लघुप्रयोगबोधकानि सहस्रनामजपपारायण योग्यानि आसन्–प्रायश्चित्तमहाशान्ति यज्ञप्रयोगरूपेण पुस्तकमेकं साधकेभ्यो आवश्यक मितिमत्वा - श्रीकालिकाम्बायाः चेन्नपुरी आलये वार्षिकनवदिन महाशान्ति यज्ञे अनुष्टितविषयान् क्रोडीकृत्य पुस्तकमिदं सम्पादितम्। एतत् अस्तीकजनानां प्रमोदजनकंभवेत्। काल्याः उपासनायाः पूर्वं। दीक्षायां मन्त्रोपदेशं प्राप्य ततः पुरश्चरणं कृत्वा प्रवृत्तमानानां साधकवराणां मन्त्रिणां भगवती प्रत्यङ्गिरा भोगमोक्षद्वयमपि अनुगृह्णाति ददाति। उपासकस्य उपासनाङ्ग समस्तविषयानां ज्ञानं अत्यन्तं आवश्यकं भवति। यमनियमादीनां अभावे वैपरीत्ये अनर्थाय निष्फलंच कार्यंभवेदिति मत्वा अस्मिन्पुस्तके उपयुक्तविषयाः प्रोक्ताः। संयोणिताश्चतस्मात्पुस्तकमिदं

प्राप्यसाधकाः स्वस्यजीवनं ब्रह्मानन्दानुभूत्या सुखलाभयुक्ताःजन्मसाफल्यं प्राप्नुयुरिति विशास्त्रनिश्चिताशीः। इत्थं विद्वच्चरणचञ्चरीकः

याद्दशं पुस्तकं द्दष्ट्वा ताद्दशं लिखितं मया।

यदि शुद्ध मशुद्धं वा मम दोषो न विद्यते।

भग्नपृष्ठ कटिग्रीव स्तब्धद्दष्टि रधोमुखम्।

कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत्।

तैलाद्रक्षेत् जलाद्रक्षेत् रक्षेच्छिथिल बन्धनात्।

मूर्खहस्ते न दातव्यं एवं वदति पुस्तकम्।

एवं मन्त्रसाधकानां उपयोगाय महता परिश्रमेण संपादितं इदं

पुस्तकं सर्वेषां विद्वन्मूर्धन्यानां पूजककुलतिलकानां

सन्तोषजनकं अभीप्सितफलदायकं च भवेदित्याशास्महे।।



इत्थम्

एतत् पुस्तकरचयिता

भवतां निवेदकः संपातकः

वि.सोमशेखर शिवाचार्यः

சைவஸித்தாந்த ஆகம ஸாகரம், சிவாகம ஞானபாநு, சிவாகம கல்பத்ருமம், சிவாகம ரத்னாகரம், சிவாகம திருத்தொண்டர், மந்த்ரஸேவாமணி, சிவாகம பாஸ்கர, சிவாகமச் செல்வர், சிவாகம வித்யா ரத்னம், சைவ வைதிக ரக்ஷாமணி

K.ராஜப்பா சிவாச்சார்யார்

ஸ்தானீகர்- ஸ்ரீ ஏகாம்பரநாதர் தேவஸ்தானம்,
ஸ்ரீ கைலாஸநாதர் தேவஸ்தானம்
121-45,ஏகாம்பரநாதர் சன்னதி தெரு.
காஞ்சிபுரம்..631502..போன்-944525747

உ

ஆசியுரை

நமது சைவச்சமயம் பல்வேறு ஆகம-தந்த்ர சாஸ்த்ர ஸம்ப்ரதாய, வழக்கமுறைகளை உள்ளடக்கியது. பரார்த்த ஆலயங்களில் பூஜை செய்யும் சிவவேதிய குருக்களாகிய நமக்கு எல்லா வழிப்பாட்டு முறைகளிலும் கலந்துக்கொள்வதற்கு அதிகாரங்கள் உள்ளன. எனினும் ஸித்தாந்த மார்க்கத்தை அனுஸரிக்கும் ஆதிசைவர்களாகிய நமக்கு, மற்ற ஸம்ப்ரதாயங்களை அனுஸரிக்கும் அவசியம் இல்லை எனினும், ஒரு தேவதையைப்பற்றி முழுமையாகத் தெரிந்துக்கொள்ள, காமிய பலனை உடனே அடைய, நம்மிடைய இருக்கின்ற புத்தகங்களில், அந்த தேவதையைப்பற்றினக் குறிப்புகள் அதிகமாகக் காணப்படாத போது, இதர புத்தகங்களின் வாயிலாக நாம் அவற்றைப்பற்றி தெரிந்துக்கொள்ள முயற்சிக்க வேண்டும். அதுவும் பல காலங்கள் பல புத்தகங்களின் மூலமாகத்தான் நாம் ஒரு தேவதையைப்பற்றியதான சிறிய அறிவைப் பெறமுடியும்.

ஆனால், வெகுகாலம் முயர்ச்சியுடன் நாம் கற்றுப்பெற்ற அறிவை விட, அனுபவத்துடன் கூடிய சில முழுமையான புத்தங்கள், குறுகிய காலத்திலேயே மெத்தமான ஞானத்தை நமக்கு அளிக்கின்றன. அவ்வகையில் பல ப்ரமாண நூல்களை ஆதாரமாக்கொண்டு, அதித

முயற்சியுடன் **பிரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்** எனும் வடமொழி நூல் வெளிவருவது கண்டு ஆனந்தம் கொள்கிறோம்.

नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ஆதாரமில்லாமல் எதையும் எழுதக்கூடாது, தேவையில்லாதவற்றைச் சொல்லவும் கூடாது எனும் வடமொழிச் சொல்லிற்கேற்ப, பல புத்தகங்களை வெளியிட்டுக் கொண்டுவரும் சிவஸ்ரீ.Dr .V.ஸோமசேகர சிவாசார்யரைப் பற்றி அறிமுகம் தேவையில்லை. ஆசிரியர் அவர்களின் மெய் வருத்தக்கூலியே இந்நூல். இந்நூலில் ப்ரத்யங்கிரா ப்ரபாவம், ப்ரத்யங்கிரா பாராயணம், மந்த்ரானுஷ்டானம், காம்யார்ச்சனை, ஜபவிதி,புரச்சரணம், மந்த்ர ப்ரயோகம், காளீபூஜைக்கு அங்கமான ந்யாஸம், ப்ரத்யங்கிரா பூஜை, ஹோமம், தேவியுனுடைய ப்ரீதிக்காகச் செய்யப்படும் அர்ச்சனை, சைவாகமத்தின் படி தேவியை பூஜிக்கும் முறை, காளி ஸ்தோத்ரங்கள், ஸஹஸ்ரநாமாவளி போன்ற அரிதான, தேடினாலும் எங்கும் கிடைக்காத பல விஷயங்களை உள்ளடக்கியதாக இந்நூல் அமைந்திருப்பது நூலாசிரியரின் தேவியின் மேல் வைத்திருக்கும் ச்ரத்தையைக் காட்டுகிறது.

இது போல அநேக விஷயங்களைப் புத்தகமாக நமது ஸமுதாயத்தினருக்கு அளிக்கவும் சைவம் தழைத்தோங்கவும், எல்லா நலன்களும் அவருக்கும் அவர் சார்ந்து இருக்கும் அனைத்து சைவர்களுக்கும் கிடைக்கவும் எல்லாம் வல்ல ஏலவார்குழிலி நாதனுன திருவேகம்பனின் திருத்தாளினைப் போற்றி அமைகிறேன்.

உ

சிவமயம் ஸ்ரீ ராஜராஜேஸ்வரி ப்ரசன்னா சத்திமயம்

சிவாகம சார்வபௌமா – சண்டஹோம சாம்ராட்

சிவஸ்ரீ. எஸ். சபேச சிவாச்சார்யார்

முதல்வர், ஸ்ரீ நாகநாத அகோர சிவாச்சார்யார்

வேத சிவாகம பாடசாலை, மயிலாடுதுறை.

ஸ்ரீ ராஜேஸ்வரி துணை

ஆசியுரை

எல்லாம் வல்ல எம்பெருமான், அன்னை, துணைகொண்டு ஜீவராசிகள், தோற்றமும், அவரவர்குறிய வகையில் காபாற்றி தன்னுள் அடக்கி, இறைவனிடம் சேர்ப்பது ஜகன்மாதாவின் தொழிலாகும். குறிப்பாக 𑌕𑌾𑌶𑍍𑌯𑌾𑌂 𑌤𑍁 𑌮𑌰𑌣𑌾𑌨𑍍 𑌮𑍁𑌕𑍍𑌤𑌿𑌃 என சொல்லியபடி, காசியில் இறந்தவர்கள், ஜகன்மாதாவானதாய் தன்மடியில் வைத்து, தனது புடவை தலைப்பால் வீசி ஜீவன் நல்ல கதியை, அடையவைக்கிறாள் என்பது அனைவரும் அறிந்ததே. அதேபோல ஐந்து முகங்களில் மத்தியில் உள்ள அகோரமூர்த்தியிலிருந்து தோன்றியவர்கள் நரசிம்ம மூர்த்தியின் கோபத்தை தணிக்க சரபமூர்த்தியும், காளீயும், ஆவிர் பவித்து, நரசிம்மமூர்த்தியின் கோபத்தை தனித்து சாந்தமாக்கினார். **'பத்ரம்'** என்றார் **'க்ஷேமம்', 'காளீ'** என்றால் **'காலத்தைவெல்ல வைப்பவள்'** என்று பொருள் ஆதலால்தான், க்ராமங்களில் பத்ரகாளியை பிடாரி என்றும் சொல்வார்கள். 'பிடாரி' என்றால் 'பீடாஹாரி' என்று பொருள். உபத்ரவத்தை பீடையை நிவர்த்திசெய்து காப்பவள் என்றழைப்பார்கள். அந்த பத்ரகாளிதான் பலவடிவங்கள் எடுத்து ப்ரத்யங்கிரா காளியாக வந்தாள் என வரலாறு கூறும். அந்த ப்ரத்தியங்கிரா தேவி உக்ர ப்ரத்யங்கிரா என பல உண்டு.

சாந்தமாகவும், உக்ரமாகவும் இருபிரிவை உடையது. அந்த ப்ரத்யங்கிரா தேவிக்கு சஹஸ்ரநாமம், அர்ச்சனை, பூஜா, பத்ததி, வீரபத்திரர், பைரவர், காளீ முதலான தேவதைகளின் பூஜா ஹோமம் ஜபவிதானம், செய்முறை முதலியன எளிமையாகவும், புரியும் படியும் அவருக்கே உரித்தான வகையில் "சாக்ததந்த்ர நிபுணரும்", "கல்பதருவுமான" **சிவஸ்ரீ வி. சோமசேகரசிவாச்சாரியர், எம்.ஏ.,** அவர்கள் எழுதியுள்ளதை கண்டு மகிழ்ச்சி. சென்னை காளிகாம்பாள் கோவில் சிவாச்சாரியர் குலபூஷணம்

டாக்டர் சிவஸ்ரீ ஸாம்பமூர்த்தி சிவாச்சாரியர் அவர்கள் அறக்கட்டளை உறுப்பினர்கள் ப்ரத்யங்கிரா பக்தஜனசபா "ப்ரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்" பல விஷயங்களை வெளியிட்டள்ளார்கள். பலவிஷயங்களை கொண்டு இப்புத்தகம்போல் சிவாகமத்துக்கு விரோதம் இல்லாமல் இன்னும் பல விஷயங்களை வெளிக்கொண்டுவர எல்லாம் வல்ல, நமது குருவான ஸ்ரீ தூர்வாச்ஸாசார்யாளையும் அன்னை ஸ்ரீ மூகாம்பிகையும் ஆன்மார்த்த மூர்த்தியான ஸ்ரீ சிவகாம ஸுந்தரி ஸமேத ஸ்ரீ சிதம்பரேசரின் பாதகமலங்களை வணங்கி வாழ்த்தி ஆசிரியருக்கும் அறக்கட்டனை உறுப்பினர்களுக்கும் நோயின்மை வேதோக்ம சதாயுஸ் அருள வேண்டுகிறேன்.

நமஸ்காரம்

இப்படிக்கு,

S. ஸபேச சிவாசார்யர்

சிவஸ்ரீ. எஸ். ஸபேச சிவாசார்யர், மயிலாடுதுறை.

உ
ஜெய் குருதேவ் சிவமயம் ஸ்ரீ ராஜராஜேஸ்வரி ப்ரசன்னா
சிவாகம விசாரதா – சிவாகம பிரவிணா – சிவாகம ஞானத்திலகம்
சிவஸ்ரீ.அவிநாசி.எஸ்.சுந்தரமூர்த்தி சிவாச்சாரியார்
குருத்துவம் — முதல் ஸ்தானிகம்
அருள்மிகு அவிநாசிலிங்கேசுவரர் திருக்கோயில், அவிநாசி
முதல்வர், வேத ஆகம சம்ஸ்க்ருத மஹா பாடசாலை, ஸ்ரீ ஸ்ரீ குருகுலம்,
வேத விஞ்ஞான மஹா வித்யா பீடம்,சர்வதேச வாழும் கலை மையம், பெங்களூரு.
A.S.Sundara Murthy Sivam,
PRINCIPAL, VEDA AGAMA SAMSKRUTHA MAHA PATASHALA, THE ART OF LIVING INTERNATIONAL CENTRE,
SRI SRI GURUKULAM, 21ST KM, KANAKAPURA ROAD, UDAYAPURA, BENGALURU – 560 082
Contact: 080 67262851, 9008499833, E-Mail: srisrigurukulinfo@gmail.com/ assmsivam20@gmail.com

---

உ 05.01.2021

ஸ்ரீ குருப்யோ நமஹ

॥ प्रत्यङ्गिरा सपर्या सर्वस्वम् ॥ ப்ரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்

ஸார்வரி வருடம் கார்த்திகை மாதம்–28 13.12.2020

மகிழ்வுரை

ஏதத் குஹ்யதமம் லோகே ந கஸ்ய கதிதம் மயா.
தவாபி தவ ஸ்நேஹேன பக்த்யா குஹ்யம் வதாம்யஹம்.
யா தேவீ யோகமாதேதி மஹா மாஹேச்வரீ சிவா.
ப்ரத்யங்கிரேதி விக்யாதா ஷட்விம்சதி வர்ணிகா.
ஸ்ருஷ்டிம் ஸகலம் விச்வம் பிபர்த்தி பாலயந்திகா.
அந்தே ஸம்ஹார கர்த்ரீ ச ஸம்ஹரிஷ்யதி தாமஸீ.
குணத்ரயவதீ வித்யா மஹாதாரித்ர்ய வாரிணீ.
தஸ்யாம் மந்த்ராக்ஷராதி படலபத்ததிஸ்தவம்.
ஜப வித்யாம் ஸர்வஸித்தாம் ஸர்வ நாம ஸஹஸ்ரகம்.
ஸ்தவம் யந்த்ராயணம் தேவீ பலம் பரமேச்வரி.
ஏதத் ப்ரயோகத் அஹம் தேவி த்வத்ஸ்நேஹேன ப்ரப்ரவீமி:
வைரிணோ வைரபாவேன ஸம்ஹர்த்தும் ஸக்தி வைபவை:
~ தக்ஷிணாம்நாயம்–ஸ்ரீருத்ரயாமளதந்த்ரம்

அகிலம் காக்கும் அன்னை ஸ்ரீ காளிகாம்பாள் அனுக்ரஹத்துடன் பல ஆண்டுகளாக, உலக நலன் கருதியும், மக்களின் ப்ரார்த்தனை நிறைவேற வேண்டியும் - பிரதி வருடம் - கார்த்திகை மாதத்தில், ஸ்ரீ காளிகாம்பாள் ஆலயத்தில், ப்ரத்யங்கிரா யாகம் - மிகவும் சிறப்புடன் வேத பண்டிதர்களுடன் சில ஆகம சான்றோர்களான சிவாச்சாரியார்களைக்கொண்டு ஸ்ரீ தேவீ ப்ரத்யங்கிரா மஹோத்ஸவமாக திருக்கோயில் நிர்வாகமும், ஸ்ரீ சாம்பமூர்த்தி சிவாச்சார்யார் அறக்கட்டளையும் ஏற்பாடு செய்து ப்ரம்மாண்டமாக நடத்தி வருகின்றனர், என்று அறிவோம்.

சிறப்பு மிக்க ப்ரத்யங்கிரா தேவி யாகத்தின், மேன்மையை விளக்கும் வண்ணம், சாக்த தந்த்ரங்கள், ஆகம நூல்கள், சாஸ்த்திர பிரமாணங்களுடன் பூஜைமுறைகள், ஹோம விதானங்களின் முறைகளையும், விரிவாகவும், விளக்கமாகவும் அறிந்து கொண்டு நடத்தும் வகையில், **ப்ரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்** மந்த்ர சாஸ்த்ர ப்ரமாண க்ரந்தமாக இந்நூல் அமைந்துள்ளது, சிறப்பாகும்.

இந்த நூலை தகுந்த வேத, ஆகம, சாஸ்த்ர, சாக்த மந்த்ர சான்றுகளுடன் தொகுத்து வழங்கி உள்ள போற்றுதர்க்குரிய, சைவாகம, சாக்த தந்த்ர, சாஸ்த்ர ஞான சாகரம் - **சிவஸ்ரீ விஜய. சோமசேகர சிவாச்சாரியார்** அவர்களின் சர்யை, க்ரியை, யோகம், ஞானத்தின் வெளிப்பாடாக அமைந்துள்ளது மிகவும் பாராட்டுக்குரியதாகும். முக்கியமாக சாக்த உபாஸகர்களுக்கும், பாடசாலை மாணவர்களுக்கும் பூஜை முறையை உணர்ந்து செய்ய வழிகாட்டும் புத்தகமாக விளங்குகிறது.

இந்நூல் வெளியிட ஏற்பாடு செய்த – ஸ்ரீ காளிகாம்பாள் திருக்கோயில் நிர்வாகம், சிவாச்சார்யார் அறக்கட்டளை மற்றும் ஸ்ரீ சாம்பமூர்த்தி சிவாச்சார்யார் டிரஸ்ட், ஸ்ரீ ப்ரத்யங்கிரா பக்தஜனசபை மற்றும், ஆதிசைவ குலத்தின் பெருமையை உலகெங்கும் பிரகாசிக்க செய்த மஹான் – **தெய்வத்திரு, சிவாசார்ய குலபூஷணம் டாக்டர் சிவஸ்ரீ. தி.ஷ. ஸாம்பமூர்த்தி சிவாச்சார்யார்**, அவர்களின் குமாரர்கள், **சிவஸ்ரீ. ஸ்வாமி ஸதாசிவோம், சிவஸ்ரீ. காளிதாஸ சிவாச்சார்யார்** மற்றும் **சிவஸ்ரீ. டாக்டர். தி.ஷ. ஷண்முக சிவாச்சார்யார்** அவர்களுக்கும், உலகம் போற்றும், ஸ்ரீ காளிகாம்பாள் ஆலயத்தில் வருடம் தோறும் நடைபெறும் –**ஸ்ரீ ப்ரத்யங்கிரா மஹாசாந்தி யாகத்தின்** சிறப்பையும், பெருமையையும் ஆஸ்திக பக்தர்களும் உணர்ந்து வழிபடும் வகையில் ஏற்பாடு செய்துள்ளமைக்கும், மிகவும் சிறப்பான முறையில் வடிவமைத்து நேர்த்தியாகவும், அழகாகவும் அச்சிட்டு கொடுத்த **கிரிஜா கணேஷ்** மற்றும் **ஓம் டி.ஜி. ஒர்க்ஸ்**, நிர்வாகத்துக்கும் மனமார்ந்த நன்றியையும் பாராட்டுகளையும் தெரிவித்து மகிழ்வுரையை அன்புடன் சமர்ப்பிக்க வாய்ப்பளித்த– **சிவஸ்ரீ. டாக்டர். தி.ஷ. ஷண்முக சிவாச்சார்யார்** அவர்களுக்கு நன்றியை தெரிவித்து இதுபோல பல ஞானநூல்கள் வெளியிட ஸ்ரீபெருங்கருணாம்பிகை உடனமர் ஸ்ரீஅவிநாசிலிங்கேஸ்வர பெருமானை பிரார்த்திகிறேன்.

நன்றி – வணக்கம்

இப்படிக்கு

A. S. சுந்தரமூர்த்தி சிவாசார்யர் [signature]

(அவிநாசி. எஸ். சுந்தரமூர்த்தி சிவாசார்யர்)

முதல்வர், வேத ஆகம ஸம்ஸ்க்ருத மஹா பாடசாலை,

பெங்களூரு, கர்நாடகா– 560 082.

சார்வரி வருடம்,
கார்த்திகை – 03
13.12.2020
ஞாயிற்றுக்கிழமை

உ
ஸ்ரீ காளிகாம்பாள் துணை
வேதாந்த சிரோமணி, வேதாந்த விசாரதா
முனைவர் தி.ஸா.ஷண்முக சிவாசார்யார், M.A., Ph.D.,
66/101, இராமசாமி தெரு, மண்ணடி, சென்னை - 600 001, தமிழ்நாடு, இந்தியா
Dr. T.S. Shanmukha Sivacharyar, M.A., Ph.D.,
66/101, Ramaswamy Street, Mannady, Chennai - 600 001.

அணிந்துரை

सिंहस्थां सिंहवदनां जगद् धात्रीं च भैरवीम् ।
वन्दे प्रत्यङ्गिरां देवीं वाञ्छितार्थ प्रदायिनीम् ॥

அகிலாண்டகோடி ப்ரம்மாண்ட நாயகியான அன்னை காளியின் வழிபாடு ஒன்றே, இம்மைக்கும் மறுமைக்கும் இன்பமளிப்பது. வழிபாட்டிற்கு பக்தி ஒன்றே போதுமானது.

ஸ்ரீப்ரத்யங்கிராம்பா காளீகுலத்தில் போற்றப்படுபவள். இவளே கலியுகவரதாவாகக்ஷிப்ரப்ரஸாதினியாக விரைந்தருள் தருபவளாகிறாள். कालिका मोक्षदा देवी कलौ शीघ्रफलप्रदा என்ற கூற்றுப்படி ஸநாதனியான ஆதிபராசக்தியே உலகத்துயரைத் துடைக்கக் காரணமாவாள். இவளே முக்தியளிப்பவள். இவளே மேலானவள் என்கிறது மார்க்கண்டேய புராணம்.

सा विद्या परमा मुक्तेः हेतुभूता सनातनी ।
संसार बन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥ (मार्कण्डेयपुराणम्)

சாக்தமந்த்ர சாஸ்த்ரங்கள் இவளை சிவசக்தி என்று சங்கரதேஜஸோரிதா என்கிறது. சாக்தாகம பிச்சிலாதந்த்ரம் கலியுகத்தில் சரண்புகவேண்டியவள் காளி ஒருத்தியே कलौ काली कलौ काली नान्यो देवः कलौ युगे என்கிறது. மேலும் காளியே மூவுலகிற்கும் அன்னை, உலகத்தோரின் துயரத்தைப்போக்குபவள், எல்லாகுற்றங்களையும் பொருத்து அருள்தரக்கூடியவள் என்று காளீகுலஸர்வஸ்வம் எனும் நூல் கூறுகிறது.

कालिका जगतां माता लोकदुःख विनाशिनी ।
विशेषतः कलियुगे महापातक हारिणी ॥ (कालीकुलसर्वस्वे)

மேலும் கலியுகத்தில் வழிபடவேண்டியவள் காளீ ஒருத்தியே இவளே ஸகலவரத்தையும் தரக்கூடியவள் என்று காளீரஹஸ்ய தந்த்ரசாஸ்த்திரம் கூறுகிறது.

कलौ काली कलौ काली कलौ काली वरप्रदा ।
कलौ काली कलौ काली कलौ काली तु केवला ॥

காளீ பயங்கரியாக வடிவுடையவளேயாயினும் மனதில் கருணை வடிவினள் இவள் தனது அடியவர்களைப் பார்த்துப் எப்பொழுதும் "நீங்கள் பயப்படவேண்டாம், நான் அபயம் அளிக்கிறேன். தயக்கமின்றி உங்களுக்கு வேண்டியவற்றைக்கேளுங்கள் அதை நான் அளிக்கிறேன்" என்று அடிக்கடி இதைக் கூறுகிறாள் என்று சாக்தநூல்கள் கூறுகின்றன. இதனையே சண்டீசப்தசதீ நூலில்

चित्ते कृपा समर निष्ठुरता च दृष्टा -
त्वय्येव देवि वरदे भुवनत्रयेऽपि ।

என்று தேவர்களின் துதி கூறுகிறது.

शक्तिं संपूज्य देवेशि पठेत् स्तोत्रं वरं शुभम् ।
इह लोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत् ॥ (रुद्रयामलम्)

ப்ரத்யங்கிரா தேவியின் உபாசனை பிறவிப்பயனைத் தரவல்லது. இம்மைக்கும் மறுமைக்கும் நன்மை அளிப்பதாகும். இத்தகைய பிரத்யங்கிரா உபாசனாமுறைகளை சைவாகம, சாக்தாகம நூல்களிலிருந்து எங்களது குருநாதர் சிவஸ்ரீ **V.** சோமசேகர சிவாசார்யர் அவர்கள் மிகச்சிறந்த முறையில் **"ப்ரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்"** என்ற பெயரில் இப்புத்தகத்தை தொகுத்து அளித்துள்ளார். இந்நூல் தேவீபிரத்யங்கிரா, பைரவர் முதலான தெய்வங்களின், மந்திரங்கள், புரச்சரணவிதிகள், யந்திரம், பூஜை, யாகம் செய்முறைகள், அஷ்டகர்ம்பிரயோக விதிகள், கவசம், ஸஹஸ்ரநாம துதிகள், 1000 நாமாவளிகள், 108 நாமாவளிகள், பிரார்த்தனைகள் இவற்றை பலருக்கும் பலன்அளிக்கும் வகையில் உள்ளடக்கியது தனிசிறப்பாகும். இந்நூல் அரியபல மந்திரங்கள் அவற்றை ஜபிக்கும் முறைகள் இவற்றை எளியமுறையில் தெளிவாக எடுத்துரைக்கிறது. இது தேவி உபாசகர்களுக்கு பின்பற்றுவதற்கு சிறந்த கையேடாக விளங்கும் என்பதில் ஐயமில்லை. நூல்ஆசிரியர் அவர்களுக்கு எங்களது அறக்கட்டளை சார்பாக பணிவான நமஸ்காரங்களை தெரிவித்துக் கொள்கிறேன். இது போன்று பல புத்தகங்களை அண்ணா அவர்கள் ஆன்மீக உலகத்திற்கு அளித்து நல் வழிகாட்டுமாறு வேண்டிக் கொள்கிறேன். கிடைத்தற்கரிய ஞான நூலான இதனை யாவரும் வாங்கிவழிபட்டு இகபர நலன்யாவும் பெற்றிடவும் இந்நூல் பயன்தரவும் காளிகாம்பாள் திருவருளை சிந்தித்து வாழ்த்தி மகிழ்கிறோம்.

இப்படிக்கு,

சிவஸ்ரீ. Dr. T.S. ஷண்முக சிவாசார்யர், M.A., Ph.D.,
மண்ணடி, சென்னை–1.

உ

ஸ்ரீ காளிகாம்பாள் துணை

சென்னை–1, சிவாசார்யர் அறக்கட்டளையின் நிறுவனர்

சிவஸ்ரீ. Dr. தி.ஷ. சாம்பமூர்த்தி சிவாசார்யார் சரிதம்

தருமமிகு. சென்னையின் திருமழிசை திருத்தலத்தில் கௌசிககோத்திரத்தில் ஆதிசைவகுலத்திலே சிவஸ்ரீ. ஷண்முக குருக்களுக்கும், ஸ்ரீமதி. தாக்ஷயணி அம்மையாருக்கும், 3வது திருமகனாக அவதரித்தவர். சென்னை பூக்கடை சிவஸ்ரீ.சபாரத்ன சிவாசார்யாரிடம் சிவதீக்ஷை பெற்றவர். குருவருளாலும், திருவருளாலும் சென்னை கடற்கரைநகரில் ஸ்ரீ காளிகாம்பாள் ஆலயத்தில் தமது சகோதரர்களுடன் சிறந்த அர்ச்சகராய் வெகுகாலம் தொண்டாற்றியவர். மேற்படி ஆலயத்தில் தமது பெருமுயற்சியால் பலசிறப்புமிக்க திருப்பணிகளைச்செய்து, ஆலயவளர்ச்சிப் பணிகளில் தம்மை முழுவதும் இவ்வாலயத்திற்கு அர்ப்பணித்து பலமுறை கும்பாபிஷேகங்களைச் செய்வித்தவர். தனது ஆத்மார்த்த சிவபூசையை இடையறாதுசெய்து, சிவநெறியில் வாழ்ந்தவர். தமது வாழ்க்கைத் துணைவியாராக ஸ்ரீமதி. புவனேச்வரி அம்மையாரை மணந்து மகன்களோடும், மகள்களோடும் மனநிறைவுடன் வாழ்ந்தவர்.

தென்னிந்திய அர்ச்சகர் சங்கத்தலைவராக பலஆண்டுகள் இருந்து அர்ச்சக சமூகத்தின் மேன்மைக்குத் தொண்டாற்றியவர்.

தமதுஆலயத்திலும், உள்நாட்டிலும், வெளிநாடுகளிலும் பல இடங்களில் பலவகை யாகங்களையும், சஹஸ்ரசண்டீ யாகங்களையும் நடத்தியவர். ஆலயசேவார்த்திகளுக்கும், அயல்நாட்டின் ஆஸ்தீகர்களுக்கும் இந்துசமய சுபாஷிதங்களையும், சித்தாந்த கருத்துக்களையும் போதித்த சைவசமயபோதகர். ஆலயசேவார்த்திகளின் மனத்துயரம் நீங்கிட அம்பாளிடம் கசிந்துருகி அர்ச்சனைசெய்து, தேவியின் திருநாம உச்சரிப்பால் நாதகலைகளை ஆலயமெங்கும் பரவச்செய்த தேவீஉபாஸகர். சேவார்த்திகளுக்கு 'அம்பாள் ஆசீர்வாதம்" எனக்கூறி குங்குமம்அளித்து, மங்களம்பெறச் செய்த மஹிமை பொருந்தியவர். கோயிலுக்குவரும் பக்தர்களில் ஏழை, பணக்காரர், படித்தவர், பாமரர், நல்லவர், தீயவர் என்ற வேறுபாடுஎதுவும் பாராமல், சமநோக்கில் தாயன்புகாட்டி உதவி, ஆசிநல்கிய ஆசான். பல்லோராலும் சிவாசார்யகுலபூஷணம் என்றும், சக்திகருணாகர சக்ரவர்த்தி என்றும் விருதுவழங்கிப் போற்றப்பட்டவர். பக்தர்களுக்கு தன் தீபாராதனைத்தட்டிலிருந்து குங்குமத்தையும், எளியோருக்கு பரிவுடன் பணத்தையும் எடுத்துத்தந்திடும் தயாளகுணத்தவர். முப்பதுக்கும்மேற்பட்ட வெளிநாடுகளில், பலகோயில்களில், ஆசியுரையாற்றியும், கும்பாபிஷேகம், யாகம் இவற்றைசெய்தும், செய்வித்தும், இந்துசமய வளர்ச்சிக்குத் தொண்டாற்றியவர்.

அமெரிக்காவிலுள்ள ஐக்கியநாடுகள்சபையில், இந்துசமய சிறப்பைப்பற்றி, சொற்பொழி ஆற்றியவர். தனது நான்குகுமாரர்களையும், ஆலய மற்றும் சமயப்பணிகளில் அமர்த்தியும், அறக்கட்டளைகளை ஏற்படுத்தி சைவாகம கலாசாரவளர்ச்சிக்கு அடித்தளம் அமைத்தும் வழிகாட்டியவர். தேசபொதுநலனுக்காக அச்வமேதயாகம், ஸஹஸ்ரசண்டீயாகம் முதலிய அரிய பல பெருவேள்விகளைச் செய்து உலகஅமைதிக்கு துணைநின்று கௌரவமுனைவர் பட்டம் பெற்ற ஆகமஞானகலாநிதி ஆவார். இன்றும் சிவபுரத்துச் சிவனடிநிழலில் சிவபோகம் அனுபவித்தவாறு, குமாரர்கள்மூலமாக அறக்கட்டளைகளை ஆசியளித்து இயக்கிவருகிறார். இவரது சைவசமய சேவையைஎண்ணிப் போற்றிடும் ஆஸ்தீகர்கள் அம்பாள் ஆசீர்வாதம் பெற்றவர்களாய் இன்புற்று வாழ்கின்றனர். வாழ்க சீர்அடியார் எல்லாம்.

சுபம்.

வெளியீட்டுரை.

மாதா மரகத ச்யாமா மாதங்கீ மத சாலினீ.
குர்யாத் கடாக்ஷம் கல்யாணீ கதம்பவந வாஸினீ.

எல்லாம்வல்ல எம்பெருமாட்டி தாய் காளிகாம்பாளின் திருவருட்பயனால், உலகமக்களிடையே தெய்வபக்தி மேலோங்கி வளரவேண்டும். இந்து சமயத்தின் ஸநாதனதர்மம் தழைத்துஓங்கவேண்டும், என்றநோக்கில் எமது அறக்கட்டளையின் மூலமாக சமயஆன்மீக பொதுநலசேவைகளைத் தொடர்ந்து செய்து வருகிறோம். இதில் குறிப்பாக எங்களது குருநாதரும், எமதுஅறக்கட்டளையின் கௌரவஆலோசகரும், மார்கதர்சியுமான சிவஸ்ரீ.வி.சோமசேகரசிவாசார்யர் அவர்கள் எழுதித் தொகுத்தளித்த பலதெய்வீகநூல்களை வெளியிட்டு சமய சமூகஅறப்பணியாற்றி வருகிறோம்.

2020 சார்வரி வருஷம் சரத்காலகார்த்தீக சிவராத்ரி 13.12.2020 அன்று தினத்தில் ஸ்ரீமஹாபிரத்யங்கிரா சாந்தியாகத்தில் **“ப்ரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம்”** வெளியிடப்பட்டது.

இந்நூல் காளியை இஷ்டதெய்வமாகக் கொண்டு சிறப்பாக சிறப்பு நாட்களில் வீடுகளில் வழிபாடாற்ற விரும்பும் காளீ உபாஸகர்களுக்கும், காளீ ஆலய பூஜகர்களுக்கும் பெரிதும் உதவும் வகையில் அமைந்துள்ளது. தெய்வத்திருவுருவங்கள் நமக்கு உணர்த்திடும் தத்துவக் கருத்துக்களை உணர்ந்து வழிபடுவதால் சிரத்தையும் பக்தியும் சிறப்புற்று முழுமைபெறும். யாவரும் செய்யத்தக்கவகையில் எளியமுறையிலும் சிறப்பான உபசரிப்புகளோடும் விரிவாக செய்யத்தேவையான வகையிலும் பூசையின் செய்மறை கூறப்பட்டுள்ளதும் அப்பூசைக்குத் தேவையான பலவகை நாமார்ச்சனைகளும் துதிகளும், மந்திரங்களும் இந்நூலில் இடம்பெற்றுள்ளது தனிச்சிறப்பு உடையதாக உள்ளது. ஆகையால் இப்புத்தகத்தைப் பின்பற்றி காளிதேவியை அனைவரும் வழிபடுவது கலியுகத்தில் விரைவில் அருள்தருவதாகும் என்பதில் ஐயமில்லை.

இந்தகாளிகாம்பாள் ஆலயத்தில் காளீயாகங்களை நடத்தி காளீபெருமைகளை எடுத்துரைத்த நூலாசிரியர் இந்த ஆலயத்தில் இந்த

நூலை வெளியிடுவது எங்களையும் கௌரவப்படுத்துவதாக உள்ளது. இதனை எண்ணி பெருமிதம் கொள்வதோடுவாய்ப்பளித்தமைக்கு நன்றியோடு பணிந்து மகிழ்கிறோம்.

இந்நூலை பொதுமக்கள் யாவரும் பெற்றுபயன்பெற வேண்டுகிறோம். பலஅறிஞர்பெருமக்களும் இந்நூலைக் கண்டு அவசியத்தேவையை உணர்த்தியும் வாழ்த்தியும் அணிந்துரைகளை அளித்துள்ளதாக, சிறந்தமுறையில் அமைந்துள்ள இந்நூலை ஆஸ்தீகப்பொதுமக்கள் யாவரும் வேண்டிப்பெற்று பயனுறவேண்டுமாய் கேட்டுக்கொள்கிறோம். இந்த புத்தகத்தை வெளியிடுவதற்கு எங்களுக்கு வாய்ப்பளித்தமைக்கும், நல்வழிகாட்டுதலுக்கும், மணிவிழா கண்டுள்ள எமது குருநாதரை வணங்கி, அவர்களின் சமயத்தொண்டு பல்லாண்டுகள்தொடர்ந்திட எம்பெருமாட்டி ஸ்ரீமாதா காளீகாம்பாளின் திருவருளைவேண்டி வணங்கி வாழ்த்துகின்றோம். நன்றி. வணக்கம்.

இப்படிக்கு

சாக்தச்செம்மல் சிவஸ்ரீ. T.S.S. காளிதாஸ் சிவாசார்யர்.
ஸ்ரீகாளிகாம்பாள் ஆலய ஆசார்யர், சென்னை–1.

अस्य ग्रन्थस्य विषयसङ्ग्रहणे उपयुक्त पुस्तकानि

1. कामिकागमः (प्रतिष्ठामहातन्त्रम्) उत्तरभागः।
2. कारणागमः (प्रतिष्ठामहातन्त्रम्) उत्तरभागः।
3. रौरवोत्तरागमः
4. वातुलशुद्धाख्यम् (आगमरहस्यम्)
5. किरणागमः (चर्यापादः)
6. सिद्धान्तशेखरम्
7. भद्रकालीप्रतिष्ठाविधिः
8. दक्षिणकालिका सपर्या पद्धतिः
9. निरुत्तरतन्त्रम्
10. महानिर्वाण तन्त्रम्
11. काली तन्त्रम्
12. रुद्रयामलम्
13. शक्तियामलम्
14. नवयामल सङ्ग्रहम्
15. कुलार्णव तन्त्रम्
16. काली रहस्यम्
17. आकाशभैरव कल्पम्
18. कालीस्तव मञ्जरी
19. देवीभागवतम्
20. मन्त्र महोदधिः (नवमस्तरङ्गः)
21. प्रपञ्चसार सङ्ग्रहम्
22. कालीपुराणम्
23. कुलप्रकाश तन्त्रम्
24. सकलागम सार सङ्ग्रहम्

श्रीशिवाभ्यांनमः

प्रत्यङ्गिरा सपर्या सर्वस्वम्

विषयानुक्रमणिका

संख्या	विषयः/शीर्षकं	पत्रसंख्या
	प्रत्यङ्गिरा प्रभावादि विषयः (विभागः-1)	
1.	प्रत्यङ्गिरा पटलम्	2
	देवी भैरव संवादः	2
	प्रत्यङ्गिरा पञ्चाङ्गम्	4
	प्रत्यङ्गिरा मन्त्रोद्धारः	4
	मन्त्र प्रभावः	4
	मन्त्र पुरश्चर्या क्रमः	5
	पुरश्चरण मुख्यता	5
	मन्त्र जपविधि :	5
	यन्त्रोद्धारः (चक्र कल्पनम्)	6
	यन्त्र पूजाविधिः	6
	अष्टकर्म प्रयोगविधिः	7
	मन्त्र पुरश्चरण विधिः	9
	पुरश्चरण फल विधिः	
	पारायणार्ह विषयाः (विभागः-2)	
2.	प्रत्यङ्गिरा कवचम् (रुद्रयामळतन्त्रस्थम्)	11
3.	प्रत्यङ्गिरा सहस्रनाम स्तोत्रम्	13
4.	श्री काली अर्गलम्	26
5.	त्रैलोक्यविजय कवचम् (अष्टश्लोकी)	29
6.	श्री काली प्रत्यङ्गिरा विद्याकवचम् (रिपुनाशिनीविद्या)	31
7.	श्री एकाक्षरी काळीकवचम् (शक्तियामळोक्तम्)	35
8.	श्री ऋग्वेदोक्त प्रत्यङ्गिरा सूक्तम्	36
9.	अथर्व वेद प्रत्यङ्गिरा सूक्तम् ॥	42
10.	रक्षोहण सूक्तम्	46

संख्या	विषयः/शीर्षकं	पत्रसंख्या
11.	स्वस्ति सूक्तम् & अभयंकर सूक्तम्	48
12.	दुर्गा सूक्तम्	49
13.	श्री कालिका उपनिषत् (अथर्व वेदोक्तः)	50
14.	देव्युपनिषत्।	51
15.	बह्वृचोपनिषत्।	53
16.	श्री कालिका हृदयस्तोत्रम्	54
17.	श्री काली ककारादि नामशताष्टक स्तोत्रम्	55
18.	भैरवी अष्टोत्तर शतनाम स्तोत्रम्	57
19.	भैरवी स्तोत्रम् (भैरवी स्तवराजः)	60
	मन्त्रिणः अनुष्ठान विषयाः (विभागः - 3)	
20.	साधकनित्यान्हिक पूजोहामादिकृत्य कारिका	64
21.	प्राणप्रतिष्ठायां भावना विशेषः	85
22.	मूर्तिकलाकर्षण कालविधिः	85
23.	कलाकर्षणे कलाभेदविधिः	85
24.	आवाहनकृत्ये नैवेद्यविधिः (मधुपर्क कल्पनम्)	86
25.	मन्त्राणांकाम्यकर्म प्रयोगविधिः (षट् कर्मणां लक्षणम्)	86
26.	शाक्तोपासना क्रमः (प्रत्यङ्गिरा मन्त्रसाधन विधिः)	95
	काल्याः काम्यार्चन विषयाः (विभागः-4)	
27.	कालिकार्चन कालविधानम् (प्रत्यङ्गिरा काम्यपूजा कारिका)	119
28.	श्री भद्रकाली यन्त्र विधानम्	123
29.	प्रत्यङ्गिरा पूजायन्त्र स्वरूपम्	125
30.	काळी प्रतिमायाः रत्नन्यास विधिः (रौरवोत्तरआगमे)	126
31.	प्रायश्चित्तकर्मसु शान्तिहोमविधिः (कामिकागमे पटले)	128
32.	दक्षिणाम्नाय देवतामन्त्र संग्रहः	131
33.	दक्षिणाम्नाये मन्त्रविशेषाः	136
34.	कालीकुलादि विद्याविवरणम्	138
35.	प्रत्यङ्गिराम्बा मन्त्रप्रभेदाः	143
36.	महाप्रत्यङ्गिरा - ब्रह्मविद्या स्तुतिः (सहस्रशीर्षा, शताष्टभुजा)	151
37.	होमे - प्रत्यङ्गिरा मन्त्रप्रयोग भेदाः	152

संख्या	विषयः/शीर्षकं	पत्रसंख्या
38.	काम्यविधौ प्रत्यङ्गिरामन्त्राणां प्रयोगप्रकाराः (लौकिकाग्नौ होमः)	154
	जप्यमन्त्राणां जपविधिः & ध्यानानि (विभागः-5)	
39.	कराङ्गुलि जपविधिः (करमाला प्रकारः)	160
40.	श्री दुर्गागणपति मन्त्र जपविधिः	161
41.	मेधादक्षिणामूर्ति मन्त्र जपविधिः	163
42.	अपस्मारनिवर्तक दक्षिणामूर्तिमन्त्र जपविधिः	164
43.	गुरुतारक पञ्चाक्षरमन्त्र जपविधिः	165
44.	अजपा हंसगायत्रीमन्त्र जपविधिः	166
45.	शक्तिपञ्चाक्षरमन्त्र जपविधिः	167
46.	भुवनेश्वरीमन्त्र जपविधिः	168
47.	प्रत्यङ्गिरा एकाक्षरी जपविधिः	169
48.	अथर्वणभद्रकाळी मन्त्र जपविधिः (विंशत्यक्षरमन्त्रः)(20 वर्णाः)	169
49.	प्रत्यङ्गिरामन्त्र जपविधिः (द्वाविंशति अक्षरात्मकः 22 वर्णाः)	170
50.	प्रत्यङ्गिरा मूलमन्त्र उद्धारविधिः (षड्विंशतिवर्णात्मिका 26 वर्णाः)	171
51.	प्रत्यङ्गिरामूलमन्त्र जपविधिः	171
52.	अथर्वणभद्रकाली प्रत्यङ्गिराविद्या जपविधिः	173
53.	कालीसूक्त मन्त्राः (रिपुमारकपञ्चमन्त्राः)	174
54.	प्रत्यंगिरा वेदमन्त्रोद्धार विधिः (३७ अक्षरः) (शत्रुकृत्यनाशकः)	174
55.	प्रत्यङ्गिराऋचः जपविधिः	174
56.	प्रत्यङ्गिरामन्त्र प्रयोगः (शत्रुकृत्यविनाशने)	175
57.	स्वदेहे मन्त्रपद न्यासक्रमः (चतुर्दशपदानि)	176
58.	मन्त्र ऋष्यादि न्यासक्रमः (मन्त्र जपविधिः)	176
59.	प्रत्यङ्गिरा ऋग्वेदमन्त्र जपविधिः	177
60.	प्रत्यङ्गिराङ्ग षोडशाक्षर मन्त्रोद्धारः (शत्रुनाशकमन्त्रः षट्देवताकः)	178
61.	रिपुमारक षोडशाक्षर मन्त्र जपविधिः (16वर्णाः)	179
62.	प्रत्यङ्गिरास्त्र अस्त्र मन्त्र जपविधिः (100 वर्णाः)	181
63.	प्रत्यङ्गिरा वेदमन्त्र जपविधिः	183
64.	प्रत्यङ्गिराऋचां जपविधिः	184
65.	प्रत्यङ्गिरायाः श्रौतऋचां जपविधिः	185

संख्या	विषयः/शीर्षकं	पत्रसंख्या
66.	प्रत्यङ्गिरा ऋचः जपविधिः	188
67.	मालामन्त्रस्य उद्धारविधिः	
68.	प्रत्यङ्गिरा माल मन्त्रस्य - सिद्धिप्रकारविधिः	189
69.	मायाबीज मन्त्रोद्धारः (ह्रीं बीजाक्षरोद्भवः जपमाला मन्त्रः)	190
70.	उग्रकृत्या प्रत्यङ्गिरा महामालामन्त्र जपविधिः	191
71.	उग्रकृत्या स्वरूपध्यानम्	192
72.	श्री महा महा प्रत्यङ्गिरा महा खड्गमाला स्तोत्र मन्त्रः (द्विसहस्राक्षरी महाविद्या 2000 वर्णाः)	193
73.	महाकाळभैरव जपविधिः	199
74.	महाकालभैरव जपविधिः	201
75.	कालभैरवमन्त्र जपविधिः	202
76.	स्वर्णाकर्षणभैरव स्तुतिमन्त्रः	204
77.	स्वर्णाकर्षण भैरवमन्त्र जपविधिः	205
78.	भैरवाष्टमूर्तीश्वर नामानि	207
79.	भैरवेश्वरयागे सप्तविंशतिमूर्तयः (27 देवताः)	207
80.	भैरव मन्त्रोद्धारः	207
81.	भैरव मूर्तिभेद ध्यानानि (32)	208
82.	वटुकभैरव ध्यानम् (श्वानाधिरूढ भैरवः)	218
83	वटुकनाथ ध्यानम्	218
84.	महावटुक ध्यानम्	218
85.	आकाशभैरव ध्यानम्	218
86.	अष्टभैरव समष्टि ध्यानम्	219
87.	वटुकभैरव ध्यानम्	219
88.	सिद्धभैरव ध्यानम्	219
89.	स्वर्णाकर्षणभैरव ध्यानम्	220
90.	अष्टभैरव ध्यानानि	221
91.	असिताङ्गदीनां शक्तयः - (अष्टभैरवि नामानि)	223
92.	भैरव पञ्चावरण लघु पूजाक्रमः	223
93.	श्वानवाहन ध्यानम् (भैरवस्य वाहनपूजा)	223

संख्या	विषयः/शीर्षकं	पत्रसंख्या
94.	पूजायां गायत्रीमन्त्र प्रयोगविधिः	223
95.	शरभेश्वरमन्त्र जपविधिः	224
96.	पक्षिराज शरभेश्वरमन्त्र जपविधिः	226
97.	साळुव शरभेश्वरमन्त्र जपविधिः	228
98.	शरभेश्वरमन्त्र प्रयोगः	229
99.	शरभेश्वरस्य अथर्वणवेद् मन्त्रः	229
100.	पक्षिराज शरभेश्वर आकाशभैरवमूर्तिमन्त्रः	229
101.	शरभेश्वर स्तुतिः (निग्रहदारुण सप्तकम्)	230
102.	शूलिनी दुर्गामन्त्र जपविधिः	232
103.	आसुरी दुर्गामन्त्र जपविधिः	234
104	जातवेदोमन्त्र दुर्गारक्षाकर यन्त्रविधानम्	236
105.	दुर्गायाः रक्षाकरयन्त्रम् (धारणयन्त्रम्)	237
106.	जातवेदोमन्त्र यन्त्रलक्षणम्	237
107.	ग्रहग्रस्त क्रिया नियमः	238
108.	कृत्या शन्तिकर यन्त्रविधानम्	239
109.	यांकल्पयन्तीमन्त्र यन्त्रलक्षणम्	240
110.	प्रत्यङ्गिरायाः कृत्याशान्तिकर यन्त्रम् (धारणयन्त्रम्)	240
111.	वीरभद्रमन्त्र जपविधिः	241
112.	वीरभद्रमन्त्र जपविधिः	243
113.	वीरभद्रमन्त्र जपविधिः (रक्षाप्रधानोयं मन्त्रः)	244
114.	वीरभद्रपूजाक्रमः (लघुपक्षः)	245
115.	भद्रकाळीमन्त्र जपविधिः	246
116.	भद्रकाळी मालामन्त्राः (मन्त्रभेदः)	247
117.	भद्रकाळीमन्त्र जपविधिः (रक्षाकरमन्त्रोश)	248
118.	भद्रकाळीमन्त्रः जपविधिः	249
119.	रक्तचामुण्डीमन्त्र जपविधिः	250
120.	चामुण्डी मालामन्त्रः	251
121.	महाशास्तृमन्त्र जपविधिः	252
122.	धात्री स्वरूपोक्तिः (वैखानसागमे)	253

संख्या	विषय:/शीर्षकं	पत्रसंख्या
123.	प्रत्यङ्गिरा रूपभेद ध्यानानि (21)	253
124.	अष्टमातृ ध्यानानि	259
	मन्त्राणां पुरश्चरण विषया: (विभाग:-6)	
125.	पुरश्चरण प्रयोग: (मन्त्रोपासकानां मन्त्रप्रयोग विधि:)	262
126.	मन्त्र पुरश्चरणस्य आवश्यकता	262
127.	पुरश्चरणक्रिया परिचय:	262
128.	स्थाननिर्णय:	262
129.	वर्ज्य भक्ष्यादि नियम:	263
130.	साधकस्य आचरणीया: धर्मा:	263
131.	जपविधौ पूजाविधि:	263
132.	जपकाले वर्ज्या: नियमा:	263
133.	जपनियम:	263
134.	जपकाले भावनाविधि:	263
135.	होमनियम:	264
136.	गुरुपूजा	264
137.	सुवासिनीपूजा	264
138.	ग्रहणकाले पुरश्चरणम्	264
139.	पुरश्चरण काल:	264
140.	पुरश्चरण प्रयोग: (मन्त्रोपासकानां)	265
	मन्त्राणां प्रयोग विषया: (विभाग:-7)	
141.	दिनास्त्र कृत्यास्त्र मन्त्रयो: प्रयोगविधि:	268
142.	मूलमन्त्र प्रतिलोम क्रम:	268
143.	मन्त्रवर्ण प्रयोगविधि:	268
144.	सर्वमन्त्राणां साधारण चतुरङ्गविधि:	269
	काळीपूजाङ्ग मन्त्रन्यासावळि: (विभाग:-8)	
145.	भद्रकाळी प्रतिष्ठायागशाला कलशस्थानानि च	271
146.	भद्रकाळीप्रतिष्ठा यागमण्डप देवतार्चनम्	272
147.	काळीआलय नित्यद्वार पूजा	273
148.	काळीपूजाङ्ग मन्त्रन्यासावळि:	275

संख्या	विषयः/शीर्षकं	पत्रसंख्या
149.	कालिका ब्रह्मशक्ति न्यासः	275
150.	पञ्चकला शक्ति न्यासः	275
151.	पञ्चकालिका न्यासः	275
152.	मातृगणशक्ति न्यासकारिका	275
153.	मातृगण न्यासः	276
154.	अष्टत्रिंशत्कला न्यासः (38 कला)	276
155.	पञ्चविंशति गौरीकला न्यासः (25 कलाः)	278
156.	कालीगायत्री न्यासः	279
157.	विश्वमातृ न्यासः (प्रकारान्तरेण)	279
158.	त्रितत्वशक्ति न्यासः	279
159.	अन्तर्मातृका सप्तपीठेश्वरी न्यासः	280
160.	काली बहिर्मातृका न्यासः	283
161.	श्रीकण्ठादि मातृका न्यासः	286
162.	प्रत्यङ्गिरा मातृका न्यासः	291
163.	अन्तमातृकाभैरव न्यासः (षड्क्रमातृकान्यासः)	294
164.	भैरव्यम्बा न्यासः	296
165.	भद्रकाळी मालामन्त्रपद न्यासः	297
166.	प्रत्यङ्गिरा प्राणप्रतिष्ठा न्यासः	299
167.	प्राणशक्ति पीठदेवता न्यासः	302
168.	प्रत्यङ्गिरा पीठशक्ति न्यासः	304
169.	प्राणशक्ति ध्यानानि	305
170.	प्राणप्रतिष्ठामन्त्र न्यासः	305
171.	जीवन्यासे कर्तव्य विधिः	306
172.	नवदूतिका न्यासः	307
173.	नवयोनि न्यासः (अवयवानां त्रिकोणाकारेषु)	310
174.	पञ्चमहाभूत न्यासः	311
175.	शक्तिबीज न्यासः (भुवनेश्वरी कुण्डलिनीबीज न्यासः)	311
176.	षोढा न्यासः (षड्प्रकार न्यासः)	312
177.	योगिनी न्यासः	314

संख्या	विषय:/शीर्षकं	पत्रसंख्या
178.	कलामातृका न्यास:	319
179.	लोकमातृशक्ति न्यास:	321
180.	हंस न्यास:	322
181.	देहे त्रिखण्डे त्रिमूर्तिकला न्यास:	323
	प्रत्यङ्गिरा पूजाविषया: (विभाग:-9)	
182.	प्रत्यङ्गिरा पूजाचक्रम् (यन्त्ररूपम्)	325
183.	यन्त्रोद्धार: (चक्रकल्पनम्)	325
184.	प्रत्यङ्गिरायन्त्र नवावरण लघुपूजा (सृष्टिक्रम:)	326
185.	प्रत्यङ्गिरा सपर्या पद्धति:	329
	गुरुप्रणाम मंत्रा:	329
	स्वदेह षट्चक्रार्चनम् (कुण्डलिनी योगाभ्यास:)	330
	अजपा जप समर्पणम्	332
	करन्यास:	333
	षडङ्गन्यास:	333
	भूमिदेवी प्रार्थना	334
	तान्त्रिक स्नानम्	334
	शाक्तानुष्ठानम् (सन्ध्याप्रयोग:)	334
	शाक्ततर्पणम् (प्रयोग:)	335
	गृहाराधनम् - (स्वगृहे - स्वार्थपूजनम्)	336
	प्राणायामत्रयम्	337
	भूतशुद्धि क्रिया प्रयोग:	337
	प्राणप्रतिष्ठा मन्त्र:	338
	मूलमन्त्रऋष्यादि न्यास:	338
	मूलमन्त्र करन्यास:	338
	अथ स्वमूल करन्यास:	338
	मूलमन्त्र षडङ्गन्यास:	338
	मातृकान्यासक्रम:	339
	षडङ्गन्यास:	340
	षट्चक्र अन्तर्मातृका न्यास:-	340

संख्या	विषयः/शीर्षकं	पत्रसंख्या
	देहे - बहिर्मातृका न्यासः	341
	बीजत्रय विद्यान्यासः	343
	नवयोनि न्यासः	343
	षडङ्गन्यासः	343
	देवी पीठपूजा (अर्चकदेहे)	344
	देवी मानसपूजा	346
	शङ्खादि पात्रपूजा	346
	आवाहनादि पूजनम् (प्रत्यङ्गिरा महायन्त्रे पूजाक्रमः)	349
	नीराजनम्	350
	नैवेद्यम्	350
186.	प्रत्यङ्गिरा द्वादशावरण पूजा (लयक्रमा) (बाह्य चतुरश्ररेखायाःआरभ्य मध्यान्तं क्रमेण पूजयेत्)	351
187.	प्रत्यङ्गिरा आवरण देवतार्चनम्	355
	प्रत्यङ्गिरा होम विषयाः (विभागः-10)	
189.	नवदिन शान्तिहोम नवकुण्डपक्ष कलासूत्र यागशाला	359
190.	श्री भद्रकाली नैमित्तिकार्चनार्हं - मनुसूत्र यागशाला	360
191.	प्रत्यङ्गिराहोम प्रयोगः	361
	कुण्डसंस्कारः	361
	अग्नेः पित्रोः पूजनम्	361
	गर्भाग्नि संस्कारः	361
	वह्निजिह्वा न्यासः	363
	अग्न्यधिष्ठाता न्यासः	364
	अग्निमन्त्र ऋष्यादि न्यासः	364
	अग्निनाममन्त्र करन्यासः	364
	अग्नि नाममन्त्र षडङ्गन्यासः	365
	अग्नेः अष्टमूर्ति न्यासः	365
	अग्नेः पीठन्यास पूजा	365
	देवीपीठ पूजा	366
	वह्नेः प्राणप्रतिष्ठा	369

संख्या	विषय:/शीर्षकं	पत्रसंख्या
	पात्र साधनम्	370
	ब्रह्मार्चनम् (ब्रह्मा नियमनम्)	370
	स्रुक्स्रुव संस्कार:	370
	आज्य संस्कारा:	371
	अग्ने: षोडश संस्कारा:	371
	अग्ने: पित्रो: विसर्जनम्	372
	होमारम्भ:	373
	प्रत्यङ्गिराहोम: (देव्याहुति:)	373
	प्रत्यङ्गिरा आवरण देवता होम:	373
	देव्या: निजकरधृत आयुध हवनम्	377
	प्रत्यङ्गिराहोम पूर्णाहुति:	377
192.	नित्यहोम बलिक्रम:	378
193.	बलिदान प्रयोग:	378
194.	आत्मार्णणम्	379
195.	देव्यै आत्मार्पण मन्त्र:	379
196.	क्षमा प्रार्थना	379
197.	देव्या: उद्वासने प्रार्थना	380
198.	चण्डेश्वरीपूजा	381
199.	मूलाधारे कुण्डलीध्यान कारिका	381
200	कुण्डलिनीप्रयोग:	381
	देवी प्रीत्यर्चन विषया: (विभाग:-11)	
201.	कुमारीपूजा विधि:, लक्षणं च	383
202.	कुमारीपूजा प्रयोग:	383
203.	कुमारीपूजा मन्त्रा:	384
204	सुवासिनी पूजा (पतिपुत्रवतीं सतीं यजेत्)	386
205.	सुवासिनी पूजामन्त्र:	386
206.	सुवासिनीदेवी पादुकाध्यानम्	386
207.	बिल्ववृक्ष पूजा	387
208.	नवपत्रिकार्चन विधि:	387

संख्या	विषय:/शीर्षकं	पत्रसंख्या
209	नवपत्रिका ग्रहणविधि: (दमनपूजावत् कृत्यम्)	387
210	सप्तकन्यका नामानि	387
211.	सप्तकन्यका ध्यानानि	388
212.	कन्यागायत्री मन्त्र: (सप्तकन्यानां समान:)	389
213.	कन्यापूजा क्रम:	389
	प्रत्यङ्गिराहोम बलिदान विषया: (विभाग:-12)	
214.	खड्गेशार्चनम्	391
215.	खड्गायुध प्रार्थना (पञ्चश्लोकी)	392
216.	सिंहवाहन पूजाक्रम:	393
217.	सिंहवाहन गायत्रीमन्त्र:	393
218.	सिंही सिंहशक्ति गायत्री मन्त्र:	394
219.	सिंहस्य अष्टपरिवार नामानि	394
220.	सिंहीशक्ति परिवारिका:	394
221.	बलिपीठार्चन प्रयोग: (भद्रकाल्या:)	395
222.	नवसन्धिबलि स्थानेषु बलिदान क्रम:	398
223.	चतुष्षष्टि भैरव बलिमण्डलम्	410
224.	चतुष्षष्टि भैरव नामावली	410
225.	चतु:षष्टि भैरवार्चनम्	411
226.	भैरव अष्टोत्तरशतनाम स्तोत्रम्	414
227.	चतुष्षष्टि योगिनी नामानि	415
228.	चतुष्षष्टि योगिनी बलिमण्डलम्	416
229.	चतुष्षष्टि योगिनीपूजा	416
230.	प्रत्यङ्गिराम्बाया: महाचक्रस्वरूपे नवावरण देवतार्चन विवरणम् (खड्गमालामन्त्रोक्तम्)	419
	शैवागमोक्ता: पूजा & होम विषया: (विभाग:-13)	
231.	प्रत्यङ्गिरा शान्तिहोम प्रयोग: (शैवागमोक्त:)	422
232	कलशस्थापनम्	422
233	शान्तिकार्चन काल विधि: (होम कालविधानम्)	422
234.	प्रत्यङ्गिरा पूजा प्रयोग:	423

संख्या	विषय:/शीर्षकं	पत्रसंख्या
235.	प्रत्यङ्गिरा यागक्रम: (षड्विधद्रव्यैः षड्वार शताहुति क्रम:)	429
236.	दशदिक्षु बलिहरणमन्त्र: (अष्टषष्ठ्यर्णमन्त्र:६८)	437
	प्रत्यङ्गिराकाली स्तोत्रभाग: (विभाग:-14)	
237.	प्रत्यङ्गिरा स्तोत्रम्	439
238.	भुवनेशी स्तवराज अष्टकम्	447
239.	काली स्तुत्यष्टकम् (ब्रह्मणा प्रोक्तम्)	448
240.	काळरात्री सप्तश्लोकी (देवीभागवते)	450
241.	कालिकाष्टकम् (शङ्कराचार्य कृतम्)	451
242.	काली क्षमापण स्तोत्रम् (स्तुति पञ्चदशी)	452
243.	प्रत्यङ्गिरा स्तव:/प्रत्यङ्गिरा चतुर्दश नामानि शत्रुघ्नानि	454
244.	काळी स्तुति पञ्चकम्	455
	अर्चनाया: नामावलि भाग: (विभाग:-15)	
245.	प्रत्यङ्गिरा सहस्र नामावळि: (1000 नामानि)	457
246.	कालीनाम शताष्टक ककारादि नामावळि: (108 नामानि)	478
247.	भैरवी अष्टोत्तरशत नामावळि: (108 नामानि)	482
248.	प्रत्यङ्गिरा अष्टोत्तर शतनामावळि: (108 नामानि)	485
	अनुबन्धविषया: (विभाग:-16)	
249.	ग्रहभेद अष्टादश ग्रहनामानि	489
250.	अष्टादश ग्रहगणस्य - गुणरूपाणि	489
251.	भूतलक्षणम्	492
252.	दशविध भूतावेश प्रकार:	492
253.	अपस्मार लक्षणम्	492
254.	अपस्मारस्य - द्वादश शक्तय:	493
255.	काम्यार्चनादौ मुद्राया: मुख्यता	493
256.	शाक्त शान्तिस्तव:	494
257.	शैव आशीर्वाद श्लोका:	495

ऊर्ध्वकेशीं च सिंहस्थां चन्द्रांकित शिरोरुहाम्।
कपाल शूल डमरू नागपाश धरां शुभाम्।
प्रत्यङ्गिरां भजे नित्यं सर्वशत्रु निवाशिनीम्।।

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

प्रत्यङ्गिरा प्रभावादि विषयः

विभागः - 1

प्रत्यङ्गिरा पटल:

श्री गणेशाय नम:

देवी भैरव संवाद:

देव्युवाच -

मेरुपृष्ठे सुखासीनं भैरवं परमेश्वरम्।
प्रसन्नवदनं देवं नागयज्ञोपवीतिनम्। 1

गजचर्म परीधानं भूतिभूषण विग्रहम्।।
कपालमाला भरणं गंगावीचि रवाकुलम्।। 2

चन्द्रार्धार्चित मूर्धानं सर्पकंकण नूपुरम्।
खट्वाङ्ग शूल पाशासि विभूषित करांबुजम्।। 3

वामांकस्थित गौरीशं देवगन्धर्व सेवितम्।।
यक्षेन्द्र किन्नरनुतं ब्रह्माच्युत नमस्कृतम्।। 4

भैरव उवाच -

प्रहसन्तं जपन्तं च ध्यायन्तं च मुहु र्मुहुः ।
स्मितपूर्वं प्रणम्यादौ बद्धाञ्जलि पुटं ततः।। 5
उत्थाय पार्वती देवी भगवन्त मभाषत।।

देव्युवाच -

भगवंस्त्वं परो देव स्त्रैलोक्य प्रभु रीश्वरः।। 6
त्रिगुणात्मा गुणातीत श्चित्स्वरूपो निरंजनः।।

सकलो निष्कलो देवः सत्तारूपो महेश्वरः।। 7
त्वं किं जपसि देवेश ममाद्य विदितं तु यत्।

तत्समाचक्ष्व सकलं यद्यहं तव वल्लभा।। 8

भैरव उवाच -

एतद्गुह्यतमं लोके न कस्य कथितं मया।
तथापि तव देवेशि भक्त्या गुह्यं वदाम्यहम् ।। 9

या देवी लोकमातेति महामाहेश्वरी शिवा।
प्रत्यंगिरेति विख्याता षड्विंशति सुवर्णिका।। 10

सृजते सकलं विश्वं बिभर्ति परमांबिका।
अन्ते सहायकर्त्री च संहरिष्यति तामसी।। 11

गुणत्रय मयी विद्या महा दारिद्र्य वारिणि।।
तस्याः पंञ्चांङ्ग मीशानि पठाम्यह महर्निशम्।। 12

जपे विद्यां सर्वमेतां वर्म नाम सहस्रकम्।।
स्तवं मन्त्रमयं देवि पठामि परमेश्वरीम्।। 13

तत्प्रसादा दहं देवि त्रैलोक्य प्रभु रीश्वरः।
भैरवो भैरवादेशः सृष्टि स्थिति लयात्मकः।। 14

प्रत्यङ्गिरा पञ्चाङ्गम्

देव्युवाच -

भगवन् देवदेवेश निःशेष करुणाकर।।
देव्याः प्रत्यङ्गिरायाश्च पञ्चाङ्गं वक्तु मर्हसि।। 15

भैरव उवाच -

पटलं पद्धतिं चैव वर्म नाम सहस्रकम्।।
स्तोत्रं मन्त्रमयं देवि वक्ष्ये लोक हितेच्छया।। 16

अत्रादौ पटलं दिव्यं मूलमन्त्रमयं परम्।
सयन्त्र मन्त्र सहितं प्रयोग सहितं श्रुणु।। 17

प्रत्यङ्गिरा मन्त्रोद्धारः

प्रणवं वाग्भवं माया लक्ष्मीः प्रत्यंगिरे ति च।
मम रक्ष द्वयं देवि मम शत्रून् पदं मयि।। 18

भक्ष द्वयं च प्रणवं स्वाहान्तो मन्त्र उत्तमः ।
एषा विद्या मया ख्याता परमानन्द दायिनी।। 19

मन्त्र प्रभावः

भोगदा सुखदा देवि राज्यदा धनदा तथा ।
सिद्धिमोक्ष प्रदा विद्या परा सायुज्य दायिनी।। 20

गुरुपाद प्रसादेन श्रीविद्या यदि लभ्यते।
विना गुरूपदेशेन नान्यत् सिध्यति भारती।। 21

नस्वान्तरायो न क्लेशो न शौच नियमोऽपि वा ।
साक्षात् सिद्धिप्रदो देवि मन्त्रोऽयं भोग मोक्षदः ।। 22

मन्त्र पुरश्चर्या क्रमः

वर्णलक्षं पुरश्चर्या तदर्धं वा महेश्वरि।
एकलक्षावधिं कुर्यान् नातो न्यूनं कदाचन।। 23

जपात् दशांशतो होमः तद्दशांशेन तर्पणम्।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम्।। 24

पुरश्चरण मुख्यता

वटे ऽरण्ये श्मशाने च शून्यागारे चतुष्पथे।
अर्धरात्रे च मध्याह्ने पुरश्चरण मारभेत्।। 25

जीवहीनो यथा देहः सर्वं कर्मसु न क्षमः।
पुरश्चरण हीनो यो न मंत्रः फलदायकः।। 26

मन्त्र जपविधि :

मन्त्र मुत्कीलये दादौ मन्त्रं सं जीवयेत् ततः।।
निष्कौटिल्यं चरेत्पश्चत् ततः शापहरीं जपेत् ।। 27

सिद्धमन्त्रं जपेत्शुद्धं ततः संपुटितं चरेत्।
क्रमेणानेन देवेशि श्रीविद्यां यो जपेत्सुधीः ।। 28

स साधको भवेल्लोके भोगी सायुज्य माप्नुयात्।
मन्त्र स्यास्य मुनिश्चैव महाभैरव एव च ।। 29

अनुष्टुप् छन्द इत्युक्तः श्रीमत्प्रत्यंगिरे ति च।
देवता स्यात्परा बीजं शक्तिः स्वाहा च कीलकम् ।। 30

भोगा पवर्ग सिद्ध्यर्थं विनियोग इति स्मृतः।
ध्यान मस्या : प्रवक्ष्यामि सर्वतन्त्रेषु गोपितम्।। 31

आशांबरा मुक्तकचा घनच्छविः
ध्येया सचर्मासि कराहिभूषणा।
दंष्ट्रोग्र वक्त्रा ग्रसिता हिता त्वया
प्रत्यङ्गिरा शंकर तेजसे रिता ।। 32

यन्त्रोद्धार: (चक्र कल्पनम्)

यन्त्रोद्धारं प्रवक्ष्यामि सर्वसिद्धि प्रवर्तकम्।
सर्वसंमोहनं चक्रं सर्वाशा परिपूरकम्।। 33

बिन्दु त्रिकोणं वसुकोण युक्तं -
वृत्ताष्टपत्रं च त्रिवृत्त युक्तम्।
भूगेह लक्ष्मी रचितं च सिद्धिदं
प्रात्यङ्गिरं चक्र मेतन् मयोक्तम्।। 34

यन्त्र पूजाविधि:

लयांग मस्य वक्ष्यामि यन्त्रराजस्य पार्वति।।
येन श्रवणमात्रेण कोटिपूजाफलं लभेत्।। 35

इन्द्राद्या लोकपालाश्च ब्रह्मानन्ताङ्किता: प्रिये।।
वज्रादि हेतिसंयुक्ता: पूज्या भूगेह मण्डले।। 36

बायव्येशान पर्यन्तं दिव्यसिद्धौघ माप्नुयात्।।
गुरूश्च पूजयेद् देवि पङ्क्ति त्रितय मध्यगान्।। 37

ब्रह्माद्या मातर: पूज्या भैरवाष्टक संयुता:।
वामावर्तं क्रमेणैव रक्तपुष्पै र्विशेषत:।। 38

स्तंभिनी मोहिनी चैव क्षोभिणी द्राविणी तथा।
जृंभिणी भ्रामिणी रौद्री तथा संहारिणी ति च।। 39

वसुकोणे परा पूज्या महाचीन क्रमेच्छुभि:।।
वामावर्तेन देवेशि परमार्थ प्रदा सदा।। 40

काली च भद्रकाली च नित्याकाली त्रिकोणगा:।।
एता: सं पूजनीया स्तु शिवाग्नी वाम भागत: ।। 41

देवीं रत्नमयीं पात्रे सौवर्णे पूजये त्सुधी: ।
लयांग मेत दाख्यातं सर्वसिद्धि प्रदं शिवे।। 42

अष्टकर्म प्रयोगविधिः

प्रयोगान् अष्ट वक्ष्येऽहं श्रृणुष्वावहिता प्रिये।
स्तंभनं मोहनं चैव मारणा कर्षणे ततः।। 43

वशीकरो च्चाटनाख्ये शान्तिकं पौष्टिकं ततः।
एतेषां साधनं वक्ष्ये मंत्रसिद्धि प्रवर्तकम्। 44

स्तम्भनम्

येन श्रवण मात्रेण मन्त्रः कल्पद्रुमो भवेत्।
रवौ स्नात्वा जपेन्मूलं वटमूलं महेश्वरि।। 45

अयुतं तद्दशांशेन हुने दाज्य सितां शटीम्।
गोधूमं मधुना लोड्यं स्तंभये द्वादिनां रसान्।। 46

जलसूर्येन्दु वातानां गति रेषां च कामिनाम्।

मोहनम्

अश्वत्थस्य तले जप्त्वा मूलविद्यां यथा विधि।। 47

अयुतं तद्दशांशेन जुहुयात्सर्पि रेणजम्।
मांसं कणा शटी मिश्रं मोहनं जगतां भवेत्।। 48

मारणम्

कुजे वा शनिवारे वा पित्र्यर्क्षे विष्टि संगमे।
गत्वा श्मशानं देवेशि नत्वा दिग्भूत भैरवान्।। 49

चितां संपूज्य वीरेशो जपेत् अयुत संख्या।
चिताग्नौ जुहुया दाज्यं गुरुपुष्पे शतावरीम्।। 50

चंडालकेश नखर दन्त मिश्रां च साधकः।
तर्पयेत् तद्दशांशेन भोजयेत् पात्रपूर्वकम्।। 51

शत्रु मृत्यु समानोऽपि मृत्यु मायाति नान्यथा ।

कर्षणम्

करेरिमूले गिरिजे जपेन्मूलं शिवेऽयुतम् ।। 52

हुनेदाज्यं वचां शुण्ठीं वानर्यातिबला समम्।
मेनका पीनवक्षोजा स्वस्थाभ्या कर्षिता भवेत्।। 53

वशीकरणम्

वानीरमूले देवेशि जपे दयुत संख्यया ।
हुनेदाज्ये ह्यरघूतं नागवल्ली दलाङ्कितम्।। 54

भूबिंबं तर्पयेद्देवीं दशांशेनैव साधकः।
शक्रोऽपि दासतां याति किं पुनः क्षुद्र मानुषः ।। 55

उच्चाटनम्

क्रूरर्क्षे क्रूरवेलायां जपेत् प्रेतालये मनुम्।
अयुतं तु चितावह्नौ हुनेत् सर्पिः कणौषणान्।। 56

जातीफलं पलं मैंष खर रोमाणि पार्वति।
रिपूणां सहसा देवि भवे दुच्चाटनं परम्।। 57

शान्तिकम्

नदीकूले जपेन्मंत्र मयुतं साधकोत्तमम् ।
तद्दशांशं हुनेत् आज्यं समृद्धीकं सपायसम्।। 58

कनकं तागरं रात्रौ तर्पयेत् तद्दशांशतः ।
अतिवृष्टे रनावृष्टे मांरी भीते मंहेश्वरि।। 59

राजभीते महा व्याघ्रात् सद्यः शान्तिः प्रजायते।

पौष्टिकम्

महापर्वं दिने देवि यत्र तत्र जपे न्मनुम्।। 60

अयुतं तद्दशांशेन जुहुया दाज्य पायसम्।
शैलं सिन्दूर मिश्रं च सपलं सलवङ्गकम्।। 61

ऐणं मांसं शरं मीनं सालं च सकुलुत्थकम्।।
सासवं शुकसद्धीत रजोव त्यंबरा न्वितम्।। 62

हुत्वा च तर्पयित्वा च भोजयित्वा च साधकान्।
पितृणां देवतानां च ऋषीणां कुलिनां प्रिये।। 63

दिव्यकल्पायुतं देवि महापुष्टिः प्रजायते।

मन्त्र पुरश्चरण विधिः

सर्वथा सर्वदा नित्यं महाविद्यां जपे त्सुधीः ।
दशांशं होमये त्तत्र तर्प्पये त्तद्दशांशतः।। 64

भोजये त्तद्दशांशेन मन्त्री किं किं न साधयेत्।

पुरश्चरण फल विधिः

मूर्खो वागीशतां याति निर्धनो धनवा न्भवेत्।। 65

महा दारिद्रय युक्तोऽपि भवेत् वैश्रवणोपमः।
इह लोके भवेद्भ भोगी परत्र त्रिदिवं भजेत्।। 66

इतीदं मंत्र सर्वस्वं प्रत्यङ्गिरा रहस्यकम्।। 67

पटलं गुह्य मीशानि गोपनीयं स्व योनि वत्।। 68

(इति श्री रुद्रयामले तंत्रे पञ्चाङ्ग खण्डे दशविद्यारहस्ये
प्रत्यङ्गिरापटलं समाप्तम्।।)

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

पारायणार्ह विषयाः

विभागः - 2

१

श्री कालिकाम्बिकायै नमः

प्रत्यङ्गिरा कवचम्

(रुद्रयामळतन्त्रस्थम्)

देव्युवाच –

भगवन् सर्वधर्मज्ञ सर्व शास्त्रार्थ पारग।
देव्या प्रत्यङ्गिरायाश्च कवचं यत्प्रकाशितं।।
सर्वार्थ साधनं नाम कथयस्व मयि प्रभो।। 1

भैरव उवाच –

श्रुणुदेवि प्रवक्ष्यामि कवचं परमाद्भुतम्।
सर्वार्थसाधनं नाम त्रैलोक्येचाति दुर्लभम्।। 2

सर्वसिध्दिमयं देवी सर्वैश्वर्य प्रदायकम्।
पठनात् श्रवनात् मर्त्यः त्रैलोक्यैश्वर्यभाग्भवेत्।। 3

सर्वार्थसाधकस्यास्य कवचस्य ऋषिश्शिवः।
छन्दोविराट् पराशक्तिः जगद्धात्री च देवता।। 4

धर्मार्थ काममोक्षेषु विनियोगः प्रकीर्तितः।
प्रणवं मे शिरः पातु वाग्भवं च ललाटकम्।। 5

ह्रीं पातु दक्षनेत्रं मे लक्ष्मी वामं सुरेश्वरी।
प्रत्यङ्गिरा दक्षकर्णं वामं सुरेश्वरी तथा।। 6

लक्ष्मीः प्राणं सदापातु बन्धनं पातु केशवः।
गौरीतु रसणां पातु कण्ठं पातु महेश्वरः।। 7

स्कन्ददेशं रतिःपातु भुजौतु मकरध्वजः।
शङ्खनिधिः करंपातु वक्षः पद्मनिधिस्तथा।। 8

ब्राह्मीमध्यं सदापातु नाभिं पातु महेश्वरी।
कौमारी पृष्ठदेशंतु गुह्यं रक्षतु वैष्णवी।। 9

वाराही च कटि पातु चैनदी पातु पदद्वयम्।
भार्यां रक्षतु चामुण्डा लक्ष्मी रक्षतु पुत्रकान्।। 10

इन्द्रः पूर्वे सदा पातु आग्नेय्यां अग्नि देवता।
याम्ये यमः सदा पातु नैऋत्यां निऋतिस्तथा।। 11

पश्चिमे वरुणः पातु वायव्यां वायुदेवता।
सौम्यां सोम स्सदा पातु चैशान्यां ईश्वरो विभुः।। 12

ऊर्ध्वं प्रजापतिः पातु अधश्चानन्त देवता।
राजद्वारे श्मशाने चा रण्ये च प्रान्तरे तथा।। 13

जले स्थले चान्तरिक्षे शत्रुणां निवहे तथा।
एताभि स्सहिता देवी चतुर्बीजा महेश्वरी।। 14

प्रत्यङ्गिरा महाशक्तिः सर्वत्र मां सदा ऽवतु।
इति ते कथितं देवि सारात्सारं परात्परम्।। 15

सर्वार्थ साधनं नाम कवचं परमाद्भुतम्।
अद्यापिपठनात् सद्यः कुबेरोऽपि धनेश्वरः।। 16

इन्द्राद्याःसकला देवाः धारणात् पठनाद्यतः।
सर्वसिध्दीश्वरास्सन्तः सर्वैश्वर्य मवाप्नुयुः।। 17

पुष्पाञ्जल्यष्टकं दत्वा मूलेनैव सकृत् पठेत्।
संवत्सर कृतायास्तु पूजायाः फलमाप्नुयात्।। 18

प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे।
वाणी च निवसेत् वक्त्रे सत्यं सत्यं न संशयः।। 19

यो धारयति पुण्यात्मा सर्वार्थ साधनाभिधम्।
कवचं परमं पुण्यं सोऽपि पुण्यवतां नरः।। 20

सर्वैश्वर्य युतौ भूत्वा त्रैलोक्य विजयी भवेत्।
पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा।। 21

बहुपुत्रवती भूत्वा धन्याऽपि लभते सुतम्।
ब्रह्मास्त्रादीनि शस्त्राणि नैव कुर्वन्ति तत्तनुम्।। 22

एतत् कवच मज्ञात्वा यो जपेत् परमेश्वरीम्।
दारिद्र्यं परमं प्राप्य सोऽचिरात् मृत्यु माप्नुयात्।। 23

इति श्री रुद्रयामलतन्त्रे पञ्चाङ्गखण्डे प्रत्यङ्गिरायाः
सर्वार्थसाधनं नाम कवचं समाप्तम्।।

प्रत्यङ्गिरा सहस्रनाम स्तोत्रम्

सहस्रनाम पाठमहिमा

ईश्वरउवाच -

श्रुणु देवि प्रवक्ष्यामि सांप्रतं त्वत्पुरस्सरम् ।
सहस्र नाम परमं प्रत्यङ्गिरायाः सिद्धये ।। 1

सहस्रनाम पाठे यः सर्वत्र विजयी भवेत् ।
पराभवो न चा स्यास्ति सभायां वासने रणे ।। 2

तथा तुष्टा भवे द्देवी प्रत्यङ्गिरास्य पाठतः ।
यथा भवति देवेशि साधकः शिव एव हि ।। 3

अश्वमेध सहस्राणि वाजपेयस्य कोटयः ।
सकृत्पाठेन जायन्ते प्रसन्ना यत्परा भवेत् ।। 4

भैरवोऽस्य ऋषिश्छंदो ऽनुष्टुप् देवी समीरिता ।
प्रत्यङ्गिरा विनियोगःस्यात् सर्व संपत्ति हेतवे ।। 5

सर्वकार्येषु संसिद्धिः सर्व संपत्तिदा भवेत् ।
एवं ध्यात्वा पठे द्देवीं यदीच्छे दात्मनो हितम् ।। 6

स्तोत्रस्य ऋष्यादि न्यासः

ओं अस्य श्री प्रत्यङ्गिरा महामन्त्रस्य - भैरव ऋषिः - अनुष्टुप् छन्दः।।

श्री प्रत्यङ्गिरा देवता – ह्रीं बीजं - श्रीं शक्तिः - स्वाहा कीलकं –
विद्यासिद्ध्यर्थे जपे पाठे विनियोगः।। (अथ ध्यानम्।) -

सिंहीं सिंहमुखीं सखीं भगवतः श्री भैरवोल्लसत् -
शूल स्थूल कपाल पाश डमरु व्यग्राग्र हस्ताम्बुजाम् ।
दंष्ट्रा कोटि विशंक टास्य कुहरा मारक्त नेत्र त्रयां -
बालेन्दु ज्वल मौळिकां भगवतीं प्रत्यङ्गिरां भावये ।।

(देवी प्रत्यङ्गिरा सेव्या शिरसा शशिशेखरा ।।
समाऽसमा धर्मिणी च समस्त सुर सेमुषी ।।)

लमित्यदिना पञ्चोपचारमानसपूजां विधायस्वहृदये देवीं सन्तोष्य – ततो जपेत् ।

सहस्रनामस्तोत्रम्

देवी प्रत्यङ्गिरा सेव्या शिरसा शशिशेखरा ।
समाऽसमा धर्मिणी च समस्त सुर सेमुषी ।। 1

सर्वसंपत्ति जननी समधा सिन्धु सेविनी ।
शंभु सीमंतिनी सोमाराध्या च वसुधा रसा ।। 2

रसा रसवती वेला वन्या च वनमालिनी ।
वनजाक्षी वनचरी वनी वन विनोदिनी ।। 3

वेगिनी वेगदा वेगबला स्थानबलाधिका ।
कला कलाप्रिया कौलि कोमला कालकामिनी ।। 4

कमला कमलास्या च कलास्या कमलावती ।
कुलीना कुटिला कान्ता कोकिला कुलभाषिणी ।। 5

कीरकेलि: कला काली कपालिन्यपि कालिका ।
केशिनी च कुशावर्त्ता कौशांबी केशवप्रिया ।। 6

काशी काशापहा कांशि शङ्काशा केशदायिनी ।
कुण्डली कुण्डलिस्था च कुण्डलाङ्गद मण्डिता ।। 7

कुशा पाशी कुमुदिनी कुमुद प्रीति वर्धिनी ।
कुंद प्रिया कुंद रुचि: कुरंग मद मोदिनी ।। 8

कुरङ्ग नयना कुन्दा कुरुवृन्दा भिनन्दिनी ।
कुसुंभ कुसुमा किञ्चित् क्कणत् किङ्किणिका कटु: ।। 9

कठोरा करणा कण्ठा कौमुदी कम्बुकण्ठिनी ।
कपर्दिनी कपटिनी कठिनी कालकण्ठिका ।। 10

किबृहस्ता कुमारी च कुरुन्दा कुसुमप्रिया ।
कुञ्जरस्था कुञ्जरता कुम्भी कुम्भस्तन द्वया ।। 11

कुम्भिगा करभोरुश्च कदलीदल शालिनी ।
कुपिता कोठरस्था च कङ्काली कन्दशेदरा ।। 12

एकान्त वासिनी किञ्चित् कम्पमान शिरोरुहा ।
कादम्बरी कदम्बस्था कुङ्कुमी प्रेम धारिणी ।। 13

कुटुंबिनी क्रियायुक्ता क्रतुः क्रतुकरी क्रिया ।
कात्यायनी कृत्तिका च कार्तिकेय प्रवर्त्तिनी ।। 14

कामपत्नी कामधात्री कामेशी कामवन्दिता ।
कामरूपा कामगतिः कामाक्षी काम मोहिता ।। 15

खङ्गिनी खेचरी खंजा खंजरी टेक्षणा खला ।
खरगा खरनासा च खरास्या खेलनप्रिया ।। 16

खरांशुः खेटिनी खद्वा खर खट्वांग धारिणी ।
खल खंडिनि विख्यातिः खण्डिता खण्डवी स्थिरा ।। 17

खङ्गासना खङ्गरूपा खङ्गदक् खङ्गमण्डला ।
खङ्गहस्ता खङ्गवेगा खङ्गेशी खण्डितासुरा ।। 18

खट्वाङ्गी खङ्गखेला च खङ्गतीक्ष्णा च खङ्गगा ।
खण्डप्रिया खण्डखाद्या सेन्दुखण्डा च खञ्जनी ।। 19

गङ्गा गोदावरी गौरी गोमत्य पि च गौतमी ।
गया गौ र्गंजी गगना गारुडी गरुडध्वजा ।। 20

गीता गीतप्रिया गोत्रा गोत्रक्षयकरी गदा ।
गिरिभूपाल दुहिता गोगा गोकुल वर्धिनी ।। 21

घनस्तनी घनरुचिः र्घनोरु र्घननिःस्वना ।
घूत्कारिणी घूतकरी घुघूक परिवारिता ।। 22

घण्टानाद प्रिया घण्टा घना घोट प्रवाहिनी ।
घोररूपा च घोरा च घूनी प्रीति र्घनांजनी ।। 23

घृताची घनमुष्टिश्च घटा घण्टा घटामृता ।
घटास्या घटनादा च घात पात निवारिणी ।। 24

चञ्चरीका चकोरी च चामुण्डा चीरधारिणी ।
चातुरी चपला चारुः चला चेला चलाचला ।। 25

चतुश्चिरन्तना चाका चिया चामीकरच्छविः ।
चापिनी चपला चम्पूः चिन्ताः चिन्तामणिः चिता ।। 26

चातु र्वर्ण्यमयी चञ्चत् चौरा चाप चमत्कृतिः ।
चक्रवर्तिवधूः चक्रा चक्राङ्गा चक्रमोदिनी ।। 27

चेतश्चरी चित्तवृत्तिः अचेता चेतनप्रदा ।
चाम्पेयी चम्पकप्रीतिः चण्डी चण्डाळवासिनी ।। 28

चिरञ्जीवितदा चित्ता तरुमूल निवासिनी ।
छुरिका छत्रमध्यस्था छिद्रा छेदकरी छिदा ।। 29

छुच्छुन्दरी पालयित्री सुन्दरीभ निभस्वना ।
छलिनी छलव च्छिन्ना छिटिका छेककृत्तथा ।। 30

छद्मिनी छांदसी छाया छायाकृत् छादि रित्यपि ।
जया च जयदा जातिः जृम्भिणी जामलायुता ।। 31

जपा पुष्पप्रिया जाया जाप्या जाप्य जगज्जनिः ।
जम्बूप्रिया जयस्था च जङ्गमा जङ्गमप्रिया ।। 32

जन्तु र्जन्तुप्रधाना च जरत्कर्णा जरद्गवा ।
जाती प्रिया जीवनस्था जीमूत सदृश च्छविः ।। 33

जन्या जनहिता जाया जम्भा जम्भिल शालिनी ।
जवदा जववद्वाहा जमानी ज्वरहा ज्वरी ।। 34

झञ्झानिल मयी झञ्झा झणत्कार कराचला ।
झिण्टीशा झस्यकृत् झम्पा यमत्रास निवारिणी ।। 35

टङ्कारस्था टङ्कधरा टङ्कारा कारणा टसी ।
ठकुरा ठीत्कृतिः चैव ठिण्ठीर वसना वृता ।। 36

ठण्ठानिल मयी ठण्ठा ठणत्कार करा ठसा ।
डाकिनी डामरा चैव डिण्डिम ध्वनि नादिनी ।। 37

ढक्का प्रियस्वना ढक्का तपिनी तापिनी तथा ।
तरुणी तुन्दिला तुन्दा तामसी च तपः प्रिया ।। 38

ताम्रा ताम्रांबरा ताली तालीदल विभूषणी ।
तुरङ्गा त्वरिता तोता तोतला तादिनी तुला ।। 39

तापत्रयहरा तारा ताल केशी तमालिनी ।
तमाल दलवच्छाया तालस्वनवती तमी ।। 40

तामसी च तमिस्त्रा च तीव्रा तीव्र पराक्रमा ।
तटस्था तिल तैलाक्ता तारिणी तपनद्युतिः ।। 41

तिलोत्तमा तिलककृत् तारकाधीश शेखरा ।
तिलपुष्पप्रिया तारा तारकेश कुटुम्बिनी ।। 42

स्थाणुपत्नी स्थितिकरी स्थलस्था स्थलवर्ध्दिनी ।
स्थितिस्स्थैर्या स्थविष्ठा च स्थावतिः स्थूलविग्रहा ।। 43

दन्तिनी दण्डिनी दीना दरिद्रा दीन वत्सला ।
देवी देववधू दैत्य दमिनी दन्तभूषणा ।। 44

दयावती दमवती दमदा दाडिमस्तनी ।
दन्तशूकनिभा दैत्य दारिणी देवताऽऽनना ।। 45

दोलाक्रीडा दलायुश्च दम्पती देवतामयी ।
दशा दीपस्थिता दोषा दोषहा दोष कारिणी ।। 46

दुर्गा दुर्गार्त्ति शमनी दुर्गमा दुर्गवासिनी ।
दुर्गन्ध नाशिनी दुःस्था दुःस्वप्न शम कारिणी ।। 47

दुर्वारा दुन्दुभि ध्वाना दूरगा दूरवासिनी ।
दरदा दरहा दात्री दयादा दुहिता दशा ।। 48

धुरन्धरा धुरीणा च धौरेयी धनदायिनी ।
धीरा सुधीरा धरित्री धर्मदा धीरमानसा ।। 49

धनुर्धरा च धमिनी धूर्त्ता धूर्त्त परिग्रहा ।
धूमवर्णा धूमपाना धूमला धूम मोदिनी ।। 50

नलिनी नन्दनी नन्दा नन्दिनी नन्द बालिका ।
नवीना नर्मदा नर्मी नेमि र्नियम निश्चया ।। 51

निर्मला निगमाचारा निम्नगा नग्निका निमि: ।
नाला निरन्तरा निघ्नी निर्लोपा निर्गुणा नति: ।। 52

नीलग्रीवा निरीहा च निरञ्जन जनी नवी ।
नवनीत प्रिया नारी नरकार्णव तारिणी ।। 53

नारायणी निराकारा निपुणा निपुणप्रिया ।
निशा निद्रा नरेन्द्रस्था नमिता ऽ नमिता ऽपिच ।। 54

निर्गुण्डिका च निर्गुण्डा निर्मांसा नासिकाभिधा ।
पताकिनी पताका च पलप्रीति र्यशस्विनी ।। 55

पीना पीनस्तना पत्नी पवनाशन शायिनी ।
परा पराकला पाका पाककृत्या रतिप्रिया ।। 56

पवनस्था सुपवना तापसी प्रीति वर्ध्दिनी ।
पशुवृद्धिकरी पुष्टि: पोषणी पुष्पवर्ध्दिनी ।। 57

पुष्पिणी पुस्तककरा पुन्नागतल वासिनी ।
पुरन्दर प्रिया प्रीति: पुरमार्ग निवासिनी ।। 58

पेशा पाशकरा पाश बन्धहा पांशुला पशु: ।
पटा पटाशा परशु धारिणी पाशिनी तथा ।। 59

पापघ्नी पतिपत्नी च पतिता ऽपतिता पि च ।
पिशाची च पिशाचघ्नी पिशिताशन तोषिता ।। 60

पानदा पानपात्रा च पानदान करोद्यता ।
पेषा प्रसिद्धिः पीयूषा पूर्णा पूर्ण मनोरथा ।। 61

पतद्गर्भा पतद्गात्रा पौनः पुन्या पिवा पुरा ।
पङ्किला पङ्कमग्ना च पामी पापञ्जर स्थिता ।। 62

पञ्चमा पञ्चयामा च पञ्चता पञ्चमप्रिया ।
पञ्चमुद्रा पुण्डरीका पिङ्गला पिङ्गलोचना ।। 63

प्रिंयङ्गु मञ्जरी पिण्डी पण्डिता पाण्डुर प्रभा ।
प्रेतासना प्रियालुस्था पाण्डुघ्नी पीतसा पहा ।। 64

फलिनी फलदात्री च फलश्री फणिभूषणा ।
फूत्कार कारिणी स्फारा फुल्ल फुल्लाम्बुजा सना ।। 65

फिरङ्गहा स्फीतमतिः स्फीतिः स्फीतिकरी तथा ।
वनमाया बलाराति र्बलिनी बलवर्द्धिनी ।। 66

वेणुवाद्या वनचरी वीरा वीर जनन्यपि ।
विद्या विद्याप्रदा विद्या बोधिनी वेद दायिनी ।। 67

बुद्धा माता च बुध्दा च वनमालावती वरा ।
वरदा वारुणी वीणा वीणावादन तत्परा ।। 68

विनोदिनी विनोदस्था वैष्णवी विष्णुवल्लभा ।
विद्या वैद्य चिकित्सा च विवशा विश्वविश्रुता ।। 69

वितन्द्रा विह्वला वेला विरावा विरति ज्वरा ।
विविधार्क करा वीरा बिंबोष्ठी बिंब वत्सला ।। 70

विन्ध्यस्था वारवन्द्या च वरीया नपराचवित् ।
वेदान्तवेद्या वैद्या च वेदास्या विजयप्रदा ।। 71

विरोध वर्धिनी वन्ध्या बन्ध्या बन्ध निवारिणी ।
भगिनी भगमाला च भवानी भय भाविनी ।। 72

भीमा भीमानना भौमी भंगुरा भीमदर्शना ।
भिल्ली भल्लधरा भीरू भेरुण्डी भी भयापहा ।। 73

भगसर्पिण्यपि भगा भगरूपा भगालया ।
भगासना भगामोदा भेरी भङ्कार रञ्जिनी ।। 74

भीषणा भीषणारावा भगवत्यपि भूषणा ।
भारद्वाजी भोगदात्री भवघ्नी भूतिभूषणा ।। 75

भूतिदा भूमिदात्री च भूपतित्व प्रदायिनी ।
भ्रमरी भ्रामरी नीला भूपाल मुकुटस्थिता ।। 76

मता मनोहरमना मानिनी मोहिनी मही ।
महालक्ष्मी मंदक्षीबा मदीया मदिलालया ।। 77

मदोद्धता मतङ्गस्था माधवी मधुमन्यिनी ।
मेधा मेधाकरी मेध्या मध्या मध्यवय स्थिता ।। 78

मद्यपा मांसला मत्स्य मोदिनी मैथुनोद्धता ।
मुद्रा मुद्रावती माता माया महिम मन्दिरा ।। 79

महामाया महाविद्या महामारी महेश्वरी ।
महादेववधू र्मान्या मधुरा वीरमण्डला ।। 80

मेदस्विनी मीलदश्री महिषासुर मर्दिनी ।
मण्डपस्था मठस्था च मदिरागम गर्विता ।। 81

मोक्षदा मुण्डमाला च माला माला विलासिनी ।
मातङ्गिनी च मातङ्गी मतङ्गतनया ऽपि च ।। 82

मधुस्रवा मधुरसा मधूक कुसुम प्रिया ।
यामिनी यामिनीनाथ भूषा यावक रञ्जिता ।। 83

यवाङ्कुर प्रिया यामा यवनी यवना धिपा ।
यमघ्नी यमकन्या च यजमान स्वरूपिणी ।। 84

यज्ञा यज्वा यजुर्याज्या यशो निकर कारिणी ।
यज्ञसूत्र प्रदा यष्ट्री यज्ञकर्म करी तथा ।। 85

यशस्विनी यकारस्था यूपस्तम्भ निवासिनी ।
रञ्जिता राजपत्नी च रमा रेखा रवे रणी ।। 86

रजोवती रजश्चित्रा रजनी रजनीपतिः ।
रागिनी राज्य नीराज्या राज्यदा राज्य वर्धिनी ।। 87

राजन्वती राजनीतिः तथा रजत वासिनी ।
रमणी रमणीया च रामा रामावती रती ।। 88

रेतोवती रतोत्साहा रोगहृद् रोगकारिणी ।
रङ्गा रङ्गवती रागा रागज्ञा रागकृद् रणा ।। 89

रञ्जिका रञ्जिकारञ्ज्ञा रञ्जिनी रक्तलोचना ।
रक्तचर्मधरा रक्ता रक्तस्था रक्तवादिनी ।। 90

रम्भा रम्भाफलप्रीता रम्भोरू राघवप्रिया ।
रङ्गभृत् रङ्गमधुरा रोदसी रोदसी गृहा ।। 91

रोधकृत् रोधहन्त्री च रोगभृत् रोगनाशिनी ।
बन्दी बन्दिस्तुता बन्धूः र्बन्धूक कुसुमाधरा ।। 92

वन्दिता वन्दितांमाता बिन्दुरा बैन्दवी विधा ।
विङ्की विङ्कपला विङ्का विङ्कस्था विङ्कवत्सला ।। 93

वदि र्विलग्ना विप्रा च विधि र्विधिकरी विधा ।
शङ्खिनी शङ्खवलया शङ्खमालावती शमी ।। 94

शङ्खपात्राशनी शङ्खा शङ्खा शङ्खगला शशी ।
शङ्खी शरावती श्यामा श्यामाङ्गी श्याम लोचना ।। 95

श्मशानस्था श्मशाना च श्मशान स्थल भूषणा ।
शमदा शमहन्त्री च शाकिनी शङ्कु शेखरा ।। 96

शान्तिश्शान्तिप्रदा शेषा शेषस्था शेषदायिनी ।
शेमुषी शोषिणी शीरी शौरिः शौर्या शरा शिरिः ।। 97

शापहा शापहानीशा शम्पा शपथ दायिनी ।
शृङ्गिणी शृंगफलभुक् शङ्करी शाङ्करी चया ।। 98

शङ्का शङ्कापहा संस्था शाश्वती शीतला शिवा ।
शिवस्था शवभुक्ता वा शववर्णा शिवोदरी ।। 99

शायिनी शाव शयना शिंशपा शिशुपालिनी ।
शवकुण्डलिनी शैवा शङ्करा शिशिरा शिरा ।। 100

शवकाञ्ची शवश्रीका शवमाला शवाकृतिः ।
शयनी शङ्कुवा शक्तिः शन्तनुः शीलदायिनी ।। 101

सिन्धुः सरस्वती सिन्धु सुन्दरी सुन्दरानना ।
साधुः सिद्धिः सिद्धिदात्री सिद्धा सिद्धसरस्वती ।। 102

सन्ततिःसंपदां संपत् संवित्सरति दायिनी ।
सपत्नी सरसा सारा सरस्वतिकरी स्वधा ।। 103

सरस्समा समाना च समाराध्या समस्तदा ।
समिद्धा समदा संमा संमोहा समदर्शना ।। 104

समितिः समिधा सीमा सवित्री सविधा सती ।
सवना सवनाधारा सावना समरा समी ।। 105

सिमिरा सतता साध्वी सदधि चिन्त्या सहायिनी ।
हंसी हंसगतिः हंसा हंसोज्वल निचोलयुक् ।। 106

हलिनी हलदा हाला हरश्री हरवल्लभा ।
हेला हेलावती हेषा ह्वेषस्था ह्वेष वर्द्धिनी ।। 107

हन्ता हन्ति र्हता हत्या हाहन्त ताप हारिणी ।
हङ्कारी हन्तकृद्द हङ्का हीहा हाता हताहता ।। 108

हेमप्रदा हंसवती हारी हातरि संमता ।
होरी होत्री होलिका च होमा होमहवि र्हरिः ।। 109

हारिणी हरिणी नेत्रा हिमाचल निवासिनी ।
लम्बोदरी लम्बकर्णा लम्बिका लम्ब विग्रहा ।। 110

लीला लीलावती लोला ललनी लालिता लता ।
ललाम लोचना लोच्या लोलाक्षी लक्षणा लला ।। 111

लंपती लुंपती लंपा लोपामुद्रा ललन्तिनी ।
लन्तिका लम्बिका लम्बा लघिमा लघु मध्यमा ।। 112

लघीयसी लघुदयी लूता लूता निवारिणी ।
लोमभृ ल्लोमलोप्ता च लुलुती लुलु संयती ।। 113

लुलायस्था च लहरी लंकापुर पुरन्दरी ।
लक्ष्मी र्लक्ष्मीप्रदा लक्ष्या लक्षा बलमति प्रदा ।। 114

क्षुण्णा क्षुपा क्षणा क्षीणा क्षमा क्षान्तिः क्षणावती ।
क्षामा क्षामोदरी क्षीमा क्षौमभृत् क्षत्रियाङ्गना ।। 115

क्षया क्षयकरी क्षीरा क्षीरदा क्षीर सागरा ।
क्षेमङ्करी क्षयाकारी क्षयदा क्षणदा क्षतिः ।। 116

क्षुरन्ती क्षुद्रिका क्षुद्रा क्षुत्क्षामा क्षरपातका ।
मातुः सहस्रनामेदं प्रत्यङ्गिर्याः प्रसादकम् (1000) ।। 117

स्तोत्र जप फलम्

यः पठेत् प्रयतो नित्यं स एव स्यान् महेश्वरः ।
अनाचान्तःपठे न्नित्यं दरिद्रो धनदो भवेत् ।। 118

मूकः स्यात् वाक्पति र्दैवि रोगी नीरोगतां व्रजेत् ।
अपुत्रः पुत्र माप्नोति त्रिषु लोकेषु विश्रुतम् ।। 119

वन्ध्यापि सूते तनयान् गावश्च बहु दुग्धदाः ।
राजानः पादनम्राः स्युः तस्य दासाः इव स्फुटाः ।। 120

अरय: संक्षयं यान्ति मनसा संस्मृता अपि ।
दर्शनादेव ता ऽयान्ति नरा नार्यो ऽपि तद्वशा: ।। 121

कर्ता हन्ता त्वयं वीरो जायते नात्र संशय: ।
यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ।। 122

दुरितं न च तस्यास्ते नास्ति शोक: कदाचन ।
चतुष्पथे अर्धरात्रे च य: पठेत् साधकोत्तम: ।। 123

एकाकी निर्भयो धीरो दशावर्त्त स्स्तवोत्तमम् ।
मनसा चिन्तितं कार्यं तस्य सिद्धि र्न संशय: ।। 124

सहस्रनामजपस्य आवश्यकता

विना सहस्रनाम्ना यो जपे न्मन्त्रं कदाचन ।
न सिध्दो जायते तस्य मन्त्र: कल्पशतै रपि ।। 125

जपयोग्यं देशकालादिकम्

कुजवारे श्मशाने च मध्याह्ने यो जपे दथ ।
शतावर्त्या सर्जयेत कर्ता हर्ता नृणा मिह ।। 126

रोगान्तर्धौ निशायान्ते पठिताम्बसि संस्थित: ।
सद्यो नीरोगता मेति यदि स्यान्निर्भय स्तदा ।। 127

अर्धरात्रे श्मशाने वा शनिवारे जपेन् मनुम् ।
अष्टोत्तर सहस्रं तत् दशवारं जपेत्तत: ।। 128

सहस्रनाम चैत द्धि तदा याति स्वयं शिवा ।
महा पवनरूपेण घोर गो मायु नादिनी ।। 129

तदा यदि न भीति: स्यात्ततो द्रोहीति वा भवेत् ।
तदा पशुबलिं दद्यात् स्वयं गृह्णाति चण्डिका ।। 130

यथेष्टं च वरं दत्वा याति प्रत्यङ्गिरा शिवा ।

यन्त्रधारणविधि:

रोचनागरु कस्तूरी कर्पूर मद चन्दन: ।। 131

कुङ्कुम प्रथमाभ्यां तु लिखितं भूर्ज पत्रके ।
शुभनक्षत्र योगे तु कृत्रिमाकृत सक्रियः ।। 132

कृत संपातना सिद्धि र्धारये द्दक्षिणे करे ।
सहस्रनाम स्वर्णस्थं कण्ठे वापि जितेन्द्रियः ।। 133

तदा यन्त्रे नमेन् मन्त्री क्रुध्दा संम्रियते नरः ।
यस्मै ददाति यः स्वस्ति स भवेद् धनदो यमः ।। 134

दुष्ठ श्वापद जन्तूनां न भीः कुत्रापि जायते ।
बालकाना मिमां रक्षां गर्भिणीना मपि ध्रुवम् ।। 135

मोहनं स्तंभनाकर्षं मारणो च्चाटनानि च ।
यन्त्र धारणतो नूनं जायन्ते साधकस्य तु ।। 136

नामसहस्र जप्यद्रव्य फलादि

नीलवस्त्रे विलिखितं ध्वजायां यदि तिष्ठति ।
तदा नष्टा भवत्येव प्रचण्डा परिवाहिनी ।। 137

एतज्जप्तं महाभस्म ललाटे यदि धारयेत् ।
तद्दर्शनत एव स्युः प्राणिन स्तस्य किङ्कराः ।। 138

राजपत्न्यो ऽपि वशगाः किमन्याः पर योषितः ।
एत ज्जप्तं पिबे त्तोयं मासैकेन महाकविः ।। 139

पण्डितश्च महादीक्षो जायते नात्र संशयः ।
शक्तिं संपूज्य देवेशि पठेत् स्तोत्रं वरं शुभम् ।। 140

इह लोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत् ।
इति नाम सहस्त्रं तु प्रत्यङ्गिरा मनोहरम् ।। 141

गोप्यं गुप्ततमं लोके गोपनीयं स्वयोनिवत् ।

इति श्री रुद्रयामले महातन्त्रे - दशविद्यारहस्ये -
प्रत्यङ्गिरा सहस्त्रनामस्तोत्रं संपूर्णम्।।



श्री काली अर्गलम्

ओं अस्य - श्री कालिकार्गलस्तोत्रस्य - श्री भैरव: ऋषि:। अनुष्टुप् छन्द:। श्री कालिका देवता। मम सर्वसिद्धिसाधने पाठे विनियोग:।

ऋष्यादिन्यास:

श्री भैरवऋषये नम: - शिरसि। अनुष्टुप् छन्दसे नम: - मुखे।

श्री कालिका देवतायै नम: - हृदि । सर्वसिद्धिसाधने - पाठे - विनियोगाय नम: - अञ्जलौ।

नमस्ते कालिके देवि आद्य बीजत्रय प्रिये।
वशमानय मे नित्यं सर्वेषां प्राणिनां सदा।। 1

कूर्चयुग्मं ललाटे च स्थातु मे शववाहिनी।
सर्वसौभाग्यसिद्धिं च देहि दक्षिण कालिके।। 2

भुवनेशी बीजयुग्मं भ्रूयुगे मुण्डमालिनी।
कन्दर्परूपं मे देहि महाकालस्य गेहिनि।। 2

दक्षिणे कालिके नित्ये पितृकाननवासिनि।
नेत्रयुग्मं च मे देहि ज्योतिरालोकनं महत्।। 3

श्रवणे च पुन र्लज्जा बीजयुग्मं मनोहरम्।
महाश्रुतिधरत्वं च मे देहि मुक्त कुन्तले।। 4

ह्रीं ह्रीं बीजद्वयं देवि पातु नासापुटे मम।
देहि नानाविधिं मह्यं सुगन्धिं त्वं दिगम्बरे। 5

पुनस्त्रि बीज प्रथमं दन्तौष्ठ रसनादिकम्।
गद्य पद्य मयीं वाणीं काव्य शास्त्रा द्यलंकृताम्। 6

अष्टादशपुराणानां स्मृतीनां घोर चण्डिके।
कवितासिद्धि लहरीं मम जिह्वां निवेशय। 7



वह्निजाया महादेवि घण्टिकायां स्थिरा भव।
देहि मे परमेशानि बुद्धि सिद्धि रसायनम्। 8

तुर्याक्षरी सिद्धिरूपा चित् स्वरूपा मदालिका।
सा तु तिष्ठतु हृत्पद्मे हृदयानन्द कारणा। 9

षडक्षरी महाकाली चण्डकाली कपालिनी।
रक्ताशिनी घारेदंष्ट्रा भुजयुग्मे सदाऽवतु। 10

सप्ताक्षरी महाकाली महाकालरतोद्यता।
स्तनयुग्मे सूर्यकर्णी नमुण्डसुकुन्तला। 11

तिष्ठस्व जठरे देवि अष्टाक्षरि शुभप्रदे।
पुत्र पौत्र कलत्रादि सुहृन् मित्राणि देहि मे। 12

दशाक्षरी महाकाली महाकाल प्रिया सदा।
नाभौ तिष्ठतु कल्याणी श्मशानालय वासनी। 13

चतुर्दशार्णवा या च जयकाली सुलोचना।
लिङ्गमध्ये च तिष्ठस्व रेतस्विनी ममाङ्के। 14

गुह्यमध्ये हर्षकाली मम तिष्ठ कुलाङ्गने।
सर्वाङ्गे भद्रकाली च तिष्ठ मे परमात्मिके। 15



कालि पादयुगे तिष्ठ दक्षिणे मे मुखे शिवे।
कापालिनी च या शक्तिः खड्ग मुण्डधरा शिवा। 16

पाद द्वयाङ्गुलि ष्वङ्गे तिष्ठ मे पाप नाशिनि।
कुल्लादेवी मुक्तकेशी रोमकूपेषु वै मम। 17

तिष्ठतु उत्तमाङ्गे च कुरुकुल्ला महेश्वरी।
विरोधिनी विरोधे च मम तिष्ठतु शाङ्करि। 18

विप्रचित्ता महेशानि चण्ड मुण्ड विनाशिनी।
मार्गे दुर्मार्ग गमने उग्रा तिष्ठतु मे सदा। 19

प्रभा दिक्षु विदिक्षु मां दीप्ता दीप्तं करोतु माम्।
नीला शक्तिश्च पाताले घना चाकाश मण्डले। 20

पातु शक्ति र्बलाका मे भुवं मे भुवनेश्वरी।
मात्रा मम कुले पातु मुद्रा तिष्ठतु मन्दिरे।

मिता मे योगिनी या च सदा मित्रकुल प्रदा।
सा मे तिष्ठतु देवेशि पृथिव्यां दैत्यदारिणी।

ब्राह्मी ब्रह्मकुले तिष्ठमम सर्वार्थ दायिनी।
नारायणी विष्णुमाया मोक्षद्वारे च तिषठ मे।। 2

माहेश्वरी कृषारुढा कैलासाचल वासिनी।
शिवतां देहि चामुण्डे पुत्र पौत्रादि दायिनी। 24

कौमारी च कुमाराणां रक्षार्थं तिष्ठ मे सदा।
अपराजिता विश्वरूपा जये तिष्ठ स्वभाविनी। 25

वाराही वेदरूपा च सामवेद परायणा।
नारसिंही नृसिंहस्य वक्षःस्थल निवासिनी। 26

सा मे तिष्ठतु देवेशि पृथिव्यां दैत्य दारिणी।
सर्वेषां स्थावरादीनां जङ्गमानां सुरेश्वरि। 2

स्वेदजोद्भिजाण्डजानां चराणां च भयादिकम्।
विनाशायाभिमतिं देहि दक्षिणकालिके। 28

फलश्रुतिः

य इदं चार्गलं देवि यः पठेत् कालिकार्चने।
सर्वसिद्ध मवाप्नोति खेचरो जायते तु सः।। 29

त्रैलोक्यविजय कवचम् (अष्टश्लोकी)

विनियोगविधिः

त्रैलोक्य विजयस्यास्य कवचस्य ऋषिः शिवः।
छन्दोऽनुष्टुप् देवता च आद्याकाली प्रकीर्तिता।।
मायाबीजं बीजमिति रमा शक्ति रुदाहृता।
क्रीं कीलकं काम्यसिद्धौ विनियोगः प्रकीर्तितः।

ऋष्यादिन्यासः

अस्य श्रीत्रैलोक्यविजय कवचस्य शिवः ऋषिः । अनुष्टुप् छन्दः।
श्री आद्याकाली देवता। ह्रीं बीजम्। श्रीं शक्तिः। क्रीं कीलकम् । मम अभीष्ठकामना सिद्धये जपे विनियोगः।

ओं श्रीं शिवऋषये नमः शिरसि।
ओंश्रीं अनुष्टुप् छन्दसे नमः - मुखे।
आद्याकाली देवतायै नमः - हृदि।
ह्रीं बीजाय नमः - गुह्ये।
श्रीं शक्तये नमः - पादयोः।
क्रीं कीलकाय नमः - सर्वाङ्गे।
काम्यसिद्धौ विनियोगाय नमः - करञ्जलौ।

श्री सदाशिव उवाच –

ह्रीं आद्या मे शिरः पातु श्रीं काली वदनं मम।
हृदयं क्रीं पराशक्तिः पायात् कण्ठं परात्परा।। 1

नेत्रे पातु जगद्धात्री कर्णौ रक्षतु शङ्करी।
घ्राणं पातु महामाया रसनां सर्वमङ्गला।। 2

दन्तान् रक्षतु कौमारी कपोलौ कमलालया।
ओष्ठाधरौ क्षमा रक्षेत् चिबुकं चारु हासिनी।। 3

ग्रीवां पायात् कुलेशानी ककुत् पातु कृपामयी।
द्वौ बाहू बाहुदा रक्षेत् करौ कैवल्य दायिनी।। 4

स्कन्धौ कपर्दिनी पातु पृष्ठं त्रैलोक्य तारिणी।
पार्श्वे पायात् अपर्णा मे कटिं मे कमठासना।। 5

नाभौ पातु विशालाक्षी प्रजास्थानं प्रभावती।
ऊरू रक्षतु कल्याणी पादौ मे पातु पार्वती।। 6

जयदुर्गा ऽवतु प्राणान् सर्वाङ्गं सर्व सिद्धिदा।
रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन च।। 7

तत् सर्वं मे सदा रक्षेत् आद्या काली सनातनी।
शुभं ते कथितं दिव्यं त्रैलोक्य विजयाभिधम्।। 8

कवच फलश्रुतिः

कवचं कालिका देव्याः आद्यायाः परमाद्भुतम्।
पूजाकाले पठेद् यस्तु आद्याऽधिकृत मानसः।। 9

सर्वान् कामान् अवाप्नोति तस्याऽऽद्याशु प्रसीदति।
मन्त्रसिद्धि र्भवेदाशु किङ्कराः क्षुद्रसिद्धयः।। 10

अपुत्रो लभते पुत्रं धनार्थी प्राप्नुयात् धनम्।
विद्यार्थी लभते विद्यां कामी कामा नवाप्नुयात्।। 11

सहस्रावृत्ति पाठेन वर्मणोऽस्य पुरस्क्रिया।
पुरश्चरण सम्पन्नं यथोक्त फलदं भवेत्।। 12

चन्दनागरु कस्तूरी कुङ्कुमै रक्तचन्दनैः।
भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद् यदि।। 13

शिखायां दक्षिणे बाहौ कण्ठे वा साधकः कटौ।
तस्या ऽऽद्या कालिका वश्या वाञ्छितार्थं प्रयच्छति।। 1

न कुत्रापि भयं तस्य सर्वत्र विजयी कविः।
अरोगी चिरजीवी स्यात् बलवान् धारण क्षमः।। 15

सर्वविद्यासु निपुणः सर्व शास्त्रार्थ तत्ववित्।
वशे तस्य महीपाला भोग मोक्षौ करस्थितौ।। 16

कलि कल्मष युक्तानां निश्रेयसकरं परम्।। 17

इति महानिर्वाणतन्त्रे प्रोक्तं आद्या त्रैलोक्यविजय कवचं समाप्तम्।

श्री काली प्रत्यङ्गिरा विद्याकवचम् (रिपुनाशिनीविद्या)

ओं देव्युवाच –

कथये शान सर्वज्ञ यतो ऽहं तव वल्लभा।
या या प्रोक्ता त्वया नाथ सिद्धविद्या पुरा दश।।
तासां प्रत्यङ्गिराख्यं तु कवचं चैकशः परम्।।

श्री देव उवाच –

श्रुणु प्रिये प्रवक्ष्यामि गुह्याद् गुह्यतरं परम्।
विना येन न सिध्यन्ति मन्त्राः कोटि क्रियान्विताः।
प्रत्यङ्ग रक्षणकरी तेन प्रत्यङ्गिरा मता।
काली प्रत्यङ्गिरां वक्ष्ये श्रुणुष्वा वहिताऽनघे।।

पार्वत्युवाच –

प्रभो प्रत्यङ्गिरा विद्या सर्व विद्योत्तमा स्मृता।
अभिचारादि दोषाणां नाशिनी सिद्धि दायिनी।
मह्यं तत् कथयस्वाद्य करुणा यदि ते मयि।

श्री भगवानुवाच –

साधु साधु महादेवि त्वं हि संसार मोचिनी।
श्रुणुष्व सुख चित्तेन वक्ष्ये देवि समासतः।
देवि प्रत्यङ्गिरा विद्या सर्व ग्रह निवारिणी।
मर्दिनी सर्व दुष्टानां सर्व पाप प्रमोचिनी।
स्त्री बाल प्रभृतीनां च जन्तूनां हितकारिणी।
सौभाग्य जननी देवी बीजा पुष्टिकरी सदा।

ओं ओं ओं - अस्य - श्री प्रत्यङ्गिरामन्त्रस्य - श्री अङ्गिरा - ऋषिः। अनुष्टुप् - छन्दः। श्री प्रत्यङ्गिरा - देवता। हूं बीजम्। ह्रीं शक्तिः। क्रीं कीलकम्। ममाभीष्ट सिद्धये पाठे विनियोगः। अथ न्यासः। श्री अङ्गिराऋषये नमः - शिरसि। अनुष्टप्छन्दसे नमः - मुखे। श्री प्रत्यङ्गिरादेवतायै नमः - हृदि। हूं बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः। क्रीं कीलकाय नमः - गुह्ये। ह्रीं शक्तये नमः पादयोः। क्रीं कीलकाय नमः - सर्वाङ्गे। ममाभीष्ट सिद्धये पाठे विनियोगाय नमः - अञ्जलौ।

भुजै श्चतुर्भि र्धृत तीक्ष्ण बाण -
धनु र्वराभी श्च शवांघ्रि युग्मा।
रक्ताम्बरा रक्त तनु स्त्रिनेत्रा -
प्रत्यङ्गि रेयं प्रणतं पुनातु।।

ओं नमः सहस्र सूर्येक्षणाय - श्रीकण्ठानादिरूपाय - पुरुषाय - पुरुहूताय - ऐं महासुखाय व्यापिने - महेश्वराय - जगत् सृष्टिकारिणे - ईशानाय - सर्ववयापिने - महाघोराति घोराय - ओं ओं ओं प्रभावं दर्शय दर्शय -ओं ओं ओं हिल हिल ओं ओं ओं विद्युज्जिह्वे - बन्ध बन्ध - मथमथ -प्रमथ प्रमथ - विध्वंसय विध्वंसय - ग्रस ग्रस –पिब पिब - नाशय नाशय - त्रासय त्रासय - विदारय विदारय - मम शत्रून् खाहि खाहि - मारय मारय - मां सपरिवारं रक्ष रक्ष - करि कुम्भस्तनि - सर्वोपद्रवेभ्यः - ओं महा मेघौघराशि सम्वर्तक विद्युदन्त कपर्दिनि – दिव्य कनकाम्भोरुह विकच माला धारिणि – परमेश्वरि प्रिये - छिन्धि छिन्धि विद्रावय - विद्रावय देवि – पिशाच नागासुर गरुड किन्नर विद्याधर गन्धर्व यक्ष राक्षस लोकपालान् स्तम्भय स्तम्भय - कीलयकीलय - घातय घातय - विश्वमूर्ति महातेजसे -ओं मम शत्रूणां विद्यां स्तम्भय स्तम्भय - ओं हूं सः मम शत्रूणां मुखं स्तम्भय स्तम्भय - ओं हूं सः मम शत्रूणां पादौ स्तम्भय स्तम्भय - ओं हूं सः मम शत्रूणां गृहागत कुटुम्बमुखानि स्तम्भय स्तम्भय - स्थानं कीलय कीलय - ग्रामं कीलय कीलय - मण्डलं कीलय कीलय - देशं कीलय कीलय –सर्वसिद्धिमहाभागे – धारकस्य सपरिवारस्य शान्तिं कुरु कुरु फट् स्वाहा ओं ओं ओं ओं ओं - अं अं अंअं अं - हूं हूं हूं हूं हूं - खं खं खं खं खं - फट् स्वाहा।

जय प्रत्यङ्गिरे - धारकस्य सपरिवारस्य मम रक्षां कुरु कुरु -ओं हूं सः जय जय स्वाहा - ओं ऐं ह्रीं श्रीं ब्रह्माणि। शिरो रक्ष रक्ष हूं स्वाहा - ओं ऐं ह्रीं श्रीं कौमारि मम वक्रं रक्ष रक्ष हूं स्वाहा - ओं ऐं ह्रीं श्रीं वैष्णवि - मम कण्ठं रक्ष रक्ष हूं स्वाहा - ओं ऐं ह्रीं श्रीं नारसिंहि - ममोदरं रक्ष रक्ष हूं स्वाहा - ओं ऐं ह्रीं श्रीं इन्द्राणि - मम नाभिं रक्ष रक्ष हूं

स्वाहा। ओं नमो भगवति उच्छिष्ट चाण्डालिनि -त्रिशूलवज्राङ्कुशधरे -मांसभक्षिणि - खट्वाङ्ग कपाल वज्रासि धारिणि - दह दह - धम धम - सर्वदुष्टान् ग्रस ग्रस - ओं ऐं ह्रीं श्रीं फट् स्वाहा। ओं दंष्ट्राकरालि - मम मन्त्र तन्त्रवृन्दादीन् विषशस्त्राभिचारकेभ्यो रक्षरक्ष स्वाहा।

स्तम्भिनी मोहिनी चैव क्षोभिणी द्राविणी तथा।
जृम्भिणी त्रासिनी रौद्री तथा संहारिणी ति च।।
शक्तय: क्रमयोगेन शत्रुपक्षे नियोजिता:।
धारिता: साधकेन्द्रेण सर्वशत्रु निवारिणी।।
ओं स्तम्भिनि - स्फ्रें मम शत्रून् स्तम्भय स्तम्भय स्वाहा -
ओं मोहिनि - स्फ्रें मम शत्रून् मोहय मोहय स्वाहा -
ओं क्षोभिणि - स्फ्रें मम शत्रून् क्षोभय क्षोभय स्वाहा -
ओं द्राविणि। - स्फ्रें मम शत्रून् द्रावय स्वाहा -
ओं जृम्भिणि - स्फ्रें मम शत्रून् जृम्भय जृम्भय स्वाहा -
ओं त्रासिनि - स्फ्रें मम शत्रून् त्रासय त्रासय स्वाहा -
ओं रौद्रि - स्फ्रें मम शत्रून् सन्तापय सन्तापय स्वाहा -
ओं संहारिणि - स्फ्रें मम शत्रून् संहारय संहारय स्वाहा -

फलश्रुति:

य इमां धारयेद् विद्यां त्रिसन्ध्यं वापि य: पठेत्।
सोऽपि व्यथा गत श्चैव हन्यात् शत्रून् न संश:।
सर्वतो रक्षतो देविभयेषु च विपत्तिषु।
महाभयेषु सर्वेषु न भयं विद्यते क्वचित्।
विद्याना मुत्तमा विद्या वाचिता धारिता पुन:।
लिखित्वा च करे कण्ठे बाहौ शिरसि धारयेत्।
स मुच्यते महाघोरै र्मृत्युतुल्यै र्दुरासदै:।
दुष्टग्रह व्याल चौर रक्षो यक्ष गणा स्तथा।
पीडां न तस्य कुर्वन्ति ये चान्ये पीडका ग्रहा:।

हरिचन्दन मिश्रेण गोरोचन कुंकुमेन च।
लिखित्वा भूर्जपत्रे तु धारणीया सदा नृभिः।
पुष्प धूप विचितत्रैश्च बल्युपहार बन्दनैः।
पूजयित्वा यथा न्यायं त्रिलोहेनैव वेष्टयेत्।
धारयेद् य इमां मन्त्री लिखित्वा रिपुनाशिनीम्।
विलयं यान्ति रिपवः प्रत्यङ्गिरा विधारणात्।
यं यं स्पृशति हस्तेन यं यं खादति जिह्वया।
अमृतत्वं भवेत् तस्य मृत्यु र्नास्ति कदाचन।
त्रिपुरं तु मया दग्धं इमं मन्त्रं विजानता।
निर्जिता स्ते सुराः सर्वे देवै र्विद्याधरा दिभिः।
दिव्यै र्मन्त्रपदै र्गुह्यैः सुखोपायैः सुरक्षितैः।
पठेद् रक्षा विधानेन मन्त्रराजः प्रकीर्तितः।
क्रान्ता दमनकं चैव रोचनं कुंङ्कमं तथा।
अरुष्करं विषाविष्टं सिद्धार्थं मालतीं तथा।
एतद् द्रव्यगणं भद्रे गोलमध्ये निधापयेत्।
संस्कृतं धारयेन् मन्त्री साधको ब्रह्मवित् सदा।
अङ्गिरास्य मुनिः प्रोक्तः छन्दोनुष्टु बुदाहृतः।
देवता च स्वयं काली काम्येषु विनियोजयेत्।।
(इति काली रिपुनाशिनी विद्या कवचं संपूर्णम)

श्री एकाक्षरी काळीकवचम् (शक्तियामळोक्तम्)

श्यामाभां वेदहस्तां त्रिणयन लसितां सिंहवक्रोर्ध्वकेशीं
शूलं मुण्डं च सर्पं डमरु भुजयुतां कुन्तला दुग्रदंष्ट्राम्।
रक्तेष्वालीड जिह्वां ज्वलदनल गायत्रि सावित्रि युक्तां
ध्यायेत् त्प्रत्यङ्गिरां तां मरणरिपुविष व्याधिदारिद्र्य नाशाम्।।

श्री दुर्गा उवाच -

एकाक्षरी महं वक्ष्ये कवचं भुवि दुर्लभम्।
यथोक्तं सर्वतन्त्रेषु अधुना निगदामि ते।।
सूक्ष्मात् सूक्ष्मतरं सूक्ष्मं चतुर्वर्ग फल प्रदम्।
ब्रह्मा पातु सदाधारं वह्निर्मे नाभिमण्डलम्।।
क्रीं काळी दक्षिणाकाळी पातु मे भूतमण्डलम्।
इदं कवच मज्ञात्वा यो जपेत् जगदम्बिकाम्।
न साध्यं जायते तस्य सङ्गति र्नास्ति तस्य वै।
त्रिसन्ध्यं प्रपठेत् यस्तु तस्य सिद्धि रदूरतः।
एतत् कवच मभ्यासात् मन्त्रसिद्धिः प्रजायते।।

(इति शक्तियामळे दुर्गाविजयसंवादे प्रोक्तं एकाक्षरी कालिकाकवचं संपूर्णम्)

श्री ऋग्वेदोक्त प्रत्यङ्गिरा सूक्तम्

याङ्कल्पयन्ति नोरयः क्रूराङ्कृत्यां वधूमिव । [1]
तांब्रह्मणाप निर्णुद्मः प्रत्यक्कर्तारमृच्छतु ।।

शीर्षण्वतीङ्कर्णवतीं विषुरूपां भयङ्करीम् ।
यःप्राहिणोदिहाद्यत्वां वितन्त्वं योजयासुभिः ।।

येन दिष्टेह वहसि प्रतिकूल मघायिनि ।
तमेवेतो निवर्तस्व मास्मान्मृच्छो अनागसः ।।

अभिवर्तस्व कर्तारन्निरस्तास्माभिरोजसा ।
आयुरस्य निकृन्तस्व प्रजाञ्च पुरुषादिनि ।।

यस्त्वा कृत्ये चकारेह तन्त्वङ्गच्छ पुनर्नवे ।
अरातीः कृत्ये नाशय सर्वांश्च यातु धान्यः ।। [5]

क्षिप्रङ्कृत्ये निवर्तस्व कर्तुरेव गृहान् प्रति ।
पशूँश्चैवास्य नाशय वीरांश्चास्य निबर्हय ।।

यस्त्वा कृत्ये प्रजिघाय विद्वाँ अविदुषो गृहान् ।
तस्यैवेतः परेत्याशु तनुङ्कृधि परुष्परुः ।।

प्रतीचीन्त्वापसेधतु ब्रह्मरोचिष्ण्वमित्रहा ।
अग्निश्च कृत्ये रक्षोहा रिप्रहाचाज एकपात् ।।

यथात्वाङ्गिरसः पूर्वे भृगवश्चाप सेधिरे ।
अत्रयश्च वसिष्ठाश्च तथैवत्वापसेधिम ।।

यस्ते परूषि सन्दधौ रथस्येव विभुर्धिया ।
तङ्गच्छ तत्र तेऽयनमज्ञातस्ते अयञ्जनः ।। [10]

योनः कश्चिद्रणस्थोवा कश्चिद्वान्योऽभिहिंसति ।
तस्यत्वन्द्रोरिवेद्धोऽग्निस्तनूमृच्छस्व हेळिता ।।

भवाशर्वा देवहेळि मस्यत पाप कृत्वने ।
हरस्वती त्वञ्च कृत्ये मोच्छिषस्तस्य किञ्चन ।।

योनः कश्चिद्रुहारातिर्मनसा प्रतिभूषति ।
दूरस्थोवान्ति कस्थोवा तस्य हृद्य मसृक्पिब ।।

येनासि कृत्ये प्रहिता दूढ्ये नास्मज्जिघांसया ।
तस्य व्यानच्चाव्यानच्च हिनस्तु हरसा शनिः ।।

येनश्शिवासः पन्थानः परायन्ति परावतम् ।
तैर्देवि रात्र्याः कृत्यानो गमयस्वानु कृत्तये ।। [15]

यदिवैषि द्विपद्यस्मान् यदि वैषि चतुष्पदी ।
निरस्तेतो व्रजास्माभिः कर्तु रष्टापदी गृहान् ।।

योनश्शपादशपतो यश्चनश्शपतश्शपात् ।
वृक्षमिव विद्युदाशु तमामूलादनु शोषय ।।

यन्द्विष्मो यश्चनोद्वेष्ट्यघायुर्यश्चनः शपात् ।
शुनेपिष्टमिवक्षामन्तंप्रत्यस्य स्व मृत्यवे ।।

यश्च सापत्नः शपथो यश्च यामी शपातिनः ।
ब्रह्माच यत्कुद्धश्शपात् सर्वन्तत्कृध्यधस्पदम् ।।

सबन्धुश्चाप्य बन्धुश्च यो अस्माँ अभिदासति ।
तस्यत्वं भिन्ध्यधिष्ठाय पदा विस्फूर्य तच्छिरः ।। [20]

अभि प्रेहि सहस्राक्षं युक्त्वातु शपथं रथे ।
शत्रूनन्विच्छती कृत्ये वृकीवाविमतो गृहान् ।।

परिणो वृङ् ग्धि शपथान्दहन्नग्निरिव ह्रदम् ।
शत्रूनेवाभितो जहि दिव्या वृक्षमिवा शनिः ।।

शत्रून्मे प्रोथ शपथात् कृत्याश्च सुहृदोऽसुहृत् ।
जिह्वाश्श्लक्ष्णाश्च दुर्हृदस्समिद्धज्ञातवेदसम् ।।

असपत्नं पुरस्तान्नश्शिवन्दक्षिणतस्कृधि ।
अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ।।

परेहि कृत्ये मातिष्ठ विद्धस्येव पदन्नय ।
मृगस्य हि मृगारिप्रो नत्वा नीकर्तु मर्हति ।। [25]

अभ्यास्येव घोररूपे विषुरूपेऽविनाशिनी ।
जृम्भिता प्रतिगृभ्णीष्व स्वयमादाय चाद्भुतम् ।।

त्वमिन्द्रो यमो वरुणस्त्वमापोग्निरथानिलः ।
त्वंब्रह्मा चैव रुद्रश्च त्वष्टा चैव प्रजापतिः ।।

आवर्तध्वन्निवर्तध्व मृतवः परिवत्सराः ।
अहोरात्राश्चाब्दाश्च त्वन्दिशः प्रदिशश्चमे ।।

त्वं यमं वरुणं सोमन्त्वमापोऽग्नि मथानिलम् ।
अत्राहृत्य पशूंश्चैव मुत्पादयसि चाद्भुतम् ।।

येमे दमे दारु गर्भे शयानन्धिया सहितं पुरुषन्निजह्नुः ।
कुम्भीपाकन्नरकङ्गीवबद्धं हता एवं पुरुषासो यमस्य ।। [30]

अभ्यक्ताक्ता स्वलङ्कृता सर्वन्नो दुरितन्दह ।
जानीथाश्चैव कृत्यानाङ्कर्तॄन् नृन् पापचेतसः ।।

यथा हन्ति पुरासीनन्तथैवेष्वा सुकृन्नरः ।
तथा त्वया युजा वयन्निकृण्मस्थास्नु जङ्गमम् ।।

उत्तिष्ठैव परेहीतोऽज्ञाते किमिहेच्छसि ।
ग्रीवास्ते कृत्ये पादौ चाऽभि कर्त्स्यामि विद्रव ।।

स्वायसाः सन्ति नोसयो विद्मचैव परूषिते ।
तैस्ते निकृण्मस्तान्युग्रे यदि नो जीवयस्वरीन् ।।

मास्योच्छिषो द्विपदं मोत किञ्चिच्चतुष्पदम् ।
मा ज्ञातीननुजान्पूर्वान् मावेशि प्रतिवेशिनौ ।। [35]

शत्रूयता प्रहितासि दूढ्ये नाभि यथायतः ।
ततस्तथा त्वानुदतु योऽयमन्तर्मयिश्रितः ।।

एवन्त्वन्निकृतास्माभि ब्रह्मणादेवि सर्वशः ।
यथेतमाश्रिता गत्वा पापधीनिव नो जहि ।।

यथा विद्युद्धतो वृक्ष आमूलादनु शुष्यति ।
एवं स प्रतिशुष्यतु योमे पापञ्चिकीर्षति ।।

यथा प्रतिशुको भूत्वा तमेव प्रति धावति ।
पापन्तमेवन्धावतु योमे पापञ्चिकीर्षति ।।

योनः स्वो अरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ।। [40]

उत्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः ।
अव ब्रह्मद्विषो जहि ।।

कुबेर ते मुखं रौद्रन्नन्दिन्नानन्द मावह ।
ज्वरमृत्युभयङ्घोरं विश नाशयमे ज्वरम् ।।

योमे करोति प्रद्वारे योगृहे यो निवेशने ।
योमे केशनखे कुर्या दञ्जने दन्त धावने ।।

प्रतिसरप्रतिधाव कुमारीव पितुर्गृहान् ।
मूर्द्धानमेषां स्फोटय पदमेषाङ्कुले कृधि ।।

येनो रयिन्दुश्चरितासो अग्ने जहुर्मतासो अनृतं वदन्तः ।
तेषां वपूंष्यर्चिषा जातवेदः शुष्कन्न वृक्ष मभि सन्दहस्व [45]

कृष्ण वर्णे महद्रूपे बृहत्कर्णे महद्भये ।
देवि देवि महादेवि मम शत्रून् विनाशय ।।

खट् फट् जहि महा कृत्ये विधूमाग्नि समप्रभे ।
जहिशत्रूं स्त्रिशूलेन क्रुध्यस्व पिबशोणितम् ।।

ये द्रुह्युर् ऋजवे मह्यमग्ने कदाधियो दुर्मदा अश्मनासः ।
आबध्यैताञ्च्छोचिषा विध्य तन्तून्वैवस्वतस्य सदनन्नयस्व ।। [48]

।। इति प्रत्यङ्गिरा सूक्तम् ।।

अथर्व वेद प्रत्यङ्गिरा सूक्तम् ॥

यां कल्पयन्ति वहतौ वधूमिव विश्वरूपां हस्तकृतां चिकित्सवः ।
सारादेत्वपनुदाम एनाम् ॥ ॥1॥

शीर्षण्वतीं नस्वतीं कर्णिनीं कृत्याकृता संभृता विश्वरूपा ।
सारादेत्वपनुदाम एनाम् ॥ ॥2॥

शूद्रकृता राजकृता स्त्रीकृता ब्रह्मभिः कृता ।
जाया पत्या नुत्तेव कर्तारं बन्ध्वृच्छतु ॥ ॥3॥

अनयाहमोषध्या सर्वाः कृत्या अदूदुषम् ।
यां क्षेत्रे चक्रुर्यां गोषु यां वा ते पुरुषेषु ॥ ॥4॥

अधमस्त्वधकृते शपथः शपथीयते ।
प्रत्यक्प्रतिप्रहिण्मो यथा कृत्याकृतं हनत् ॥ ॥5॥

प्रतीचीन आङ्गिरसोऽध्यक्षोनः पुरोहितः ।
प्रतीचीः कृत्या आकृत्यामून्कृत्या कृतोजहि ॥ ॥6॥

यस्त्वोवाच परेहीति प्रतिकूलमुदाय्यम् ।
तं कृत्येऽभिनिवर्तस्व मास्मानिच्छो अनागसः ॥ ॥7॥

यस्ते परूंषि सन्दधौ रथस्येव भुर्धिया ।
तङ्गच्छ तत्र तेऽयन मज्ञातस्तेऽयञ्जनः ॥ ॥8॥

ये त्वा कृत्यालेभिरे विद्वला अभिचारिणः ।
शंभ्वी 3 दं कृत्या दूषणं प्रतिवर्त्म पुनः सरं तेनत्वा स्नपयामसि ॥ ॥9॥

यद्दुर्भगां प्रस्नपितां मृतवत्सामुपेयिम ।
अपैतु सर्वं मत्पापं द्रविणं मोप तिष्ठतु ॥ ॥10॥

यत्ते पितृभ्यो ददतो यज्ञे वो नाम जगृहुः ।
संदेश्या 3 त्सर्वस्मात्पापादिमा मुंचन्तु त्वोषधीः ॥ ॥11॥

देवैनसात्पित्र्यान्नामग्राहात्संदेश्या दिभि निष्कृतात् ।
मुंचन्तुत्वा वीरुधो वीर्येण ब्रह्मण ऋग्भिः पयस ऋषीणाम् ॥ ॥12॥

यथा वातश्च्यावयति भूम्या रेणुमन्तरिक्षाच्चाभ्रम् ।
एवामत्सर्वं दुर्भूतं ब्रह्मनुत्तमपायति ॥ ॥13॥

अपक्राम नानदती विनद्धा गर्दभीव ।
कर्तॄन्नक्षस्वेतो नुत्ता ब्रह्मणा वीर्यावता ॥ ॥14॥

अयं पन्थाः कृत्येति त्वा नयामोऽभिप्रहितां प्रतित्वा प्रहिण्मः ।
तेनाभि याहि भञ्जत्यनस्वतीव वाहिनी विश्वरूपा कुरूटिनी ॥ ॥15॥

पराक्ते ज्योतिरपथं ते अर्वागन्यत्रास्मदयना कृणुष्व ।
परेणेहि नवतिं नाव्या 3 अति दुर्गाः स्रोत्या मा क्षणिष्ठाः परेहि ॥ ॥16॥

वात इव वृक्षान्निमृणीहि पादय मा गामश्वं पुरुषमुच्छिष एषाम् ।
कर्तृन्निवृत्येतः कृत्येऽप्रजास्त्वाय बोधय ॥ ॥17॥

यांते बर्हिषि यां श्मशाने क्षेत्रे कृत्यां वलगं वा निचख्नुः ।
अग्नौ वा त्वा गार्हपत्येऽभि चेरुः पाकं सन्तं धीरतरा अनागसम् ॥ ॥18॥

उपाहृतमनुबद्धं निखातं वैरं त्सार्यन्वविदाम कर्त्रम् ।
तदेतु यत आभृतं तत्राश्व इव वि वर्ततां हन्तु कृत्या कृतः प्रजाम् ॥ ॥19॥

स्वायसा अयसः सन्ति नो गृहे विद्म ते कृत्ये यतिधा परूंषि ।
उत्तिष्ठैव परेहीतोऽज्ञाते किमिहेच्छसि ॥ ॥20॥

ग्रीवास्ते कृत्ये पादौ चाऽपि कर्त्स्यामि निर्द्रव ।
इन्द्राग्नी अस्मान्रक्षत्तां यौ प्रजानां प्रजावती ॥ ॥21॥

सोमो राजाधिपा मृडिता च भूतस्य नः पतयो मृडयन्तु ॥ ॥22॥

भवा शर्वावस्यतां पापकृते कृत्याकृते ।
दुष्कृते विद्युतं देवहेतिम् ॥ ॥23॥

यद्येयथ द्विपदी चतुष्पदी कृत्या कृता संभृता विश्वरूपा ।
सतो 3 ष्टापदी भूत्वा पुनः परेहि दुच्छुने ॥ ॥24॥

अभ्य 1 क्ता क्ता स्वरंकृता सर्वं भरन्ती दुरितं परेहि ।
जानीहि कृत्ये कर्तारं दुहितेव पितरं स्वम् ॥ ॥25॥

परेहि कृत्ये मतिष्ठो विद्धस्येव पदं नय ।
मृगःस मृगयुस्त्वं नत्वा निकर्तुं मर्हति ॥ ॥26॥

उतहन्ति पूर्वासिनं प्रत्यादायापर इष्वा ।
उत पूर्वस्य निघ्नतो निहन्त्यपरः प्रति ॥ ॥27॥

एतद्धि श्रृणु मे वचोऽथेहि यत एयथ ।
यस्त्वा चकार तं प्रति ॥ ॥28॥

अनागोहत्या वै भीमा कृत्ये मानो गामश्वं पुरुषं वधीः ।
यत्र यत्रासि निहिता ततस्त्वोत्थापयामसि पर्णाल्लघीयसी भव ॥ ॥29॥

यदिस्थ तमसावृता जालेनाभि हिता इव ।
सर्वाः संलुप्येतः कृत्याः पुनः कर्त्रे प्रहिण्मसि ॥ ॥30॥

कृत्या कृतो वलगिनोऽभिनिष्कारिणः प्रजाम् ।
मृणीहि कृत्ये मोच्छिषोऽमून्कृत्या कृतो जहि ॥ ॥31॥

यथा सूर्यो मुच्यते तमसस्परि रात्रिं जहात्युषसश्च केतून् ।
एवाहं सर्वं दुर्भूतं कर्त्रं कृत्या कृता कृतं हस्तीव रजो दुरितं जहामि ॥ ॥32॥

॥ इति दशमकाण्डे कृत्यादूषणम् ॥

रक्षोहण सूक्तम्

कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवा७इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्ताऽसि विध्य रक्षसस्तपिष्ठैः ॥

तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपू७ष्यग्ने जुह्वा पतङ्गानसन्दितो वि सृज विष्वगुल्काः ॥

प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघश७सो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥

उदग्ने तिष्ठ प्रत्याऽऽतनुष्व न्यमित्रा७ ओषतात् तिग्महेते ।
यो नो अराति७ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥

ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्या न्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥

स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥

सेदग्ने अस्तु सुभगस्सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥

अर्चामि ते सुमतिं घोष्यर्वाक्सन्ते वावाता जरतामियं गीः ।
स्वश्वास्त्वा सुरथा मर्जये मास्मे क्षत्राणि धारयेरनु द्यून् ॥

इह त्वा भूर्या चरे दुपत्मन्दोषावस्तर्दी दिवाऽसमनु द्यून् ।
क्रीडन्तस्त्वा सुमनसस्सपेमाभि द्युम्ना तस्थिवाऽसो जनानाम् ॥

यस्त्वा स्वश्वस्सु हिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग् जुजोषत् ॥

महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वन्नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥

अस्वप्नजस्तरणयस्सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।
ते पायवस्सध्रियञ्चो निषद्याऽग्ने तव नः पान्त्वमूर ॥

ये पायवो मामतेयन्ते अग्ने पश्यन्तो अन्धन्दुरितादरक्षन् ।
ररक्ष तान्थ्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥

त्वया वयऽसधन्यस्त्वोतास्तव प्रणीत्याश्याम वाजान् ।
उभा शऽसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥

अया ते अग्ने समिधा विधेम प्रति स्तोमऽ शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥

रक्षोहणं वाजिनमाऽऽजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म ।
शिशानो अग्निः क्रतुभिस्समिद्धस्स नो दिवा स रिषः पातु नक्तम् ॥

विज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायास्सहते दुरेवाः शिशीते श्रृङ्गे रक्षसे विनिक्षे ॥

उत स्वानासो दिविषन्त्वग्नेस्तिग्मायुधा रक्षसे हन्त वा उ ।
मदे चिदस्य प्ररुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ कृष्णयजुर्वेद सं.1,का.2,प्र.14,अ

स्वस्ति सूक्तम् & अभयंकर सूक्तम्

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि । कृष्णयजुर्वेद ब्रा,3,अ.7,प्र.11,अ

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः । कृष्णयजुर्वेद.आ.10,प्र.55,अ

महा७इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु ।
स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान् द्वेष्टि । कृष्णयजुर्वेद. सं.1,का.4,प्र.41,अ

सजोषा इन्द्र सगणो मरुद्भिस्सोमं पिब वृत्रहञ्छूर विद्वान् ।
जहि शत्रू७रपमृधोनुदस्वाथाभयं कृणु हि विश्वतो नः । कृष्णयजुर्वेद. सं.1,का.4,प्र.42,अ

॥ दुर्गा सूक्तम् ॥

ओं जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः ।
स नः पर्.षदति दुर्गाणि विश्वा नावेव सिन्धुन्दुरिताऽत्यग्निः ॥

तामग्निवर्णान्तपसा ज्वलन्तीं वैरोचनीङ्कर्मफलेषु जुष्टाम् ।
दुर्गान्देवी॰शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥

अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥

विश्वानि नो दुर्गहा जातवेदस्सिन्धुन्न नावा दुरिताऽतिपर्.षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥

पृतना जित॰सहमानमुग्रमग्नि॰ हुवेम परमाथ्सधस्थात् ।
स नः पर्.षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वाञ्चाऽग्ने तनुवं पिप्रयस्वास्मभ्यञ्च सौभगमायजस्व ॥

गोभिर्जुष्टमयुजो निषिक्तन्तवेन्द्र विष्णोरनुसञ्चरेम ।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥
ओं कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥

कृष्णयजुर्वेद.आ.10,प्र.2,अ

श्री कालिका उपनिषत् (अथर्व वेदोक्त:)

ओं अद्याह वै - देवप्रिये - मनोहारिणि – चण्डकपालिनि - भगवति - त्रैलोक्याधिरूपे - ओं तत्सत् - हंस: सोहं -अम्बे - अम्बिके - अम्बालिके – दक्षिणाम्नायेश्वरी - चतुर्दश भुवनाधिपेश्वरी – कालिकाऽतो - ब्रह्मा विष्णु महेश्वरादय स्सर्वे देवाराक्षसा: मुनय: अष्टसिद्धि माप्नुवन्ति - तपस्वी प्रजापतय: - प्रजाता: - पुन: कालिकाङ्गे - प्रलीयन्ते - दिव्य चतुर्दशभुवन मणिमालिनि - अरूपे - स्वरूपे - रूपातीते - ओं कार स्वरूपिणि - वषट्काररूपे - फट्कारावतारे - इडा पिङ्गला सुषुम्णा चित्रा स्वरूपे - ओं तत् त्वमसि - जगत् त्वमसि - स्थावर जङ्गमस्त्वमसि -

य एवं वेद - स वेदविद्भ भवति स ज्ञानी पण्डितश्च - क्रीं मिति त्रितय मग्रे - क्रोधद्वयं तद्वल्लज्जा - दक्षिणे कालिकेति - पुनस्सप्ताक्षरं प्राग्वदुच्चार्य - स्वाहान्तं येन विज्ञायते - स शिवत्वं प्राप्नोति - स योगी स पण्डित: - स सर्व मेव भवति - ध्यानज्ञानमनोवच: - कर्मणा स्मरणं करोति - स जीवन्मुक्त कथ्यते – अस्य पाठाच्चतुर्वर्गित्वं प्राप्यते –

नाग यज्ञोपवीतां च चन्द्रार्ध कृतशेखराम्। जटा जूटां च संचिन्त्य महाकाल समीपगाम्।

एवं ध्यानं - ये ये जनापठन्ति स्मरन्ति - तेते जना कालिकायु युवा भवन्ति - समाधिज्ञानं - विज्ञानमिति सत्यम् - इति मन्त्रोच्चारणेन - पञ्चमहापातकं नाशयति - विद्याराज्ञीयं - यस्यगृहेवर्तते - स: वैश्रवणो भवति - सर्वरोगं सर्वदोषं नाशयति - क्षिप्रं ब्रह्मस्वरूपे - सर्वक्रतुफलं – सर्वदान सर्वतीर्थपुण्यं पाठाल्लभते - मनोरथं प्राप्नोति - धनवान् पुत्रवान् ज्ञानवान् - योगित्वं लभते - नात्र संशय: - इहत्र भोग: परत्वामृते - मोक्षं प्राप्नोति सत्यम् – यएवंवेद - इत्युपनिषत्।।

देव्युपनिषत्।

ओं भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभि र्यजत्राः। स्थिरै रङ्गै स्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्ताक्ष्यो अरिष्ट नेमिः। स्वस्ति नो बृहस्पति र्दधातु।। ओं शान्तिः शान्तिः शान्तिः।।

हरिः ओं - सर्वे वै देवा देवी मुपतस्थुः। कासि त्वं महादेवि।। १।। साब्रवीदहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगच्छून्यं चाशून्यं च। अहमानन्दानानन्दाः। विज्ञानाविज्ञाने अहम्। ब्रह्मा ब्रह्मणी वेदितव्ये। इत्याहा थर्वणी श्रुतिः।। २।। अहं पञ्चभूता न्यापञ्च भूतानि। अह मखिलं जगत्। वेदोऽह मवेदोऽहम्। विद्याह मविद्याहम्। अजाह मनजाहम्। अधश्चोर्ध्वं च तिर्यक्चाहम्।। ३।। अहं रुद्रेरभि र्वसुभि श्चरा म्यहमादित्यै रुत विश्वदेवैः। अहं मित्रावरुणा वुभौ विभर्म्यह मिन्द्राग्नी अहमश्विना वुभौ।। ४।। अहं सोमं त्वष्टारं पूषणं भगं दधाम्यहम्। विष्णु मुरुक्रमं ब्रह्माण मुत प्रजापतिं दधामि।। ५।। अहं दधामि द्रविणं हविष्मते सुप्राव्ये ३ ये यजमानाय सुन्वते। अहं राष्ट्री सङ्गमनी वसूना महं सुवे पितर मस्य मूर्धन्।।६।। मम योनि रप्स्वन्तः समुद्रे। य एवं वेद स देवीपद माप्नोति।। ७।। ते देवा अब्रुवन्। नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भुद्रायै नियताः प्रणताः स्म ताम्।।८।। तामग्नि वर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीं शरण महं प्रपद्ये सुतरां नाशय ते तमः।। ९।। देवीं वाच मजनयन्त देवास्तां विश्वरूपाःपशवो वदन्ति। सा नो मन्द्रेष मूर्जं दुहाना धेनुर्वागस्मा नुपसुष्टुतैतु।। १०।। कालरात्रिं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम्। सरस्वती मदितिं दक्षदुहितरं नमामः पावनां शिवाम्।। २२।। महालक्ष्मीश्च विद्महे सर्वसिद्धिश्च धीमहि। तन्नो देवी प्रचोदयात्।। १२।। अदिति र्ह्यजनिष्ट दक्ष या दुहिता तव। तां देवा अन्वजायन्त भद्रा – अमृतबन्धवः ।।१३।। कामो योनिः कामकला वज्रपाणि र्गुहा हसा मातरिश्वाभ्र मिन्द्रः। पुन र्गुहा सकला मायया च पुरूच्येषा विश्वसाता दिविद्योम्।। १४।। एषात्मशक्तिः। एषा विश्वमोहिनी पाशाङ्कुश धनुर्बाण धरा। एषा श्री महाविद्या।। १५।। य एवं वेद स शोकं तरति।। १२६।। नमस्ते अस्तु भगवति भवति मातर स्मान्या तु सर्वतः।। सैषाष्टौ वसवः। सैषैकादश रुद्राः। सैषा द्वादशादित्याः। सैषा विश्वेदेवाः सोमपा असोमपाश्च। सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः। सैषा सत्तव रजस्तमांसि - सैषा

प्रजापतीन्द्र मनवः। सैषा ग्रहन क्षत्रज्योतींषि कलाकाष्ठादिकालरूपिणी। तामहं प्रणौमि नित्यम्।। १८।। तापापहारिणीं देवीं भुक्तिमुक्ति प्रदायिनीम्। अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम्।। १९।। वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम्। अर्धेन्दुलसितं देव्याबीजं सर्वार्थसाधकम्।। २०।। एव मेकाक्षरं मन्त्रं यतयः शुद्धचेतसः। ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः।। २१।। वामाया ब्रह्मभू स्तस्मात्षष्ठं वक्र समन्वितम्। सूर्यो वामश्रोत्र बिन्दुसंयुक्तष्टा चृतीयकः ।।११।। नारायणेन संयुक्तो वायुश्चाधर युक्ततः। विच्चे नवार्णकोऽणुःस्या न्महदानन्द दायकः।। २३।। हृत्पुण्डरी क मध्यस्थां प्रातः सूर्य समप्रभाम्। पाशाङ्कुशधरां सौम्यां वरदाभय हस्तकाम्। त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे।। २४।। नमामि त्वामहं देवीं महाभय विनाशिनीम्। महादुर्ग प्रशमनीं महाकारुण्य रूपिणीम्। २५।। यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मा दुच्यते ऽज्ञेया। यस्या अन्तो न विद्यते तस्मा दुच्यते ऽनन्ता। यस्या ग्रहणं नोपलभ्यते तस्मा दुच्यते ऽलक्ष्या। यस्या जननं नोपलभ्यते तस्मा दुच्यते ऽजा। एकैव सर्वत्र वर्तते तस्मा दुच्यते एका। एकैव विश्वरूपिणी तस्मा दुच्यते नैका। अत एवोच्यते ऽज्ञेया नन्ता लक्ष्या जैका नैकेति।। २६।। मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी। ज्ञानानां चिन्मया तीता शून्यानां शून्य साक्षिणी।। २७।। यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता। (दुर्गात्संत्रायते यस्मा द्देवी दुर्गेति कथ्यते। प्रपद्ये शरणं देवीं दुं दुर्गे दुरितं हर।।)तां दुर्गां दुर्गमांदेवीं दुराचार विधातिनीम्। नमामि भवभीतोऽहं संसारार्णव तारिणीम्।। २८।। इद मथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्ष जपफल मवाप्नोति। इद मथर्वशीर्ष मज्ञात्वा योऽर्चां स्थापयति शतलक्षं प्रजप्त्वापि सोऽर्चासिद्धिं न विन्दति।। २९।। शतमष्टोत्तरं चास्याःपुरश्चर्याविधिः स्मृतः।। ३०।। दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते। महादुर्गाणि तरति महादेव्याः प्रसादतः।। ३१।। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो ऽपापो भवति। निशिथे तुरीय सन्ध्यायां जप्त्वा वाक्सिद्धि र्भवति। नूतनप्रतिमायां जप्त्वा देवता सांनिध्यं भवति। प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति। भौमाश्विन्यां महादेवीसंनिधौ जप्त्वा महामृत्युं तरति। य एवं वेदेत्युपनिषत्।। ३२।।

ओं भद्रंकर्णेभिरितिशान्तिः।। हरिः ओं तत्सत्।।

।। इति देव्युपनिषत्।।

बह्वृचोपनिषत्।

ओं वाङ्मे मनसीति शान्तिः।।

हरिः ओं ।देवी ह्येकाग्र एवासीत्। सैव जगदण्ड मसृजत्। कामकलेति विज्ञायते। शृङ्गारकलेति विज्ञायते।तस्या एव ब्रह्मा अजीजनत्। विष्णु रजीजनत्। रुद्रो ऽजीजनत्। सर्वेमरुद्गणा अजीजनन्। गन्धर्वाप्सरसः किंनरा वादित्र वादिनः समन्ता दजीजनन्। भोग्य मजीजनत्। सर्वं मजीजनत्। सर्वं शाक्त मजीजनत्। अण्डजं स्वेदज मुद्भिजं जरायुजं यत्किंचैतत्प्राणि स्थावर जङ्गमं मनुष्यमजीजनत्।।

सैषा परा शक्तिः। सैषा शांभवी विद्या - कादिविद्येति वा - हादिविद्येति वा - सादिविद्येति वा। रहस्यमोमो वाचि प्रतिष्ठा। सैव पुरत्रयं शरीरत्रयं व्याप्य बहिरन्त रवभासयन्ती देश काल वस्त्वन्तरा सङ्गा न्महा त्रिपुरसुन्दरी वै प्रत्यक्चितिः। सैवात्मा ततोऽन्य दसत्य मनात्मा। अत एषा ब्रह्मसंवित्ति र्भावाभावकला विनिर्मुक्ता चिद्विद्या ऽद्वितीय ब्रह्मसंवित्तिः सच्चिदानन्दलहरी महात्रिपुरसुन्दरी बहिरन्त रनुप्रविश्य स्वय मेकैव विभाति। यदस्ति सन्मात्रम्। यद्विभाति चिन्मात्रम्। यत्प्रिय मानन्दं तदेत त्पूर्वाकारा महात्रिपुरसुन्दरी। त्वं चाहं च सर्वं विश्वं सर्वदेवता। इतरत्सर्वं महात्रिपुरसुन्दरी। सत्यमेकं ललिताख्यं वस्तु तदद्वितीय मखण्डार्थं परं ब्रह्म। पञ्चरूप परित्यागा दर्वरूप प्रहाणतः। अधिष्ठानं परं तत्त्वमेकं सच्छिष्यते महत् - इति। प्रज्ञानं ब्रह्मेति वा अहं ब्रह्मास्मीति वा भाष्यते। तत्त्वमसीत्येव संभाष्यते।अयमात्मा ब्रह्मेति वा - ब्रह्मैवाहमस्मीति वा - योऽहमस्मीति वा - सोहमस्मीति वा - योऽसौ सोऽहमस्मीति वा - या भाव्यते सैषा षोडशी - श्रीविद्या पञ्चदशाक्षरी - श्रीमहात्रिपुरसुन्दरी - बालाम्बिकेति -बगलेति वा - मातङ्गीति - स्वयंवरकल्याणीति - भुवनेश्वरीति - चामुण्डेति - चण्डेति वाराहीति - तिरस्करिणीति - राजमातङ्गीति वा शुकश्यामलेति वा - लघुश्यामलेति वा -अश्वारूढेति वा - प्रत्यङ्गिरा - धूमावती - सावित्री - गायत्री - सरस्वती - ब्रह्मानन्दकलेति। ऋचो अक्षरे परमे व्योमन्।यस्मिन्देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति। य इत्तद्विदुस्त इमे समासते।। इत्युपनिषत्।। ओं वाङ्मे मनसीति शान्तिः।। हरिः ओं तत्सत्।।

।।इति बह्वृचोपनिषत्।।

श्री कालिका हृदयस्तोत्रम्

हं हं हं हंस हंसी स्मित कह कह चामुक्त घोरा ट्टहासा -
खं खं खं खड्गहस्ते त्रिभुवन निलये कालिका कालधारी।
रं रं रं रङ्ग रङ्गी प्रमुदित वदने पिङ्ग केशी श्मशाने
यं रं लं तापनीये भ्रकुटि घटघटा टोप टङ्कार जापे।।

हं हं हं हुंकारनादं नरपिशितमुखी संघिनी साधुदेवी -
ह्रीं ह्रीं कूष्माण्ढ मुण्डी वर वर ज्वलिनी पिङ्गकेशी कृशाङ्गी।
खं खं खं भूतनाथे किलि किलि किलिके एहि एहि प्रचण्डे
ह्रूं ह्रूं ह्रूं भूतनाथे सुरगण नमिते मात रम्बे नमस्ते।।

भां भां भां भावभावैः भय हन हनितं भुक्ति मुक्ति प्रदात्री
भीं भीं भीं भीमकाक्षिः गुण गुणित गुहावास भोगी स भोगी।
भूं भूं भूं भूमिकम्पे प्रलय च निरते तारयन्तं स्व नेत्रे
भें भें भें भेदनीये हरतु मम भयं कालिके त्वां नमस्ते ।।

आयुः श्री वर्द्धनीये विपुल रिपु हरे सर्व सौभाग्य हेतुः
श्रीकाली शत्रुनाशे सकलसुखकरे सर्व कल्याण मूले।
भक्त्या स्तोत्रं त्रिसन्ध्यं यदि जपति पुमान् आशु सिद्धिं लभन्ते
भूत प्रेतादि रण्ये त्रिभुवन वशिनी रूपिणो भूति युक्ते।।

इति श्रीकालीतन्त्रे कालिका हृदयस्तोत्रं संपूर्णम्।

श्री काली ककारादि नामशताष्टक स्तोत्रम्

श्री भैरव उवाच –

शतनाम प्रवक्ष्यामि कालिकाया वरानने ।
यस्य प्रपठनाद् वाग्मी सर्वत्र विजयी भवेत् ।। 1

काली कपालिनी कान्ता कामदा कामसुन्दरी ।
कालरात्रिः कालिका च कालभैरव पूजिता ।। 2

कुरुकुल्ला कामिनी च कमनीय स्वभाविनी ।
कुलीना कुलकर्त्री च कुलवर्त्म प्रकाशिनी ।। 3

कस्तूरी रसनीला च काम्या काम स्वरूपिणी ।
ककार वर्ण निलया कामधेनुः करालिका ।। 4

कुलकान्ता करालास्या कामार्त्ता च कलावती ।
कृशोदरी च कामाख्या कौमारी कुलपालिनी ।। 5

कुलजा कुलकन्या च कलहा कुलपूजिता ।
कामेश्वरी कामकान्ता कुञ्जरेश्वर गामिनी ।। 6

कामदात्री कामहर्त्री कृष्णा चैव कपर्दिनी ।
कुमुदा कृष्णदेहा च कालिन्दी कुलपूजिता ।। 7

काश्यपी कृष्णमाता च कुलिशाङ्गी कला तथा ।
क्रीं रूपा कुलगम्या च कमला कृष्णपूजिता ।। 8

कृशाङ्गी किन्नरी कर्त्री कलकण्ठी च कार्तिकी ।
कम्बुकण्ठी कौलिनी च कुमुदा कामजीविनी ।। 9

कुलस्त्री कीर्तिका कृत्या कीर्तिश्च कुलपालिका ।
कामदेव कला कल्प लता कामाङ्ग वर्द्धिनी ।। 10

कुन्ता च कुमुद प्रीता कदम्ब कुसुमोत्सुका ।
कादम्बिनी कमलिनी कृष्णानन्द प्रदायिनी ।। 11

कुमारी पूजन रता कुमारी गण शोभिता ।
कुमारी रञ्जन रता कुमारी व्रत धारिणी ।। 12

कङ्काली कमनीया च कामशास्त्र विशारदा ।
कपाल खट्वाङ्ग धरा कालभैरव रूपिणी ।। 13

कोटरी कोटराक्षी च काशी कैलास वासिनी ।
कात्यायनी कार्यकरी काव्यशास्त्र प्रमोदिनी ।। 14

कामाकर्षणरूपा च कामपीठ निवासिनी ।
कङ्किनी काकिनी क्रीडा कुत्सिता कलह प्रिया ।। 15

कुण्ड गोलोद्भवप्राणा कौशिकी कीर्तिवर्द्धिनी ।
कुम्भस्तनी कलाक्षा च काव्या कोकनदप्रिया ।। 16

कान्तार वासिनी कान्ति: कठिना कृष्ण वल्लभा ।
शुभं ते कथितं देवि गुह्यात् गुह्यतरं परम् ।। 17

फलश्रुति:

प्रपठेद् य इदं नित्यं कालीनाम शताष्टकम् ।
त्रिषु लोकेषु देवेशि तस्या साध्यं न विद्यते ।। 18

प्रात:काले च मध्याह्ने सायाह्ने च सदा निशि ।
य: पठेत् परया भक्त्या कालीनाम शताष्टकम् ।। 19

कालिका तस्य गेहे च संस्थाने कुरुते सदा ।
शून्यागारे श्मशाने वा प्रान्तरे जलमध्यत: ।। 20

वह्निमध्ये च संग्रामे तथा प्राणस्य संशये ।
शताष्टकं जपेन्मन्त्री लभते क्षेममुत्तमम् ।। 21

कालीं संस्थाप्य विधिवत् स्तुत्वा नामशताष्टकम् ।
साधक: सिद्धि माप्नोति कालिकाया: प्रसादत: ।। 22

(इति श्री काली ककारादि नामशताष्टकस्तोत्रं सम्पूर्णम्)

भैरवी अष्टोत्तर शतनाम स्तोत्रम्

श्री देव्युवाच –

कैलासवासिन् भगवन् प्राणेश्वर कृपानिधे ।
भक्तवत्सल भैरव्या नाम्ना मष्टोत्तरं शतम् ।। 1

न श्रुतं देवदेवेश वद मां दीनवत्सल।

श्री शिव उवाच –

श्रुणु प्रिये महागोप्यं नाम्ना मष्टोत्तरं शतम् ।। 2

भैरव्याः शुभदं सेव्यं सर्वसम्पत्प्रदायकम् ।
यस्यानुष्ठानमात्रेण किं न सिध्यति भूतले ।। 3

ओं भैरवी भैरवाराध्या भूतिदा भूतभावना ।
कार्या ब्राह्मी कामधेनुः सर्वसम्पत्प्रदायिनी ।। 4

त्रैलोक्य वन्दिता देवी महिषासुर मर्दिनी ।
मोहघ्नी मालती माला महापातकनाशिनी ।। 5

क्रोधिनी क्रोधनिलया क्रोध रक्तेक्षणा कुहूः ।
त्रिपुरा त्रिपुराधारा त्रिनेत्रा भीमभैरवी ।। 6

देवकी देवमाता च देवदुष्ट विनाशिनी ।
दामोदरप्रिया दीर्घा दुर्गा दुर्गति नाशिनी ।। 7

लम्बोदरी लम्बकर्णा प्रलम्बित पयोधरा ।
प्रत्यङ्गिरा प्रतिपदा प्रणतक्लेश नाशिनी ।। 8

प्रभावती गुणवती गुणमाता गुहेश्वरी ।
क्षीराब्धितनया क्षेम्या जगत् त्राण विधायिनी ।। 9

महामारी महामोहा महाक्रोधा महानदी ।
महापातक संहर्त्री महामोह प्रदायिनी ।। 10

विकराळा महाकाला कालरूपा कलावती ।
कपाल खट्वाङ्गधरा खड्गा खर्पर धारिणी ।। 11

कुमारी कुङ्कुमप्रीता कुङ्कुमारुण रञ्जिता ।
कौमोदकी कुमुदिनी कीर्त्या कीर्तिप्रदायिनी ।। 12

नवीना नीरदा नित्या नन्दिकेश्वर पालिनी ।
घर्घरा घर्घरारावा घोरा घोरस्वरूपिणी ।। 13

कलिघ्नी कलिधर्मघ्नी कलि कौतुकनाशिनी ।
किशोरी केशवप्रीता क्लेश सङ्घ निवारिणी ।। 14

महोत्तमा महामत्ता महाविद्या महीमयी ।
महायज्ञा महावाणी महा मन्दर धारिणी ।। 15

मोक्षदा मोहदा मोहा भुक्तिदा मुक्तिदायिनी ।
अट्टाट्टहास निरता क्वणन्नूपुर धारिणी ।। 16

दीर्घदंष्ट्रा दीर्घमुखी दीर्घघोणा च दीर्घिका ।
दनुजान्तकरी दुष्टा दुःख दारिद्र्य भञ्जिनी ।। 17

दुराचारा च दोषघ्नी दमपत्नी दयापरा ।
मनोभवा मनुमयी मनुवंश प्रवर्धिनी ।। 18

श्यामा श्यामतनुः श्शोभा सौम्या शम्भुविलासिनी ।
इति ते कथितं दिव्यं नाम्ना मष्टोत्तरं शतम् ।। 19

भैरव्या देवदेवेश्या स्तव प्रीत्यै सुरेश्वरि ।
अप्रकाश्य मिदं गोप्यं पठनीयं प्रयत्नतः ।। 20

देवीं ध्यात्वा सुरां पीत्वा मकारपञ्चकैः प्रिये ।
पूजयेत् सततं भक्त्या पठेत् स्तोत्र मिदं शुभम् ।। 21

षण्मासाभ्यन्तरे सोऽपि गणनाथसमो भवेत् ।
किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे ।। 22

सर्वं जानासि सर्वज्ञे पुनर्मां परिपृच्छसि ।
न देयं परशिष्येभ्यो निन्दकेभ्यो विशेषतः ।। 23

(इति श्री भैरव्यष्टोत्तर शतनामस्तोत्रं समाप्तम्)

(श्री मन्त्रमहार्णवे - मध्यखण्डे - त्रिपुरभैरवीतन्त्रे - ऽष्टमस्तरङ्गः)



भैरवी स्तोत्रम् (भैरवी स्तवराज:)

ब्रह्मादय: स्तुति शतै रपि सूक्ष्मरूपं –
जानन्ति नैव जगदादि मनादि मूर्तिम् ।
तस्मात् वयं कुचनतां नव कुङ्कुमाभां –
स्थूलां स्तुम: सकल वाङ्मय मातृभूताम् ।। 1

सद्य: समुद्यत सहस्र दिवाकराभां –
विद्याक्षसूत्र वरदाभय चिह्न हस्ताम् ।
नेत्रोत्पलै स्त्रिभिलङ्कृत वक्रपद्मां –
त्वां तारहार रुचिरां त्रिपुरे भजाम: ।। 2

सिन्दूरपूर रुचिरं कुचभार नम्रं –
जन्मान्तरेषु कृतपुण्य फलैक गम्यम् ।
अन्योन्य भेदकलहा कुल मानसास्ते –
जानन्ति किं जडधिय स्तव रूप मम्ब ।। 3

स्थूलां वदन्ति मुनयो श्रुतयो गृणन्ति –
सूक्ष्मां वदन्ति वचसा मधिवास मन्ये ।
त्वां मूल माहु रपरे जगतां भवानि –
मन्यामहे वय मपार कृपाम्बुराशिम् ।। 4

चन्द्रावतंस कलितां शरदिन्दु शुभ्रां –
पञ्चाश दक्षरमयीं हृदि भावयन्तीम् ।
त्वां पुस्तकं जपवटी ममृताम्बुकुम्भं –
व्याख्यां च हस्तकमलै र्दधतीं त्रिनेत्राम् ।। 5



शम्भु स्त्व मद्रि तनया कलितार्धभागो –
विष्णु स्त्व मम्ब कमला परिरब्धदेहः ।
पद्मोद्भव स्त्वमपि वागाधिवास भूमिः –
तेषां क्रियाश्च जगति त्रिपुरे त्वमेव ।। 6

आश्रित्य वाग्भव भवांश्चतुरः परादीन् –
भावान् पदेषु विहिता न्समुदीरयन्तीम् ।
कण्ठादिभिश्च करणैः परदेवतां त्वां –
संविन्मयीं हृदि कदापि न विस्मरामि ।। 7

आकुञ्च्य वायु मवजित्य च वैरिषट्कं –
आलोक्य निश्चल धिया निज नासिकाग्रम् ।
ध्यायन्ति मूर्ध्नि कलितेन्दु कला वसन्तं
त्वद्रूप मम्ब कृतिन स्तरुणार्क मित्रम् ।। 8

त्वं प्राप्य मन्मथरिपो र्वपुरर्धभागं –
सृष्टिं करोषि जगता मिति वेदवादः ।
सत्यं तदद्रितनये जगदेक मातः -
नो चेदशेष जगतः स्थिति रेव न स्यात् ।। 9

पूजां विधाय कुसुमैः सुरपादपानां –
पीठे तवाम्ब कनकाचल गह्वरेषु ।
गायन्ति सिद्धवनिताः सह किन्नरीभिः -
आस्वादितासव रसा रुण नेत्रपद्माः ।। 10

विद्यु द्विलास वपुषः श्रिय मुद्वहन्तीं –
यान्तीं स्ववास भवना च्छिव राजधानीम् ।
सौषुम्न वर्त्मकमलानि विकासयन्तीं –
देवीं भजे हृदि परामृत सिक्त गात्राम् ।। 11

आनन्द जन्मभवनं भवनं श्रुतीनां-
चैतन्य मात्र तनु मम्ब तवा श्रयामि ।
ब्रह्मेश विष्णुभि रुपासित पादपद्मां –
सौभाग्य जन्मवसतिं त्रिपुरे यथावत् ।। 12

शब्दार्थ भावि भवनं सृजतीन्दुरूपा –
या तद् बिभर्ति पुन रर्क तनुः स्वशक्त्या ।
ब्रह्मात्मिका हरति तत्सकलं युगान्ते –
तां शारदां मनसि जातु न विस्मरामि ।। 13

नारायणीति नरकार्णव तारिणीति –
गौरीति खेद शमनीति सरस्वतीति ।
ज्ञानप्रदेति नयनत्रय भूषितेति –
त्वा मद्रिराज तनये बहुधा वदन्ति ।। 14

ये स्तुवन्ति जगन्मातः श्लोकै र्द्वादशभिः क्रमात् ।
त्वा मनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते नराः श्रियम् ।।

(इति शाक्ततन्त्रे रुद्रयामले भैरवीस्तोत्रं समाप्तम्।)

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

मन्त्रिणः अनुष्ठान विषयाः

विभागः - 3

साधकनित्यान्हिक पूजाहोमादिकृत्य कारिका

ओं श्री गणेशाय नमः - ओं नमःशिवाय - ओं नमो भगवत्यै - ओं नमः कुमाराय - इति प्रातः मनसा प्रणमेत्।

प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदाम्बुजम्।
आवश्यकं विनिर्वर्त्य स्नातुं यायात् सरित्तटे।।

श्रौतेन विधिना स्नात्वा मन्त्रस्नानं समाचरेत्।
स्मार्तसन्ध्यां मन्त्रसन्ध्यां कृत्वा देवं विचिन्तयेत्।।

गृहद्वार मथागत्य द्वारपूजां समाचरेत्।

द्वारपूजाक्रमः

द्वार मस्त्राम्बुना प्रोक्ष्य गणेशं चोर्ध्वतो यजेत्।
महालक्ष्मीं दक्षभागे वामभागे सरस्वतीम्।
पुनर्दक्षे यजेद् विघ्नं गङ्गां च यमुना मपि।
पुनर्वामे क्षेत्रपालं स्वर्सिन्धु यमुने अपि।
पुनर्दक्षे तु धातारं विधातारं तु वामतः।।
तद्वन्निधी शङ्खपद्मौ ततोऽर्चेद् द्वारपालकान्।
द्वारपूजां विधायेत्थं प्रविश्यार्चनमन्दिरम्।।

प्राणायामविधिः

उपविश्यासने नत्वा गणेश गुरुदेवताः।
प्राणानायम्य तारेण पूर कुम्भक रेचकैः।
द्वात्रिंशता यतुःषष्ठ्या क्रमात् षोडश संख्या।
देवार्चा योग्यता प्राप्त्यै भूतशुद्धिं समाचरेत्।।

भूतशुद्धि क्रियाक्रमः (कुण्डलिनीयोगेनात्मशुद्धिः)

मूलाधारस्थितां देवीं कुण्डलीं परदेवताम्।
बिसतन्तु निभां विद्युत् प्रभां ध्यायेत् समाहितः।
मूलाधारात् समुत्थाप्य सङ्गतां हृदयाम्बुजे।
सुषुम्ना मार्ग माश्रित्याऽदाय जीवं हृदम्बुजात्।
प्रदीप कलिकाकारं ब्रह्मरन्ध्रगतं स्मरेत्।
जीवं ब्रह्मणि संयोज्य हंसमन्त्रेण साधकः।।

पञ्चभूतमण्डल ध्यानम्

पादादि ब्रह्मरन्ध्रान्तं स्थितं भूतगणं स्मरेत्।
स्ववर्ण बीजाकृतिभिः युक्तं तद् विधिरुच्यते।
पादादि जानुपर्यन्तं चतुष्कोणं सवज्रकम्।
भूबीजाढ्यं स्वर्णवर्णं स्मरेद् अवनि मण्डलम्।
जान्वाद्या नाभि चन्द्रार्धनिभं पद्मद्वयांकितम्।।
वं बीजयुक्तं श्वेताभ मम्भसो मण्डलं स्मरेत्।
नाभे र्हृदयपर्यन्तं त्रिकोणं स्वस्तिकान्वितम्।
रं बीजेन युतं रक्तं स्मरेत् पावक मण्डलम्।।
हृदो भ्रूमध्य पर्यन्तं वृत्तं षड्बिन्दु लाञ्छितम्।
यं बीजयुक्तं धूम्राभं नभस्वन् मण्डलं स्मरेत्।।
आब्रह्मरन्ध्रं भ्रूमध्याद् वृत्तं स्वच्छं मनोहरम्।
हंबीजयुक्त माकाश मण्डलं प्रविचिन्तयेत्।
पद्धस्त पायूपस्था वाक् क्रमाद् ध्येया धरादिगाः।
स्वकीय विषयै र्युक्ता गमन ग्रहणादिभिः।
घ्राणं च रसना चक्षुः स्पर्शनं श्रोत्रमिन्द्रियम्।
क्रमाद् ध्येयं धरादिस्थं गन्धादि गुणसंयुतम्।

ब्रह्मविष्णु शिवेशाना: सदाशिव इतीरिता:।
धरादि भूतसंघेशा: ध्येया स्तन्मण्डलेषु ते।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्ति श्चतुर्थिका।
शान्त्यतीतेति पञ्चैव कला ध्येया धरादिगा:।
समानोदान व्यानाश्चा पान प्राणौ च वायव:।
धरादि मण्डलगता: पञ्च ध्येया: क्रमादिमे।
एवं भूतानि संचिन्त्य प्रत्येकं प्रविलापयेत्।

भूतविलापनम्

भुवं जले जलं वह्नौ वह्निं वायौ नभस्यमुम्।
विलाप्य खमहंकारे महत्तत्वे प्यहंकृतिम्।।
महान्तं प्रकृतौ माया मात्मनि प्रविलापयेत्।
शुद्ध सच्चिन्मयो भूत्वा चिन्तयेत् पापपूरुषम्।

पापपुरुष निरासनम्

दक्ष कुक्षिस्थितं कृष्ण मङ्गुष्ट परिमाणकम्।
विप्रहत्या शिरोयुक्तं कनकस्तेय बाहुकम्।
मदिरापान हृदयं गुरुतल्प कटीयुतम्।
पापि संयोगि पद्वन्द्व मुपपातक रोमकम्।
खङ्ग चर्मधरं दुष्ट मधोवक्त्रं सु दुस्सहम्।
वायुबीजं (यं) स्मरन् वायुं संपूर्य्यैनं विशोषयेत्।
स्वशरीरयुतं मन्त्री वह्निबीजेन(रं) निर्दहेत्।
कुम्भके परिजप्तेन तत: पापनरो द्भवम्।
बहिर्भस्म समुत्सार्य वायुबीजेन (यं) रेचयेत्।।

सुधाबीजेन (वं) देहोत्थं भस्म संप्लावयेत्सुधीः।

भूबीजेन (लं) घनीकृत्य भस्म तत् कनकाण्डवत्।

विशुद्ध मुकुराकारं जपन् बीजं विहाय सः (हं)

मूर्धादि पादपर्यन्ता न्यङ्गानि रचयेत् सुधीः।

शुद्धे जीवस्थापनम्

आकाशादीनि भूतानि पुनरुत्पादयेत् चितः।।

सोहं मन्त्रेण चात्मानंआनयेत् हृदयाम्बुजे।

कुण्डलींजीव मादाय परसङ्गात् सुधामयम्।

संस्थाप्य हृदयाम्भोजे मूलाधारगतां स्मरेत्।।

भूतशुद्धिं विधायैवं प्राणस्थापन माचरेत्।।

प्राणप्रतिष्ठा न्यासकारिका

प्राणप्रतिष्ठा मन्त्रस्य मुनयो ऽजेश पद्मजाः।

छन्द ऋग् यजुषं साम प्राण शक्तिस्तु देवता।

पाशो (आं) बीजं त्रपा (ह्रीं)शक्तिः विनियोगोऽसु संस्थितौ।।

ऋषीन् शिरसि वक्रे तु छन्दांसि हृदि देवताम्।

गुह्ये बीजं पदोः शक्तिं न्यस्य कुर्यात् षडङ्गकम्।

सृष्ट्यादि न्यासत्रय विधिः

स्थित्यादौ तु गृहस्थानां सृष्ट्यादौ ब्रह्मचारिणाम्।

संहारादौ यतीनां च मातृकान्यास माचरेत्।

नाभा वारभ्यते यस्तु हृदये च समाप्यते।

स्थितिन्यासः स विज्ञेयः दृष्टादृष्ट फलप्रदः।

विद्यार्थी योनिबीजाद्यः जपेद् मन्त्रं समाहितः। (योनिबीजं = ऐं)
श्रीयाऽर्थी च रमाबीजं स्तम्भनेऽपि तदेव हि। (रमाबीजं = श्रीं)
वशीकर्तुं कामबीज पूर्वकं मन्त्र मुच्चरेत्।। (कामबीजं = क्लीं)
समस्त कामना वाप्तये त्रितारीयुत न्यासः = ओं ऐं ह्रीं श्रीं
(ह्रीं बीजं स्तंभने च न्यसेत्)
(त्रितारी = ऐं ह्रीं श्रीं-) कालीमूलत्रिबीजं = क्रीं हूं ह्रीं)
(कालीप्रेतबीजं = हसौंस्हौं)

वर्ण व्यापक न्यासाकारिका

कवर्ग नभ आद्यैः हृच्छशब्दाद्यैः शिरः स्मृतम्।
टश्रोत्राद्यैः शिखा प्रोक्ता तवर्गाद्यैः तनुच्छदम्।
पवक्तव्यादिभि र्नेत्रं अस्त्रं येनान्तरिन्द्रियैः।
आत्मन्येतान् मनून् अङ्गान्विन्यसेद् हृदयादिषु।।
पञ्चमं प्रथमं पश्चात् द्वितीयं च चतुर्थकम्।
तृतीय मित्थं क्रमतो वर्गवर्णान् समुच्चरेत्।
यवर्गेप्येवमुच्चार्य नभः (हं) श्वेतो (षं) न्तिमो (शं) भृगुः (सं)।
विमलश्चेति (लं) चोच्चार्य्याः क्रमाद् वर्णाः सबिन्दवः।
नभोवाय्वग्निर्वाभूमि नभ आदय ईरिताः।
शब्दस्पर्शौ रूप रस गन्धाः शब्दादयो मताः।
श्रोत्रं त्वङ् नयनं जिह्वा घ्राणं श्रोत्रादयःस्मृताः।
वाक् पाणी पाद पायू चोपस्थो वागादयः पुनः।
वक्तव्या दान गमन विसर्गा नन्द संज्ञकाः।
वक्तव्याद्या बुद्धि मनो हंकाराः चित्तसंयुताः।
अन्तरिन्द्रिय संज्ञाः स्युः एव मुक्तं षडङ्गकम्।
नाभे रारभ्य पादान्तं पाशबीजं (आं) प्रविन्यसेत्।

नाभ्यन्तं हृदयात् शक्तिं (ह्रीं) हृदन्तं मस्तकात् सृणिम् (क्रौं)
त्वगसृङ्मांस मेदो ऽस्थि मज्जा शुक्राणि विन्यसेत्।
आत्मने हृदयान्तानि यादि सप्तादिकान्यपि।
ओजः सद्यान्विता काशपूर्वं प्राणं तु खादिकम्।
भृग्वादिकं न्यसेत् जीवं एतान् हृदय देशतः।
यकाराद्याः आद्यवर्णाः सर्वे स्युः चन्द्रभूषिताः।
ततः समस्त मूलेन मूर्धादि चरणावाधि।।
विधाय व्यापकन्यासं विन्यसेत् पीठदेवताः।

हृत्पद्मे पीठदेवतान्यास विधिः क्रमः ।

मण्डूकश्चाथ कालाग्नी रुद्र आधारशक्ति युक्।
कूर्मो धरा सुधा सिन्धुः श्वेतद्वीपं सुराङ्घ्रिपाः।
मणिहर्म्यं हेमपीठं धर्मो ज्ञानं विरागता।
ऐश्वर्यं धर्मपूर्वास्तु चत्वार स्ते नञादिकाः।
धर्मादयः स्मृताः पादाः पीठगात्राणि चेतरे।।
मध्ये ऽनन्तस्तत्वपद्म मानन्दमय कन्दकम्।
संविन् नालं ततः प्रोक्ता विकारमय केसराः।
प्रकृत्यात्मक पत्राणि पञ्चाशद् वर्ण कर्णिका।
सूर्यस्येन्दोः पावकस्य मण्डल त्रितयं ततः।
सत्वं रज स्तमः पश्चाद् आत्मयुक्तोन्तरात्मना।
परमात्माऽथ ज्ञानात्मा तत्वे माया कलादिके।
विद्यातत्वं परं तत्वं कथिताः पीठदेवताः।।
पूजने सर्वदेवानां पीठे ताः परिपूजयेत्।
न्यास स्थानानि चैतासां शरीरे बहि रर्चने।
पूजातरङ्गे वक्ष्यन्ते सेन्द्वाद्यर्णयुताश्च ताः। (मन्त्रमहोदधौ)

प्राणशक्ति पूजा विधिः

प्राणशक्ते स्ततः पूज्या अष्टौ पीठस्य शक्तयः।

हृदयाम्भोज पत्रेषु नवमी त्वधिकर्णिकम्।

जयाख्या विजया पश्चात् अजिता चा ऽपराजिता।

नित्या विलासिनी दोग्ध्री त्वघोरा मङ्गला न्तिमा।।

पाशादि बीजत्रितयं पोच्य पीठंदिशेत्ततः। (आं – ह्रीं - क्रों)

एवं देहमये पीठे ध्यायेत् देवीं असुप्रदाम्।

नवयौवन गर्वाढ्यां पीवरस्तन शोभिनीम्।

पाशं चापासृक्कपाले सृणीषूच्छूलं हस्तै र्बिभ्रतीं रक्तवर्णां –

रक्तो दन्वत्पोत रक्ताम्बुजस्थां देवीं ध्यायेत् प्राणशक्तिं त्रिनेत्राम्।।

अष्टपत्रस्थ षट्कोणे ध्यात्वैवं पूजयेत् तु तान्।

पञ्चावरणपूजाविधि कारिका

प्राग्रक्षो वायु कोणेषु ब्रह्म विष्णु शिवान्यजेत्।

अग्नि वारुण शैवेषु वाणी लक्ष्मी हिमाद्रिजाः।

केसरेषु षडंगानि पत्रेष्वष्टौ तु मातरः।

ब्राह्मी माहेश्वरी चापि कौमारी वैष्णवी तथा।

वाराही च तथेन्द्राणी चामुण्डा सप्तमी मता।

अष्टमी तु महालक्ष्मीः प्रोक्ता विश्वस्य मातरः।

देवतापूजने प्राची मध्ये पूजक पूज्ययोः।

इन्द्रादयः स्वदिक्ष्वेव पूजनीया दिगीश्वराः।

इन्द्रः कृशानुः कीनाशो निऋति र्वरुणोऽनिलः।

सोम ईशान नामा ऽधो ऽनन्त ऊर्ध्वं चतुर्मुखः।

तत इन्द्रादि काष्ठासु पूज्या दिक्पाल हेतयः।

वज्रं शक्ति र्दण्ड खड्गौ पाशाङ्कुश गदे अपि।

त्रिशूल चक्र पद्मानि दशदिक्पाल हेतयः।

एव मिष्ट्वा प्राणशक्तिं पञ्चावरण संयुताम्।

ध्यायन् हृदि करं धृत्वा त्रिर्जपेत्तन्मनुं सुधीः।

वक्ष्ये ऽधुना मनो स्तस्य उद्धारं ध्यातृ सुखावहम्।

प्राणप्रतिष्ठा मन्त्रोद्धारः (आकाशो = हः, भृगुः=सः)

पाशं मायां सृणिं प्रोच्य यादीन् सप्तेन्दु संयुतान्। (पाशं = आं – माया = ह्रीं)

तारान्वितं नभः सप्त वर्णमन्त्रं ततो ऽजपाम् । (सृणिः = क्रों – तारा = ओं)

मम प्राणा इह प्राणा मम जीव इह स्थितः । (नभः = हं – अजपा = हंसः सः)

मम सर्वेन्द्रिया ण्युक्त्वा मम वाड्मन ईरयेत्। (ओं क्षं सं हं सः ह्रीं ओं 7वर्णाः)

चक्षुश्रोत्र घ्राण पदात् प्राणा इह समीर्य च। (ओं क्षं सं हं सः ह्रीं ओं 7वर्णाः)

आगत्य सुख मुच्चार्य चिरं तिष्ठं त्विदं पठेत्।

वह्निजायां च सप्तार्णं मन्त्रमन्ते पुन र्वदेत्। (वह्निजाया = स्वाहा)

प्राणप्रतिष्ठा मन्त्रोऽयं स्मृतः प्राण निधापने।

ममेत्यस्य पदस्यादौ पाशादीनि समुच्चरेत्।

यन्त्रेषु प्रतिमादौ वा प्राणस्थापन माचरन्।

मम स्थाने तस्य तस्य षष्ठ्यन्तां अभिधां वदेत्।

सबिन्दवो मेरुहंसाः काशाः सर्गी भृगुः पुनः।

मायेति तारुरुद्धोऽयं मन्त्रः सप्ताक्षरो मतः। (आकाशः हं – भृगु : = सः)

एवं प्राणान् प्रतिष्ठाप्य - मातृकान्यास माचरेत्।
प्राण मन्त्रः = आं ह्रीं क्रौं - यं रं लं वं शं षं सं हों = "ओं क्षं सं हं सः ह्रीं ओं - हंसः - मम प्राणाः इह प्राणाः - आं ह्रीं क्रौं हंसः - मम जीव इह स्थितः - आं ह्रीं क्रौं - हंसः - मम सर्वेन्द्रियाणि इह स्थितानि - आं ह्रीं क्रौं - हंसः - मम वाड्मन श्चक्षुः श्रोत्र घ्राण प्राणाः - इहागत्य - सुखं चिरं – तिष्ठन्तु - स्वाहा - ओं क्षं सं हं सः ह्रीं ओं "

मातृकान्यास कारिका

अकाराद्याः क्षकारान्ताः वर्णाः प्रोक्ताः तु मातृकाः।

प्रजापति मुंनि स्तस्याः गायत्री छन्द ईरितम्।

सरस्वती देवतोक्ता विनियोगो ऽखिलाप्तये।

हलो बीजानि चोक्तानि स्वराः शक्तयः ईरिताः।

मूर्ध्नि वक्त्रे हृदि न्यस्येत् ऋष्यादीन् साधकोत्तमः।

पञ्चवर्गैं यांदिभि श्च षडङ्गानि समाचरेत्।

क्लीबाःहीन शशांकाढ्य ह्रस्वदीर्घातर स्थितैः। (ऋ - ॠ - ऌ - ॡक्लीबाः)

सानुस्वारै र्जाति युक्तैः ध्यायेत् देवीं हृदंबुजे।

पञ्चाश दर्णैं रचिताङ्ग भागां – धृतेन्दु खण्डां कुमदा वदाताम्।

वरा भये पुस्तक मक्षसूत्रां - भजे गिरं सन्दधतीं त्रिणेत्राम्।।

वाणीपीठपूजा विधिः (50 मातृकात्मिका)

ध्यात्वैवं पूजयेत् पीठदेवताः पूर्व मीरिताः।

पीठशक्ती स्तदुपरि सरस्वत्या न वा र्चयेत्।

मेधा प्रज्ञा प्रभा विद्या श्री धृति स्मृति बुद्धयः।

विद्येश्वरीति संप्रोक्ता मातृकापीठ शक्तयः।

वियद् भृगुस्थ मनुयुग् विसर्गाढ्यं च मातृका। (ह्सौः)

योगपीठाय नत्यन्तो मनु रासन देशने।

मूर्तिं सङ्कल्प्य मूलेन तस्यां वाणीं प्रपूजयेत्।

वाणीसप्तावरण न्यासपूजाक्रमः

आदौ अङ्गानि संपूज्य द्वितीये पूजयेत् स्वरौ।।

द्वौ द्वौ तृतीय वर्गांश्च वर्गशक्ती श्चतुर्थके।

व्यापिनी पालिनी चापि पावनी क्लेदिनी पुनः।

धारिणी मालिनी पश्चात् हंसिनी शंखिनी तथा।

वर्ग शक्तयः इत्युक्ताः पञ्चमे त्वष्ट मातरः।

षष्ठे शक्रादयो देवाः सप्तमे वज्र पूर्वकाः।
इत्थं संपूज्य देवेशीं न्यसेद्वर्णान् निजाङ्के।।

सृष्टिन्यासक्रमः (मातृकान्यास स्थानानि)

ललाटे मुखवृत्ते ऽक्षि श्रवो नासा सुगण्डयोः।
ओष्ठयो र्दन्तपङ्क्त्योश्च मूर्ध्नि वक्रे न्यसे त्स्वरान्।
बाह्वोः सन्धिषु साग्रेषु कचवर्गौ न्यसेत् सुधीः।
टतवर्गौ पदोस्तद्वत् पार्श्वयोः पृष्ठदेशतः।
नाभौ कुक्षौ पवर्गं च हृदंसं ककुदं ततः।
न्यस्य यादि चतुर्वर्णान् शादिषट्कं ततो न्यसेत्।
हृदादि करयोरङ्घ्र्योः जठरे वदने तथा।
सृष्टिन्यासं विधायैवं स्थितिन्यासं समाचरेत्।

स्थितिन्यासक्रमः

ऋषिश्छन्दश्च पूर्वोक्तो देवता विश्वपालिनी।
उपविष्टां वल्लभांके ध्यायेत् देवीं अनन्यधीः।
मृगबालं वरं विद्या मक्षसूत्रं दधत्करैः।
माला विद्या लसध्द्दस्तां वहन् ध्येयः शिवां गिरम्।
एवं ध्यात्वा डकाराद्यान् वर्णान् अङ्गेषु विन्यसेत्।
गुल्फादि जानुपर्यन्तं स्थितिन्यासोऽय मीरितः

संहारन्यासक्रमः

न्यासे संहारसज्ञे तु ऋषिश्छन्दश्च पूर्ववत्।
संहारिणी सपत्नानां शारदा देवता स्मृता।
अक्षस्रक् टङ्क सारङ्ग विद्याहस्तां त्रिलोचनाम्।
चन्द्रमौलिं कुचानम्रां रक्ताब्जस्थां गिरं भजे।।
ध्यात्वैवं विन्यसे द्वर्णान् क्षाद्या नान्तान्विलोमतः।
सृष्टिन्यासे तु सर्गान्ताः सर्ग बिन्द्वन्तिकाः स्थितौ।

बिन्द्वन्ता: संहृतौ चैषा पूर्ववत् चाङ्गपूजने।
न्यस्या: सर्वत्र नत्यन्ता: वर्णा: वा (तार - ओं) संपुटा:।।
भारती मेव माराध्य भजेदिष्टान् मनून् सुधी:।

पूज्यदेवता मन्त्र पुरश्चरणम् (पञ्चमूर्ति पूजाविधि:)

शिवो विष्णु र्गणेशोऽर्को दुर्गा पञ्चैव देवता:।
आराध्या: सिद्धिकामेन तत्तन्मन्त्रै र्यथोदितम्।
आदौ देवं वशीकर्तुं पुरश्चरण माचरेत्।
तीर्थादौ निर्जने स्थाने भूमिग्रहण पूर्वकम्। (स्थानम्)
नवधा तां धरां कृत्वा पूर्वादिषु समालिखेत्।
कोष्ठेषु सप्तवर्गांश्च लक्षौ मध्ये तथा स्वरान्। (लक्षावीशेवूत्यपि)
क्षेत्रनामादिमो वर्ण: तत्र कोष्ठे भवेत् तत:।
उपविश्य जपं कुर्यात् नान्यस्मिन् दु:खदे स्थले।।

मन्त्रजपे नियमविधि:

आमध्याह्नं जपं कुर्यात् उपांशु त्वथ मानसम्। (काल:)
हविष्यं निशि भुञ्जीत त्रि:स्नाय्यभ्यङ्गवर्जित:। (नियमा:)
व्यग्रतालस्य निष्ठीव क्रोध पाद प्रसारणम्।
अन्यभाषां परेषां च जपकाले त्यजेत्सुधी:।
स्त्री शूद्रभाषणं निन्दां ताम्बूलं शयनं दिवा।
प्रतिग्रहं नृत्य गीते कौटिल्यं वर्जयेत् सदा।
भूशय्यां ब्रह्मचर्यं च त्रिकालं देवतार्च्चनम्।
नैमित्तिकार्चनं देवस्तुतिं विश्वास माश्रयेत्।।
प्रत्यहं प्रत्यहं तावत् नैव न्यूनाधिकं क्वचित्।
एवं जपं समाप्यान्ते दशांशं होमं आचरेत्।
तत्तत् कल्पोदितै र्द्रव्यै: तद्विधानं उदीर्यते।

मन्त्रहोमविधिः

प्राणायामं षडङ्गं च कृत्वा मूलेन मन्त्रवित्।
कुण्डे वा स्थण्डिले कुर्यात् संस्काराणां चतुष्टयम्।
मूलेनेक्षण मस्त्रेण प्रोक्षणं ताडनं कुशैः।
वर्मणा मुष्टिना सिध्य लिखेद् यन्त्रं तदन्तरे।
वह्निकोण षडश्राष्ट दल भूमन्दिरात्मकम्।
मध्ये तारापुटां मायां लिखित्वा पीठ मर्चयेत्। (ओं - ह्रीं - ओं)
मण्डूकात् परतत्तवान्तं पीठशक्ती र्जयादिकाः।
मायादिकः पीठमन्त्रः तयोस्तेनासनं दिशेत्।
यजेत् तौ तार मायाभ्यां गन्धाद्यै रुपचारकैः। (तारः = ओं + माया = ह्रीं)
(ओं ह्रीं वागीशी वागीश्वरयो र्योगपीठात्मने नमः इति पीठमन्त्रः)
(लक्ष्मीनारायणौ त्वर्चेत् वैष्णवे होमकर्मणि।)
सूर्यकान्ता दरणितः श्रोत्रिया गारतो ऽपि वा।
पात्रेण पिहिते पात्रे वह्निं आनाययेत् ततः।।

अग्निस्थापनम्

अस्त्रेणादाय तत्पात्रं वर्मणोद्घाटयेत् तु तम्।
अस्त्रमन्त्रेण नैरृत्ये क्रव्यादांशं तत स्त्यजेत्।
मूलेन पुरतो धृत्वा संस्काराश्च तत श्चरेत्।
वीक्षणाद्यान् पुरा प्रोक्तान् अल्पप्रोक्षण माचरन्।
परमात्मा ऽनलेनाथ जाठरेणापि वह्निना।
स्मरन्नैक्यं वह्निबीजात् चैतन्यं योजयेत् ततः।
तारेणचा भिमन्त्र्याग्निं सुधया धेनु मुद्रया।
अमृतीकृत्य संरक्षेत् अस्त्रमन्त्रेण मन्त्रवित्।
मुद्रया त्ववकुण्ठिन्या कवचेनाव कुण्ठयेत्।

कुण्डोपरि ततो वह्निं भ्रामयेत् त्रिपठन् ध्रुवम्। (ध्रुवं = ओं)

शय्यागतां ऋतुस्नातां नीलेन्दीवर धारिणीम्।

देवेन भुज्यमानां तां स्मृत्वा तद्योनि मण्डले।

ईश्वरेतो धिया वह्निं स्थापयेत् आत्म संमुखम्।।

अग्निस्थापन मन्त्रः

मूलं नवार्णं च पठन् जानु स्पृष्ट धरातलः।

रेफार्धे शेन्दु संयुक्तं गगनं वह्नि चैततः। (ह्रूंवह्निचैतन्यायनमः इति नवाक्षरमन्त्रः)

तन्याय हृदयान्तोऽयं नवार्णोऽग्नि निधापने।

विश्राण्याचमनं देवी देवयो र्ज्वालये द्वसुम्।

चतुर्विंशतिवर्णेन मन्त्रेण श्रपणादिभिः।

वह्नेः चतुर्विंशतिवर्ण मन्त्रोद्धारः

चित्पिङ्गल हन द्वन्द्वं दह युग्मं पच द्वयम्।

सर्वज्ञा ऽज्ञापय स्वाहा मन्त्रो वेदभुजाक्षरः।।

(चित्पिङ्गल हनहन दहदह पचपच सर्वज्ञाज्ञापय स्वाहा) (24 अक्षरमन्त्रः)

प्रदर्श्य ज्वालिनीं मुद्रां उत्थाय विहिताञ्जलिः।

श्लोकरूपेण मन्त्रेण ह्युपतिष्ठेद् हुताशनम्।

ज्वालिनीमुद्रालक्षणम्

मणिबन्धयुतौ कृत्वा प्रसृतांगुलिकौ करौ।

कनिष्ठांगुष्ठ युगलो मिलित्वा ऽन्तः प्रसारिते।

ज्वालिनी नाम मुद्रेयं वैश्वानर प्रियंकरी।।

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।

सुवर्णवर्ण ममलं समिद्धं विश्वतोमुखम्।

अग्निमन्त्रविधानम् (२६वर्णाः)

अथाग्नि मन्त्रं विन्यस्येत् तद् विधान मुदीर्यते।

वैश्वानरान्ते जातेति वेदान्ते स्यात् इह्वावह।।

लोहिताक्ष पदात् सर्व कर्माण्यन्ते तु साधय।

वह्निप्रियान्तो मन्त्रोऽयं षड्विंशत्यक्षरान्वितः।।

(वैश्वानर – जातवेद – इह्वावह – लोहिताक्ष – सर्वकर्माणि-साधय-स्वाहा)
26 अक्षराः

ऋषि श्छन्दो देवता ऽस्य भृगु र्गायत्रि पावकाः।

रं बीजं ठद्वयं (ठठ) शक्तिः हवने विनियोजनम्।।

लिङ्गे पायौ मूर्ध्नि वक्त्रे नासि नेत्रे ऽखिलाङ्गके।

अग्निजिह्वामन्त्राः

वह्नेर्जिह्वाः स्वबीजाढ्याः न्यसेन्ङेन्ता नमोन्विताः।।

हिरण्या कनका रक्ता कृष्णा सुप्रभया न्विता। (गगना - इतिपाठभेदः)

बहुरूपाऽतिरक्तेति जिह्वा दमुनसो मताः। (सषशवलरयेति बीजसप्तकम्)

दीपिकाऽनलवायुस्थाः साद्या वर्णा विलोमतः।
सेन्दवः सप्तजिह्वानां सप्तानां बीजतां गताः।।
(दीपिका = ऊ + अनल = रः + वायुः + यः)

(अग्ने र्जिह्वाबीजानि = 1.स्र्यूं – 2.ष्र्यूं – 3.श्र्यूं – 4.०र्यूं - 5.ल्र्यूं – 6. र्यूं – 7.य्र्यूं – इति सप्त)

1. स्र्यूं हिरण्यायै नमः 2. ष्र्यूं कनकायै (गगनायै) नमः 3. श्र्यूं रक्तायै नमः
4. ०र्यूं कृष्णायै नमः 5. ल्र्यूं सुप्रभायै नमः 6. र्यूं बहुरूपायै नमः
7. य्र्यूं अतिरक्तायै नमः इति सप्तजिह्वामन्त्राः ज्ञेयाः

सप्तजिह्वाधिदेवता नामानि

गीर्वाण पितृ गन्धर्व यक्ष नाग पिशाचकाः।
राक्षसा श्चेति जिह्वानां देवता स्तत्स्थले न्यसेत्।।
(सुरेभ्योनमः - लिंगे – पितृभ्योनमः - पायौ – एवमादिप्रयोगः)
न्यासेऽर्चने व्युत्क्रमः स्याद् बहुरूपाऽतिरक्तयोः।
नेत्रेतिरक्ता न्यस्तव्या सर्वाङ्गे बहुरूपिका।

अग्नेः षडङ्गमन्त्राः

सहस्रार्चिषे हृदयं स्वस्तिपूर्णाय मस्तकम्।
उत्तिष्ठपुरुषायेति शिखामन्त्रोऽय मीरितः।।
धूमान्तव्यापिने वर्म सप्तजिह्वाय नेत्रकम्।
अस्त्रं धनुर्धरायेति षडङ्गानि समाचरेत्।
मूर्ध्नि वामांसके पार्श्वे कटौ लिङ्गे कटौ पुनः।
दक्षे पार्श्वेंसके न्यस्येत् मूर्ती रष्टौ विभावसोः।
ताराग्नये पदाद्यास्ताः चतुर्थी नमसान्विताः।
जातवेदाः सप्तजिह्वो हव्यवाहन इत्यपि।
अश्वोदरज संज्ञोन्यः तथा वैश्वानराह्वयः।
कौमारतेजाः स्याद् विश्वमुखो देवमुखस्तथा।
ततो न्यसेन् निजे देहे पीठं हाटक रेतसः।।

अग्नेः पूजा क्रमः

वह्निमण्डलपर्यन्तं मण्डूकादि यथोदितम्।
पीता श्वेता ऽरुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी।
रुचिरा ज्वालिनी चेति कृशानोः पीठशक्तयः। (पद्मपीठ दलशक्तयः)
बीजं वह्न्यासनायेति हृदन्तः पीठमन्त्रकः।
एवं विन्यस्य पीठान्तं पावकं चिन्तयेत्तनौ।।

त्रिनेत्र मारक्त तनुं सुशुक्ल - वस्त्रं सुवर्ण स्त्रज मग्नि मीडे।।

वराभय स्वस्तिक शक्ति हस्तं – पद्मस्थ माकल्प समूह युक्तम्।।

एवं ध्यात्वा ऽर्चनं कुर्यात् मानसं विधिवत् (द्ध)असोः।

परिषिञ्चेत् तत स्तोयैः कुण्डं स्थण्डिल मेव वा।

दर्भैः परिस्तरे दग्निं प्रागग्रै रुदगग्रकैः।।

प्रत्यग्दक्षिण सौम्यासु न्यसेत् त्रीन् परिधीन् क्रमात्।

पालाशान्बिल्वजांस्तेषु ब्रह्मविष्णु शिवान्यजेत्।

वह्नौ तत्पीठ मभ्यर्च्या ऽवाहयेत् स्वहृदाऽनलम्।

गन्धादिभिः समभ्यर्च्य पूजयेत् पावकं व्रती।

अग्नेःसप्तावरणपूजा

षड्सु कोणेषु मध्ये च जिह्वा स्तद् देवता यजेत्।

ईशानादिषु वाय्वन्त कोणेषु षट् समर्चयेत्।

हिरण्या द्यतिरक्तान्ता मध्ये तु बहुरूपिणीम्।

केसरे ष्वङ्गपूजा स्यात् दलेष्वष्टसु मूर्त्तयः।

मातरोष्टौ दलान्तेषु भैरवाः स्युस्तदग्रतः।

धरापुरे तु शक्राद्या वज्रा द्यायुध संयुताः

एव मावरणै र्युक्तं सप्तभिः पावकं यजेत्।

पात्रसाधनम्

असिताङ्गो रुरु श्चण्डः क्रोधनो उन्मत्त संज्ञकः।

कपाली भीषण श्चापि संहार श्चाष्ट भैरवाः।।

वामे कुशानथास्तीर्य तत्र वस्तूनि निक्षिपेत्।

प्रणीता प्रोक्षणी पात्रे आज्यस्थालीं स्त्रुवं स्त्रुचम्।

अधोमुखानि चैतानि होमद्रव्यं घृतं कुशान्।

समिधः पञ्च पालाशीः अन्यद प्युपयोगि यत्।

कृत्वा पवित्रे मूलेन प्रोक्षे त्तानि शुभांभसा।
उत्तानानि विधायाथ प्रणीतां पूरयेत् जलैः।
तीर्थमन्त्रेण तीर्थानि सृण्या तत्राह्वये त्सुधीः।
पवित्रे ह्यक्षतां स्तत्र निःक्षिप्योत्प्लवनं चरेत्।
अथोदीच्यां निधायैतां प्रोक्षण्यां तज्जलं क्षिपेत्।
हवनीयं द्रव्यजातं उक्षेत् तोयैः पवित्रगैः।
मूलेन मूलगायत्र्या यद्वा हृदय मन्त्रतः।

ब्रह्मार्चनम्

दक्षिणे पीठ मासाद्य तत्र ब्रह्माण माह्वयेत्।
आणिमाद्याः सिद्धयोऽष्टौ ब्रह्मणः पीठदेवताः।
तारहृत्पूर्वको ङेन्तो ब्रह्मा मन्त्रोस्य पूजने।।
("ओं हां ब्रह्मणे नमः"- इति ब्रह्मणः मूलमन्त्रः)

स्रुक्स्रुवसंस्कारः

हस्ताभ्यां स्रुक्स्रुवौ धृत्वा तापयेत् त्रि रधोमुखौ।
वामहस्तेन तौ धृत्वा दर्भै र्दक्षिण मार्जयेत्।।
संप्रोक्ष्य प्रोक्षणीतोयैः प्रतप्य पूर्ववत् पुनः।
न्यस्याग्नौ मार्जनान्दर्भान् तयोः शक्तित्रयं न्यसेत्।।
इच्छा ज्ञान क्रिया संज्ञा चतुर्थी नमसा न्विता।
दीर्घ त्रयेन्दु युग्व्योम पूर्वकं स्थानक त्रये।
हृदा स्रुचि न्यसेत् शक्तिं स्रुवे शम्भुं तत स्तुतौ।।
सूत्र त्रयेण संवेष्ठ्य संपूज्य कुसुमादिभिः।
कुशोपरि न्यसेत् दक्षे तयो स्संस्कार ईरितः।।

आज्य संस्कारः

अस्त्रोक्षिताया माज्यस्य स्थाल्या माज्यं विनिक्षिपेत्।
वीक्षणादिक संस्कारं संस्कृतं मूलमन्त्रतः।
गोमुद्रया ऽमृतीकृत्य षड्संस्कारां स्तत श्चरेत्।।
कुण्डोद्धृते वायुकोणे स्थितेङ्गारे विनिःक्षिपेत्।
हृदेति तापनं प्रोक्तं दर्भयुग्मं प्रदीपितम्।
आज्ये क्षिप्त्वा हृदावह्नौ पवित्रीकरणं क्षिपेत्।
आज्यंनीराजयेद् दीप्त दर्भयुग्मेन वर्मणा।
अभिद्योतन मुक्तं तत् दीप्तं दर्भत्रयं घृते।
दर्शये दस्त्रेणोद्योते गृहीत्वा घृतपात्रकम्।
संयोज्याग्नौ तदंगारान् सलिलं संस्पृशेत्सुधीः।
अङ्गुष्ठा नामिकाभ्यां तु दर्भा वादाय निःक्षिपेत्।
त्रिरग्नि - संमुखेत्वाज्य मस्त्रेणोत्पवनं त्विदम्।
हृदात्म संमुखं तद्वद् आज्यक्षेपस्तु संप्लवः।
नीराजनादि संस्कारेष्वग्नौ दर्भान्विनिःक्षिपेत्।
दर्भद्वयं ग्रन्थियुतं घृतमध्ये विनिक्षिपेत्।
वामदक्षिणयोः पक्षौ स्मृत्वा नाडीत्रयं स्मरेत्।
दक्षिणा द्वामतो मध्यात् हृदा दादाय घृतं सुधीः।
अग्नये ऽग्निप्रिया सोमाय स्वाहेत्यग्नि नेत्रयोः।
जुहुया दग्नीषोमाभ्यां स्वाहे त्यक्षिण तृतीयके।
पातये दाहुतेश्शेष माहुति ग्रहण स्थले।
भूयो हृदा दक्षभागा दादायाज्यं मुखे यजेत्।
अग्नये स्विष्टकृते तन्नेत्रास्यो द्घाटनं मतम्।
(नरसिंहं विना विष्णुं मन्त्रे नेत्रद्वयं यजेत्।
नरसिंहान्य देवेषु अह्नेर्नैत्रत्रयं स्मृतम्।)

अग्निसंस्कार:

महा व्याहृतिभि र्व्यस्त समस्ताभि श्चतुष्टयम्।
आहुतीनां त्रयं वह्नि मन्त्रणैव तत श्चरेत्।
घृताहुतिभि रष्टाभि: एकैकां संस्कृतिं चरेत्।
ओमस्याग्ने रमुं संस्कारं करोम्यग्नि वल्लभा।
इत्थं मनुं जपन् गर्भाधानं पुसवनं तत:।
सीमन्तोन्नयनं जातकर्मकृत्वा ततश्चरेत्।
वह्नौ पञ्चसमिद्धोमाल्लाला पनयनं वसो:।
कुर्याद् देवाभिधानेन पूर्ववन् नामशुष्मण:।
नामानन्तर मेतस्य पितरौ स्वेर्पयेद् हृदि।
अन्नप्राशं तथा चौलो पनयौ दार योजनम्।
संस्कारा: स्युर्विवाहान्ता मृत्यन्ता:क्रूरकर्मणि।
एकैकमाहुतिं कुर्यात् वह्ने र्जिह्वाङ्ग मूर्तिभि:।
इन्द्रादिभिश्च वज्राद्यै: द्विठान्तै र्जुहुयात्तत:।
स्रुवेणाज्यं चतुर्वारं निधाय स्रुचितां सुधी:।
अपिधाय स्रुवेणैतौ गृह्णीयात्करयुग्मत:।
तिष्ठन्मूलं तयो र्नाभौ कृत्वाग्रे कुसुमं क्षिपेत्।
वामस्तनान्तं तन्मूलं कृत्वाऽग्नि मनुना सुधी:।
जुहयात वौषडन्तेन संपत्यर्थ मतन्द्रित:।

गणपति होम: (पूवाङ्ग आहुतय:)

महा गणेश मन्त्रेण व्यस्तेन दशधा तत:।
जुहुयाच्च समस्तेन चतुर्वारं घृताहुती:।
पूर्वपूर्व युतं बीज षट्कं बाणाश्च सायका:।
मुनयो मार्गणा श्चेति विभाग स्तन्मनो: स्मृत:।

गणपतिमन्त्रोद्धारः

तारो लक्ष्मी र्गिरिसुताकामो भूर्गणनायकः।
चतुर्थ्यन्तो गणपतिः वरान्ते वरदेति च ।
सर्वान्ते जन मित्युक्त्वा मे वशान्ते तु मानय।
स्वाहान्तो वसुयुग्माणों महागणपते र्मनुः।

देवतार्चन हवनम् (प्रधानहोमः)

एवं कृत्वाग्निसंस्कारं पीठं देवस्य पूजयेत्।

तत्रेष्टदेव मावाह्य मुद्रा आवाहनादिकाः।
प्रदर्श्य वह्निरूपस्य देवस्य वदने पुनः।
मूलेन जुहुयात् पञ्च नेत्रसंख्या घृताहुतीः।
वह्न्यैकीकरणं त्वग्नि र्देवयोस्तेन जायते।
नाडीसन्धान सिद्ध्यर्थं वह्निदेवतयो स्ततः।
जुहुया न्मूलमन्त्रेण रुद्र संख्या घृताहुतीः।
इष्टदेव स्यावृतीना मेकैका माहुतिं चरेत्।
ततस्तु मूलमन्त्रेण दशधा जुहुयाद् घृतम्।
ततः कल्पोक्त द्रव्येण दशांशं जुहुयात् जपात्।
होमं समाप्य कुर्वीत पूर्णाहुति मनन्यधीः।

पूर्णाहुतिः (उत्तरांगक्रियाविधिश्च)

होमावशिष्टे नाज्येन पूरयित्वा स्रुचं सुधीः।
पुष्पं फलं निधा याग्रे स्रुवेणाच्छाद्य तां पुनः।
उत्थितो वौषडन्तेन मूलेन जुहुया द्वसौ।
तद्द्रव्येणा वृतीनां च जुहुया दाहुतिं पृथक्।
देवं विसृज्य स्वहृदि वह्ने र्जिह्वांग मूर्तिभिः।
जुहुया द्व्याहृती र्हुत्वा प्रोक्षेत् तं प्रोक्षणी जलैः।

संप्रार्थ्यानेन मनुना नत्वा तं विसृजेद् हृदि।
भो भो वह्ने महाशक्ते सर्व कर्म प्रसाधक।
कर्मान्तरे ऽपि संप्राप्ते सान्निध्यं कुरु सादरम्।।
वह्नौ पवित्रे नि:क्षिप्य प्रणीतांबु भुवि क्षिपेत्।
विधिं विसृज्य सकुशान् परिधीन् विन्यसेद्वसौ।
एवं होमं समाप्याथ तर्पयेत् देवतां जले।

तर्पणमार्जनभोजनादि विधि:

आवाह्य तद् दशाम्शेन तर्पणा दभिषेचनम्।
तर्पयामि नमश्चेति द्वितीयान्ते ष्टपूर्वकम्।
मूलान्ते तु पदं देयं सिञ्चामी त्यभिषेचने।
ततो नानाविधै रन्नै: तर्पयेद् द्विजसत्तमान्।
इष्टरूपान् समाराध्य तेभ्यो दद्यात्च दक्षिणाम्।
न्यूनं संपूर्णता मेति ब्राह्मणाराधना न्नृणाम्।
देवताश्च प्रसीदन्ति संपद्यन्ते मनोरथा:।।

(इति श्री महीधरविरचिते – मन्त्रमहोदधौ-
भूतशुद्ध्यादिकथनं नाम प्रथमस्तरङ्ग:।।)
(प्रत्यंगिरामन्त्रसाधक पुरच्छरण क्रियाक्रम:)

प्राणप्रतिष्ठायां भावना विशेषः

काष्ठेनाग्नि रधिष्ठोऽपि वायुना ज्वलिते यथा।
तथा च भक्तिवैराग्य मन्त्ररज्जु निबन्धनात्।
आमूलाग्र स्थितस्याग्नेः अभिव्यक्ति र्यथा तरौ।
तस्मा देकत्र चिद्यक्तिः व्यापकस्य न बाध्यते।
यथा कुण्डगतस्याग्निः वायुना ज्वलितो भवेत्।
तथा च लिङ्गं मन्त्रेण शायते भगवान् शिवः।।
अप्रमेय मनिर्देश्यं अनौपम्य मनामयम्।
सूक्ष्मं सर्वगतं नित्यं ध्रुव मव्यय मीश्वरम्।
भवन्तं भवता दिष्टो मन्त्रेणा वाहया म्यहम्।।
एवं प्राणप्रतिष्ठान्ते (विभाव्य) विज्ञाप्य (शिवंशक्तिंच) आवाहयेत् सदा।

मूर्तिकलाकर्षण कालविधिः

कलाकर्षण मेतत् तु निशीथे चोत्तमं स्मृतम्।
दशनाड्यां मध्यमं स्यात् अधमं पञ्चनाडिकम्।
दिवा चा परारात्रौ च कर्षणं नैव कारयेत्।
ब्रह्मादि कारणेशानां कलानां कर्षणं स्मृतम्।।
तथा मन्त्रकलादीनां कर्षणं योजनं चरेत्।

कलाकर्षणे कलाभेदविधिः

ब्रह्मणस्तु कला चैवं दश विष्णोस्तु षोडश।
चतुर्विंशतिका श्चैव कला रुद्रे प्रकीर्तिताः।
पञ्चाशदेवं कथिताः कलाः भोगाङ्गके गुरो।
एवं बिम्ब स्थितानां तु कलानां गुरुसत्तम।
कुम्भे चाकर्षणं यत्तत् कलाकर्षण मुच्यते।।

आवाहनकृत्ये नैवेद्यविधिः (मधुपर्क कल्पनम्)

मधु क्षीरं दधि घृतं इक्षुसारं तथैव च।
नारिकेलोदकं चैव कापित्थं फल मेव च।
कदलीफलं चूतफलं पनसं लिकुचं तथा।
खर्जूरं दाडिमं चैव फलसारं प्रगृह्य च।
एलां च देवकुसुमं जातिकापत्र मेव च।
सिता भृङ्गाप्यग्निशिखं रसखण्डं च शर्करम्।
चूर्णीकृत्य च संमिश्रं कृत्वा च फलसारके।
मधुपर्क मितिख्यातं देवानां तु निवेदयेत्।।

मन्त्राणांकाम्यकर्म प्रयोगविधिः

षट् कर्मणां लक्षणम्

कर्माणि षडथो वक्ष्ये सिद्धिदानि प्रयोगतः।
शान्ति वश्यं स्तंभनं च द्वेष मुच्चाट मारणे।।

उक्ता नीमानि कर्माणि शान्तिः रोगादि नाशनम्।
वश्यं वचनकारित्वं स्तम्भो वृत्ति निरोधनम्।।

द्वेषो ऽप्रीतिः प्रीतिमतोः उच्चाटः स्थानत च्युतिः।
मारणं प्राणहरणं इति षट्कर्म लक्षणम्।।

षट्कर्मणि ज्ञेयाः देवतादि पदार्थाः (19 वस्तूनि)

देवता देवतावर्णा ऋतु दिग् दिवस आसनम्।
विन्यासा मण्डलं मुद्रा ऽक्षरं भूतोदयः समित्।

माला ऽग्नि लेखनं द्रव्यं कुण्ड स्रुक्स्रुव लेखनीः।
षट्कर्माणि प्रयुञ्जीत ज्ञात्वैतानि यथायथम्।।

षट्कर्मणां देवताः वर्णाः च

रति र्वाणी रमा ज्येष्ठा दुर्गा काली च देवताः।
सिताऽरुण हरिद्राभ मिश्र श्यामल धूसराः।
प्रपूजयेत्तु कर्मादौ स्व वर्णैः कुसुमैः क्रमात्।।

षट्कर्मणां ऋतु कालः

ऋतुषट्कं वसन्ताद्यं अहोरात्रं भवेत्क्रमात्।
एकैकस्य ऋतो र्मानं घटिका दशकं मतम्।
हेमन्तं च वसन्ताख्यं शिशिरं ग्रीष्म तोयदौ।
शरदं कर्मणां षट्के योजयेत् क्रमतः सुधीः।।

षटकर्मणां जपार्ह दिङ्मुखः

शिव सोमेन्द्र निरृति पवनाग्नि दिशः क्रमात्।
तत्तत्कर्माणि कुर्वीत जपस्तत्तत् दिशामुखः।

षट्कर्मणां योग्यकाल विधिः

शुक्लपक्षे द्वितीया च सप्तमी पञ्चमी तथा।
तृतीया बुध जीवाभ्यां युता शान्तिविधौ मता।।
चतुर्थी नवमी षष्ठी त्रयोदशी तिथि स्तथा।
जीव सोम युता शस्ता वशीकरण कर्मणि।
एकादशी च दशमी नवमी चाष्टमी पुनः।
शनैश्चर सितोपेता प्रोक्ता विद्वेषकर्मणि
कृष्णे चतुर्दश्यष्टम्यौ भानुसूनु युते यदि।
उच्चाटनाख्यं कर्मात्र कर्तव्यं फलसिद्धये।
भूताष्टम्यौ कृष्णगते अमावास्या तदन्तगा।
भानु मन्द कुजोपेताः स्तम्भ मारणयोः शुभाः।।

षट्कर्मणां आसनानि (शारीरउपवेशार्थंच)

पद्मं स्वस्तिक विकटे कुक्कुटं वज्र भद्रके।
शान्त्यादिषु प्रकुर्वीत क्रमाद् आसनमुत्तमम्।।
गो खड्ग गज फेरूणां (सृगाल:) मेषी महिषयो स्तथा।
कृत्तौ निवेश्य कुर्वीत जपं शान्त्यादि कर्मणि।।
आसना न्येवं संकीर्त्य विन्यास: प्रोच्यते ऽधुना।

षड्विध विन्यासानां लक्षणम्।

ग्रन्थनं च विदर्भाख्यं संपुटो रोधनं तथा।
योग: पल्लव एते षट् विन्यासा: कर्मसु स्मृता:।।
प्रत्येक मेषां षण्णां तु लक्षणं प्रनिगद्यते।
एको मन्त्रस्य वर्ण:स्यात् ततो नामाक्षरं पुन:।
मन्त्राणों नामवर्ण श्चेत्येवं ग्रन्थन मीरितम्।
आदौ मन्त्राक्षरद्वन्द्वं एकं नामाक्षरंतत:।
एवं पुन: पुन: प्रोक्तो विदर्भों मन्त्रवित्तमै:।
मन्त्र मादौ समुच्चार्य ततो नामाखिलं पठेत्।
अन्ते व्युत्क्रतमो मन्त्र एष: संपुट ईरित:।
आदिमध्यावसानेषु नाम्नो मन्त्रस्तु रोधनम्।
नामान्ते तु मनुर्योग: मन्त्रान्ते नाम पल्लव:।

षट्कर्म मण्डलानि लाञ्छनानि च

अर्धचन्द्र निभं पार्श्व द्वये पद्म द्वयां कितम्।
जलस्य मण्डलं प्रोक्तं प्रशस्तं शान्ति कर्मणि।
त्रिकोणं स्वस्तिकोपेतं वश्ये वह्नेस्तु मण्डलम्।
चतुरश्रं वज्र युक्तं स्तंभे भूमे स्तु मण्डलम्।
वृत्तं दिवस्त द्विद्वेषे बिन्दु षट्कांकितं तु तत्।
वायुमण्डल मुच्चाटे मारणे वह्निमण्डलम्।।

षट्कर्मसु षण्मुद्राः

सरोरुहं पाश गदे मुसलं कुलिशं त्वसिः ।
कर्मषट्के तु मुद्रा स्यु रथ होमे निगद्यते।।
मृगी हंसी सूकरी ति होमे मुद्रा त्रयं मतम्।
मध्यमा ऽनामिका ङ्गुष्ठ योगे मुद्रा लक्षण मीरितम्।
शान्तौ वश्ये मृगी हंसी स्तम्भनादिषु सूकरी।

षट्कर्मसु वर्णाः (बीजानि)

चन्द्र तोय धरा काश पवना नल वर्णकाः
षट्सु कर्मसु यन्त्रस्य बीजा न्युक्तानि मन्त्रिभिः।
स्वराः सठौ चन्द्रवर्णाः भूतवर्णा उदीरिताः।
चन्द्रार्ण हीना स्ते ग्राह्या वशीकृत्यादि कर्मणि।
केचित् सवलहान्यं रमाहु श्चन्द्रादि वर्णकान्। (६ वर्णाः)

षट्कर्मसु षट्जातिः

शान्त्यादि कर्मसु ज्ञेयाः जातयः षडमूः क्रमात्।।
नमः स्वाहा वषट् वौषट् हुं फट् षण्मन्त्र वित्तमैः।

षट्कर्म भूतोदय प्रकारः

नासा पुटद्वया धस्तात् यदा प्राणगति र्भवेत्।
तोयोदयः तथा ज्ञेयः शान्तिकर्मणि सिद्धिदः।।
नासा दण्डा श्रित गतौ प्राणे स्तम्भे धरोदयः।
पुट मध्य गतौ तस्मिन् द्वेषे व्योमोदयः शुभः।
पुटोपरिष्टात्गमने प्राणे स्यात् पावकोदयः।
तदा र्मिद्वये सिद्धिः मारणे च वशीकृतौ।
प्राणे तिर्यग्गतौ ज्ञेयः उच्चाटे मारुतोदयः

षट्कर्महवने समिधः

दूर्वायाः समिधः शान्तौ गोघृतेन समन्विताः

दाडिम प्रसुवो होमे वश्ये ऽजाघृत संयुताः। (दाडिमसमित्)

मेषी घृताक्ताः समिधः स्तम्भे राजतरूद्भवाः।

धुत्तूर समिधो द्वेषे अतसी तैल संयुताः।

चूतजाः कटुतैलाक्ताः उच्चाटनविधौ मताः। (सर्षपतैलं)

कटुतैलयुताः शस्ताः मारणे खदिरोभ्द्वाः।

षट्कर्मसु जपमाला विधिः

शङ्खजा पद्मबीजोत्था निम्बा ऽरिष्टफलोद्भवा। (फेनिलफल) (अरिष्टफल)

प्रेतदन्त भवा वाह रदोत्था खरदन्तजा। (अश्वदन्तजा)

जपमालाः क्रमात् ज्ञेयाः शान्ति मुख्येषु कर्मसु।

षट्कर्मसु जपमाला गणनप्रकारः

मध्यमायां स्थितां मालां ज्येष्ठेना वर्तये त्सुधीः।

शान्तौ वश्ये तथा पुष्टौ भोगमोक्षार्थके जपे।

अनामांगुष्ठ योगेन स्तम्भनादौ जपेत्सुधीः।

तर्जन्यंगुष्ठ योगेन द्वेषोच्चाटनयोः पुनः।

कनिष्ठांगुष्ठ संयोगात् मारणे प्रजपेत् सुधीः।

षट्कर्मसु जपमाला मणिसंख्या

अष्टोत्तरशतं संख्या तदर्धं च तदर्धकम्।।

मणीनां शुभकार्ये स्यात् तिथिसंख्याऽभिचारके।

षट्कर्मसु अग्निभेद विधिः

शान्ति वश्यं लौकिकाग्नौ स्तम्भनं वटजे ऽनले। (वटकाष्ठान्मथनोत्पादितं)

द्वेषः कलितरूत्पन्ने शेषे पितृवनस्थिते ।।

(विभीतकतरुजाते) (पितृवनं = श्मशानाग्नौ)

षट्कर्मसु होमकाष्ठानि

शुभे कर्मणि बिल्वार्क पलाश क्षीर वृक्षजैः।

अशुभे विषवृक्षाक्षै र्निम्ब धुत्तूर शेलुजैः। (कुचिला/बिभीतकः श्लेष्मातकः)

काष्ठैः प्रदीपयेद् अग्निं होमकर्मणि मन्त्रवित्।

षट्कर्मसु अग्निजिह्वाः

वह्ने र्जिह्वां सुप्रभाख्यां शान्तिकर्मणि पूजयेत्।

वश्यकार्ये हि रक्ताख्यां स्तंभने कनकाभिधाम्। (हिरण्यायां)

विद्वेषे गगनां जिह्वां उच्चाटे प्यतिरक्तकाम्।

कृष्णां तु मारणे चार्चेद् बहुरूपां तु सर्वतः।

षट्कर्मसु विप्रभोजने संख्या विधिः

भोज्ये संख्या विशेषोपि ज्ञेयः शान्त्यादि कर्मसु।

शान्तौ वश्ये भोजयेत् होमाद्विप्रान् दशांशतः। (1/10)

उत्तमं तद्भवेत्कर्म तत्त्वांशेन तु मध्यमम्। (1/5)

होमात् शतांशतो विप्रभोजनं त्वधमं तु तत्। (1/100)

शान्ते र्द्विगुणितं विप्रभोजनं स्तम्भने मतम्।।

अतिशुद्ध कुलोत्पन्नाः सांग वेदविदो ऽमलाः।

सदाचाररता विप्राः भोज्याः भोज्यै र्मनोहरैः।

पूज्या स्ते देवताबुद्ध्या नमस्कार्याः पुनः पुनः।

सन्तोष्या मधुरै र्वाक्यैः हिरण्यादि प्रदानतः।

अचिरात् लभते ऽभीष्टं गृहीतायां तदाशिषि।

एनोभिचारकर्मोत्थं नश्यति द्विजवाक्यतः।

षट्कर्मसु यन्त्रलेखन द्रव्यम् (विषाष्टकम्)

चन्दनं रोचना रात्रिः गृहधूम श्चिताभवः। (रात्रिः = हरिद्राचूर्णं)
अंगारोष्ट विषाणीति शान्त्यादौ यन्त्रलेखने।।
पूर्वोक्तं लेखनद्रव्यं गृह्णीयात् तदपि ध्रवम्।
पिप्पली मरीचं शुण्ठी श्येन विष्ठा च चित्रकः।
गृहधूमो न्मत्तरसो लवणं च विषाष्टकम्।।

षट्कर्मसु यन्त्रलेखने आधारम्

शान्तौ वश्ये लिखेद् भूर्जे स्तम्भने द्वीपिचर्मणि।
खरचर्मणि विद्वेषे उच्चाटे ध्वजवाससि।
नरास्थिनि लिखे द्यन्त्रं मारणे मन्त्रवित्तमः।

षट्कर्मसु कुण्डकल्पन विधिः

वृत्तं पद्मं चतुष्कोणं त्रि षट्कोणं दलेन्दुवत्।
तोयेश सोम शक्राणां यातु वाय्वो र्यमस्य च।
आशासु क्रमतः कुण्डं शान्ति मुख्येषु कर्मसु।

षट्कर्मसु स्रुक्स्रुवयोः कल्पनम्

सौवर्णौ यज्ञवृक्षोत्थौ स्रुक्स्रुवौ शान्ति वश्ययोः।
स्तम्भनादिषु कार्येषु स्मृतौ लोहमयौ हितौ।।

षट्कर्मसु लेखनीभेद विधिः

हेमजा रूप्यजा जाती संभवा लेखनी शमे।
वश्ये दूर्वांकुरोत्पन्ना स्तंभने ऽगस्त्य वृक्षजा। (मुनिद्रुमः)
राजवृक्षभवा वा स्यात् विद्वेषे तु करञ्जजा।
शुभे कर्मणि रम्याहे लेखनीं रचयेत्सुधीः।
बिभीतको त्थितोच्चाटे मारणे तु पुमस्थिजा।
रिक्तातिथौ कुजदिने विष्टौतामशुभे पुनः।

षट्कर्मसु नैवेद्य भक्ष्यभेद विधिः

भक्ष्यं च तर्पणं द्रव्यं तत्पात्र मथ कीर्त्यते।

शान्तौ वश्ये हविष्यान्नं स्मतभने परमान्नकम्।

माषाः मुद्गाश्च विद्वेषे गोधूमाः भ्रंशने स्थलात्।

मसूरान्नं तथा श्यामा अजादुग्धोत्थ पायसम्।

मारणे प्रोदितं भक्ष्यं मन्त्रिणां कर्म कुर्वताम्।

षट्कर्मसु जलतर्पण विधिः

शान्तौ वश्ये हरिद्राक्तं जलं तर्पण ईरितम्।

मरीचाद्यं कवोष्णं तत् स्तम्भने मारणे तथा।

मेषरक्तान्वितं तोयं विद्वेषोच्चाटयो र्मतम्।

षट्कर्मसु तर्पणे आधारपात्र विधिः

स्वर्णपात्रं तर्पणे स्यात् शान्तौ वश्ये च कर्मणि।

स्तम्भने मृत्तिका पात्रं विद्वेषे खदिरोद्भवम्।

लोह निर्मित मुच्चाटे कुक्कुटाण्डं तु मारणे।

षट्कर्मसु तर्पण करणीय विधिः

मृद्वासने समासीनः शान्तौ वश्ये प्रतर्पयेत्।

जानुभ्या मुत्थितः स्तम्भे द्वेषादा वेकपात्स्थितः। (एकपादस्थितः)

षट्कर्मणां विधिः प्रोक्तः एवं मन्त्रज्ञ तुष्टये।।

काम्यकर्मसु मुख्यानि (अनुष्ठेयानि)

सम्यक् कृत्वा न्यासजातं आत्मरक्षां विधाय च ।

काम्यं कर्म प्रकर्तव्यं अन्यथा ऽभिभवो भवेत्।

शुभं वा प्यशुभं वापि काम्यं कर्म करोति यः।

तस्या रित्वं व्रजेन्मन्त्रो न तस्मात् तत्परो भवेत्।

विषयासक्त चित्तानां सन्तोषाय प्रकाशितम्।

पूर्वाचार्योदितं काम्यं कर्म नैतत् हितावहम्।

काम्यकर्म प्रसक्तानां तावन्मात्रं भवेत् फलम्।।

निष्कामं भजतां देवं अखिलाभीष्ट सिद्धयः।

प्रतिमन्त्रं समुदिताः ये प्रयोगाः सुखाप्तये।।

तदा शक्तिं विहायैव निष्कामो देवतां भजेत्।।

(इति मन्त्रमहोदधौ प्रोक्ता षट्कर्म प्रयोगकारिका समाप्ता)

शाक्तोपासना क्रमः (प्रत्यङ्गिरा मन्त्रसाधन विधिः)

मन्त्रोपदेशे गुरुशिष्यलक्षणे योग्यता च

गुरु शिष्या वुभौ मोहात् अपरीक्ष्य परस्परम्।
उपदेशं ददद् गृह्णन् प्राप्नुयातां पिशाचताम्।

अज्ञः स्त्रियोपदेशं तु यो गृह्णाति ददाति च।
भुञ्जाते तावुभौ घोरान् नरकान् एकविंशतिम्।

अनर्हे मन्त्रविज्ञानं न तिष्ठति कदाचन।
तस्मात् परीक्ष्य वक्तव्यं अन्यथा निष्फलं भवेत्।

यः स्नेह भय लोभाद्यैः अयोग्यं यदि दीक्षयेत्।
देवता शापं आप्नोति कृतं च निष्फलं भवेत्।। (कुलार्णवतन्त्रे)

मन्त्रोपदेशे शिष्यपरीक्षा विधिः

ज्ञानेन क्रियया वापि गुरुः शिष्यं परीक्षयेत्।
संवत्सरं तदर्धं वा तदर्धं वा प्रयत्नतः।

शिष्योऽपि लक्षणैरेतैः कुर्यात् गुरु परीक्षणम्।।
आनन्दाद्यैः जपैः स्तोत्रै र्ध्यान होमा र्चनादिषु।

ज्ञानोपदेश सामर्थ्यं मन्त्रशुद्धि मपीश्वरि।।
बोधकत्वं च विज्ञाय शिष्यो भूयान् न चान्यथा।। (महानिर्वाणतन्त्रे)

मन्त्रोपदेशे श्री गुरुलक्षणम्

श्री गुरुः परमेशानि शुद्धवेषो मनोहरः।
सर्वलक्षण संपन्नः सर्वावयव शोभितः।।

अग्रगण्यो गभीरश्च पात्रापात्र विशेषवित्।
शिवविष्णुसमः साधु र्न च दर्शन दूषकः।

नित्ये नैमित्तिके काम्ये रतः कर्म ण्यनिन्दिते।
युदृच्छा लाभ सन्तुष्टो गुण दोष विभेदकः।

इत्यादि लक्षणोपेतः श्रीगुरुः कथितः प्रिये।

अत्रिनेत्रः शिवःसाक्षात् अचतुर्बाहु रच्युतः।
अचतुर्वदनो ब्रह्मा श्रीगुरुः कथितः प्रिये।। (कुलार्णवतन्त्रे)

मन्त्रोपदेशो गुरुपरीक्षा विधिः

श्वित्री चैव गलत्कुष्ठी नेत्ररोगी च वामनः।
कुनखी श्यावदन्तश्च स्त्रीजितो ह्यधिकाङ्गकः।

हीनाङ्गः कपटी रोगी बह्वाशी बहुजल्पकः।
एतै र्दोषै र्विहीनो यः स गुरुः शिष्यसंमतः। (क्रियासारे)

गुरु र्गृहस्थ एवैको न कदाचित् पति र्गुरुः।
(आगमे) (केवलकामिपरः अयंनियमः)

उत्तमगुरु लक्षणम्

उत्तमः पञ्चधा प्रोक्तो गुरु र्ब्रह्म सुवेदिभिः।
ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः।।
अतिवर्णाश्रमी चेति क्रमात् श्रेष्ठो विचक्षणः।। (सूतसंहितायां)

मन्त्रस्वीकरणे वर्ज्याणां मन्त्राः, वर्ज्याःशिष्याश्च

निन्दितस्तु पितुर्मन्त्रः तथा मातामहस्य च।
सोदरस्य कनिष्ठस्य वैरिपक्षा श्रितस्य च।। (ज्ञानार्णवे)

स्त्री शूद्राणां मन्त्रोपदेशो आचार्यत्व निषेधः

स्त्रियः शूद्रादय श्चापि बोधयेयु र्हिताहितम्।
यथार्हं माननीयाश्च नार्हत्याचार्यतां क्वचित्।।
शूद्रान्नं शूद्रसंपर्कः शूद्रेणैव सहासनम्।
शूद्रात् ज्ञानागमः कश्चित् ज्वलन्त मपि पातयेत्।। (ज्ञानार्णवे)
शूद्राणां च तथा स्त्रीणां गुरुत्वं न कदाचन। (इति शिवोक्तिः - सूतसंहितायाम्)
योग्य माद्यं गुरुं त्यक्त्वा शिष्यः शूद्रं क्रियाविदम्।
गुरुं समाश्रये दन्यं यः प्रयाति स दुर्गतिम्। (अन्यत्र)
नास्तिकान् भिन्नमर्यादान् कृतघ्नान् वेदनिन्दकान्।
मन्त्राक्षरोपदेशे तु दूरतः परिवर्जयेत्। (नारदतन्त्रे)
न देय मर्थलुब्धाय पिशुनाया ऽस्थिराय च।
भक्ति श्रद्धा विहीनाय शुश्रुषाविमुखाय च ।। (सनत्कुमारोक्तिः)

मन्त्र उपदेशे विशेष विधिः

दासस्य शिवभक्तस्य हित प्रिय करस्य च।
शूद्रस्यापि प्रदातव्यं नमोन्तं प्रणवं विना।
प्रणवेन विना मन्त्रः स्त्री शूद्राणां प्रसाधकः।
प्रणवेन समायुक्तः तयो र्दैवि विषोपमः।। (ज्ञानार्णवे)

अन्यत्र च आगमेऽपि

स्वाहा प्रणव संयुक्तं मन्त्रं शूद्रे तदात् द्विजः।
शूद्र श्चण्डालता मेति विप्रः शूद्रत्व मेव हि।।

अपिच – आगमान्तरे

अमात्यदोषो राजानं भार्यादोषः पतिं यथा।
तथा शिष्यकृतो दोषो गुरुं प्राप्नो त्यसंशयम्।।
तस्मात् शिष्यं गुरु र्नित्यं परीक्ष्यैव पृरिग्रहेत्।।

शाक्त मन्त्रस्वीकरणे - दीक्षाकालविधिः

दीक्षायाः मासनिर्णयः

वैशाखे श्रावणे वापि आश्विने कार्त्तिके तथा।
फाल्गुने मार्गशीर्षे वा कुर्यान्मन्त्रस्य दीक्षणम्।।
शरत्काले च वैशाखे दीक्षा श्रेष्ठ फलप्रदा।
फाल्गुने मार्गशीर्षे च ज्येष्ठे दीक्षा तु मध्यमा।।
आषाढे श्रावणे माघे कनिष्ठा सद्भि रादृता।
निन्दितश्चापि मासस्तु पौषो भाद्रपद स्तथा।।
निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा।। (सिद्धान्तशेखरे)

दीक्षायाः तिथिनिर्णयः

पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा।
त्रयोदशी च दशमी प्रशस्ताः सर्वकर्मसु।।

अन्यत्र

द्वितीया पञ्चमी वापि षष्ठी चापि विशेषतः।
द्वादश्या मपि कर्तव्यं त्रयोदश्या मथापि वा।। (यामलसङ्ग्रहे)

दीक्षायाः मध्यम तिथयः

षष्ठी भाद्रपदे मासि इषे कृष्णत्रयोदशी।
कार्त्तिके नवमी शुक्ला श्रावणे कृष्णपञ्चमी। (षष्ठीत्रयोदश्योः)
एतानि देवपर्वाणि तीर्थकोटि फलानिच।

दीक्षायाः विशेष कालः

कृष्णाष्टम्यां चतुर्दश्यां पञ्चपर्व दिने तथा।
ग्रहणादौ व्यतीपाते परिवेषे न्दुसूर्ययोः।
न वार मास दोषोऽस्ति ग्रहणे सूर्य चन्द्रयोः।
ग्रहणे देवदेवेशि कालः सप्तदिनावधि।।

दीक्षायाः नक्षत्रनिर्णयः (दीक्षाकर्मणि पूर्णाभिषेके च)

अश्विनी रोहिणी स्वाती विशाखा हस्त भेषु च।
ज्येष्ठोत्तरा त्रये ष्वेव कुर्या न्मन्त्राभिषे चनम्।
श्रवणार्द्रा धनिष्टा च पुष्यः शतभिषक् तथा।
दीक्षानक्षत्र जातानि ह्याहु स्तन्त्र सर्थ कोविदाः।।

दीक्षायाः वारनिर्णयः (सोमाङ्गारकशनिवाराःत्याज्याः)

रवौ गुरौ विधौ दीक्षा कर्तव्या बुध शुक्रयोः।।
मन्त्रा रंभो रवौ शुक्रे बुधे जीवे विशेषतः।
शनौ मृत्युः क्षयो भौमे सोमे सर्वं च निष्फलम्।

दीक्षायाः कालनिर्णयः

गुरु शुक्रोदये शुद्धे लग्ने सद्वार शोधिते।
चन्द्र तारा नुकूले च ग्रहणे चन्द्र सूर्ययोः।
दीक्षा विधेया मन्त्रज्ञैः पुरुषार्थं प्रसिद्धये।।

कालशोधनस्य आवश्यकता (कालस्य मुख्यता)

न मास तिथि वारादि शोधनं सूर्य पर्वणि ।
ददातीष्टं च गृह्णीयात् तस्मिन् काले गुरो र्नरः।
सिद्धि र्भवति मन्त्रस्य विनाभ्यासेन कामतः।
प्रबुद्धे बलसंयुक्ते शुक्रे देवगुरौ तथा।
शुक्लपक्षे च कृष्णे वा दीक्षा सर्वशुभावहा।।
मुक्तिकामैः कृष्णपक्षे भूतिकामैः सिते सदा। (कालोत्तरागमे)

दीक्षायाः राशि लग्न विधिः

मेष कर्कट कन्यासु तुलायां वृश्चिके तथा।
कुम्भे च मकरे चैव दीक्षा सर्वशुभावहा । (तत्वसार संहितायाम्)
सतीर्थे ऽर्क विधुग्रासे तन्तूद्वहन पर्वणि।
मन्त्रदीक्षां प्रकुर्वाणो मास र्क्षादीन् न शोधयेत्।
चैत्रे दमनकीं पूजां कृत्वा दीक्षां समाचरेत्।
अष्टमी द्वादशी भूता चतुर्थी रविसप्तमी।
श्रावणे तन्तुपूजां च कृत्वा संस्कार माचरेत्।। (रुद्रयामळे)

आगमेषु दीक्षाकालः (क्षेत्रविशेषश्च)

सतीर्थे ऽर्क विधुग्रासे पुण्यारण्ये वनेषु च।
पुण्यक्षेत्रे कुरुक्षेत्रे देवीपीठ चतुष्टये।
प्रयागे श्रीगिरौ काश्यां कालाकालान् न शोधयेत्।। (रुद्रयामळे)
तिथिं विनापि दीक्षायां विशेषं वत्सरं श्रुणु।
दुर्लभे सद्गुरूणां च सकृत्सङ्ग उपस्थिते।।
तदनुज्ञा यदा लब्धा स दीक्षावत्सरो महान्।
ग्रामे वा यदि वाऽरण्ये क्षेत्रे वा यदि वा निशि।।
आगच्छति गुरु र्दैवात् यदा दीक्षा तदा भवेत्।।

मुमुक्षुं प्रति न कालनियमः (काल अनपेक्षत्वम्)

निन्द्या न्यपि च पर्वाणि प्रशस्तानि विमुक्तये।

दीक्षायां त्याज्यकालाः (कामिविषये तदेवलग्नमिति सामन्यविषये)

सन्ध्या गर्जित निर्घोष भूकम्पोल्का निपातने।
एता नन्यांश्च दिवसान् स्मृत्युक्तांश्च परित्यजेत्।। (वैशंपायन संहितायाम्)
त्रिरात्र मेवो पवसेत् आदितः सर्वं कर्मणाम्।
त्रीणि नक्तानि वा कुर्यात् ततः कर्म समारभेत्।। (गायत्रीकल्पे)
चन्द्र सूर्य ग्रहे चैव सिद्धि क्षेत्रे शिवालये।

मन्त्र मात्र प्रकथनं उपदेशः स उच्यते।। (उपदेश सुधायाम्)

शाक्त दीक्षाप्रकारः (मन्त्रोपदेशविधिः)

अथ दीक्षां प्रवक्ष्यामि संक्षिप्तां गुरु संमताम्।
मुहूर्ते सर्वतोभद्रे नवकुम्भं विधाय च।
मोदकं गन्ध पुष्पाभ्यां अर्चितं वस्त्रसं युतम्।
सर्वौषधी पञ्चरत्न पञ्चपल्लव संयुतम्।
ततो देवार्चनं कृत्वा हुने दष्टोत्तरं शतम्।
शिष्यं स्वलङ्कृतं वेद्यां उपाग्नि मुपवेशयेत्।
मन्त्रितं प्रोक्षणी तोयैः शान्तिकुम्भ जलै स्तथा।
मूलमन्त्रे णाष्टशतं मन्त्रितै रभिषेचयेत्।।
अथ संपादयन् मन्त्रं हस्तं शिरसि धारयेत्।
समेस्त्वीक्ष्य च तां दद्या दथ शिष्यो ऽर्चयेद्गुरुम् ।
अत्रा प्यशक्तःकश्चित् चेत् अब्ज मभ्यर्च्य साक्षते।
तदम्बुना भिषिच्याथ तारमूलेन केकरम्।
निधायाथ जपेत् कर्णे उपदेशे त्वयं विधिः।

पञ्चरत्नानि – मुक्तामणिः, विद्रुमं, माणिक्यं, पुष्परागं, इन्द्रनीलमणिः एतानि।

पञ्चपल्लवास्तु – अशोकं, आम्रं, पिप्पलं, वटं, वकुलाः, एतेस्युः।
सर्वौषधयः - मुरा, मांसी, वचा, कुष्ठं, शैलेयं, रजनीद्वयम् इत्यादि।
चम्पकं भद्र मुस्तं च सर्वौषधि गणःस्मृतः।।

मन्त्रग्रहणानन्तर शिष्यवृत्तिः -

अष्टोत्तरशतं शिष्यः प्रजपेत् गुरुणो दितम्।
अष्टाविंशति वारं वा ह्यष्टकृत्वो ऽथवा जपेत्।।

मन्त्रोपदिष्टे देशिके दक्षिणादानम् (तदावश्यकत्वं)

आचार्या दनभिप्राप्तो मन्त्रश्चादत्त दक्षिणः।
अभ्यस्तोऽपि सदा मन्त्रः श्रेयसे नावकल्पते।। (नारदीये)

दीक्षायाः आवश्यकता (पार्वत्यै शिवोक्तिः)

अदीक्षिता ये कुर्वन्ति जप पूजादिकाः क्रियाः।
निष्फलं तत् प्रिये तेषां शिलाया मूप्त बीजवत्।।

उपासकस्य आचरणम्

चिकीर्षुः देवतो पास्तिं आदौ भावि विचारयेत्।
स्नान सन्धयादिकं कृत्वा स्मृत्वा हरिपदांबुजम्।
शयीत कुश शय्यायां प्रार्थयेत् वृषभध्वजम्।
ओं भगवन् देव देवेश शूलभृद् वृषवाहन।
इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत।।
नमोऽजाय त्रिनेत्राय पिङ्गलाय महात्मने।
भीमाय विश्वमुख्याय स्वप्नाधिपतये नमः।।
स्वप्ने कथय मे तथ्यं सर्वं कार्यं मशेषतः।
क्रियासिद्धिं विधास्यामि त्वत् प्रसादात् महेश्वर।।
एभि र्मन्त्रैः शिवं प्रार्थ्य निद्रां कुर्यात् निराकुलः।
स्वप्नदृष्टं निशि प्रातः गुरवे विनिवेदयेत्।।
तमन्तरेण मन्त्रज्ञः स्वयं चैव विचारयेत्।।

मन्त्रजपे योग्य स्थानानि

शिवस्य सन्निधाने च सूर्याग्न्योर्वा गुरोरपि।
दीपस्य ज्वलितस्यापि जपकर्म प्रशस्यते।।

स्थानभेदेन जपस्य फलविशेषः

गृहे जपं समं विद्यात् गोष्ठे शतगुणं भवेत्।
नद्यां शतसहस्रं स्यात् अनन्तं शिवसन्निधौ।।
समुद्रतीरे च ह्रदे गिरौ देवालयेषु च।
पुण्याश्रमेषु सर्वेषु जपं कोटिगुणं भवेत्।।

जापकस्य दिग्निर्णयः

तत्पूर्वाभिमुखो वश्यो दक्षिणे चाभिचारिकम्।
पश्चिमे धनदं विद्यात् उत्तरे शान्तिदं भवेत्।।

अन्यच्च – जपनिषेधस्थलं

अग्रे पृष्ठे तथा वामे समीपे गर्भमन्दिरे।
जपं प्रदक्षिणं होमं न कुर्यात् हि शिवालये ।।

जपकर्मणः दीपचक्रविधिः (कूर्मासन दीपस्थानम्)

इत्यादि स्थान माश्रित्य दीपस्थानं विचिन्तयेत्।
कूर्मस्यैव मुखं विद्धि दीपस्थानं सुसिद्धिदम्।।

जपासन दीपचक्रभावनाक्रमः (कूर्मचक्रं - उपासकस्य स्थानम्)

चतुरश्रं भुवं भित्वा कोष्ठानां नवकं लिखेत्।
पूर्वक्रोष्ठादि विलिखेत् सप्तवर्गा ननुक्रमात्।।
लक्षा वीक्षे मध्यकोष्ठे स्वरान्युग्म क्रमाल्लिखेत्।
दिक्षु सर्वादितो यत्र ग्रामस्याद्यक्षरं भवेत्।

मुखं तदास्य जानीयात्हस्तावुभयतः स्थितौ।
कोष्ठे कुक्षी उभे पादौ द्वौ शिष्टं पुच्छ मीरितम्।।
कूर्मचक्र मिदं प्रोक्तं मन्त्राणां सिद्धि साधनम्।
मुखस्थो लभते सिद्धिं करस्थः स्वल्प भोगभाग्।
कुक्षिस्थित उदासीनः पादस्थो दुःख माप्नुयात्।
पुच्छस्थं पीडितो मन्त्री बन्धनो च्चाटनादिभिः।।
दीपस्थानं ततः क्षेत्रे कृत्वा मन्त्री शुचि र्जपेत्।
क्षेत्र साधक मन्त्राणां एक मेवाद्य मक्षरम्।
यदि स्यात् स ध्रुवं मन्त्रः क्षिप्र मेव प्रसिध्यति।

कूर्मचक्रम् चित्रम्



अन्यत्र उक्तं च दीपचक्रम्

युग्मं स्वराणां विलिखेत् च पूर्वं -
कादीं श्च वर्गा न्क्रमशः क्षमीशे।
स्थाना धिप स्या क्षर मस्ति यत्र
तं दीपदेशं मुनयो वदन्ति।।

जपस्य विशेष-स्थानानि

कुरुक्षेत्रे प्रयागे च गङ्गा सागर सङ्गमे।
महाकाले च काश्यां च कूर्मस्थानं न चिन्तयेत्।। (देवीयामळे)
काशीपुरी च केदारो महाकालो ऽथ नासिकम्।
त्र्यम्बकं च महाक्षेत्रं पञ्चदीपा इमे भुवि।
एतेषु सर्वतो दीपाः कूर्मासन मित स्ततः।। (विश्वामित्रकल्पे)

जपस्य योग्य आसनानि (वर्ज्यानि आसनानि)

वंशा ऽश्म धरणी दारु तृण पल्लव निर्मितम्।
वर्जये दासनं धीमान् दारिद्र्य व्याधि दुःखदम्।।

जपे ग्राह्याणि आसनानि

तूल कम्बल वस्त्राणि पट्ट व्याघ्र मृगाजिनम्।
कल्पयेत् आसनं धीमान् सौभाग्य ज्ञान सिद्धिदम्।।
वंशासने दरिद्रत्वं पाषाणे व्याधि संभवः।
धरण्यां स्यात् दुःख भीतिः दौर्भाग्यं दारुकासने।
तूलके च यशोहानिः पल्लवे चित्तविभ्रमः।
कृष्णाजिने ज्ञानसिद्धिः मोक्षश्रीः व्याघ्रचर्मणि।
स्यात्पौष्टिकं च कौशेयं शान्तिकं वेत्रविष्टरम्।
वंशासने व्याधिनाशः कम्बले दुःख मोचनम्।
स्यादा भिचारिकं नीले रक्ते वश्यादिकं भवेत्।
धवळे शान्तिकं मोक्षः सर्वार्थ श्चित्रकम्बले।
सर्वाभावे त्वासनार्थं कुशविष्टर मिष्यते।।

जपमालाभेद विधिः

स्फाटिकी मौक्तिकी वापि प्रोक्तव्या सित सूत्रकैः।
सर्वकर्म समृद्ध्यर्थं जपेत् रुद्राक्षमालया।।
धर्मार्थ काम मोक्षार्थं जपेत् पद्माक्ष मालया।
अरिष्ट पुत्रजीवैश्च शंख पद्मौ मणि स्तथा।
कुशग्रन्थिश्च रुद्राक्षं उत्तमं चोत्तरोत्तरम्।।
रुद्राक्षं श्वेतपद्माक्षमाले तु अखिले जपेत्। (आगमे)

जपे त्याज्य रुद्राक्षमालाः

अतिस्थूलो ऽतिसूक्ष्म श्च स्फुटितो भङ्गुरि र्लघुः।
भिन्नः पुरा धृतो जीर्णो रुद्राक्षो न वरः स्मृतः।।

कराङ्गुलि जपविधिः (जपे करमाला प्रकारः)

अलाभे जपमालायाः करशाखासु पर्वभिः।
अनामिकया यो मध्यः तस्मा दधः क्रमेण तु।।
मध्याङ्गु ल्यग्र पर्वादि प्रादक्षिण्य क्रमेण तु।।
तर्जन्यादौ जपान्तश्च अक्षमाला करे स्थिता।।
अङ्गुल्यग्रेषु यत् जप्तं यत् जप्तं मेरु लङ्घने।
असङ्ख्यातं तु यत् जप्तं तत् सर्वं निष्फलं भवेत्।।
मध्यमादि द्वयं पर्व जपकाले तु वर्जयेत्।
पर्व मेरुं विजानीयात् तस्मात् तत् परिवर्जयेत्।।
अथवा करशाखाभिः कर्तव्यो जापकै र्जपः।।
अङ्गुल्या जपसंख्यानां एवमेव मुदाहृतम्।। (एकमेव इति वा पाठः)

जपोपकरण फलविशेषाः

रेखया ऽष्टगुणं विद्यात् पुत्रजीवै र्दश स्मृतम्।
शतं चन्दन शङ्खै श्च प्रवाळै स्तु सहस्रकम्।
स्फाटिकै र्लक्ष साहस्रं मौक्तिकै र्लक्ष मेव च।
दशलक्षं राजताक्षैः सौवर्णैः कोटि रुच्यते।।
कुशग्रन्थ्या च रुद्राक्षैः अनन्त गुणितो भवेत्।।

जपमाला मणिसंख्या विधिः (जपमाला लक्षणम्)

अष्टोत्तर शतै र्माला पञ्चाशत् चतुराधिकैः।
सप्तविंशतिभिः कार्या एकग्रीवा समेरुका।।
मुखं मुखेन संयोज्य पुच्छं पुच्छेन योजयेत्।
प्रोतव्या सित सूत्रेण सत्कर्म फल सिद्धये।

देवतायोग्य मालाविधिः

पट्टसूत्राकृता माला देव्याः प्रीतिकरा मता।
कार्पासै वैष्णवी माला पद्मसूत्रै रथापि वा।
ऊर्णाभि र्वल्कलै र्वापि शैवीमाला प्रकीर्तिता।
कार्पाससूत्रै रन्येषां विदध्यात् जपमालिकाः।।

कामनायां मालाक्षविशेषः

त्रिंशद्भिः स्यात् धनं पुष्टिः सप्तविंशतिभि र्भवेत्।
पञ्चविंशतिभि र्मोक्षे पञ्चदश्या ऽभिचारिकैः।
पञ्चाशद्भिः कुलेशानि सर्वसिद्धि रुदाहृता।

अन्यत्र च सङ्ख्याविधिः

मोक्षार्थं पञ्चविंशत्या सप्त विंशति पौष्टिकम्
त्रिंशत् च धनसंपत्यै पञ्चदश्या भिचारिकम्।

जपमाला कर्षणक्रमः

अङ्गुष्ठं मोक्षदं विद्यात् तर्जनी शत्रुनाशिनी।
मध्यमा धनदा शान्तिकरा त्वेषा ह्यनामिका।
कनिष्ठा ऽऽकर्षणे शस्ता जपकर्मणि शोभने।
अङ्गुष्ठेन जपं जप्य मन्यै रङ्गुलिभि स्सह।
अङ्गुष्ठेन विना कर्म कृतं तत् अफलं यतः।।

जपकर्म विधिः

जप्त्वा ऽक्षमालां सकलां भ्रामयेत् आशिखामणिम्।
प्रदक्षिणं पुन र्वक्रे प्रारभ्यैवं समाचरेत्।।
स्वयं वामेन हस्तेन जपमालां न संस्पृशेत्।
अदीक्षितो द्विजो वापि स्पृष्टश्चेत् शुद्धि माप्नुयात्।।
न धारयेत् करे मूर्ध्नि कण्ठे च जपमालिकाम्।
जपकाले जपं कृत्वा सदा शुद्धे स्थले क्षिपेत्।
गुरुं प्रकाशयेत् धीमान् मन्त्रं नैव प्रकाशयेत्।
अक्षमालां च मुद्रां च गुरो रपि न दर्शयेत्।।

जपकाले वर्जनीयानि कृत्यानि

कम्पनात् सिद्धिहानिः स्यात् धूननं बहु दुःख कृत्।
शब्दे जाते भवेत् रोगो करभ्रष्टा विनाश कृत्।।
छिन्ने सूत्रे भवे न्मृत्युः तस्माद् यत्नपरो भवेत्।
जपान्ते कर्णदेशे वा उच्चस्थाने ऽथवा न्यसेत्।
अक्षमाला द्विधा प्रोक्ता कल्पिता ऽकल्पितेति च।
कल्पिता मणिभिः क्लृप्ता मातृका स्यादकल्पिता।।
आदि क्षान्ता क्षरैः प्रोक्ता माला वर्णमयी बुधैः।
अनुलोम विलोमाभ्यां गणयेन् मन्त्रवित्तमः।।
जपमालां विधायेत्थं ततः संस्कार माचरेत्।।

जपमालायाः संस्कारविधिः

क्षाळयेत् पञ्चगव्येन सद्योजातेन सज्जलैः।
चन्दना ऽगरु गन्धाद्यै र्वामदेवेन घर्षयेत्।
धूपयेत् तां अघोरेण लेपये त्पुरुषेण तु।।
मन्त्रयेत् पञ्चमेनैव प्रत्येकं तु शतं शतम्।
मेरुं च पञ्चमे नैव तथा मन्त्रेण मन्त्रयेत्।
येन प्रतिष्ठिता माला तमेव तु मनुं जपेत्।
अन्यमन्त्र जपात् विद्वान् न कार्या कर्हिचिद्बुधैः।।

प्रकारान्तरेण - जपमालासंस्कारः

ईश्वर उवाच -

प्रक्षाल्य पञ्चगव्येन तथा पञ्चामृतेन च।
संस्नाप्य पञ्चगव्येन शिवकुम्भस्थितेन च।
सर्वं वै मूलमन्त्रेण गन्ध पुष्पाक्षतादिभिः।
धूपदीप नैवेद्यादि दत्वा चाष्टशतं स्पृशेत्।।
मूलमन्त्रं जपेत् पश्चात् दण्डवत् प्रणमेद् बुधः।
एवं या संस्कृता माला जपकर्मणि सर्वदा।।
अभीष्ट फलदा ऽत्यर्थं सा सर्वाघ विनाशिनी।
मध्यमाऽनामिकाङ्गुष्ठैः अक्षमाला मणीशतैः।।
एवं जपस्य चैकस्य क्रमोऽयं चालयेज्जपेत्।

अक्षमालाजपक्रमः

अङ्गुष्ठेन तु मोक्षाय मध्यमाऽऽयुर्विवृद्धये।
जपेदनामिकाऽङ्गुष्ठैः नेतराभ्यां कदाचन।।
अङ्गुष्ठ मध्यमा योगात् सर्वसिद्धि प्रदा मता।

जापकानां भक्ष्याभक्ष्य विधिः

चरु मूल फल क्षीर दधि भिक्षान्न सक्तवः।
शाक श्चाष्टविधं चान्नं साधक स्योच्यते बुधैः।
(गौतमीये)

मृदुकोष्णं सुपक्कं च कुर्यात् वै लघु भोजनम्।
नेन्द्रियानां विकारः स्यात् तथा भुञ्जीत साधकः।।
यद्वा तद्वा परित्याज्यं दुष्टान्नं कुत्सितं फलम्।
प्रशस्तान्नं समश्नीयात् मन्त्रसिद्धि समीहया।।(नारदीये)

जपाङ्ग पयोव्रते विशेषः

पयोव्रतस्य सिद्धिः स्यात् लक्षेनैव न संशयः ।
शाक भैक्ष्य हविष्याशी कलौ लक्षत्रयं जपेत्।।
(भिक्षान्नं तु न गृहिणः। यतिश्च ब्रह्मचारी च भिक्षान्नजीविनौ)
सर्वधर्म बहि र्भूतो गृही भिक्षान्न जीववान्।
विधवा विधुर श्चापि स्नात कश्च परित्यजेत्।

साधकस्य मन्त्रजपे नियमाः (पुरश्चरणजपकालाचाराः)

लवणं पललं चैव क्षारं क्षौद्रं रसान्तरम्।
माष मुद्ग मसूराद्याः कोद्रवां श्चणकानपि।।
असद्भाषण मन्याय्यं वर्जये दन्यपूजनम्।
विनाश्रमोचितं किञ्चित् नित्य नैमित्तिकं चरेत्।
स्त्री शूद्र पतित व्रात्य नास्तिकोच्छिष्ट भाषणम्।
असत्यभाषणं चैव कौटिल्यं च परित्यजेत्।।
न सद्भि रपि भाषेत जप होमार्चनादिषु।
वाग्यतः कर्म निर्वर्त्य निस्पृहो वर्तितादिषु।।
वर्जयेत् गीतकाव्यादि श्रवणं नृत्यदर्शनम्।
परान्नं च परद्रव्यं तथैव तु प्रतिग्रहः।।
परस्त्रीं परनिन्दां च मनसाऽपि विवर्जयेत्।
जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात्।
मनो दग्धं परस्त्रीभिः कथं सिद्धि र्वरानने।
ताम्बूलं गन्धलेपं च पुष्पधारण मेव च।
मैथुनं तत्कथालापं तद्गोष्ठीः परिवर्जयेत्।
कौटिल्यं क्षौद्र मभ्यङ्ग मनिवेदित भोजनम्।
असङ्कल्पित कृत्यं च वर्जये न्मर्दना दिकम्।

स्नायाच्च पञ्चगव्येन केवला मलकेन वा।।

श्रुति स्मृति पुराणोक्तै र्मन्त्रैः स्नाया न्निरन्तरम्।

स्नानं त्रिषवणं प्रोक्त मशक्तौ द्विः सकृत्तथा।

अस्नातस्य फलं नास्ति न चातर्पयतः पितृन्।

स्वजप्य मन्त्रेण तु कुम्भ मुद्रया
निमज्जन स्यानुपदं स्वमस्तके।
सदाष्ट विंश त्यभिषेक माचरेत्
तथाष्ट जप्त्वा ऽऽचमनं च सन्ततम्।।

मन्त्रजपविधानम् (जपारम्भकृत्यम्)

न शनै र्न ह्यति स्पृष्टं न द्रुतं न विलंबितम्।

न न्यूनं नातिरिक्तं वा जपं कुर्यात् दिने दिने।।

जात स्वस्थ इतस्ततः सुविहिते स्वस्थासने भूगृहं

कुर्यान् मन्त्र मुदीरय न्निति महा ऽनुष्ठान हेतो र्वशी।।

पुरश्चरणसिद्धये पूर्वदिन कृत्यानि - (गृहीतमन्त्रस्य)

"मयेयं गृह्यते भूमिः मन्त्रोऽयं सिध्यतां" इति अनेन मन्त्रेण ततो ज्ञाताज्ञात पापक्षयार्थं सहस्रपञ्चकं त्रयं वा ष्टोत्तरसहस्रं वा गायत्रीं जपित्वा - ब्राह्मणान्भोजनादिनाभ्यर्च्य - गुरुं च वस्त्रालङ्कारादिभिस्सन्तोष्य - ततो हविष्यान्न नैवेद्यभोजनं च कुर्यात्। (कस्यचिन्मते उपवासः उक्तंच सनत्कुमारकल्पे)

विप्रान् सन्तर्पये दन्न भोजनाच्छादनादिभिः।
बहुभि र्वस्त्र भूषाभिः प्रणमेत् गुरु मात्मनः।।
आरभेत् च जपं पश्चात् तदनुज्ञा पुरः सरम्।। (इति पूर्वदिनकृत्यम्)

अथ पुरश्चरणकर्म प्रयोगः- जपारम्भः।

ततो – जपारम्भदिने – स्नानादिकं विधाय – दीपस्थाने गत्वा – आसनविधिं च संपाद्य - सङ्कल्पं कुर्यात्। तद्यथा – अद्येत्यादि कालपञ्चाङ्गं स्मृत्वा – अमुकाक्षर - अमुक मन्त्रस्य सिद्धिकामो –अमुक लक्षसंख्याक जप - तद्दशांश होम – तर्पण

– अभिषेक – विप्रभोजनात्मक –पुरश्चरण महं करिष्ये - (ब्राह्मणद्वारा वा करिष्ये) इति सङ्कल्प्य - विघ्नेश्वरपूजां कृत्वा – अमुक ऋषिः – अमुक छन्दः – अमुक देवता - पुरश्चरणजपे विनियोगः। इत्युक्त्वा – स्वदेहे - मन्त्रस्य ऋष्यादि न्यासान् विधाय – देवतां - स्वहृदि - ध्यानोक्तं रुपं - ध्यात्वा - ततो अक्षमालां -

ओं त्वं माले सर्वदेवानां सर्व सिद्धि प्रदा मता।
तेन सत्येन मे सिद्धिं मात देहि नमो ऽस्तु ते।।
तेन सत्येन मे सिद्धं मात देहि नमो ऽस्तु ते।।

इति जपमालां प्राथ्य - मालां आदाय – हस्ते धृत्वा – आत्मानं देवाह मिति भावयित्वा – अभिन्न देवताभावनया जप मारभेत्। इति जपारम्भः।

पुरश्चरण जपविधानम्

पुरश्चरणजपे दिवसातिक्रमः न कर्तव्यः जपस्तु – प्रत्यहं न न्यूनो नाधिकः नत्वरया न च विलम्बेन - किन्तु मध्यम वृत्या कार्य : - एतत् उक्तं च नारदीये –

नैरन्तर्या विधिः प्रोक्तो न दिनं व्यतिलंघयेत्।
दिवसातिक्रमे तेषां सिद्धिरोधः प्रजायते।। (नारदीये)

प्रत्यहं प्रातः कालात् मध्याह्न कालावधिश्च जपः कार्यः। उक्तं च

शिवादीं श्च गुरुं नत्वा जपं कुर्यात् समाहितः।
उक्तसंख्या मितं प्रातःकालान्मध्यन्दिनावधि।।

मानसः सिद्धिकामानां पुष्टिकामै रुपांशुकः।
वाचिको मारणे चैव प्रशस्तो जप ईरितः।।

शयनं दर्भ शय्यायां शुचिः प्रयत मानसः।
नैकवासा जपेन्मन्त्रं बहु वस्त्राकुलो न च।। (पुरश्चरण चन्द्रिकायाम्)

जपे विशेषनियमः

नार्द्रवासा जपं कुर्यात् होमं दानं प्रतिग्रहम्।
सर्वं तद्राक्षसं विद्यात् बहि र्जानु च यत्कृतम्।
अशुचि दर्शने ऽयुक्तो स्वयम प्यशुचिःपुनः।
आयान्तः प्रयतो भूत्वा न्यासं पूर्वव दाचरेत्।।

जपं मौनेन कर्तव्यम् (तदुक्तं मणिसागरे)

सन्ध्ययो रुभयो र्जाप्ये भोजने दन्त धावने।
पितृकार्ये च दैवे च तथा मूत्र पुरीषयोः।
गुरूणां सन्निधौ दाने योगे चैव विशेषतः।।
एषु मौनं समातिष्ठन् स्वर्ग माप्नोति मानवः।
(यदि मौनं नोपचरेत् तदा प्रयश्चित्तमुक्तं ग्रन्थान्तरे)
सकृ दुच्चरिते शब्दे प्रणवं समु दीरयेत्। इति ।
जपध्यान समायुक्तो मन्त्रः सिद्ध्यति नान्यथा।। इति ।

पुरश्चरण स्वरूपम्

पूजा त्रैकालिकी नित्यं जप स्तर्पण मेव च।
होमो ब्राह्मणभुक्तिश्च पुरश्चरण मुच्यते।।

पुरश्चरण पञ्चाङ्गानि – ईश्वरोक्तिः

पञ्चाङ्गानि महादेवि जपो होमश्च तर्पणम्।
स्वाभिषेकश्च विप्राणा माराधन मपीश्वरि।।
पूर्वपूर्व दशांशेन पुरश्चरण मुच्यते।। (कुलार्णवतन्त्रे)

जपहोमादिफलविशेषः

पूजया विपुलं राज्यं अग्नौ होमेन सम्पदः।
जपेन पाप संशुद्धिः ध्यानेन ज्ञान मुच्यते।। (स्कान्दे)

जपान्ते होमविधिः

इषुमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्मणि । (वसिष्ट संहितायां)
होमो प्रशस्यते कुण्डं स्थण्डिले बाहु संमितम्।। (पिंगलामते)
कुण्डे वा स्थण्डिले वाऽपि कुण्डे होमः प्रशस्यते।
होमोक्त विधिना चैव कुर्या द्वै साधकोत्तमः।। (वायवीयसंहितायां)

होमकुण्ड प्रमाणम्

कुण्डं तु नारदेनोक्तं हस्त मात्रं शुभं मतम्। इति।

पुरश्चरण होमार्ह कालविधिः

वसन्त श्चैव पूर्वाह्णे मध्याह्ने गीष्म उच्यते।
अपराह्णे भवेद्व वर्षा शरत् चैवा र्धरात्रिके।।
उषो हेमन्तकश्चैव सन्ध्यायां शिशिरः स्मृतः।

होमे षट्कर्मणां उचितकालः

ग्रीष्मे उच्चाटनं कुर्यात् स्तंभनं प्रावृषि तथा।
शरदि शान्तिकं कुर्यात् हेमन्ते मोहनं कुरु।
शिशिरे मारणं ज्ञेयं वसन्तो वश्य कर्मणि।।

होमकाले वह्निरूपम्

यतः काष्ठं ततः श्रोत्रं यतो धूमो ऽथ नासिका।
यतो ऽल्पज्वलनं नेत्रं यतो भस्म ततः शिरः।
यतः प्रज्वलितो वह्निः तन्मुखं जातवेदसः।

वह्निस्थाने होमफलम्

बधिरत्वं कर्णहोमे नेत्रे त्वन्धत्व माप्नुयात्।
नासिकायां मनःपीडा शिरोहोमो हि मृत्युदः।।

वह्नेर्वर्णशब्दगन्धादि शुभनिमित्तानि

स्वर्ण सिन्दूर बालार्क कुङ्कुम क्षोद सन्निभः। (वह्निवर्णः शुभावहः)
भेरि वारिद हस्तीनां ध्वनि वह्नेः शुभावहः। (शब्दः शुभदः)
नाग चम्पक पुन्नाग पाटला यूथिका निभः। (गन्धः शुभावहः)

दुष्टचिन्हे प्रायश्चित्तकर्म

काकस्वर स्वरो वह्ने यजमानस्य दुःखदः।।
कृष्टे कष्टगते वर्णे यजमानं विनाशयेत्।
एवं दुष्टेषु चिह्नेषु प्रायश्चित्तं समाचरेत्।।
मूलेनाज्येन जुहुयात् पञ्चविंशति माहुतीः।।

काल्या:होमद्रव्याणि तत्फलानिच

पालाशपुष्प होमेन सर्वज्ञत्व मवाप्नुयात्।
अश्वत्थस्य समिद्धोमात् ब्राह्मण्यं सुस्थिरं भवेत्।
दूर्वा होमा दवाप्नोति दीर्घायुष्यं न संशय:।
अन्नाज्य होमा दाप्नोति मुने राज्यं द्विजोत्तम:।।
कन्याकामो लभेत्कन्यां लाजहोमेन सुव्रत।
वैराग्यकामो वैराग्यं लभते घृतहोमत:।
श्रियार्थी श्रिय माप्नोति बिल्वपत्रस्य होमत:।
पुत्रकामो लभेत्पुत्रं जीवपुत्रस्य होमत:।। (बीजविशेष: जीवपुत्रनामक:)
आरोग्यकाम: आरोग्यं लभते तिल होमत:।
यद्य दिच्छति तत्सर्वं लभते पुष्पहोमत:।। (कालीरहस्ये)

जप होमयो: सङ्ख्या विधि:

येषां जपे च होमे च संख्या नोक्ता महर्षिभि:।
तेषां अष्टसहस्राणि संख्योक्ता जपहोमयो:।।

युगकालभेदेन पुरश्चरणे जपहोमसङ्ख्या

कल्पो प्रोक्ता कृते संख्या त्रेतायां द्विगुणा स्मृता।
द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणा।। (मन्त्रमहार्णवे)

होमकर्तव्य प्रकार: (सन्यासिनांविधि:)

स्वाहान्तेनैव मन्त्रेण होम: कार्यो विजानता।
सन्यासिनां न होमोस्ति न वा ब्राह्मण तर्पणम्।
जपमात्रेण सिद्धि: स्यात् तर्पणाद्यं विकल्पितम्।। (सनत्कुमारोक्ति:)

अशक्तानां विशेषविधि:

होमकर्म ण्यशक्तानां विप्राणां द्विगुणो जप:।
इतरेषां तु वर्णानां त्रिगुणादि र्विधीयते।। (गौतमोक्ति:)

होममुद्राविशेषाः

होमे मुद्राः स्मृता स्तिस्रो मृगी हंसी च सूकरी।

शान्तिके च मृगी ज्ञेया हंसी पौष्टिककर्मणि।

सूकरी ह्यभिचारेषु कार्या तन्त्रविदुत्तमैः।

होममुद्रालक्षणानि

सूकरी करसंकोची हंसी मुक्त कनिष्ठिका।

मुक्ता कनिष्ठा तर्जन्या मृगीमुद्रा प्रकीर्तिता।।

अभिचारादि होमेषु सूकरी कथिता बुधैः।।

होममुद्रा विनियोगः

सूकरी पुत्रकामाय धनकामाय हंसिनी।
मृगी मोक्षे प्रकर्तव्या आहुतिः सर्वकामिका।।
हुतं यत् मुद्रया हीनं तत्सर्वं निष्फलं भवेत्।

पुरश्चरणे तर्पणमार्जन प्रकारः (प्रकारद्वयविधिः)

स्वजपस्य दशांशेन होमं कुर्यात् दिने दिने।
अथवा लक्ष पर्यन्ते होमः कार्यो विपश्चिता।।

प्रत्यहं जपस्य दशांशेनहोमम् तस्य दशांशं तर्पण मार्जने कुर्यात्। अथवा - लक्षसंख्यापर्यन्ते जपे संपूर्णे सति - तद्दशांशहोमः कार्यः। द्वावपि पक्षौ तन्त्र सांप्रदायिकौ। अनन्तरं तद्दशांशं तर्पणं - तद्दशांशं मार्जनं च कुर्यात्।

मार्जन प्रकारः

तर्पणस्य दशांशेन नमोन्तं मन्त्र मुच्चरन्।
अभिषिञ्चेत्स मूर्धानं जलैः कुम्भाख्य मुद्रया।। (इति वैशंपायनोक्तिः)

संक्षिप्त पुरश्चरणविधिः (अगस्त्योक्तिः)

कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशी।
देवं ध्यात्वा जपेन्मन्त्रं अयुतानां चतुष्टयम्। (४०००० सङ्ख्या)

दशांशं होमये त्पश्चात् तर्पये दभिषेचयेत्।
ततः सिद्धो भवेन्मन्त्रः चाब्रवी त्कुम्भसंभवः।।

पुरश्चरणे प्रथमःपक्षः

तद्यथा – पूर्वोक्त मासतिथ्यादौ - अष्टम्यां स्नानादिकं कृत्वा - जपस्थाने आसनविधिं च कृत्वा – सङ्कल्पं कुर्यात्। अद्येत्यादि अमुक अक्षरात्मक अमुक मन्त्रस्य सिद्धिकामः अयुत चतुष्टय संख्याक जपं – तद्दशांशहोमं - तद्दशांशतर्पणं - तद्दशांश अभिषेकात्मक पुरश्चरण महं करिष्ये (तत्र अष्टम्यादि चतुर्दशीपर्यन्तं प्रतिदिनं पञ्चसहस्रं सप्तशतं (सप्ताहे चतुर्दशसंख्याकं चतुर्दशस्थाने षोढशसंख्याकं जपमहं करिष्ये इति संकल्प्य) न्यासादिकं च कृत्वा जपं कुर्यात्। जपान्ते होमादिकं च कुर्यात् – अथवा अन्यप्रकारेण पुरश्चरण मुच्यते। तद्यथा -

पुरश्चरणे द्वितीयःपक्षः (ग्रहणपुण्यकाले)

ग्रहणेऽर्कस्य चन्द्रस्य शुचिः पूर्व मुपोक्षितः।
नद्यां समुद्र गामिन्यां नाभिमात्राम्भसि स्थितः।।
स्पर्शात् विमुक्ति पर्यन्तं जपेन्मन्त्रं समाहितः।
तावत्कालं जपित्वा तु होमादिकं समाचरेत्।। (कुलप्रकाशतन्त्रे)

अत्र पूर्वदिने उपवासं एकभुक्तं वा कुर्यात्।

विप्रभोजन विधिः (मुख्यताच)

अन्नै श्चतुर्विधै र्दैवि पदार्थैः षड्रसान्वितैः।
संभोजितेषु विप्रेषु सर्वं हि सफलं भवेत्।।
संयक् सिद्धैक मन्त्रस्य पञ्चाङ्गो पासनेन च।
सर्वे मन्त्रा श्च सिध्यन्ति तत्प्रभावात् कुलेश्वरि। (कुलार्णवे तन्त्रे)

गुरोरावश्यकता मन्त्रजपे

गुरुं विना मन्त्रजपे दोषश्रवण एव च।
युदृच्छया श्रुतं मन्त्रं छद्मनापि बलेन वा।
प्रेरितं वाथ गाथादौ यज्जपे त्तदनर्थं कृत्।
पुस्तके लिखितान्मन्त्रा नालोक्य प्रजपन्ति ये।
ब्रह्महत्या समं तेषां पातकं परिकीर्तितम्।। (मन्त्रप्रयोगार्णवे)

देवतोपासनक्रमः (एकाग्रचित्तमुख्यता)

आवाह्य देवता मेकां अर्चये चान्य देवताम्।
उभाभ्यां लभते शापं मन्त्री चञ्चल मानसः।।

मन्त्रसिद्धये वर्ज्याणि (मुख्यषट्कम्)

प्रवासी बहुभक्षी च प्रजल्पो हीन्द्रियग्रहः।
नीचसंगात् च लौल्यात् च षड्भि र्मन्त्रो न सिध्यति।।

मन्त्रसिद्धये गुरुध्यानम् गुरुसन्निधिश्च।

अथवा देवतारूपं गुरुं ध्यात्वा ततो यजेत्।
पुरश्चरणहीनो ऽपि मन्त्रः सिध्येन् न संशयः।

गुरुभक्ते रावश्यकत्वम्।

सन्तुष्टो हि गुरुर्यस्य तस्य तुष्टं जगत्रयम्।
नास्य साध्यं जगत्यत्र सुप्रसन्ने गुरौ मुने।। (श्रीभगवतोक्तिः)

एवं - पुरश्चरणं कृत्वा – गुरुं - देवतां च नमस्कृत्य - स्तुत्वा - वित्तादिना - वस्त्रहेमभूषणादिना - तोषयित्वा - विद्यां जपेत्। एतत् कर्मपरिसमाप्तौ कल्पोक्तान् ब्राह्मणान् भोजयित्वा - अन्यानपि प्रयोजनानि साधयेत्। एवं यो गुरोः मन्त्रस्वीकरणात्परं विधिवत्पुरश्चरणं समाप्य - गुरुं सन्तोषयेत् - सः मन्त्रसिद्धः भूत्वा तन्मन्त्रसाधको भवतीति ज्ञेयः।।

(इति श्री प्रत्यङ्गिरा मन्त्रसाधनविधिः समाप्तः)

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

काल्या: काम्यार्चन विषया:

विभाग: - 4

काळिकार्चन कालविधानम्
(प्रत्यङ्गिरा काम्यपूजा कारिका)

प्रति संवत्सरं कुर्यात् कालिकायाः महोत्सवम्।
कार्तिके तु विशेषेण अमावास्या निशार्धके।
तस्यां च पूजयेत् देवीं भोगमोक्ष प्रदायिनीम्।। (भविष्यतन्त्रे)

तुलार्के यस्त्वमायां हि निशार्धे घोर दक्षिणाम्।
पूजयेत् विधिवत् भक्त्या सर्व सिद्धेश्वरो भवेत्।। (व्योमकेशसंहितायाम्)

दिनद्वय महानिशीथव्याप्तौ निर्णयः

प्रदोष व्यापिनी यत्र महानिशि च सा भवेत्।
तदैव काळिका पूज्या दक्षिणा मोक्ष दायिनी।

महानिशा दिने देवि प्रतिपच्च यदा भवेत्।
काळी कैवल्य योगोऽयं तद्दिने कालिकार्चनम्।। (कुलसर्वस्वे)

दिनद्वय प्रदोषव्यापिन्यां चतुर्दशीयुक्ता ग्राह्या

अर्धरात्रे महेशानि अमावास्या यदा भवेत्।
चतुर्दशी युता ग्राह्या चामुण्डा पूजने सदा।।

त्याज्या चतुर्दशी

चतुर्दशी प्रदोषे तु अमावास्या महानिशि।
शनि भौम दिने देवि निशायां सर्वथा त्यजेत्।।

कालीप्रीत्यै बलि रावश्यकः

बलि पूजादिकं सर्वं निशायां क्रियते तु यत्।
तत्तदक्षयतां याति काळी विद्या प्रसीददति।। (विश्वसारतन्त्रे)

अन्यत्र च बले: मुख्यता

तस्मा न्नैमित्तिकार्चायां बलि रावश्यक: प्रिये।
बलिं विना नैव देवी पूजा मङ्गीकरोति हि।
बलिभि र्वर्द्धते ह्यायु: बलिभि: शाम्यते रुजा।
जय त्यरातीन् बलिभि: प्राप्ते बलिभि र्धनम्।। (मात्स्ये)
अष्टमी युक्तकाले तु निशार्धे परमेश्वरीम्।
समभ्यर्च्य बलिं दद्यात् सर्वाभीष्ट फलाप्तये।। (स्कान्दे)

काळीयागोचित मुहूर्तकाल: (शाक्ततन्त्रोक्त:)

रात्रिकृत्येषु सर्वेषु रात्रियोग: प्रशस्यते।
दिवाकृत्ये दिवायोगो भास्करोदय सङ्गत:।। (समयप्रदीपे)
पूर्वेद्यु रपरेद्यु श्चेत् निशीथ व्यापिनी तिथि:।
परेद्यु रेव सा ग्राह्या ऽष्टमी न सप्तमी युता।
अष्टमी नवमीयुक्ता नवमी चाष्टमी युता।
अतीव सा प्रशस्ता स्यात् देव्या: पूजनकर्मणि। (कृत्यमहार्णवे)

- अन्यत्र -

भद्रायां भद्रकाल्याश्च मध्ये स्या दर्चनक्रिया।
तस्माद् वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधै:।। (विश्वरूपनिबन्धे)

भद्रायां भद्रकाली पूजाश्रेष्टा (भद्रकाळी जन्माष्टमी)

आश्विनस्य सिताष्टम्या मर्धरात्रे तु पार्वती।
भद्रकाळी समुत्पन्ना पूर्वाषाढा समायुता।
तत्रा ऽष्टम्यां भद्रकाली दक्षयज्ञ विनाशिनी।
महाष्टम्या माश्विने मासि शुक्ला कल्याण कारिणी।
सप्तम्या संयुता कार्या मूलेन तु विशेषत:।
महाष्टम्यां भगवती भद्राया मपि पूजिता।
ददाति चायुरारोग्यं यतो भद्रा स्वरूपिणी। (भद्रमास:)
उभयत्र दिने न स्यात् निशीथ व्यापिनी यदा।
तदा परैव सङ्ग्राह्या रवे रुदय गामिनी।। (योगिनीतन्त्रे)

पुत्ताळीपूजा – मध्यरात्रि काळी पूजाविधिः

शरत्काले च देवेशि दीपयात्रादिने तथा।
अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः।
मृण्मयीं पुत्तलीं कृत्वा दीपादिभि रलङ्कृताम्।
बलिं नानाविधं दद्यात् वाद्य भाण्ड समन्वितम्।
नृत्यं गीतं कौतुकानि यावत् सूर्योदयं चरेत्।
प्रातः काले शुद्धतोये स्थापयेत् अविनाशिनीम्।। (कामाख्यतन्त्रे)

शरत्काल कालीसपर्या

अष्टम्यां अर्धरात्रौ शरत्काले महानिशि।
आराधिता च सा काळी तत्क्षणात् सिद्धिदा भवेत्।। (कुब्जिकाशुलपाणितन्त्रे)
अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः।
शरत्काले महापूजा क्रियते या च वार्षकी। (मार्कण्डेयपुराणे)

देव्यार्चने बलिदानयोग्य कालः

ऋक्षाभावे तिथि र्ग्राह्या रवे रुदय गामिनी।
नवमी बलिदाने तु दशुमीं तत्र वर्जयेत्।
उत्तरेण नवम्यां तु बलिभिः पूजयेत् शिवाम्।
योगाभावे तिथिर्गाह्या देव्याः पूजन कर्मणि।।
सूर्योदये परा रिक्ता पूर्णा स्या दपरा यदि।
बलिदानं प्रकर्तव्यं तत्र देशे शुभं भवेत्।। (सौरधर्मे)
अश्वयुक् शुक्लनवमी मुहूर्तं वा कला यदि।
सा तिथिः सकला ज्ञेया लक्ष्मी विद्या जयार्थिभिः। (देवीपुराणे)

(बलेःअपरान्हविधिः)

अत्राऽपराह्णिके काले बलिदानं प्रशस्यते।
दशमीं वर्जयेत् तत्र नात्र कार्या विचारणा।।

शरत्कालमास वैशिष्यम्

आश्विनस्य सिते पक्षे नानाविध महोत्सवैः।

प्रसादयेयुः श्री दुर्गां चतुर्वर्ग फलार्थिनः।।

शरत्कालीन पूजां ये कर्तारो भक्ति भाविताः।

तेषां दारान् सुतान् भोगान् वित्त मारोग्य मुन्नतिम्।

तुष्टा दास्याम्यहं शम्भो स्वर्लोके वसतिं सदा।। (बृहत्सारे)

क्रियायाः उदयव्याप्ते मुख्यता

भगवत्याः प्रवेशादि विसर्गान्ताश्च याः क्रियाः।

तिथा वुदय गामिन्यां सर्वा स्ताः कारयेत् बुधः।। (तिथितत्वे)

भैरवी उत दुर्गाष्टमी पूजाकालः

अष्टम्यां अर्धरात्रे तु यत्किञ्चित् कुरुते नरः।

तत्तद् अक्षय्य मायाति नव दुर्गा प्रयोगतः।। (शक्तिसङ्गमतन्त्रे)

पुनः पूजां तथाऽष्टम्यां विशेषेण समाचरेत्।

जागरं च स्वयं कुर्यात् बलिदानं महानिशि।। (कालिकापुराणे)

शरत्कालपूजा अभीष्टफलदा

इत्थं बहुशास्त्रवचनैः देव्याः शरत्कालीन मासयोः आश्वयुजे कार्तिके वा अष्टम्यां नवम्यां वा - अमावास्यायां वा रात्र्यां दुर्गा, काली, भैरव्यादीनां शक्तीनां मध्यरात्र पूजा बलिप्रधान जागरणयुता श्रेष्ठा भवति। इति विज्ञायते।

देवीमन्त्र पुरश्चरण योग्यकालः (जपहोमादेः)

वैशाखे श्रावणे वापि आश्विने कार्तिके तथा।

फाल्गुने मार्गशीर्षे वा मन्त्री कुर्यात् पुरस्क्रियाम्।। (रुद्रयामळे)

काळी प्रतिष्ठाकालः

अथ वक्ष्ये विशेषेण कालिका स्थापनं परम्।

उत्तरायण काले तु शुक्लपक्षे शुभे दिने।

शुभ वारादिभिर्युक्ते प्रतिष्ठां सम्य गाचरेत्।।

महाकाली पूजायन्त्रम्



श्री भद्रकाली यन्त्र विधानम्

बिन्दु त्रिकोणाष्ट कोणं वृत्त मष्ट दलं तथा।
भूपुर द्वय संयुक्तं कालीयन्त्रं विधीयते।।
कोण प्रतीच्यां प्रथमां द्वितीयं मारुते भवेत्।
तृतीयं यक्ष रक्षाद्या: ईशाने तु चतुर्थकम्।
प्राच्यां च पञ्चमं विद्यात् षष्ठमं अग्नि दिग्तथा।
सप्तमं दक्षिणे भागे नैऋत्यां तु तथा ऽष्टमम्।
ह्रीं कारं प्रथमं विद्यात् ओं कारं तु द्वितीयकम्।
तृतीयं मुंकार मेवोक्तं प्रों कारं तु चतुर्थकम्।
क्लीं कारं पञ्चमं विद्यात् श्रीं कारं षष्ठ मुच्यते।
फट्कारं सप्तमं लेख्यं अकारं तु तथा ऽष्टमम्।
बिन्दुमध्ये स्थितं नादं शक्ति प्रत्यकळात्मना।
ह्रीं शिवाये ति मन्त्रेण जीवशक्तिं शिवं क्रमात्।।
प्रथमाक्षर मादाय त्रिकोण मध्यमे लिखेत्।
तत्परं प्रणवं लेख्य जीवेश्वर जगन्मयम्।
नशिवेन विना शक्ति नशक्ति रहित श्शिव:।
द्वारे चतुष्के ह्रींकारं तदूर्ध्वे श्रीं विलेखयेत्।
यकारादि हकारान्तं दळाक्षर मिदं श्रुणु।
इत्येवं चक्रभेदं स्यात् काली सान्निध्य कारणम्।
अंगन्यासं करन्यासं अक्षरन्यास मेवच।
अष्ट त्रिंशत्कला न्यासं मातृका न्यास मेवच।
दण्डभंगि कलाभंगि मुण्डभंगि तथैव च।
वक्रभंगि कलाभंगि दूतिकान्यास मेव च।
गुरूपदिष्ट मार्गेण जपं कुर्यात् सुधीमते।।

प्रत्यङ्गिरा पूजायन्त्र स्वरूपम्



श्री प्रत्यङ्गिरा यन्त्रलक्षणम्

यन्त्रोद्धारं प्रवक्ष्यामि सर्वसिद्धि प्रवर्तकम्।
सर्वसंमोहनं चक्रं सर्वाशा परिपूरकम्।।

बिन्दु त्रिकोणं वसुकोण युक्तं
वृत्ता अष्टपत्रं च त्रिवृत्त युक्तम् ।
भूगेह लक्ष्मी रचितं च सिद्धिदम्
प्रात्यङ्गिरं चक्र मेत न्मयोक्तम् ।।

(श्रीरुद्रयामळतन्त्रे दशविद्यारहस्ये प्रत्यङ्गिरापटलोक्तम्)

काळीप्रतिमायाः रत्नन्यासविधिः (रौरवोत्तरआगमे) (रत्नमण्डलपूजा)

मण्डपं समलंकृत्य शालिभिः स्थण्डिलं कुरु।

तिलाक्षतैःपरिस्तीर्य लाजैःपुष्पैःपरिस्तरेत्।

तन्मध्ये विन्यसेत् देवीं नवकोष्ट समायुते।

इन्द्रनीलं न्यसेद्ब्राह्मीं वैडूर्यं तु महेश्वरीम्

महानीलं तु कौमारीं मौक्तिकं वैष्णवी तथा।

स्फटिकं वाराहिरुक्ता पुष्यरागं महेन्द्रिका।

चामुण्डी च प्रवाळं स्यात् वज्रं विघ्नेश्वर स्तथा।

माणिक्यं तु महाशास्ता इत्येतान् स्थापयेत् क्रमात्।।

प्रतिमां तत्र विन्यस्य सान्निध्यं कारयेत् ततः।। (रौरवोत्तरगमे महाकाळीप्रतिष्ठाविधौ)

शुभकाम्यकर्मणां प्रशस्तकालः

पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा।
त्रयोदशी च दशमी प्रशस्ता सर्वकर्मसु।। (रुद्रयामळे)

अङ्गत्वेन देव्याः शरदर्चने कुमारीपूजनावश्यकत्वम्

ततः कुमारी पूजनं कुर्यात् साधक सत्तमः।
यस्मिन् कृते तु विधिवत् कर्मणः सङ्गता भवेत्।
अकृते चाङ्गहानिः स्यात् विशेषात् शरदर्चने।
न तथा तुष्यति शिवा बलिहोम स्तुतीरणैः। (तर्पणैः)
कुमारी पूजने चात्र यथा सद्यः प्रसीदति।
न केवलं पूजयेत् तां भोजयेत् चापि यत्नतः।। (देवीयामळे)

कुमारीपूजने वयोनियमः

उत्तमा सा परिज्ञेया सप्ताष्ट नव हायना।
मध्यमा पञ्चवर्षी च षडब्धा दशहायना।
एकद्वि त्रि चतुर्वर्षी रुद्राब्दाख्याऽवरा स्मृता।। (बडवानलीय तन्त्रे)

कुमारी पूजाफलं प्रभावं च

कुमारी पूजिता हन्ति कलुषं पूर्वसञ्चितम्।
कुमारिकां विजानीयात् साक्षात् प्रकृतिरूपिणीम्।
वसन्ति सततं देहे कुमार्याः योगिनी गणः।
स सर्वसिद्धि माप्नोति यः कुमारीं समर्चयेत्।
कुमारी पूजनं भक्त्या शरत्पूजन कर्मणि।
बलिहोमादय श्चास्य कलां नार्हन्ति षोडशीम्।
भोजिता चेत् कुमारी स्याद्भोजितं भुवनत्रयम्।
नवरात्रे समायाते नवम्यन्त निशातधीः।
नानोपहारै रभ्यर्च्य कुमारीं बुद्धि पूर्वकम्। (वृद्धि पूर्वकम)
वृद्धिक्रमेण प्रयजेत् वाञ्छितां सिद्धि माप्नुयात्।

कुमारीपूजने तत्स्पर्शनिषेधः

कुमारीं न स्पृशेत् भक्त्या भावयुक्तेन चेतसा।
अन्यथा मृत्यु माप्नोति नो चेत् देवी पराङ्मुखी।।

मन्त्रसाधने अष्टकर्माणि

प्रयोगानष्ट वक्ष्येऽहं श्रुणुष्वावहिता प्रिये।
स्तम्भनं मोहनं चैव मारणाऽकर्षणे ततः।
वशीकरो च्चाटनाख्ये शान्तिकं पौष्टिकं ततः।।
एतेषां साधनं वक्ष्ये मन्त्रसिद्धि प्रवर्तकम्।। (रुद्रयामळे भैरवेशः)

प्रत्यङ्गिरामन्त्र पुरश्चरणविधिः

सर्वधा सर्वदा नित्यं महाविद्यां जपेत् सुधीः।
दशांशं होमयेत् तत्र तर्पयेत् तत् दशाम्शतः।
भोजयेत् तद्दशांशेन मन्त्री किं किं न साधयेत्।। (रुद्रयामळे)

प्रायश्चित्तकर्मसु शान्तिहोमविधिः (कामिकागमे पटले ३०)

उपवास श्चरोर्भुक्तिः पात्र शेषाशनं च यत्।
शान्तिश्च शान्तिहोम श्च दिशाख्यः संहिताहुतिः।।

मूर्तिहोमो घृत क्षौद्र क्षीरस्नाना द्यनेकधा।
एकाहा द्युत्सवश्शीतकुम्भो वैशेषिकार्चनम्।।

एवमादि समुद्दिष्टं प्रायश्चित्तं सनातनम्।।
विभज्य लक्षणं तेषां केषांचि दिह कथ्यते।। (उत्तरकामिके ३०-१५)

प्रायश्चित्तकर्मणः कालविधिः

पञ्चाङ्ग भूषणोपेतो देशिको निष्कृतिं चरेत्।
प्रायश्चित्ते ऽद्भुते वापि शान्तिं सद्यस्समाचरेत्।।

दिन पक्षर्क्ष लग्नादि प्रेक्षणं नात्र संमतम्।
प्रायश्चित्तं कृतं सद्यो यदि श्रेष्ठं प्रकीर्तितम्।।

मध्यं सप्तदिनादर्वाक् पक्षाहा दधमं भवेत्।
तस्मान् मासावसानं तु हीन मित्यभिधीयते।।
मासोर्ध्वं नैव कर्तव्यं यदि शान्त्या समाचरेत्।। (उत्तरकामिके ३०पटले १७-२०)

आलयवास्तौ – प्रायश्चित्तविधौ – मातृशान्तिविधिः (कामिके)

तद् दोष विनिवृत्यर्थं शान्तिहोमं समाचरेत्।
तथैव मातृशान्तौ च प्रायश्चित्तं समाचरेत्।
अङ्गारक बलिश्चैव यामलोक्तो न दोषतः।। ७८५
वाम भैरव सिद्धश्चेत् बलिर्ग्रामक्षयो भवेत् ।
बलिः प्रमादाद् दत्तश्चेत् शान्तिहोमं समाचरेत्।।
तथैव मातृशान्तौ च प्रायश्चित्तं समाचरेत्।।
शून्यग्रामं समाश्रित्य बलियाने प्रकल्पिते।।
तदा राष्ट्रक्षयं विद्यात् कृतंचेत् शान्ति माचरेत्।
आलये बलियाने वा तस्यां देवालयावृतौ।।
देवाङ्ग वास्तौ शस्त स्स्यात् परवास्तो र्विशेषतः।
तथैव आसन्न वास्तुश्च दूरवास्तौ द्विजोत्तमाः।।(अत्तरकामिके-३०-७८५-७८९)

शान्तिहोमे दिनसङ्ख्या विधिः

द्वि सप्ताहं नवाहं वा सप्त पञ्चाग्निभं तथा।
शान्तिं समाचरेत् वाऽथ पक्षेषु त्रिषु वाऽग्रजाः।। (उत्तरकामिके ३१-९१)

शास्त्रवर्त्म-मातृशान्त्याः यामळोक्तमार्गः

यामळं त्वपरं ज्ञेयं तच्च मिश्र मिहोच्यते।
वाम दक्षिण सिध्दान्त भेदेन त्रिविधं मतम्।।

वामं पारशिवार्हं स्यात् दक्षिणं भैरवार्हकम्।
सिध्दान्तं यामळं शैवं आदिशैवार्हकं विदुः।।

व्यतिरिक्तं तु सिद्धान्तात् रौद्रं सर्वं मुदीरितम्।
वाम दक्षिण मिश्रादि भेदेन बहु भेदिनम्।।
लौकिकं वैदिकं चान्यत् अध्यात्म मतिमार्गकम्।। (उत्तरकामिके-३२-)

शान्तिके बलिकर्मविधिः

मध्यरात्रे बलिं दद्यात् ग्रामे वा नगरे ऽथवा।
मुद्गान्नं पायसं गौळं कदळीफल संयुतम्।
सप्ताह मेवं कर्तव्यं सर्वदोषाऽपनुत्तये ।। (कामिके३२)

बलिद्रव्यविधिः

हविष्यं देवभवने माम्सान्नं नृपमन्दिरे।
कूष्माण्डं नाळिकेरं वा अपूपं सक्तुकं तथा।
अभावे गुड लाजादि अक्षतै र्वा बलि र्भवेत्।।

काम्ययोगविधाने मन्त्रभेदाः

काम्यसिद्धिश्च मन्त्रैस्स्यान् मन्त्राश्च बहवो मताः।
सर्वे मन्त्राः समर्था स्स्युः सर्वे चेष्ट फलप्रदाः।
तेष्वघोराणुःरत्यन्त दोषघ्नः कृष्णवर्णभाक्।।

अस्त्रमन्त्राणां योग्यकर्माणि

परचक्र प्रमथने महाव्याधि प्रकोपने।
शान्तिके पौष्टिके वश्ये प्रायश्चित्ते विचिन्तयेत्।।
किमनेन बहूक्तेन भयकाले ऽप्युपस्थिते।
मन्त्रेणानेन नश्यन्ति ज्वरग्रह विषादय:।।
परै र्यं दभिचारादि कर्म मन्त्रौषधा दिकम्।
यन्त्राणि योग युक्तानि पावके शलभा यथा।।
तथा पाशुपतास्त्रं च शिवास्त्रं क्षुरिकास्त्रकम्।
अनेनैव प्रकारेण ध्यात्वा संपूजयेद् गुरु:।। (उत्तरकामिके ३३)
अघोरं अर्चयित्वाऽथ तदग्रे ऽस्त्रं समर्चयेत्।।

दक्षिणाम्नाय देवतामन्त्र संग्रहः

शिवसुत गजवक्रं रक्तवर्णं त्रिणेत्रं -
अभय वरद हस्तं दिव्य पाशां कुशाढ्यम्।
अमृत मय शरीरं सर्प यज्ञोपवीतं -
गणपति गणनाथं पादपद्मं नमामि।। ओं श्रीं विघ्नेश्वराय नमः

षडाम्नाय देवतासु - दक्षिणाम्नाय देवताः

सौभाग्य विद्या बहळा वाराही वटुक स्तथा।
श्री तिरस्करणी प्रोक्ता महामाया प्रकीर्तिता।
अघोरं शरभं खड्गरावणं वीरभद्रकम्।
रौद्रं शास्ता पाशुपता घस्त्र शस्त्रादि भैरवाः।।
वामदेव मुखोद्भूताः कोटिमन्त्राः वरानने।
पूर्वपीठ स्थिता देवि दक्षिणाम्नाय देवताः।।

दक्षिणाम्नाय देवतानां – गणपत्यदि मूर्तीनां मूलमन्त्राः

1. महागणपतिमन्त्रः (ऐं – ह्रीं – श्रीं = एषा त्र्यक्षरी - शाक्तप्रणवं भवेत्) ऐं ह्रीं श्रीं – ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वश मानय स्वाहा। (श्री महागणपति श्रीपादुकां पूजयामि तर्पयामि नमः)
2. क्षिप्रगण पति मन्त्रः
ऐं ह्रीं श्रीं – ओं श्रीं ह्रीं ग्लौं गणपतये - सर्वकार्यसिद्धिं कुरु कुरु स्वाहा। (श्री क्षिप्रगणपति श्री पादुकां पूजयामि तर्पयामि नमः)
3. सिद्धगणपतिमन्त्रः
ऐं ह्रीं श्रीं - ओं श्रीं ह्रीं सर्वकार्य विघ्नप्रशमनाय – सर्व राजवश्यकराय – सर्व स्त्रीपुरुषाकर्षणाय - सर्वलोक वशीकरणाय - ओं ह्रीं क्रों हुं फट् स्वाहा।। (श्री सिद्धगणपति श्रीपादुकां पूजयामि तर्पयामि नमः)
4. नवनीतगणपति मन्त्रः
ऐं ह्रीं श्रीं - ओं ग्लौं नवनीत गणपतये - सर्वजनान् – मे वशमानय वशमानय स्वाहा। (श्री नवनीतगणपति श्रीपादुकां पूजयामि तर्पयामि नमः)

5. शक्तिगणपति मन्त्रः
ऐं ह्रीं श्रीं - ओं श्रीं ह्रीं क्लीं ग्लौं ऐं वद वद वाग्वादिनि सिद्ध गणपतये - गीं भगवति स्वाहा।।
(श्री शक्तिगणपति श्रीपादुकां पूजयामि नमः तर्पयामि नमः)

6. उच्छिष्ट गणपति मन्त्रः
ऐं ह्रीं श्रीं - ओं हस्तिमुखाय - लम्बोदराय – उच्छिष्टाय - महात्मने आं क्रों ह्रीं ग्लीं ग्लौं गं खे खे उच्छिष्टाय स्वाहा।।
(श्री उच्छिष्टगणपति श्री पादुकां पूजयामि तर्पयामि नमः)

7. एकाक्षरी गणपति मन्त्रः
ऐं ह्रीं श्रीं - ओं गं ओं (एकाक्षरी गणपति श्री पादुकां पूजयामि तर्पयामि नमः)

8. महा मन्थानभैरव मन्त्रः (दक्षिणाम्नाये विशेषभैरवमन्त्राः)
ओं ऐं ह्रीं श्रीं - प्रें फट् भां भीं ह्रीं श्रीं
(मन्थानभैरवश्रीपादुकां पूजयामि तर्पयामि नमः)

9. खचक्र भैरव मन्त्रः
ओं ऐं ह्रीं श्रीं - प्रें फट् भां भीं ह्रीं श्रीं।
(खचक्रभैरव श्रीपादुकां पूजयामि तर्पयामि नमः)

10. रविभक्षण भैरवमन्त्रः
ओं ऐं ह्रीं श्रीं – प्रें फट् भां भीं ह्रीं श्रीं।
(रविभक्षणभैरव श्रीपादुकां पूजयामि तर्पयामि नमः)

11. एकात्मानन्द भैरवमन्त्रः
ओं ऐं ह्रीं श्रीं – प्रें फट् भां भीं ह्रीं श्रीं।
(एकात्मानन्द भैरवश्रीपादुकांपूजयामि तर्पयामि नमः)

12. चण्डभैरव मन्त्रः
ओं ऐं ह्रीं श्रीं - प्रें फट् भां भीं ह्रीं श्रीं ।
(चण्डभैरवश्रीपादुकां पूजयामि तर्पयामि नमः)

13. नभोनिर्मलभैरव मन्त्रः
ओं ऐं ह्रीं श्रीं - प्रें फट् भां भीं ह्रीं श्रीं।
(नभोनिर्मल भैरवश्रीपादुकांपूजयामि पर्तयामि नमः)

14. डमर भास्कर भैरव मन्त्रः
ओं ऐं ह्रीं श्रीं - प्रें फट् भां भीं ह्रीं श्रीं।
(डमरभास्कर भैरव श्रीपादुकां पूजयामि तर्पयामि नमः)

15. महा दुर्मनाम्बा सिद्धमन्त्रः
ओं ऐं ह्रीं श्रीं - ह्रीं श्रीं सौः
(आं महादुर्मनाम्बा सिद्धश्री पादुकां पूजयामि तर्पयामि नमः)

16. सुन्दर्यम्ब सिद्मन्त्रः
ओं ऐं ह्रीं श्रीं - ह्रीं श्रीं सौः
(आं सुन्दर्यम्बासिद्ध श्रीपादुकां पूजयामि तर्पयामि नमः)

17. विश्वदलनाम्बासिद्धमन्त्रः
ओं ऐं ह्रीं श्रीं - ह्रीं श्रीं सौः
(आं विश्व दलनाम्बससिद्धश्रीपादुकांपूजयामितर्पयामिनमः)

18. कराळ्यम्बामन्त्रः
ओं ऐं ह्रीं श्रीं - ह्रीं श्रीं सौः आं
. (करालयम्बासिद्ध श्रीपादुकां पूजयामि तर्पयामि नमः)

19. चिटिकाम्बामन्त्रः
ओं ऐं ह्रीं श्रीं - ह्रीं श्रीं सौः आं
(चिटिकाम्बासिद्ध श्रीपादुकां पूजयामि तर्पयामि नमः)

20. भीमाम्बा मन्त्रः
ओं ऐं ह्रीं - श्रीं ह्रीं श्रीं सौः आं
(भीमाम्बा सिद्धश्री पादुकां पूजयामि तर्पयामि नमः)

21. खराननाम्बा मन्त्रः
ओं ऐं ह्रीं - श्रीं ह्रीं श्रीं सौः आं खराननाम्बा श्रीपादुकांपूजयामि तर्पयामि नमः

22. विशालन यनाम्बा मन्त्रः
ओं ऐं ह्रीं श्रीं - ह्रीं श्रीं सौः आं विशालनयनाम्बा सिद्धश्रीपादुकां पूणयामि तर्पयामि नमः

23. सौभाग्यविद्या मन्त्रः
ओं ऐं ह्रीं श्रीं - ऐं ऐं क ए ई ल ह्रीं क्लीं ह स क ह ल ह्रीं सौः स क ल ह्रीं
सौभाग्यविद्याम्बा श्री पादुकां पूजयामि तर्पयामि नमः

24. बहळामुखी मन्त्र:
ओं ह्लीं बहलामुखि सर्वदुष्टानां वाचं मुखं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय स्वाहा ।
बहळामुखि श्रीपादुकां पूजयामि तर्पयामि नम:

25. अघोरमूलमन्त्र:
ओं ऐं ह्रीं श्रीं - ओं हुं हुं अघोरेभ्यो थघोरेभ्यो घोर घोरतरेभ्य: - सर्वेभ्य स्सर्वं सर्वेभ्यो नमोस्तु ते अस्तु रुद्ररुपेभ्यो - हैं ह्रौं ह्र: अघोराय स्वाहा । अघोरेभ्यो थघोरेभ्यो घोर - घोरतरेभ्य: - सर्वेभ्यस्सर्वं सर्वेभ्यो नमस्तेऽस्तुरुद्ररुपेभ्य: - स्वाहा खं खं हं क्षं सं हं क्रीं प्रत्यक्ष प्रत्यक्ष हुं ह्रां ह्रीं सं हुं फट् स्वाहा। (अघोरश्रीपादुकांपूजयामि तर्पयामि नम:)

26. शरभ मूलमन्त्र:
ओं ऐं ह्रीं श्रीं - ओं नमो भगवते - प्रळयकालाग्निरुद्राय – दक्षाध्वर ध्वंसकाय- महाशरभाय – मम - शत्रुच्छेदनं कुरुकुरु - स्वाहा। (श्री शरभेश्वर श्रीपादुकां पूजयामि तर्पयामि नम:)

27. शरभेश्वरी मन्त्र:
ओं ऐं ह्रीं श्रीं - खें खां खं फट् प्राणग्रहासि प्राणग्रहसि हुंफट् सर्वशत्रु संहारकाय शरभसाळुवाय पक्षिराजाय हुंफट् स्वाहा।।
(श्री शरभेश्वरी श्रीपादुकां पूजयामितर्पयामि नम:)

28. वेताळमन्त्र:
ओं ऐं ह्रीं श्रीं - छ्रां छ्रीं छ्रूं छ्रैं छ्रौं छ्र: - ऐं श्रीं श्रीं छां छां प्रेतभूताधिपतये - महापिशाच कपालाय छ्रां छ्रौं डिंगतमनाय अधिपाय वेताळाय तुभ्यं नमस्स्वाहा। (वेताळश्रीपादुकां पूजयामि तर्पयामि नम:)

29. खङ्गरावण मन्त्र:
ओं ऐं ह्रीं श्रीं - ओं ह्रीं क्लीं खं भूतेश ह्रीं ह्रां खङ्गरावणाय नम:।
(श्री खङ्गरावण श्रीपादुकां पूजयामि तर्पयामि नम:)

30. वीरभद्रेश्वरमन्त्र:
ओं ऐं ह्रीं श्रीं - ओं क्लीं श्रीं ह्रीं वीरभद्राय जय जय नमस्स्वाहा।
(वीरभद्रश्रीपादुकां पूजयामि तर्पयामिनम:)

31. रुद्रगायत्री मन्त्रः
ओं ऐं ह्रीं श्रीं - तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नोरुद्रः प्रचोदयात्।।
(श्री रुद्र श्रीपादुकां पूजयामि तर्पयामि नमः)

32. धर्मशास्तृ महामन्त्रः
ओं ह्रीं हरिहरपुत्राय पुत्रलाभाय शत्रुनाशाय मदगजवाहनाय महाशास्त्रे प्रत्यक्षवेलायुधाय वर वरद सर्वजनं मे वशमानय स्वाहा।।(श्री शास्तृ श्रीपादुकां पूजयामि तर्पयामि नमः)

33. पाशुपतास्त्र मूलमन्त्रः
ओं ऐं ह्रीं श्रीं - ओं क्लीं पं शुं हुं फट् ।
(पाशुपतश्री पादुकां पूजयामि नमः तर्पयामि नमः)

34. ब्रह्मास्त्र मूल मन्त्रः
ओं ऐं ओं ह्रीं ओं श्रीं ओं आं ह्लीं क्रों ग्लौं हुं ऐं क्लीं ह्रीं श्रीं बहळामुखि आवेशाय आं ह्लीं क्रों ब्रह्मास्त्र रूपिणि एह्येहि आं ह्लीं क्रों मम हृदये आवह आवह सन्निधिं कुरुकुरु आं ह्लीं क्रों मम हृदये सुखं चिरं तिष्ठ तिष्ठ आं ह्लीं क्रों हुं फट् स्वाहा (ब्रह्मास्त्र श्रीपादुकां पूजयामि तर्पयामि नमः)

35. वायव्यास्त्र मन्त्रः
ओं ऐं ह्रीं श्रीं – आ वायव्य या वायव्याय व्याय वायाव्ययवा आऔर्वायव्यया वायव्या व्ययाय वायव्ययर्वा औ ओं हन हन हुंफट् स्वाहा (वायव्यास्त्र श्रीपादुकां पूजयामि तर्पयामि नमः)

36. अपस्मारनिवर्तक दक्षिणामूर्ति मन्त्रः
ओं त्रिनेत्राय त्रिकालज्ञानाय - सर्वशत्रुघ्नाय - सर्वापस्मार विदारणाय - दारय दारय - मारय मारय – भस्मीकुरु भस्मीकुरु - एह्येहि हुंफट् । (अपस्मारनिवर्तक दक्षिणामूर्ति श्रीपादुकां पूजयामि तर्पयामि नमः)

37. शबरिदुर्गाम्बा मन्त्रः
ओं ऐं ह्रीं श्रीं - ह्रां ओं सौः ऐं श्रीं क्षां दुं शबरि दुर्गायै - क्रों अमलवरयऊं आदिशक्ति स्वरूपिणि अक्षरमये रक्षःकुलनाशिनि मां रक्ष रक्ष – मम - शत्रून् विदारय विदारय - रोगान् भस्मीकुरु भस्मीकुरु कृत्रिमान् दह दह – प्राणान् वह वह - आभिचारकान् नाशय नाशय – सर्वतो - मां रक्षरक्ष - शबरि दुर्गायै हुंफट् स्वाहा।। (श्रीशबरिदुर्गाम्बा श्रीपादुकां पूजयामि तर्पयामि नमः)

38. जातवेदो दुर्गाम्बा मूलमन्त्र:

ओं ऐं ह्रीं श्रीं - ओं ह्रीं दुं जातवेदसे सुनवाम सोम मराती यतो नितहाति वेद:। स न: परिषदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिता त्यग्निः दुं श्रीं ओं।। (श्री जातवेदो दुर्गाम्बा श्रीपादुकां पूजयामि तर्पयामि नम:)

39. पुळिन्दिनी मन्त्र:

ओं ऐं ह्रीं श्रीं - ओं ईः नमो भगवति शारदादेवि – अत्यन्तामलभोज्यं देहि देहि - आगच्छ आगच्छ –आगन्तुक हृदिस्थं कार्यं सद्य: ब्रूहि ब्रूहि - पुळिन्दिनी ई:स्वाहा। (पुळिन्दिनी श्रीपादुकां पूजयामि तर्पयामि नम:)

दक्षिणाम्नाये मन्त्रविशेषा:

40. श्री महालक्ष्मी मन्त्र:
ओं ऐं ह्रीं श्रीं - ओं क्लीं श्रीं क्लीं महालक्ष्मि एह्येहि सर्वसौभाग्यं देहि देहि स्वाहा। (श्री महालक्ष्मी अम्बाश्री पादुकां पूजयामि तर्पयामि नम:)

41. धर्मशास्तु: मूलमन्त्र:
ओं घ्रूं नम: पराय गोप्त्रे स्वाहा।
(श्रीमहाधर्मशास्तु: श्रीपादुकां पूजयामि तर्पयामि नम:)

42. शास्तृगायत्री
ओं भूताधिपाय विद्महे महादेवाय धीमहि तन्न: शास्ता प्रचोदयात्।

43. विष्णुमायाम्बा मन्त्र: मञ्जांम्बिका/महामाया/जगन्मोहिनी)
ओं ह्रीं नमो विष्णुमाये नम: ह्रीं ओं।
(श्री विष्णुमायाम्बा श्री पादुकां पूजयामि तर्पयामि नम:)

44. विष्णुमाया मञ्जाम्बिका मालामन्त्र:
ओं ह्रीं ह्रीं मञ्जांबिके - महाशास्तृ परिवारे – वायव्यस्थिते - जगन्मोहिनि महामाये स्वाहा ह्रीं ह्रीं ओं।।

45. कृष्णवीर: असिताङ्ग मन्त्र: (कृष्णवीर:)
ओं घ्रूं असिताङ्गाय महाशास्तृ परिवाराय नम:
(असिताङ्ग श्रीपादुकां पूजयामि तर्पयामि नम:)

46. असिताङ्ग मालामन्त्रः

ओं घ्रूं असिताङ्गाय - महावीरपराक्रमाय - गदाधराय — धूम्रनेत्राय - दंष्ट्राकराळाय - मालाधराय - नीलाम्बराय - सर्वापघ्ने — सर्वभयापघ्ने - शिवपुत्राय क्रुद्धाय कृपाकराय स्वाहा।

47. महा कटुरवस्वामी मन्त्रः

ओं घ्रूं नमः कटुरवाय महाशास्तृ परिवाराय स्वाहा।
(श्री कटुरवश्रीपादुकां पूजयामि तर्पयामि नमः)

48. क्षुद्रकटुरव स्वामी मन्त्रः

ओं घ्रूं नमः कटुरवाय महाशास्तृपरिवाराय सहभैरवाय स्वाहा।
(श्री कटुरवश्रीपादुकां पूजयामि तर्पयामि नमः)

49. वापुर मूल मन्त्रः

ओं अंगरक्षकाय महाशास्तृ परिवाराय वापुराय स्वाहा।
(श्री वापुरस्वामि श्रीपादुकां पूजयामि तर्पयामि नमः)

50. शातृस्तवमः

रेवन्ताय महाशास्त्रे गोप्त्रे च प्रभवे तथा
दीप्त्रे चैव प्रशास्त्रे च भूतनाथाय ते नमः।।

51. महाशास्तुः नामाष्टकम्गो
प्ता च वीरसेनश्च त्रिनेत्रो दक्ष एव च।
पिङ्गळाक्षो शाम्भव श्च त्रिशूली भीमरूपकः।
शास्तृनामाष्टकं दिव्यं प्रणतार्तिहरं वरम्।।

52. शास्तामन्त्रः

शास्तरं मृगयाश्रान्तं अश्वारूढं गणावृतम्।
पानीयार्थं वनादेत्य शास्त्रे ते रैवते नमः।।

कालीकुलादि विद्याविवरणम्

तत्वज्ञान योगविधिः (शिवेन देव्यै प्रोक्तः)

आत्मनो ज्ञानमात्रेण तत्वज्ञानं भवेत् प्रिये।
तत्वज्ञानी भवेत् योगी स योगी त्रिविधः स्मृतः।
निरालम्ब श्च सालम्बो भक्त श्च परमेश्वरि। (निरुत्तरतन्त्रे)

शक्तितत्वस्य द्वैविद्यम्

ज्योतिरूपा महाकाली शुक्ररूपा प्रपञ्चसु।
शुक्रतो जायते विश्वं शिवशक्ति प्रभेदतः।
शिवशक्ति र्द्विधा देवि निर्गुणा सगुणाऽपि च।। (निरुत्तरतन्त्रे)

कालीकुलभावना

सर्वासां सिद्धविद्यानां प्रकृति र्दक्षिणा प्रिये।
दिव्यै र्वा वीरभावै र्वा चिन्तयेत् दक्षिणां शुभाम् ।
दिव्यभावे श्च वीरै श्च कालीकुलं विचिन्तयेत्।
श्रीकुलं च त्रिभि स्सर्वैः चिन्तयेत् कुलसुन्दरी। (निरुत्तरतन्त्रे)

कालीकुल देवता:दश

काली तारा रक्तकाली भुवना महिषमर्दिनी।
त्रिपुटा त्वरिता दुर्गा विद्या प्रत्यङ्गिरा तथा।।
कालीकुलं समाख्यातं श्रीकुलं च ततः परम्।। (निरुत्तरतन्त्रे)

श्रीकुल देवताः दशविद्याशक्तयः

सुन्दरी भैरवी बाला बगला कमला पि च।
धूमावती च मातङ्गी विद्या स्वप्नवती प्रिये।
मधुमती महाविद्या श्रीकुलं परिभाषितम्।। (निरुत्तरतन्त्रे)

दशमहा विद्याः (सिद्धविद्याः दश)

काली तारा महाविद्या षोडशी भुवनेश्वरी।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा।
बगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एताः दश महाविद्याः सिद्धविद्याः प्रकीर्तिताः। (निरुत्तरतन्त्रे)

अष्टादश महाविद्याः (शाक्ततन्त्रोक्ताः 18 शक्तयः)

काली तारा तथा छिन्ना मातङ्गी भुवनेश्वरी।
अन्नपूर्णा तथा नित्या दुर्गा महिषमर्दिनी।
त्वरिता त्रिपुरा विद्या भैरवी बगला तथा।
धूमावती तथा ज्ञेया कमला च सरस्वती।
जयदुर्गा तथा भद्रे तथा त्रिपुरसुन्दरी।
अष्टादश महाविद्याः तन्त्रादौ कथिताः प्रिये।। (निरुत्तरतन्त्रे)

महाविद्या महिमा

यस्या ऽनुष्ठानमात्रेण किं न सिद्ध्यति भूतले।
देवता गुरु मन्त्राणां प्रभावं दर्शयेत् ततः।। (धूमावतीतन्त्रे)

काल्या रक्षासिद्धिः

भूतप्रेत पिशाचाद्याः कूष्माण्डा राक्षसा ग्रहाः।
तस्य दूरात् पलायन्ते सत्यं सत्यं न संशयः।। (निरुत्तरतन्त्रे)

कालीप्रभावः

वेदागम पुराणेषु वन्दिता कालिका शुभा।
कालिका कामपीठेषु सर्वकाम प्रदायिनी।
स्वर्गे मर्त्ये च पाताले ये केचित् सन्ति भैरवाः।
ते सर्वे कालिकापुत्रा स्ते मुक्ता नात्र संशयः।।

तान्त्रिके काल्यार्चने मन्त्रोच्चारणविधिः

उच्चै र्नोच्चारयेन् मन्त्रं मनसा च स्मरेन् मनुम्।
उत्तमा मानसी पूजा बाह्यपूजा कनीयसी।
पूजया लभते ज्ञानं जपात् सिद्धि र्न संशयः।
होमेन सर्वसिद्धिः स्यात् तस्मात् त्रितय माचरेत्। (निरुत्तरतन्त्रे)

भक्तियोगे षडङ्गानि

आसनं प्राण संरोधः प्रत्याहार श्च धारणम्।
ध्यानं समाधि रेतानि योगाङ्गानि भवन्ति षट्।। (निरुत्तरतन्त्रे)

शाक्त साधक पूर्णाभिषेक महिमा

आगमः पञ्चमो वेदः कुल माश्रय पार्वति।
शिवोऽपि पञ्चमो वर्णः सिद्धविद्यां जपेत् यतः।
सुवर्णत्वं परित्यज्य शिवत्वं संप्रजायते।। (निरुत्तरतन्त्रे)

समय साधक अभिषेक फलम् (दीक्षामुख्यता)

गुरुत्वं च लभेद् देवि कर्मणा चाभिषेकतः।
वैष्णवं गाणपत्यं च सौरः शैवः कुलेश्वरि।
अभिषेकः प्रकुर्वीत शाक्तश्च कुलभूषणः।
मन्त्रं तन्त्रं च सर्वेषां अभिषेकात् हि सिध्यति।
अभिषेकेन सर्वेषां अधिकारो भवेत् ध्रुवम्।
अभिषेककृतो विप्रो ब्रह्मत्वं लभते ध्रुवम्।
अभिषेककृतः क्षत्री विप्रधर्मत्व मागतः।
वैश्यः क्षत्रियतां याति शूद्रो वैश्यत्व मागतः।
अभिषेकेन सर्वेषां बध्दोऽपि बद्धतां त्यजेत्।। (निरुत्तरतन्त्रे)

महामाया प्रकृति प्रभावः

प्रकृत्या जायते विश्वं प्रकृत्यां च विलीयते।
शैवानां वैष्णवानां च सौराणां च महेश्वरि।
स्याच्च निर्वाण मेतेषां मातु राविर्भवन्ति हि।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
सर्वे मुक्तिप्रदा देवाः निर्वाणं श्रेयसं विना।
निर्वाणं श्रेयसं देवि प्रकृत्या परिजायते।
तस्मात् सर्वप्रयत्नेन प्रकृतिं परिपूजयेत्।
प्रकृति र्या महामाया सैव प्रकृति रूपिणी।
विकृतौ मन्त्रसिद्धिस्स्यात् प्रकृतेः कुहकं गृहे।
निर्वाणं श्रेयसं सैव प्रकृतेः कुहकं विना।। (निरुत्तरतन्त्रे)

विद्याजप पुरास्क्रिया (मन्त्रोपासकनियमाः)

लक्षद्वयं जपेत् विद्यां दिवा रात्रि प्रभेदतः।
दिवा लक्षं जपेत् विद्यां हविष्याशी सदा शुचिः।
दशांशं जुहुयात् वह्नौ तद्दशांशं च तर्पयेत्।
तद्दशांशाभिषेकं च तीर्थतोयेन पार्वति।
तद्दशांशं हविष्यान्नै र्भोजयेद्‌ भक्तितो द्विजान्।

देहनाडीसमूह शक्तिचक्र विधिः (शाक्ततन्त्रे)

नाडीनां समूहो देवि व्यक्त श्चास्ति खगाण्डवत्।
तत्र नाड्यः समुद्भूताः सहस्राणां द्विसप्ततिः।
प्रधानं प्राणवाहिन्यः स्वयं तत्र दश स्मृताः।
इडा च पिङ्गला चैव सुषुम्ना चैव कीर्तिता।
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी।
अलम्बुषा कुलश्चैव शङ्खिनी च दश स्मृताः।
एवं नाडीमयं चक्रं विज्ञेयं शक्ति चक्रके।
इडायाः पिङ्गलायाश्च मध्यं यत्तत् सुषुम्नका।
इयं च त्रिगुणा ज्ञेया ब्रह्म विष्णु शिवात्मिका।। (निरुत्तरतन्त्रे)

अष्टौ विश्वमातरः (अष्ट लोकमातरः)

ब्राह्मी माहेश्वरी चापि कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डा सप्तमी मता।
अष्टमी तु महालक्ष्मीः प्रोक्ता विश्वस्य मातरः।।

देव्यालयाष्टौ द्वारशक्तयः

जया च विजया चैव योगिनी मोहिनी तथा।
माधवी मालिनी चैव भोगी भोगवती तथा।
द्वारशक्तीस्तु संपूज्याः गन्धपुष्पाक्षतादिभिः।। (अजितागमे)

चतुर्विध माहेशशक्ति मूर्तय:

स्वतन्त्रा केवला शक्ति: सहजा गुरुपुङ्गव।
मिश्रा चेति महेशस्य शक्ति भिन्ना चतुर्विधा।
परमेश्वरस्य या शक्ति: द्विधा सं परिकीर्तिता।
स्वशक्ति: प्रथमा प्रोक्ता द्वितीया तु परिग्रहा।
शिवादभिन्ना या शक्ति: सा स्वशक्ति: प्रकीर्तिता।
कार्यमात्रे प्रक्लृप्ता या सा शक्ति वैं परिग्रहा।।

सप्तमातृणां मन्त्रोद्धारविधि:

यकारादि सकारान्तान् ब्राह्म्यादीनां तु कल्पयेत्।
बिन्दुनाद समायुक्तान् मूलमन्त्रा नत: परम्।
तत्तन्नाम चतुर्थ्यन्तं नमस्कारेण योजयेत्।
हकारं वीरभद्रस्य गणेशस्य गकारकम्।
एवं मूलाम्श्च सङ्कल्प्य चाङ्गान्येभ्यश्च कल्पयेत्।। (अजितागमे)

प्रत्यङ्गिराम्बा मन्त्रप्रभेदाः

1. गणेश स्तुतिः

ओं ओं ओं काररूपं त्र्यह मिति च परं यत्स्वरूपं तुरीयं -
त्रैगुण्या तीत नीलं कलयति मनस स्तेज सिन्दूर मूर्तिम्।
योगीन्द्रै ब्रह्मरन्ध्रैः सकल गुण मयं श्री हरेन्द्रेण सङ्गं
गं गं गं गं गणेशं गजमुख मभितो व्यापकं चिन्तयामि।।

2. पार्वतीपतिस्तुतिः

हे नीलकण्ठ वृषभध्वज पञ्चवक्र -
लोकेश शेषवलय प्रमथेश शर्व।
हे धूर्जटे पशुपते गिरिजापते मां
संसारदुःख गहनात् जगदीश रक्ष।।

3. क्षेत्रपालस्तुतिः

यं यं यं यक्षरूपं दश दिशि वदनं भूमि कम्पाय मानं
सं सं सं संहारमूर्तिं शुभमकुट जटा शेखरं चन्द्र बिम्बम्।
दं दं दं दीर्घकायं विकृत नख मुखं चोर्ध्वं रोमं करालं
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्र पालम्।।

4. बटुकनाथस्तुतिः

करकलितकपालः कुण्डली दण्डपाणिः -
तरुण तिमिर नील व्याल यज्ञो पवीती।
क्रतु समय सपर्या विघ्न विच्छेद हेतुः -
जयति वटुक नाथः सिद्धिदः साधकानाम् ।।

प्रत्यङ्गिरा स्तोत्रमन्त्रः

प्रत्यङ्गिरे नम स्तुभ्यं सर्वशत्रु विनाशिनि।
भद्रं प्रयच्छ शीघ्रं मे भद्रकालि नमो ऽस्तु ते।।

सप्त आङ्गीरसऋषयः (शैवागमे –सुप्रभेदे ४८-१९)

भृगु श्चैव वसिष्ठ श्च पुलस्त्यः पुलहः क्रतुः।
काश्यपः कौशिका श्चैव आङ्गिरा मुनय स्त्विमे।।

प्रत्यङ्गिरा मन्त्रभेदाः

1. क्षं भक्ष ज्वालाजिह्वे कराळदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हुं फट्। (20वर्णाः)
2. ओं ह्रीं क्षं भक्ष ज्वालाजिह्वे करालदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हुं फट्। (22वर्णाः)
3. प्रत्यङ्गिरामूलविद्या (26 वर्णात्मिका-भैरवोक्ता)
   "ओं ऐं ह्रीं श्रीं प्रत्यङ्गिरे मम रक्ष रक्ष मम शत्रूणां भक्ष भक्ष ओं स्वाहा"
4. प्रत्यङ्गिरामन्त्रः (26 वर्णाः)
   ओं क्षं भक्ष – रक्ष - रक्ष - ज्वालाजिह्वे-कराळदंष्ट्रे- प्रत्यङ्गिरे – क्षं ह्रीं फट् स्वाहा।
5. ओं क्षं ह्रीं हुं प्रत्यङ्गिरे मां रक्ष रक्ष मम शत्रून् भक्ष भक्ष क्षं ह्रीं हुं फट् स्वाहा। (27वर्णाः)
6. ओं क्षं ह्रीं प्रत्यङ्गिरे - उत्तिष्ठ पुरुषि- किं स्वपिषि – भयं मे समुपस्थितं - यदि शक्य मशक्यं वा तन् मे भगवति शमय स्वाहा । (44 वर्णाः)
7. ब्राह्मी प्रत्यङ्गिरा मन्त्रः
   ओं आं ह्रीं क्रों - ओं नमः कृष्णवसने – सिंहवदने – महाभैरवि – ज्वलज्ज्वालजिह्वे – कराळदंष्ट्रे – प्रत्यङ्गिरे क्षं क्रोम्।

8. नारायणी प्रत्यङ्गिरा मन्त्रः

ओं ह्रीं खें फ्रें भक्ष ज्वालाजिह्वे – कराळवदने – काळरात्रि – प्रत्यङ्गिरे – क्षों क्षं रीं ह्रीं नमस्तुभ्यं – हन हन – मां रक्ष रक्ष – मम शत्रून् भक्षय भक्ष्य हुंफट् स्वाहा।

9. रौद्री प्रत्यङ्गिरा मन्त्रः

ओं ह्रीं - ओं नमः कृष्णवसने – सहस्रसिंहिनि – सहस्रवदने - काळरात्रि-प्रत्यङ्गिरे – परसैन्य - परकर्म - विध्वंसिनि – परमन्त्रोत्सादिनि – सर्वभूतदमनि – सर्वदेहान् बन्ध बन्ध – सर्वविद्यां छिन्धि छिन्धि – क्षोभय क्षोभय – परतन्त्राणि स्फोटय स्फोटय –सर्वश्रृङ्खलाः त्रोटय त्रोटय – ज्वलज्ज्वालाजिह्वे – कराळवदने – प्रत्यङ्गिरे ह्रीं नमः स्वाहा।।

10. गायत्रीमन्त्राः

1. अपराजितायै विद्महे क्षुद्रहारिण्यै धीमहि तन्नो उग्रा प्रचोदयात्।
2. ज्वालाजिह्वायै विद्महे कराळदंष्ट्र्यै धीमहि तन्नः प्रत्यङ्गिरे प्रचोदयात्।
3. प्रत्यङ्गिरायै विद्महे शत्रुनिहन्त्र्यै धीमहि तन्नो देवी प्रचोदयात् ।

11. प्रत्यङ्गिरा एकाक्षरीविद्या –

ह्रामित्यादिभिः कराङ्गन्यासौ कृत्वा – देवीं ध्यात्वा – पञ्चोपचैस्संपूज्य – प्रत्यङ्गिरायाः एकाक्षरीविद्यां जपेत् - तद्यथा – ओं ह्रीं ह्रां ह्रीं ओं इतिमनुं गुरूपदिष्टमार्गेण स्वीकृत्यैव प्रजपेत्।

उग्रकृत्या प्रत्यङ्गिरा मन्त्रः

12. ओं यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधू मिव।
तां ब्रह्मणाऽपनिर्णुद्मः प्रत्यक्कर्तार ऋच्छतु स्वाहा।।

13. ओं कृष्णवर्णी बृहद्रूषी बृहत्कण्ठी महद्भयी।
देविदेवि महादेवि मम शत्रून् विनाशय स्वाहा।।

14. ओं खट् फट् झहि महाकृत्ये विधूमाग्नि समप्रभे।
देवि देवि महादेवि मम शत्रून् विनाशय स्वाहा ।।

कालीसूक्त मन्त्राः (रिपुमारकपञ्चमन्त्राः) (ऋग्वेदे अथर्वणवेदेच)

15. ओं ह्रीं - यां कल्पयन्ति नो अरयःक्रूरां कृत्यां वधूमिव -
तां ब्रह्मणाऽपनिर्नुद्मः प्रत्यक् कर्तार मृच्छतु - ह्रीं ओं स्वाहा।।

16. ओं ह्रीं - ये नो रयिं दुश्चरितासो अग्ने जहुर्मर्तासो अनृतं वदन्तः -
तेषां वपूंष्यर्चिषा जातवेदः शुष्कं नवृक्षमभि सं दहस्व – ह्रीं ओं स्वाहा।

17. ओं ह्रीं - कृष्णवर्णे बृहद्रूपे बृहत्कर्णे महद्भये
देवि देवि महादेवि मम शत्रून् विनाशय - ह्रीं ओं स्वाहा।

18. ओं ह्रीं – खट् फट् जहि महाकृत्ये विधूमाग्नि समप्रभे -
जहिशत्रूंस्त्रिशूलेन क्रुध्यस्व पिब शोणितम् - ह्रीं ओं स्वाहा ।

19. ओं ह्रीं ये द्रुह्युत्रृजवे मह्यमग्ने कदाधियो दुर्मदा अश्मनासः -
आ बध्यैतान् शोचिषा विध्य तन्तून् वैवस्वतस्य सदनं नयस्व - ह्रीं ओं स्वाहा।

20. ओं क्षं ह्रीं हुं प्रत्यङ्गिरे रक्ष रक्ष मम शत्रून् भक्ष भक्ष क्षं फट् ओं स्वाहा
(रुद्रयामले प्रोक्तः मन्त्रः)

21. प्रत्यङ्गिराशूलिनी मेलन मन्त्रः

ओं ऐं ह्रीं श्रीं -क्षं क्रीं हुं प्रत्यङ्गिरे – ज्वल ज्वल शूलिनि -
दुष्टग्रह हुं फट् स्वाहा ।

22. प्रत्यङ्गिरास्त्र नवाक्षरी

ह्रीं प्रत्यङ्गिरास्त्राय हुं फट् (इतिनवाक्षरमन्त्रः शैवागमोक्तः)

23. प्रत्यङ्गिरास्त्रमन्त्रः (शताक्षरीविद्या)

ओं ह्रीं कृष्णवासस्से – सिंहवदने – महावदने – महाभैरवि – सर्वशत्रुकर्म विध्वंसिनि – परमन्त्रच्छेदिनि – सर्वभूतदमनि- सर्वभूतान् बन्ध बन्ध – सर्व विघ्नान् छिन्धि छिन्धि – सर्वव्याधीन् निकृन्त निकृन्त – सर्वदुष्टान् भक्ष भक्ष - ज्वालाजिह्वे कराळवक्त्रे - कराळदंष्ट्रे - प्रत्यङ्गिरे ह्रीं ओं नम स्स्वाहा।।

24. **प्रत्यङ्गिरास्त्र मन्त्रः**

ओं ऐं ह्रीं श्रीं आं ईं उं रुद्रास्थिशृङ्खले हूं सर्वतोभद्रे – कुटिल रुद्रवदने - विधारि – रक्ष रक्ष मां प्रत्यङ्गिरे धाम धाम ज्योति र्ज्योतिः सुवे सुवः भुवे भुवःपाह्यमृतोहं – सत्यहं त्रिभिदन् पादजुषां लक्ष्मि - नमोवः किरिकेयं करोति - तमो वाञ्छा विशतु महादेव सुवृत्ति ते नमो नम स्स्वाहा।।

25. **प्रत्यङ्गिरास्त्र महामन्त्रः (शताक्षरी अस्त्रविद्या) 100 अक्षराः**

"ओं ह्रीं कृष्णवाससे - सिंहवदने - महावदने - महाभैरवि - सर्वशत्रुकर्म विध्वंसिनि – परमन्त्र छेदिनि – सर्वभूत दमनि - सर्वभूतान् बन्ध बन्ध – सर्वविघ्नान् छिन्धि छिन्धि - सर्वव्याधीन् निकृन्त निकृन्त – सर्वदुष्टान् भक्ष भक्ष – ज्वालाजिह्वे – कराळदंष्ट्रे – प्रत्यङ्गिरे – ह्रीं नमोस्तुते - स्वाहा।।"

(जपक्रमः = एतन्मन्त्रं अक्षरशतेन अक्षरसहस्रेण यथाशक्ति वा निश्चित सङ्ख्यया वा जपेत्। तत् जपान्ते – उत्तराङ्गत्वेन हृदयादि न्यासान् विधाय - देव्याः स्वरूपं ध्यात्वा – हृदि पुनःपूजां पञ्चोपचारेण कृत्वा - देव्यै जपं समर्पयेत्।।)

26. **अष्टाक्षरीविद्या**

ह्रीं प्रत्यङ्गिरास्त्रायफट् (इति अष्टाक्षरी)

27. **अष्टाक्षरमनुः (शैवागमोक्तः)**

ह्रीं प्रत्यङ्गिरायै हुं फट् (इति अष्टाक्षरी विद्या।)

28. **शक्त्यस्त्र मूलमन्त्रः**

ओं सां सीं सूं सौं -श्रीं ऐं क्लीं ऐं सौं – ज्वलज्ज्वालायै –कोटि सूर्य प्रकाशायै – महाशत्रुभयङ्करायै – लं रं दशास्य करविंशत्यै – सौं मुं पराशक्त्यै हुं फट् स्वाहा।।

29. **काल्यास्त्रमन्त्रः (महादेवी शक्त्यस्त्र गायत्री मन्त्रः)**

दशाननायै विद्महे ज्वालामालायै धीमहि तन्नो शक्तिः प्रचोदयात्।

30. शत्रुनाशिनि प्रत्यङ्गिरामालामन्त्रः (125 वर्णविद्या)

ओं ह्रीं नमः कृष्णवाससे – शतसहस्रहिंसिनि – सहस्रवदने – महाबले – अपराजिते – प्रत्यङ्गिरे – परसैन्य परकर्म विध्वंसिनि- परमन्त्रोत्सादिनि – सर्वभूतदमनि – सर्वदेवान् बन्ध बन्ध – सर्वविद्याः = छिन्धि छिन्धि – क्षोभय क्षोभय – परयन्त्राणि स्फोटय स्फोटय – सर्वश्रृङ्खलाः त्रोट्य त्रोटय – ज्वलज् ज्वालाजिह्वे – कराळवदने –प्रत्यङ्गिरे – ह्रीं नमः स्वाहा।– (नमोन्ते न पूजा जपःश्च स्वाहान्तेन होमः तर्पणं च कार्या)

31. प्रत्यङ्गिरा मालामन्त्रः

ओं ह्रीं नमः कृष्णवाससे – शतसहस्रकोटि सिंहासने – सहस्रवदने - अष्टादशभुजे – महाबले – महाबल पराक्रमे – अजिते – अपराजिते - देवि - महाप्रत्यङ्गिरे – प्रत्यङ्गिरसे – अन्यकर्म विध्वंसिनि –परमन्त्रोच्चाटिनि – परमन्त्रोत्सदिनि – सर्वभूतदमनि – क्रें सौं प्रें ह्रीं क्रों मां सर्वोपद्रवेभ्यो सर्वापद्भ्यो सर्वापद्भ्यो रक्ष रक्ष- ह्रां ह्रीं क्ष्रीं क्रों सर्वदेवानां मुखं - स्तम्भय स्तम्भय – सर्वविघ्नं छिन्धि छिन्धि – सर्वदुष्टान् भक्षय भक्षय – वक्रालय ज्वालाजिह्वे-कराळवदने – सर्वयन्त्राणि स्फोटय स्फोटय –सर्व श्रृङ्खलास्- त्रोटय त्रोटय – प्रत्यसुर समुद्रान् विद्रावय विद्रावय – सं रौद्रमूर्त्ते – महा प्रत्यङ्गिरे- महाविद्ये – शान्तिं कुरुकुरु – मम शत्रून् भक्षय भक्षय – ओं ह्रां ह्रीं ह्रूं जृम्भे जृम्भे- मोहे मोहे – स्तम्भे स्तम्भे - ओं ह्रीं हुं फट् प्रत्यङ्गिरे स्वाहा ह्रीं ओं।।(अष्टादशवारं प्रजपेत्)

32. प्रत्यङ्गिरा माला मन्त्रः (252 अक्षरात्मकः)

ओं नमः कृष्णवाससे – शतसहस्रकोटिसूर्यसम सिंहासने – सहस्रवदने - अष्टादशभुजे – महाबले – महाबलपराक्रमे – अजिते – अपराजिते –देवि - महाप्रत्यङ्गिरे – प्रत्यङ्गिरेशे – परकर्मविध्वंसिनि –परमन्त्रोच्चाटिनि - परमन्त्रोत्सादिनि सर्वभूतदमनि- खें सौं फ्रें ह्रीं क्रों – मां सर्वोपद्रवेभ्यः - सर्वापदो – रक्ष रक्ष – ह्रां ह्रीं क्ष्रीं क्रों सर्वदेवानां मुखं स्तम्भय स्तम्भय - सर्वविघ्नं छिन्दि छिन्दि – सर्वदुष्टान् भक्षय भक्षय – वक्रालय ज्वालाजिह्वे - कराळवदने – सर्व यन्त्राणि स्फोटय स्फोटय – त्रोटय त्रोटय – प्रत्यसुर समुद्रान् – विद्रावय विद्रावय – सां रौद्रमूर्तें – महाप्रत्यङ्गिरे – महाविद्ये –

शान्तिं कुरु कुरु - मम शत्रून् भक्षय भक्षय – ओं ह्रां ह्रीं ह्रूं जम्भे जम्भे – मोहे मोहे - स्तम्भे स्तम्भे – ओं ह्रीं - हुं फट् स्वाहा।। (प्रपञ्चसारसारसङ्ग्रहे)

33. श्री उग्रकृत्या प्रत्यङ्गिरा महामालान्त्रः

ओंह्रींईग्लौंश्रींक्रींसौंऐंहुंनमः-कृष्णवसने–शतसहस्त्रसिंहवदने–अष्टादशभुजे–महाबले–शतपराक्रमपूजिते–अजिते–अपराजिते-देवि–प्रत्यङ्गिरे–परसैन्य परकर्म विध्वंसिनि – परमन्त्र परयन्त्र परतन्त्र उच्चाटनी – परविद्याग्रासकरे – सर्वभूतदमनी – क्षं ग्लौं सौं ईं ह्रीं क्रीं क्रां एह्येहि – प्रत्यङ्गिरे – चिदचिद्रूपे – सर्वोपद्रवेभ्यो सर्वग्रहदोषेभ्यो – सर्वरोगेभ्यो - प्रत्यङ्गिरे - मां रक्ष रक्ष – ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः - क्षां क्षीं क्षूं क्षैं क्षौं क्षः - ग्लां ग्लीं ग्लूं ग्लैं ग्लौं ग्लः -प्रत्यङ्गिरे – परब्रह्ममहिषि- परमकारुणिके - एहि – मम शरीरे आवेशय आवेशय – मम हृदये स्फुर स्फुर - ममांसे प्रस्फुर प्रस्फुर – सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय - जिह्वां कीलय कीलय – बुद्धिं विनाशय विनाशय –प्रत्यङ्गिरे – महाकुण्डलिनि – चन्द्रखण्डावतंसिनि - भेताळवाहने – प्रत्यङ्गिरे – कपालमालाधारिणि – त्रिशूल वज्राङ्कुश बाण बाणासने - पानपात्र पूरितं - मम शत्रुशोणितं पिब पिब – मम शत्रूणां मांसं खादय खादय – मम शत्रून् ताडय ताडय – मम वैरिजनान् दहदह –मम विद्वेषकारिणः शीघ्रमेव भक्षय भक्षय – श्री प्रत्यङ्गिरे – भक्तकारुणिके - शीघ्र मेव दयां कुरु कुरु – सद्यो ज्वर जाढ्य मुक्तिं कुरु कुरु -भेताळ ब्रह्मराक्षसादीन् झहि झहि – मम शत्रून् ताडय ताडय – प्रारब्ध सञ्चित क्रियमाणान् दह दह – दूषकान् सद्यो दीर्घरोगयुक्तान् कुरु कुरु - प्रत्यङ्गिरे-प्राणशक्तिमये – मम वैरिजन प्राणान् हन हन – मर्दय मर्दय - नाशय नाशय - ओं ह्रीं श्रीं क्रीं सौं ग्लौं प्रत्यङ्गिरे महामाये देवि देवि – मम वाञ्छितं कुरुकुरु – मां रक्ष रक्ष-प्रत्यङ्गिरे स्वाहा।। (कालीतन्त्रस्था)

34. क्षुरिकास्त्रमन्त्रः (वातुलागमोक्तः) (कारणागमे)

ओं शिं छिं क्षुरिकास्त्राय फट् (इति अष्टाक्षरमन्त्रः)

35. ओं हुं क्षुरिकास्त्राय हुं फट् (अष्टाक्षरमन्त्रः)
(हुं फण्णमः इति पूजने जपे च - हुंफट्स्वाहा इति होमः कार्यः)

36. काम्यफलार्थे काली मन्त्रः

ओंकार मन्त्र पीठस्थे ओषधीशामृतोज्वले ।
आयु रारोग्य मैश्वर्यं इष्टसिद्धिं च देहि मे - स्वाहा।।

37. ओं ऐं ह्रीं श्रीं - नमोभगवति - प्रत्यङ्गिरे - महाभैरवि - ब्रह्मस्वरूपे - ब्रह्मेशि – ब्रह्मास्त्र खड्गधारिणि - ब्राह्मि प्रत्यङ्गिरे - देवि - अव ब्रह्म द्विषो जहि - स्वाहा।।

38. नमः प्रत्यङ्गिरे देवि सर्व कामार्थ दायिनि ।
इष्टसिद्धिं च मे देहि प्रतिकूलानि नाशय - स्वाहा।।

39. रिपुनाशक रक्षामन्त्रः (ऋग्वेदीयः)

ओं ह्रीं - ये नो रयिं दुश्चरितासो अग्ने जह्रुर्मर्तासो अनृतं वदन्तः
तेषां वपूं ष्यर्चिषा जातवेदः शुष्कं न वृक्ष मभि सं दहस्व
- ह्रीं ओं स्वाहा।।

40. ओं क्रीं कालिके - ह्रीं प्रत्यङ्गिरे – मम शत्रून् - खादय खादय - हिंसय हिंसय –मारय मारय –भिन्धि भिन्धि – छिन्धिछिन्धि - उच्चाटय उच्चाटय – द्रावय द्रावय – शोषय शोषय – स्वाहा। ओं क्रीं हूं ह्रीं कालिकायै मदीयशत्रून् समर्पयामि स्वाहा।।

41. पर्वतादिषट्देवतात्मक शत्रुघ्न मन्त्रः (16अक्षराः)

ओं अं कं चं टं तं पं हं लों ह्रीं हुं सः हुं फट् स्वाहा।
(पर्वत समुद्राग्नि वायु धरा काशाः देवताः।)

42. जपसमर्पण मन्त्रः

गुह्यातिगुह्य गोप्त्री त्वं गृहाणास्मत् कृतं जपम्।
सिद्धि र्भवतु मे देवि त्वत्प्रसादात् सुरेश्वरि।।
इति देव्यै (जापकाः आचार्याय वा) जपसंख्यां निवेद्य –
सुपुष्पेण वामकरतले दद्यात्।।

महाप्रत्यङ्गिरा - ब्रह्मविद्या स्तुतिः (सहस्रशीर्षा, शताष्टभुजा)

सहस्र शीर्षं च सहस्र नेत्रं सहस्र बाहुं च सहस्र पादान्।
सहस्र शक्त्या परिवेष्टितां तां सहस्र शस्त्रा परिपूर्णरूपाम्।।

एवं संचिन्तिता देवी शक्तिभिः परित स्तुता।
सुवर्ण कलश प्रख्या पीनोन्नत पयोधरा।।

गोक्षीर चन्द्रिका गौरा सर्वमिष्टं प्रयच्छति।
शताष्ट भुज संयुक्तां कन्यका शत वेष्टिताम्।।

महिषोपरि तिष्टन्तीं श्यामवर्णां शुचि स्मिताम्।
सर्वा वयव संपन्नां सर्व भूत मनोहराम्।

ध्यानेन चिन्तिता नर्थान् प्रयच्छन्तीं महेश्वरीम्।
सर्वपाप विशुद्ध्यर्थं चिन्तयेत् ब्रह्म मण्डलम्।।

ब्रह्मविद्या मिमां देवीं नित्यं सेवेत यः सुधीः।
ऐहिकाऽमुष्मिकं सौख्यं सिद्ध्यत्येव न संशयः।।

कालीं दण्डकरीं विद्यां रक्तलोचन भीषणाम्।
काली कण्ठ परं मृत्युः विजयार्थं नमाम्यहम्। (विजयाख्यै)

पञ्चयोजन विस्तीर्णं तन्मृत्यो र्मुख मण्डलम्।।
तस्मान् रक्ष महाविद्ये भद्रकाळि नमो ऽस्तुते।।

ब्रह्मविद्यां महाविद्यां ये दूषयति मानवः।
सोऽवश्यं नाश माप्नोति षण्मासाभ्यन्तरे ऽपि वा।।

अग्रतः पृष्टतः पार्श्वौ ऊर्ध्वंग स्सर्व रक्षकाम्ः।
छन्नघण्टां विरूपाक्षीं त्वां भजे जगदीश्वरीम्।

एवं विद्यां महाविद्यां त्रिसन्ध्यं स्तौति मानवः।
दृष्ट्वा दुष्ट जना स्सर्वे तस्य मोह वशंगताः।।

ओं सह ना ववतु – सह नौ भुनक्तु –सह वीर्यं करवा वहै।
तेजस्विना वधीत मस्तु मा विद्विषा वहै।।

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधके।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तुते।।

ओंङ्कार मन्त्रपीठस्थे ओषधीशामृतोज्वले।
आयुरारोग्य मैश्वर्य मिष्टसिद्धं च देहि मे।। (ओं शान्तिः शान्तिः शान्तिः)

होमे - प्रत्यङ्गिरा मन्त्रप्रयोग भेदा:

1. क्षं भक्ष ज्वालाजिह्वे कराळदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हुं फट् (स्वाहा)
2. ओं आं ह्रीं क्रों ओं नम: कृष्णवसने सिंहवदने महाभैरवि ज्वल ज्वालाजिह्वे कराळदंष्ट्रे प्रत्यङ्गिरे क्षं क्रों - ओं नमो नारायणाय - घृणिस्सूर्य आदित्यों - सहस्रार हुंफट् - अव ब्रह्म द्विषो जहि (स्वाहा)
3. प्रत्यङ्गिरायै विद्महे शत्रुनिषूदिन्यै धीमहि तन्नो देवी प्रचोदयात् (स्वाहा)
4. ओं ह्रीं - कृष्णवर्णि बृहद्रूपि बृहत्कण्ठि महद्भयि देवि देवि महादेवि मम शत्रून् विनाशय - ह्रीं ओं - ऐं ह्रीं श्रीं नमो भगवति प्रत्यङ्गिरे मम शत्रून् विनाशय ओं नमस्स्वाहा।
5. ओं ह्रीं - खट् फट् जहि महाकृत्ये विधूमाग्नि समप्रभे - देवि देवि महादेवि मम शत्रून् विनाशय - ह्रीं ओं - ऐं ह्रीं श्रीं - नमो भगवति प्रत्यङ्गिरे मम शत्रून विनाशय ओं नमस्स्वाहा।
6. ओं ह्रीं – यो नो रयिं दुश्चरितासो अग्ने जह्नुर्मर्तासो अनृतं वदन्त - तेषां वपूंष्यर्चिषा जातवेद: शुष्कं न वृक्ष मभि सं दहस्व - ह्रीं - ओं ऐं ह्रीं श्रीं - प्रत्यङ्गिरे मां रक्ष रक्ष मम शत्रूणां भक्षभक्ष हुंफट् स्वाहा।
7. ओं ह्रीं - खट् फट् जहि महाकृत्ये विधूमाग्नि समप्रभे - जहि शत्रूं स्त्रिशूलेन क्रुध्यस्व पिब शोणितम् - ह्रीं ओं नमो भगवति प्रत्यङ्गिरे मम शत्रून् नाशय नाशय हुंफट् स्वाहा।
8. ओं ह्रीं - ये दुह्युरत्रृजवे मह्यमग्ने कदाधियो दुर्मदा अश्मना स: आबध्यैतान् शोचिषा विध्य तन्तून् वैवस्वतस्य सदनं नयस्व - क्षं भक्ष ज्वालाजिह्वे कराळदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हुंफट् स्वाहा।
9. ओं ह्रीं कृष्णवर्णे महद्रूपे बृहत्कर्णे महद्भये देवि देवि महादेवि मम शत्रून् विनाशय - ह्रीं ओं प्रत्यङ्गिरे मम शत्रून् नाशय नाशय स्वाहा।
10. ओं ऐं ह्रीं श्रीं - नमो भगवति प्रत्यङ्गिरे - (अमुकस्य) अस्य आपदो नाशय नाशय - संपदो वर्धय वर्धय - प्रतिकूलं नाशय नाशय - अनुकूलं प्रयच्छ प्रयच्छ – कालीं देवीं शरण महं प्रपद्ये स्वाहा। (अत्र अमुकस्य=साध्यनाम्न:)

11. ओं ह्रीं प्रत्यङ्गिरां देवीं शरणं प्रपद्ये –ओं ऐं ह्रीं श्रीं प्रत्यङ्गिरे - (अस्य) - दुःखं शमय शमय - रोगं शमय शमय - भीतिं शमय शमय - आयुर्वर्धय वर्धय - शत्रून् संहर संहर -प्रत्यङ्गिरे क्षं ह्रीं हुंफट् स्वाहा।। (अस्य = साध्यस्य)

12. ओं ऐं ह्रीं श्रीं - नमो भगवति प्रत्यङ्गिरे - सिंहासने सिंहवक्त्रे ज्वालाजिह्वे कराळदंष्ट्रे अजिते अपराजिते शत्रुनाशिनि - शूलकपालधारिणि - धां धात्रि - भं भद्रकालि - क्षं ह्रीं हुंफट् स्वाहा।।

13. ओं ऐं ह्रीं श्रीं - नमो भगवति - अथर्वणभद्रकाळि –रक्ष मां प्रत्यङ्गिरे - ब्रह्मस्वरूपे ब्रह्मेशि - ब्रह्मास्त्र खड्गधारिणि - ब्रह्मि प्रत्यङ्गिरे - देवि - अव ब्रह्मद्विषो जहि - क्षं ह्रीं हुं फट् स्वाहा।

14. ओं ऐं ह्रीं श्रीं - नमो भगवति प्रत्यङ्गिरे –उत्तिष्ठपुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्य मशक्यं वा तन्मे भगवति शमय स्वाहा - ह्रीं प्रत्यङ्गिरे हुंफट् स्वाहा ।

15. ओं क्षं ह्रीं - हुं प्रत्यङ्गिरे रक्ष रक्ष मम शत्रून् भक्ष भक्ष क्षं ह्रीं - हुं फट् स्वाहा।।

16. ओं ह्रीं खें फ्रें भक्ष ज्वालाजिह्वे-कराळवदने-काळरात्रि-प्रत्यङ्गिरे- क्षों क्षं रीं ह्रीं नमस्तुभ्यं हन हन - मां रक्ष रक्ष – शत्रून् भक्षय भक्षय हुं फट् स्वाहा।

17. ओं ह्रीं –यां कल्पयन्ति वहतौ वधूमिव विश्वरूपां हस्तकृतां चिकित्सवः - सारादेत्वप नुदाम एनाम् – भं भद्रकालि –त्रिनेत्रि –कालवर्णि-जयशूल कपालधारिणि - प्रेतवाहिनि सौं रें श्रां रुद्ररूपि –शीतसंपूर्णवक्रि-नवत्वाधिष्ठात्रि देवि महाकाल्यै हुंफट् स्वाहा।

18. शीर्षण्वती नस्वती कर्णिनी कृत्या कृता संभृता विश्वरूपा - सारादेत्वप नुदाम एनाम् –ओं ऐं ह्रीं श्रीं प्रत्यङ्गिरे हुंफट् स्वाहा।

19. ओं दुर्गां देवीं शरण महं प्रपद्ये –ओं क्ष्रौं हनहन सहस्रार हुं फट् स्वाहा – ह्रीं नमो भगवति प्रत्यङ्गिरे - ज्वल ज्वल शूलिनि –सर्वशत्रु संहारिणि-सर्वभूत निर्नाशिनि - सकल दुरित निवारिणि-सकल राक्षस संहारिणि-सिंहवाहिनि –अष्टभुजे –अट्टहासध्वंसिनि-नमस्ते –ओं श्रीं ह्रीं क्लीं श्रौं दुं –ज्वल ज्वल शूलिनि दुष्टग्रह हुफट् स्वाहा।।

20. ओं ह्रीं नमः - प्रत्यङ्गिरास्त्राय हुं फट् - स्वाहा (इतिअष्टाक्षरीविद्या -आहुतिः)

काम्यविधौ प्रत्यङ्गिरामन्त्राणां प्रयोगप्रकारा: (लौकिकाग्नौ होम:)

1. ओं ह्रीं - यां कल्पयन्तीं नो रय: क्रूरां कृत्यां वधू मिव –तां ब्रह्मणाऽपनिर्णुद्म: प्रत्यक् कर्तार मृच्छतु – ह्रीं ओं ह्रीं ह्रीं विन्ध्याचलवासिनि- सिंहवदने – कृष्णभगिनि –महाभैरवि- ज्वल ज्वल ज्वालामालिनि – कराळवक्रे – प्रत्यङ्गिरे – क्षौं क्षौं –ओं नमो नारायणाय श्रीं – घृणिस्सूर्य आदित्यों –ओं सहस्रार हुंफट् -स्वाहा।।

2. ओं नमो ब्रह्मणे –वेधसे –अष्टौपुत्रान् जयन्तान् देहिदेहि दापय मे स्वाहा।

3. ओं ह्रीं क्षं भक्ष ज्वालाजिह्वे कराळदंष्ट्रे प्रत्यङ्गिरे-क्षं ह्रीं हुं फट् स्वाहा।।

4. ज्वालात्मिकायै विद्महे प्रत्यङ्गिरायै धीमहि तन्नो प्रत्यङ्गिरा प्रचोदयात्।

5. ओं जातवेदसे सुनवाम सोम मराती यतो निदहाति वेद: - स न: पर्षदति दुर्गाणि विश्वा नावेव सिन्धुन्दुरिताऽत्यग्नि: - ह्रीं त् या दचोप्र न: यो योधि हि मधी स्यवदेर्गोभ यंणिरेर्व तुवित्सत द्रां-यां कल्पयन्तीं नोरय:क्रूरां कृत्यां वधू मिव-तां ब्रह्मणापनिर्णुद्म: प्रत्यक् कर्तार मृच्छतु – (अमुकं साध्यं) हन हन हुं फट् स्वाहा – सुदर्शनाय विद्महे महाज्वालाय धीमहि तन् न: चक्र: प्रचोदयात्। (अमुकस्थानेशत्रुनाम)

6. ओं तामग्नि वर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् – दुर्गां देवीं शरण महं प्रपद्ये सुतरसि तरसे नम: - ह्रीं शीर्षण्वतीं कर्णवतीं विषुरूपां भयंकरीम्-य: प्राहिणो दिहाद्य त्वां वितंत्वं योजयासुभि: दोंवसा सेजररोप-त् याद चो प्र न: यो योधि हिमधी स्य वदे गोंभ यंणिरेर्व तुवित्सत – साध्यं अमुकनामानं - हन हन हुंफट् स्वाहा –तत्सवितुर्वरेणियं भर्गो देवस्य धीमहि धियोयोन: प्रचोदयात् स्वाहा।

7. ओं अग्ने त्वं पारया नव्यो अस्मान् स्वस्तिभि रति दुर्गाणि विश्वा पूश्च पृथ्वी बहुलान उर्वी भवा तोकाय तनयाय शंयो:- क्लीं येन दिष्टेह वहसि प्रतिकूल मघायिनि – तमे वेतो निवर्तस्व मास्मान् मृच्छो अनागस:- प्रचोदयात् न: यो धिय: धीमहि देवस्य भर्गो वरेणियं सवितु:तत्।_साध्यं शत्रुनाम अमुं – हन हन हुंफट् स्वाहा।।

तत्सवितुर्वरेणियं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।।
यजुर्वेदीय दुर्गासूक्तेन ऋग् वेदीय प्रत्यङ्गिरासूक्त गायत्रीयुक्तः

8. ओं विश्वानि नो दुर्गहा जातवेदस् सिन्धुन् न नावा दुरिताऽति पर्षि –अग्ने अत्रिवन् मनसा गृणानो ऽस्माकं बोध्यविता तनूनाम्-ब्लूं अभिवर्तस्व कर्तारं निरस्तास्माभि रोजसा – आयु रस्य निकृन्तस्व प्रजां च पुरुषादिनि– धियो यो नःप्रचोदयात् - भर्गो देवस्य धीमहि - तत्सवितुर्वरेणियं - (साध्यं- अमुकनामानं) हन हन हुं फट् स्वाहा – तत्सवितुर्वरेणियं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् - स्वाहा।।

9. ओं प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि – स्वाञ्चाऽग्ने तनुवं पिप्रयस्वा स्मभ्यञ्च सौभगमायजस्व – गोभिर्जुष्ट मयुजो निषिक्तं तवेन्द्र विष्णो रनु सञ्चरेम – नाकस्य पृष्ठ मभि संवसानो वैष्णवीं लोक इह मादयन्ताम् – क्षिप्रं कृत्ये निवर्तस्व कर्तुरेव गृहान्प्रति- पशूं श्चैवास्य नाशय वीरांश्चास्य नि बर्हय – साध्यं अमुक नामानं – हन हन हुंफट् - स्वाहा।।

10. ओं ह्रीं प्रत्यङ्गिरे नमोऽस्तुते –भास्कराय विद्महे महद्युतिकराय धीमहि - तन्नो आदित्य प्रचोदयात् – घृणिस्सूर्य आदित्यों न प्रभावात्यक्षरं – मधुक्षरन्ति तद् रसं सत्यं वै तद्रस मापो ज्योतीरसो ऽमृतं ब्रह्म भूर्भुवस्वरों –ओं कृष्ण ओं – स्वाहा।।

11. ओं ह्रीं क्रों कृष्णवाससि-सिंहमुखि –महाभैरवि –परसैन्य-परकर्म विध्वंसिनि –पर मन्त्र यन्त्र तन्त्र विच्छेदिनि –सर्वविघ्नान् छिन्धि छिन्धि- सर्वव्याधीन् कृन्तय कृन्तय - सर्व वैरीन् – सर्वदुष्टान् भक्षय भक्षय - सर्व मन्त्र यन्त्र तन्त्रान् आकर्षय आकर्षय - ज्वालय ज्वालय - ज्वालामालिनि भिन्धि भिन्धि – भैरवि - ज्वल ज्वालाजिह्वे करालवदने प्रत्यङ्गिरे - क्ष्मां क्ष्मीं – ओं नमो नारायणाय – घृणिस्सूर्य आदित्यों –सहस्रार - हुं फट् स्वाहा।।

12. अरुणा वारुणी चैव सर्वग्रह निवारिणी - सर्व कामकरी देवी रक्ष मां सर्वतः सदा - क्षं ह्रीं प्रत्यङ्गिरे हुंफट् - स्वाहा।।

13. ओं ह्रीं नमः प्रत्यङ्गिरे –महाभैरवि –सर्वराजभयं –चोरभयं – ग्रहभयं मारय मारय – अग्निस्तम्भनं जल स्तम्भनं वायु स्तम्भनं शत्रुस्तम्भनं सर्वजन स्तम्भनं कुरु कुरु स्वाहा।।

14. ओं क्ष्रीं ह्सौः ओं नमः - प्रत्यङ्गिरादेव्यै नमः - सर्व मनोरथान् साधय - साधय मदपवादकारिणः - मम सर्वशत्रून् नाशय नाशय - स्तम्भय स्तम्भय - मयि प्रसीद प्रसीद - त्रयक्षि नमः स्वाहा।।

15. ओं कृष्णवाससि – शतसहस्र हिंसिनि –अष्टादशभुजे – महाबल पराक्रमे – अजिते –अपराजिते –परसैन्य परकर्म विध्वंसिनि – परमन्त्र परयन्त्र परतन्त्र उच्चाटने – सर्वभूतदमनि - खें सौः प्रों द्रीं क्रों मां सर्वापद्भ्यो - रक्ष रक्ष – द्रां द्रीं क्लीं सर्वदेवानां मुखं स्तम्भय स्तम्भय मम सर्वविघ्नान् छिन्धि छिन्धि - भिन्दि भिन्दि - मम सर्ववैरीन् - सर्वदुष्टान् - भक्षय भक्षय - ज्वलद् वक्रालये - ज्वल ज्वालाजिह्वे - कराळवदने - सर्व मन्त्र यन्त्र तन्त्राणि स्फोटय -स्फोटय स्रृङ्खलान् त्रोटय त्रोटय - सौः रौद्रमूर्ते -महाप्रत्यङ्गिरे - मम शान्तिं कुरु कुरु - मम वैरीन् जम्भय जम्भय - ओं ह्रीं नमः - ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः - जम्भे जम्भे - मोहे मोहे - स्तम्भे स्तम्भे -ओं ह्रीं हुंफट् स्वाहा।।

16. यत इन्द्र भयामहे ततो नो अभयं कृधि।
मघवन् छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि।।
स्वस्तिदा विशस्पति वृंत्रहा विमृधो वशी।
वृषेन्द्रः पुर एतु नः स्वस्तिदा अभयंकरः।। ओं ह्रीं हुं फट् स्वाहा

17. महाँन् इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु।
स्वस्ति नो मघवा करोतु हन्तु पाप्मानं यो ऽस्मान् द्वेष्टि।।
सजोषा इन्द्र सगणो मरुद्भिस्सोमं पिब वृत्रहञ्छूर विद्वान्।
जहि शत्रूं रपमृधोनु दस्वाथाभयं कृणुहि विश्वतो नः।।
ओं ह्रीं हुं फट् स्वाहा।।।

18. सहस्र परमा देवी शतमूला शताङ्कुरा।
सर्वं हरतु मे पापं दूर्वा दुस्वप्न नाशिनी।। ओं ह्रीं हुं फट् स्वाहा।

19. अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा।
शिरसा धारिता देवि रक्षस्व मां पदे पदे।। ओं ह्रीं हुं फट् स्वाहा।

20. ओं ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्व रेतं विरूपाक्षं विश्वरूपाय वै नमो नमः।। ओं ह्रीं हुं फट् स्वाहा।

21. ओं अत्रिणा त्वा क्रिमे हन्मि कण्वेन जमदग्निना।
विश्वावसो ब्रह्मणा हतः कृमीणां रामां अप्येवां स्थपति र्हतः।।
अतो माता अतो पिता अतो स्थूरा अतो क्षुद्राः अतो कृष्णाः।
अतो श्वेताः अतो आशा तिकां हताः त्वेताभिस्सह सर्वे हताः।।
आहरावद्या श्रुतस्य हविषो यथा तत्सत्यं यदमुं यमस्य जंभयीः
आदद्यामि तथा हि तत्।
खण् खण् ब्रह्मणा त्वा शपामिं ब्रह्मणत्वा शपथेन शपामि
घोरे रात्वा भ्रशूनां चक्षुषा प्रेक्षे ।।
रौद्रे णाङ्गिरसा मनसा ध्यायामे।। अघस्यत्वा धारया।
विन्ध्यायामि अघशोत्यद्य स्वासौ उवुं दशमि -
जार्णर तल्पे वेराल्यं उत्तुदगरी रनुप्रवेशय मरीचि रुपसंतय।।
याव दितः पुरस्ता दुदयाति सूर्यः।। ताव दितो ऽमुं नाशय यो ऽस्मान्द्वेष्टि
- यं च वयं द्विष्मः। एता हं वास्योग्र देवो राजनि सचक्राम
तस्मादयं सर्वतः प्रवर्तते भूर्भुवस्सुवः।।

22. खट् फट् जहि छिन्धि भिन्धि खट् ररिचां च क्रूराणि।।

23. परिवाहिनि नमस्ते अस्तु मा मा हिंसी द्विषन्तं मारायतं -
मृत्यो मृत्येव नय इष्टं रक्ष रक्ष अरिष्टं भञ्जय भञ्जय स्वाहा।।

24. खट् फट् जहि महाकृत्ये विधूमाग्नि समप्रभे -
जहि शत्रून् त्रिशूलेन क्रुध्यस्व पिब शोणितम् - ह्रीं प्रत्यङ्गिरे हुंफट्
स्वाहा।।

25. संसृष्टं धनमुभयं समाकृतं अस्मभ्यं धत्तां वरुणस्य मन्युः - भियं दधानां हृदयेषु शत्रवः पराजितासो अपनिलयन्ताम् अक्षिस्पन्दं च दुस्वप्नं भुजस्पन्दं च दुर्मदं मच्चित्तं दुर्गतिं रोगं सदा नाशय शांकरि। महाविद्यां कृपावतो योऽस्मान् द्वेष्टि यो रिष्टं स्मर द्याव देक विंशतिं तव नाशय स्वाहा।

26. श्रियो जात श्रिय आनिर्याय श्रियं वयो जरित्रिभ्यो ददाति - श्रियं वसाना ममृतत्व मायान् भवन्ति सत्या समिथा मितद्रा श्रिय एवैनं तत् श्रिय मादधाति सन्तत मृचा वषट् कृत्यं सन्मन्यै सन्धीयते प्रजया पशुभिः। य एवं वेद स्वाहा।

27. नर्य प्रजां मे गोपाय - अमृतत्वाय जीवसे - जातान् जनिष्यमाणान् च - अमृते सत्य प्रतिष्ठित - अथर्व पितु मैं गोपाय - रसमन्न मिहायुषे अदब्धा यो शीत तनो अविषन्तः - पितुं कृणुसंशस्य पशून् मे गोपाय - द्विपदा ये च षद्पदाः - अष्टाशपाश्च इहाग्ने ये चैकशफाः आशुगाः - सप्रथ सभां मे गोपाय - ये च सभ्याः सभासदः - तानिन्द्रियावतः कुरु - सर्व मायुरुपासतां - अहेर्बुध्न्य मन्त्रं मे गोपाय - यमृषय स्त्रयी विदा विदुः - ऋचः सामानि यजूंषि - साहि श्री रनृता स मां - मनो हिंसी र्जातवेदो गामश्वं पुरुषं
जगत् - अभिभ्रदग्न आगहि श्रिया मा परिपातय - प्रतिकूलं मे नश्यतु - अनुकूलं मे अस्तु - महादेव्यै च विद्महे - विष्णुपत्न्यै च धीमहि - तन्नो लक्ष्मी प्रचोदयात् - ओं ब्लूं ह्रीं श्रीं ब्रह्मकेशिनि मां रक्ष रक्ष हुं फट् स्वाहा।।

28. ओं कृष्णवर्णे महद्रूपे बृहत्कर्णे महद्भये - देवि देवि महादेवि मम शत्रून् विनाशय - ओं ह्रीं नमः प्रत्यङ्गिरे हुंफट् स्वाहा)

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

जप्यमन्त्राणां जपविधिः & ध्यानानि

विभागः - 5

कराङ्गुलि जपविधिः (करमाला प्रकारः)

अलाभे जपमालायाः करशाखासु पर्वभिः।
अनामिकया यो मध्यः तस्मा दधः क्रमेण तु।।
मध्याङ्गु ल्यग्र पर्वादि प्रादक्षिण्य क्रमेण तु।।
तर्जन्यादौ जपान्तश्च अक्षमाला करे स्थिता।।
अङ्गुल्यग्रेषु यत् जप्तं यत् जप्तं मेरु लङ्घने।
असङ्ख्यातं तु यत् जप्तं तत् सर्वं निष्फलं भवेत्।।
मध्यमादि द्वयं पर्व जपकाले तु वर्जयेत्।
पर्वं मेरुं विजानीयात् तस्मात् तत् परिवर्जयेत्।।
अथवा करशाखाभिः कर्तव्यो जापकै र्जपः।।
अङ्गुल्या जपसंख्यानां एवमेव मुदाहृतम्।। (एकमेवइतिवा पाठः)

श्री गुरुभ्यो नमः

श्री दुर्गागणपति मन्त्र जपविधिः

अस्यश्री दुर्गागणपतिः महामन्त्रस्य त्र्यम्बकरुद्रो ऋषिः गायत्री छन्दः श्री दुर्गागणपतिः देवता गं बीजम् ह्रीं शक्तिः दुं कीलकम् मम अभीष्टफलसिद्ध्यर्थे - वाञ्छितार्थ प्रसाद सिध्यर्थे यन्त्र पूजाङ्गत्वेन जपे विनियोगः

करन्यासः

ओं ह्रीं गं ह्रीं दुं	अङ्गुष्ठाभ्यां नमः
दुर्गापुत्राय	तर्जनीभ्यां नमः
शक्तिहस्ताय	मध्यमाभ्यां नमः
मातृवत्सलाय	अनामिकाभ्यां नमः
महागणपतये नमः	कनिष्ठकाभयां नमः

ओं ह्रीं गं ह्रीं दुं दुर्गापुत्राय शक्तिहस्ताय मातृवत्सलाय महागणपतये नमः करतलकरपृष्ठाभ्यां नमः

अङ्गन्यासः

ओं ह्रीं गं ह्रीं दुं	हृदयाय नमः
दुर्गापुत्राय	शिरसे स्वाहा
शक्तिहस्ताय	शिखायै वषट्
मातृवत्सलाय	कवचाय हुम्
महागणपतये नमः	नेत्रेभ्यो वौषट्

ओं ह्रीं गं ह्रीं दुं दुर्गा पुत्राय शक्ति हस्ताय - मातृ वत्सलाय महागणपतये नमः - अस्त्राय फट् ।

दिग्बन्धः ओं भूर्भुवस्सुवरोम् इति दिग्बन्धः

ध्यानम्ः तप्तकाञ्चन सङ्काशश्चाष्टहस्तो महत्तनुः।
दीपताङ्कुशं शरं चाक्षं दन्तं दक्षेवहन्करैः।
वामेपाशं कार्मुकं च लतां जम्बूदधत् करैः।
रक्तांशुकः सदा भूयात् दुर्गा गणपति र्मुदे।।

हृत्पूजा ओं लं पृथि॰यात्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

जप्य मूलमत्र: ओं ह्रीं गं ह्रीं दुं दुर्गापुत्राय शक्तिहस्ताय
मातृवत्सलाय महागणपतये नमः।

उत्तर अङ्गन्यास: पूर्वोक्तवत् षड्भिः हृदयादिषु न्यस्त्वा पूर्ववत् ध्यायेत्।

पुनर्पूजा: पूर्ववत् पञ्चोपचार पूजां कृत्वा जपसङ्ख्यां पुष्पेण समर्पयेत्।।

मूलमन्त्रभेद: ओं ह्रीं ग्लां श्रीं दुं दुरितहराय दूर्वागणेशाय हुंफट्।

वेदमन्त्र: ओं श्रीं ह्रीं ग्लौं गणपतये सर्वकार्य सिद्धिं कुरुकुरु स्वाहा।

देवतागायत्री मन्त्रः

वेदे – तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदतयात्।
तन्त्रे – वक्रतुण्डाय विद्महे हस्तिवक्त्राय धीमहि तन्नो दन्ती प्रचोदयात्।

अन्य मन्त्रः माला मन्त्रः

ओं आं क्लीं सर्वशक्ति गणाधीश मां रक्ष रक्ष मम सान्निध्यं
कुरु कुरु अष्टैश्वर्यादि भूतिसमृद्धिं कुरुकुरु सर्वदुःखं
नाशय नाशय सर्वजनं मे वशमानय वशमानय मोहनोत्तम
विनायकाय हुंफट् स्वाहा।

श्री गुरुभ्यो नमः

मेधादक्षिणामूर्ति मन्त्र जपविधिः

अस्यश्री मेधादक्षिणामूर्ति महामन्त्रस्य शुकब्रह्म ऋषिः गायत्री छन्दः श्री मेधादक्षिणामूर्ति देवता मेधा बीजम् स्वाहा शक्तिः ओं कीलकम् मम श्री मेधादक्षिणामूर्ति प्रसाद सिध्यर्थे यन्त्र पूजाङ्गत्वेन जपे विनियोगः

करन्यासः		अङ्गन्यासः	
ओं	अङ्गुष्ठाभ्यां नमः	ओं	हृदयाय नमः
नमः	तर्जनीभ्यां नमः	नमः	शिरसे स्वाहा
भगवते	मध्यमाभ्यां नमः	भगवते	शिखायै वषट्द
क्षिणामूर्तये	अनामिकाभ्यां नमः	दक्षिणामूर्तये	कवचाय हुम्म
ह्यं मेधांप्रज्ञां	कनिष्ठकाभयां नमः	मह्यं मेधांप्रज्ञां	नेत्रेभ्यो वौषद्ग
यच्छ स्वाहा	करतलकरपृष्ठाभ्यां नमः	प्रयच्छ स्वाहा	अस्त्राय फट्

दिग्बन्धः ओं भूर्भुवस्सुवरों

ध्यानम् : भस्मव्यापाण्डुराङ्गः शशिशकलधरो ज्ञानमुद्राक्षमाला
वीणापुस्तैर्विराजत् करकमलधरो योगपट्टाभिरामः।
व्याख्यापीठे निषण्णो मुनिवरनिकरैः सेव्यमानः प्रसन्नः
सव्यालः कृत्तिवासाः सतत मवतु नो दक्षिणामूर्तिरीशः।।

हृत्पूजा ओं लं पृथि०या त्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

मूलमत्रः
ओं नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छस्वाहा।

उत्तर अङ्गन्यासः पूर्वोक्तवत् षड्भिः हृदयादिषु न्यस्त्वा पूर्ववत् ध्यायेत्।

पुनर्पूजा पूर्ववत् पञ्चोपचार पूजां कृत्वा जपसङ्ख्यां पुष्पेण समर्पयेत्।।

बीजमन्त्र: हौं शिवाय नम:

षडङ्ग बीजानि हां हीं हूं हैं हौं हः

मूलमन्त्रभेद: ओं नमो भगवन् दक्षिणामूर्ते मेधांप्रयच्छस्वाहा।

वेदमन्त्र : ईशानस्सर्वविद्यानामीश्वर:कैलासशिखरेरम्येशंकरस्य

देवतागायत्री मन्त्रः

विद्येश्वराय विद्महे मुद्राहस्ताय धीमहि तन्न: शिव: प्रचोदयात्।
भस्मायुधाय विद्महे दक्षिणेशाय धीमहितन्नोरुद्र: प्रचोदयात्।

अपस्मारनिवर्तक दक्षिणामूर्ति मन्त्र:

ओं त्रिनेत्राय त्रिकालज्ञानाय - सर्वशत्रुघ्नाय - सर्वापस्मार

विदारणाय - दारय दारय - मारय मारय – भस्मीकुरु भस्मीकुरु - एह्येहि हुंफट् ।
(अपस्मारनिवर्तक दक्षिणामूर्ति श्रीपादुकां पूजयामि तर्पयामि नम:)

श्री गुरुभ्यो नमः

गुरुतारक पञ्चाक्षर मन्त्रजप विधिः

अस्यश्री गुरुतारकपञ्चाक्षरी महामन्त्रस्य भगवान्सदाशिव ऋषिः विराट् छन्दः श्री गुरुपरमात्मा देवता हं बीजम् सः शक्तिः सोहं कीलकम् मम ओं श्री गुरुपरमात्मप्रसाद सिध्यर्थे यन्त्र पूजाङ्गत्वेन जपे विनियोगः

करन्यासः		अङ्गन्यासः	
ओं हं सां	अङ्गुष्ठाभ्यां नमः	ओं हं सां	हृदयाय नमः
ओं हं सीं	तर्जनीभ्यां नमः	ओं हं सीं	शिरसे स्वाहा
ओं हं सूं	मध्यमाभ्यां नमः	ओं हं सूं	शिखायै वषट्द
ओं हं सैं	अनामिकाभ्यां नमः	ओं हं सैं	कवचाय हुम्म
ओं हं सौं	कनिष्ठकाभयां नमः	ओं हं सौं	नेत्रेभ्यो वौषद्व
ओं हं सः	करतलकरपृष्ठाभ्यां नमः	ओं हं सः	अस्त्राय फट्

दिग्बन्धः भूर्भुवस्सुवरोम् इति दिग्बन्धः

ध्यानम् : उर्ध्वाम्नाय गुरोःपदं त्रिभुवनौंकाराख्य सिंहासनं -
सिद्धाचार समस्तवेद पठितं षड्वक्रसञ्चारिणम्।
अद्वैत स्फुर दग्नि मेक ममलं पूर्णप्रभा शोभितं-
शान्तं श्रीगुरुपादुकां भज मनश्चैतन्य चन्द्रोदयम्।।

हृत्पूजा ओं लं पृथि०या त्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

जप्य मूलमत्रः ओं ओं काराय नमःशिवाय - ओं न काराय नमःशिवाय-
ओं मकाराय नमःशिवाय - ओं शिकाराय नमःशिवाय -
ओं वकाराय नमःशिवाय - ओं य काराय नमःशिवाय -
ओं नमःश्रीगुरुदेवाय - परमपुरुषाय - सर्वदेवतावशीकिराय -
सर्वारिष्ठविनाशाय - सर्वदुर्मन्त्रच्छेदनाय त्रैलोक्यं वशमानय स्वाहा।
उत्तर अङ्गन्यासः पूर्वोक्तवत् षड्भिः हृदयादिषु न्यस्त्वा पूर्ववत् ध्यायेत्।

श्री गुरुभ्यो नमः

अजपा हंसगायत्री मन्त्र जपविधिः

अस्यश्री अजपागायत्री महामन्त्रस्य परमहंस ऋषिः अव्यक्तगायत्री छन्दः श्री परमहंसो देवता हं बीजम् सः शक्तिः सोहं कीलकम् मम अजपागायत्री प्रसाद सिध्यर्थे यन्त्र पूजाङ्गत्वेन जपे विनियोगः

करन्यासः			अङ्गन्यासः
हंसहंसायविद्महे	अङ्गुष्ठाभ्यां नमः	हंसहंसायविद्महे	हृदयाय नमः
परमहंसाय धीमहि	तर्जनीभ्यां नमः	परमहंसाय धीमहि	शिरसे स्वाहा
तन्नो हंसः प्रचोदयात्	मध्यमाभ्यां नमः	तन्नो हंसः प्रचोदयात्	शिखायै वषट्द
हंसहंसायविद्महे	अनामिकाभ्यां नमः	हंसहंसायविद्महे	कवचाय हुम्म
परमहंसाय धीमहि	कनिष्ठकाभयां नमः	परमहंसाय धीमहि	नेत्रेभ्यो वौषड्र
तन्नो हंसः प्रचोदयात्	करतलकरपृष्ठाभ्यां नमः	तन्नो हंसः प्रचोदयात्	अस्त्राय फट्

दिग्बन्धः ओं भूर्भुवस्सुवरोम् इति दिग्बन्धः

ध्यानम् : अग्नीषोमगरुद्वयं प्रणवकं बिन्दुत्रिणेत्रोजज्वलं -
भास्वद् रुद्रमुखं शिवाङ्घ्रियुगळं कालाग्निभाहुद्वयम्।
अद्यद् भास्कर कोटि कोटि सदृशं हंसं जगद्व्यापकं -
नादब्रह्मयं हृदम्बुजपुटेनीडे सदा भावयेत्।।

हृत्पूजा
ओं लं पृथि०या त्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

जप्य मूलमत्रः ओं नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छस्वाहा।

उत्तर अङ्गन्यासः पूर्वोक्तवत् षड्भिः हृदयादिषु न्यस्त्वा पूर्ववत् ध्यायेत्।
पूनर्पूजा पूर्ववत् पञ्चोपचार पूजां कृत्वा जपसङ्ख्यां पुष्पेण समर्पयेत्।।

श्री गुरुभ्यो नमः

शक्तिपञ्चाक्षर मन्त्र जपविधिः

अस्य श्री शक्तिपञ्चाक्षरम् महामन्त्रस्य वामदेव ऋषिः पङ्क्तिः छन्दः श्री साम्बपरमेश्वरो देवता ह्रां बीजम् ह्रीं शक्तिः ह्रूं कीलकम् मम अभीष्टसिद्धये साम्बपरमेश्वर प्रसाद सिध्यर्थे यन्त्र पूजाहोमङ्गत्वेन जपे विनियोगः

करन्यासः		अङ्गन्यासः	
ह्रां	अङ्गुष्ठाभ्यां नमः	ह्रां	हृदयाय नमः
ह्रीं	तर्जनीभ्यां नमः	ह्रीं	शिरसे स्वाहा
ह्रूं	मध्यमाभ्यां नमः	ह्रूं	शिखायै वषट्द
ह्रैं	अनामिकाभ्यां नमः	ह्रैं	कवचाय हुम्म
ह्रौं	कनिष्ठकाभयां नमः	ह्रौं	नेत्रेभ्यो वौषड्ड
ह्रः	करतलकरपृष्ठाभ्यां नमः	ह्रः	अस्त्राय फट्

दिग्बन्धः ओं भूर्भुवस्सुवरोमिति दिग्बन्धः

ध्यानम् :

मूले कल्पद्रुमस्य धृत कनकनिभं चारुपद्मासनस्थं -
वामाङ्कारूढगौरी निबिडकुचभरा भोग गाडोपगूडम्।
सर्वा लङ्कारकान्तं वर परशु मृगाभीतिहस्तं त्रिनेत्रं -
वन्दे बालेन्दुमौळीं गजवदन गुहाश्लिष्ट पार्श्व महेशम्।

हृत्पूजा ओं लं पृथि०यात्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

जप्य मूलमत्रः ओं ह्रीं ह्रौं नमशिवाय।

उत्तर अङ्गन्यासः पूर्वोक्तवत् षड्भिः हृदयादिषु न्यस्त्वा पूर्ववत् ध्यायेत्।

श्री गुरुभ्यो नमः

भुवनेश्वरीमन्त्र जपविधिः

अस्य श्री भुवनेश्वरी महामन्त्रस्य – शक्ति ऋक्षिः - गायत्री छन्दः - भुवनेश्वरी देवता - ह्रां बीजं – ह्रीं शक्तिः- ह्रूं कीलकम् – भुवनेश्वरी प्रसादसिध्यर्थे जपे विनियोगः।

करन्यासः	अङ्गन्यासः
ओं ह्रां अङ्गुष्ठाभ्यां नमः	ओं ह्रां हृदयाय नमः
ओं ह्रीं तर्जनीभ्यां नमः	ओं ह्रीं शिरसे स्वाहा
ओं ह्रूं मध्यमाभ्यां नमः	ओं ह्रूं शिखायै वषट्
ओं ह्रैं अनामिकाभ्यां नमः	ओं ह्रैं कवचाय हुम्
ओं ह्रौं कनिष्ठिकाभ्यां नमः	ओं ह्रौं नेत्रेभ्यो वौषट्
ओं ह्रः करतलकरपृष्ठाभ्यां नमः	ओं ह्रः अस्त्राय फट्

एवं करन्यासं अङ्गन्यासं च कृत्वा –
भूर्भुवस्सुवरोमिति दिग्बन्धः - ध्यानम् –

बाल रवि द्युति मिन्दु किरीटां –
तुङ्ग कुचां नय नत्रय युक्ताम्।
स्मेर मुखीं वर दाङ्कुश पाशा –
ऽभीति करां प्रभजे भुवनेशीम्।।

इतिध्यात्वा-
स्वहृदि लमित्यादिभिः -
पञ्चोपचारपूजां कृत्वा- मूलमन्त्रं प्रजपेत्।

मूलमन्त्रः
"ओं श्रीं ह्रीं श्रीं" ततःअङ्गन्यासंकृत्वा भूर्भुवस्सुवरोमिति दिग्विमोकं कृत्वा - पूर्ववतः।

स्वरूपध्यानं कृत्वा – पुनः पूर्ववत् पञ्चोपचारपूजां कृत्वा – देव्यै जपं समर्पयेत्।।

प्रत्यङ्गिरा एकाक्षरी जपविधिः

अस्य – श्री रौद्रीप्रत्यङ्गिराम्बायाः एकाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः - अनुष्टुप् छन्दः - देवीप्रत्यङ्गिरा देवता- ह्रां बीजं – ह्रीं शक्तिः- ह्रूं कीलकम् –अखिलावाप्तये जपे विनियोगः। ध्यानम् – आशाम्बरा तेजेसेरिता। लमित्यादि पञ्चोपचारपूजा।

मूलमन्त्र : = ओं ह्रीं ह्रां ह्रीं ओं।। ध्यानं – पुनःपूजा – जपसमर्पणम्।।

अथर्वणभद्रकाळी मन्त्र जपविधिः

(विंशत्यक्षरमन्त्रः) (प्रपञ्चसारे 20 वर्णाः)

अस्य श्री अथर्वणभद्रकाळी मन्त्रस्य - प्रत्यङ्गिरसः ऋषिः - अनुष्टुप् छन्दः - अथर्वण भद्रकाळी देवता – क्षं बीजम् - हुं शक्तिः - फट् कीलकम् – मम सर्वभूत (सर्वदुरित) विनाशार्थे विनियोगः - क्षां – क्षीं – क्षूं – क्षैं – क्षौं – क्षः - इति हृदयादि षडङ्गन्यासः

करन्यासः	अङ्गन्यासः
क्षां अङ्गुष्ठाभ्यां नमः	क्षां हृदयाय नमः
क्षीं तर्जनीभ्यां नमः	क्षीं शिरसे स्वाहा
क्षूं मध्यमाभ्यां नमः	क्षूं शिखायै वषट्
क्षैं अनामिकाभ्यां नमः	क्षैं कवचाय हुम्
क्षौं कनिष्ठिकाभ्यां नमः	क्षौं नेत्रेभ्यो वौषट्
क्षः करतल करपृष्ठाभ्यां नमः	क्षः अस्त्राय फट्

इति अङ्गानि विन्यस्य – भूर्भुवस्सुवरोम् इति दिग्बन्धः - ध्यानम्

ध्यायेत् समस्त शत्रुघ्नीं सर्वसौख्य दयालयाम्।
काळीं कङ्कालवदनां कालजीमूत सन्निभाम्।
भीमदंष्ट्रां ज्वलन्नेत्रीं भूयोज्वालाशिखो ज्वलाम्।
अष्टनाग कृताकल्पा मष्टदिक्पूर्ण विग्रहाम्।
सहस्र भुजदण्डोद्यत् सहस्रायुध शोभिताम्।
बिभ्रतीं किङ्किणीमालां आपादतल लम्बिकाम्।
समस्त शत्रु रुधिर पानोन्मत्तां परां शिवाम्।
एवं ध्यात्वा महाकृत्यां जपेन्मन्त्रं यथाविधि।।

स्वहृदि लमित्यादिभिः देव्याः पञ्चोपचारपूजां कृत्वा जपेत् - मूलमन्त्रः २० वर्णाः

क्षं भक्ष ज्वालाजिह्वे कराळदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हुंफट्।

इति विंशत्यक्षरी मन्त्रः। चतुष्षष्टि सहस्र संख्यां (६४०००) जपं कृत्वा – तद्दशांशं तर्पणं, तद्दशांश माज्यहोमः। पश्चात् प्रयोगविधिः।

प्रत्यङ्गिरामन्त्र जपविधिः
(द्वाविंशति अक्षरात्मकः 22 वर्णाः)

अस्य श्री प्रत्यङ्गिरा महामन्त्रस्य - ब्रह्मा ऋषिः - अनुष्टुप् छन्दः - श्री प्रत्यङ्गिरा देवता। ओं बीजं। ह्रीं शक्तिः। क्षं कीलकम् प्रत्यङ्गिरा देवता। श्री प्रत्यङ्गिरा प्रसादसिध्यर्थे जपे विनियोगः अथवा (प्रत्यंगिरा ऋषयः - अनुष्टुप् छन्दः- अथर्वणभद्रकाली देवता क्षं बीजं – हुं शक्तिः - पट् – कीलकम् जपे विनियोगः।)

करन्यासः	अङ्गन्यासः
ओं ह्रीं क्षं अङ्गुष्ठाभयां नमः	ओं ह्रीं क्षं हृदयाय नमः
ओं भक्षज्वालाजिह्वे तर्जनीभ्यां नमः	ओं भक्षज्वालजिह्वे शिरसे स्वाहा
ओं कराळदंष्ट्रे मध्यमाभ्यां नमः	ओं कराळदंष्ट्रे शिखायै वषट्
ओं प्रत्यङ्गिरे अनामिकाभ्यां नमः	ओं प्रत्यङ्गिरे कवचा हुम्
ओं क्षं ह्रीं कनिष्ठिकाभ्यां नमः	ओं क्षं ह्रीं नेत्रत्रयाय वौषट्
ओं हुं फट् करतलकरपृष्ठाभ्यां नमः	ओं हुं फट् अस्त्राय फट्

ओं भूर्भुवस्सुवरों इति दिग्बन्धः - ध्यानम्

सिह्मीं सिह्म मुखीं सखीं भगवतः श्री भैरवोल्लसत्
शूल स्थूल कपाल पाश डमरू व्यघ्राग्र हस्ताम्बुजाम्।
दंष्ट्रा कोटि विशङ्कटास्य कुहरां आरक्त नेत्र त्रयां
बालेन्दु ज्वल मौलिकां भगवतीं प्रत्यङ्गिरां भावये ।।

स्वहृदये - लमित्यादिभिः पञ्चोपचारैः मानसिकपूजां विधाय - जपेत्। मूलम् - ओं ह्रीं क्षं भक्ष ज्वालाजिह्वे करालदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हुं फट्।

प्रत्यङ्गिरा मूलमन्त्र उद्धारविधि:
(षड्विंशतिवर्णात्मिका 26 वर्णा:)

प्रणवं वाग्भवं माया लक्ष्मी: प्रत्यङ्गिरे तिच ।
मम रक्ष द्वयं देवि मम शत्रून् पदं मयि ।।
भक्ष द्वयं प्रणवं च स्वाहान्तो मन्त्र उत्तम:।
एषा विद्या मयाख्याता परमानन्द दायिनी।। (रुद्रयामळतन्त्रे प्रत्यङ्गिरापटले)

प्रत्यङ्गिरामूलमन्त्र जपविधि: (रुद्रयामळोक्त:)

ओं-अस्य श्री प्रत्यङ्गिरा महामन्त्रस्य महाभैरव ऋषि: - अनुष्टुप् छन्द: - श्री प्रत्यङ्गिरा देवता – ह्रीं बीजं – स्वाहा – कीलकं - ओं शक्ति: - प्रत्यङ्गिरा प्रसादसिद्ध्यर्थे – भोगापवर्गसिद्ध्यर्थे – (पूजाङ्गत्वेन उत होमाङ्गत्वेन) अभीष्टसिद्ध्यर्थे- जपे विनियोग:।।

ह्रामित्यादिभि: कराङ्गान्यासान् विधाय।।

करन्यास:		षडङ्गन्यास:	
ओं ह्रां	अङ्गुष्ठाभ्यां नम:	ओं ह्रां	हृदयाय नम:
ओं ह्रीं	तर्जनीभ्यां नम:	ओं ह्रीं	शिरसे स्वाहा
ओं ह्रूं	मध्यमाभ्यां नम:	ओं ह्रूं	शिखायै वषट्
ओं ह्रैं	अनामिकाभ्यां नम:	ओं ह्रैं	कवचाय हुम्
ओं ह्रौं	कनिष्ठिकाभ्यां नम:	ओं ह्रौं	नेत्रत्रयाय वौषट्
ओं ह्र:	करतल करपृष्ठाभ्यां नम:	ओं ह्र:	अस्त्राय फट्

ओं भूर्भुवस्सुवरोम् इति दिग्बन्ध: - देवीध्यानम्

आशाम्बरा मुक्तकचा घनच्छवि:
ध्येया सचर्मासि कराऽहि भूषा।
दंष्ट्रोग्र वक्त्रा ग्रसिता ऽहिता न्वया
प्रत्यङ्गिरा शङ्कर तेजसे रिता।।

स्वहृदि देव्यै लमित्यादि पञ्चभूतबीजैः पञ्चोपचारैः मानसपूजां परिसमाप्य - एकाग्रमानसः प्रत्यङ्गिरामूलविद्यां प्रजपेत्।।

प्रत्यङ्गिरामूलविद्या (26 वर्णात्मिका-भैरवोक्ता)

"ओं ऐं ह्रीं श्रीं प्रत्यङ्गिरे मम रक्ष रक्ष मम शत्रूणां भक्ष भक्ष ओं स्वाहा" - इति अष्टोत्तरशतवारं जप्त्वा – जपान्ते पुनः हृदयादि षडङ्गन्यासं कृत्वा - स्वहृदि देवीं ध्यात्वा - संपूज्य – जपं देव्यै समर्पयेत्।

या देवी लोकमातेति महामाहेश्वरी शिवा ।
प्रत्यङ्गिरेति विख्याता षड्विंशति सुवर्णिका
सृजते सकलं विश्वं बिभर्ति परमाम्बिका।
अन्ते सहायकर्त्री च संहरिष्यति तामसी
गुणत्रयमयी विद्या महादारिद्य वारिणी। (रूद्रयामलतन्त्रे)

प्रत्यङ्गिराविद्या जपफलम् -

भोगदा सुखदा देवि राज्यदा धनदा तथा।
सिध्दि मोक्ष प्रदा विद्या परा सायुज्य दायिनी।। (दशविद्यारहस्ये)

अथर्वणभद्रकाली प्रत्यङ्गिराविद्या जपविधिः (प्रकारान्तरन्यासेन)

अस्य श्री अथर्वण भद्रकाळी महामन्त्रस्य - प्रत्यङ्गिरा ऋषयः -अथर्वण भद्रकाळी देवता - क्षं बीजं - हुं शक्तिः - फड्कीलकं - मम सर्वदुरित निवृत्तयर्थे -अभीष्टसिध्यर्थे - जपे विनियोगः -

ओं क्षं भक्ष	अङ्गुष्ठाभ्यां नमः	हृदयाय नमः	इतिहृदये
ज्वालाजिह्वे	तर्जनीभ्यां नमः	शिरसेस्वाहा	इति शिरसि
कराळदंष्ट्रे	मध्यमाभ्यां नमः	शिखायै वषट्	शिखायाम्
प्रत्यङ्गिरे	अनामिकाभ्यां नमः	कवचाय हुं	सर्वाङ्गे
क्षं ह्रीं	कनिष्ठिकाभ्यां नमः	नेत्रेभ्यो वैषट्	नेत्रयोः
हुं फट्	करतल करपृष्ठाभ्यां नमः	अस्त्रायफट्	हस्तयोः।

एवं मूलमन्त्रेण कृतकराङ्गन्यासः - भूर्भुवस्सुवरोम् - इति दशदिक्षु चोटिकया दिग्बन्धनं कृत्वा - भगवतीं ध्यायेत्। ध्यानम् -

ऊर्ध्वकेशीं च सिंहस्थां चन्द्रांकित शिरोरुहाम्।
कपाल शूल डमरू नागपाश धरां शुभाम्।।

प्रत्यङ्गिरां भजे नित्यं सर्वशत्रु निवाशिनीम्।। एवं ध्यात्वा – यजेत् - स्वहृदि -

ओं लं पृथिव्यात्मिकायै - प्रत्यङ्गिरायै - गन्धं - समर्पयामि।

ओं हं आकाशात्मिकायै - प्रत्यङ्गिरायै - पुष्पं - समर्पयामि।

ओं यं वाय्वात्मिकायै - प्रत्यङ्गिरायै - धूपं - समर्पयामि ।

ओं रं अग्न्यात्मिकायै - प्रत्यङ्गिरायै - दीपं - समर्पयामि।

ओं वं अमृतात्मिकायै - प्रत्यङ्गिरायै - अमृतं - निवेदयामि।

ओं सं सर्वात्मिकायै - प्रत्यङ्गिरायै – सर्वोपचारान् समर्पयामि। एवं स्वहृदये भगवत्याः मनसा - पञ्चोपचारपूजां समाप्य - ततो - मूलविद्यां - जपेत्।

मूलविद्या (20 वर्णाः)

"क्षं भक्ष ज्वालाजिह्वे कराळदंष्ट्रे प्रत्यङ्गिरे क्षं ह्रीं हुं फट्"

(मूलमन्त्रस्य हुंफण्णमः इतिजपे - पूजायां च - हुंफट् स्वाहा इतिहोमे च विनियोगः कार्यः)

जपान्ते पूर्ववत् हृदयादिन्यासः-ध्यानं - पूजा-जपसमर्पणं - प्रार्थनाश्च- क्रमेण कुर्यात्।

कालीसूक्त मन्त्राः (रिपुमारकपञ्चमन्त्राः) (ऋग्वेदे अथर्वणवेदेच)

1. ओं ह्रीं - यां कल्पयन्ति नो अरयःक्रूरां कृत्यां वधूमिव -
तां ब्रह्मणाऽपनिर्नुद्मः प्रत्यक् कर्तार मृच्छतु - ह्रीं ओं स्वाहा।।

2. ओं ह्रीं - ये नो रयिं दुश्चरितासो अग्ने जह्रुर्मर्तासो अनृतं वदन्तः -
तेषां वपूंष्यर्चिषा जातवेदः शुष्कं नवृक्षमभि सं दहस्व – ह्रीं ओं स्वाहा।

3. ओं ह्रीं - कृष्णवर्णे बृहद्रूपे बृहत्कर्णे महद्भये
देवि देवि महादेवि मम शत्रून् विनाशय - ह्रीं ओं स्वाहा।

4. ओं ह्रीं – खट् फट् जहि महाकृत्ये विधूमाग्नि समप्रभे -
जहिशत्रूंस्त्रिशूलेन क्रुध्यस्व पिब शोणितम् - ह्रीं ओं स्वाहा ।

5. ओं ह्रीं ये द्रुह्युऋर्जवे मह्यमग्ने कदाधियो दुर्मदा अश्मनासः -
आ बध्यैतान् शोचिषा विध्य तन्तून् वैवस्वतस्य सदनं नयस्व - ह्रीं ओं स्वाहा।

प्रत्यंगिरा वेद मन्त्रोद्धार विधिः (३७ अक्षरः) (शत्रुकृत्यनाशकः)

अथ प्रत्यङ्गिरां वक्ष्ये परकृत्य विमर्दिनीम्।
दीर्घेन्दुयुग्म रुब्द्रह्मा मांस लोहित संस्थिताम् । (मरुत् = यां, ओं ह्रीं यां कल्प)
यन्ति नो रयः उच्चार्य क्रूरां कृत्यां समुच्चरेत्। (ब्रह्मा = कः)
बधूमिव पदं पश्चात् तां ब्रह्मांते सदीर्घा णः (लोहितः = पः)
अपनिर्णुद्म इत्यन्ते प्रत्यक्कर्त्तार मृच्छतु।।
तार माया पुटो मन्त्रः स्यात्सप्त त्रिंश दक्षरः।।

प्रत्यङ्गिराऋच्चः जपविधिः पदविभागः

ब्रह्मा ऽनुष्टुभ्मुनिश्छन्दो देवी प्रत्यङ्गिरे रिता।
बीज शक्ति स्तार माये कृत्वा नाशे नियोजनम्।
अष्टभि स्तोयनिधिभिः युगै र्वेदैश्च पञ्चभिः।
वसुभि र्मन्त्रजै र्वर्णैः दीर्घयुक्पार्वती परैः।।

प्रणवाद्यै ष्षडङ्गानि कल्पयेत् जाति संयुतैः।
शिरो भ्रूमध्य वक्रेषु कण्ठे बाहुद्वये हृदि।
नाभावूर्वो र्जानुनोश्च पदानि पदयो र्न्यसेत्।
चतुर्दश क्रमान् मन्त्री तार माया पुटान्यपि।
ध्याय न्नेवं जपेन् मन्त्रं अयुतं तद्दशाम्शतः।
अपामार्गोथ मध्वाज्य हविभि र्जुहुयात्ततः।
अन्नपूर्णासने चार्चे दङ्ग लोकेश्वराऽयुधः।
एवं सिद्धमनु र्मन्त्री प्रयोगेषु शतं जपेत्।।

प्रत्यङ्गिरामन्त्रप्रयोगः (शत्रुकृत्यविनाशने)

अस्य - श्री प्रत्यङ्गिरामन्त्रस्य-ब्रह्माऋषिः अनुष्टुप्छन्दः - देवी प्रत्यङ्गिरा देवता – ओं वीजम् – ह्रीं शक्तिः मम (अखिलावाप्तये) शत्रुकृत्यनाशार्थे – जपे(होमे) विनियोगः।

करन्यासक्रमः

ओं ह्रीं - यां कल्पयन्ति नोरयः - अङ्गुष्ठाभ्यां नमः -
ओं ह्रीं - क्रूरां कृत्यां - तर्जनीभ्यांनमः -
ओं ह्रीं - वधूमिव - मध्यमाभ्यां नमः -
ओं ह्रीं – ह्रां ब्रह्मणा – अनामिकाभ्यां नमः -
ओं ह्रीं - अपनिर्णुद्मः - कनिष्ठिकाभ्यां नमः -
ओं ह्रीं - प्रत्यक्कर्तारमृच्छतु – करतल – करपृष्ठाभ्यां नमः। - ततो अङ्गन्यासः-

षडङ्गन्यासक्रमः

ओं ह्रीं - यां कल्पयन्ति नोरयः - हृदयाय नमः
ओं ह्रीं - क्रूरां कृत्यां – शिरसे स्वाहा
ओं ह्रीं - वधूमिव – शिखयैवषट्
ओं ह्रीं – ह्रां ब्रह्मणा – कवचाय हुम्
ओं ह्रीं - अपनिर्णुद्मः - नेत्रत्रयायवौषट्
ओं ह्रीं – प्रत्यक्कर्तार - मृच्छतु – अस्त्राय फट्

भूर्भुवस्सुवरोम् - इति – दशदिक्षु – दिग्बन्धनं - कृत्वा - ततः स्वदेहे – मन्त्रपदानि न्यसेत्। तद्यथा -

स्वदेहे मन्त्रपदन्यासक्रमः (चतुर्दशपदानि) 14 पदन्यासः)

ओं ह्रीं - यां - ह्रीं ओं नमः - शिरसि
ओं ह्रीं - कल्पयन्ति - ह्रीं ओं नमः -भ्रूमध्ये
ओं ह्रीं - नो - ह्रीं ओं नमः - वक्त्रे
ओं ह्रीं - अरयः - ह्रीं ओं नमः - कण्ठे
ओं ह्रीं - क्रूरां - ह्रीं ओं नमः - वामबाहौ
ओं ह्रीं - कृत्यां - ह्रीं ओं नमः - दक्षिणबाहौ
ओं ह्रीं - वधूं - ह्रीं ओं नमः - हृदि
ओं ह्रीं - इव - ह्रीं ओं नमः - नाभौ
ओं ह्रीं - ह्रां - ह्रीं ओं नमः - वामोरौ
ओं ह्रीं - ब्रह्मणा - ह्रीं ओं नमः - दक्षिणौरौ
ओं ह्रीं - अपनिर्णुद्मः - ह्रीं ओं नमः - वामजानुनि
ओं ह्रीं - प्रत्यक् - ह्रीं ओं नमः - दक्षजानुनि
ओं ह्रीं - कर्तारं - ह्रीं ओं नमः - वामपादे
ओं ह्रीं - ऋच्छतु - ह्रीं ओं नमः - दक्षिणपादे

मन्त्र ऋष्यादि न्यासक्रमः (मन्त्र जपविधिः)

ओं ऐं ह्रीं श्रीं - ब्रह्मऋषये नमः - शिरसि
ओं ऐं ह्रीं श्रीं - अनुष्टुप् छन्दसे नमः - मुखे
ओं ऐं ह्रीं श्रीं - देवीप्रत्यङ्गिरायै देवतायै नमः - हृदये
ओं ऐं ह्रीं श्रीं - ओंकाराय तारबीजाय नमः - गुह्ये
ओं ऐं ह्रीं श्रीं - ह्रींकारायै शक्तये नमः - पादयोः
ओं ऐं ह्रीं श्रीं - फट्काराय कीलकाय नमः - नाभौ
स्वाहायै देव्यै प्रत्यङ्गिरायै नमः - सर्वाङ्गे

प्रत्यङ्गिरा ऋग्वेदमन्त्र जपविधिः

अस्य श्री प्रत्यङ्गिरा महामन्त्रस्य- ब्रह्माऋषिः अनुष्टुप् छन्दः - देवी उग्रकृत्या अथर्वण प्रत्यङ्गिरा देवता – ओं बीजम् – ह्रीं शक्तिः - स्वाहा कीलकम्- मम शत्रुक्षयार्थे – (रिपुबाधानिवृत्यर्थे / अखिलफलावाप्तये) – जपे विनियोगः

मन्त्रपदैः करन्यासं अङ्गन्यासं च कृत्वा - भूर्भुवस्सुवरोम् इति दिग्बन्धः-ध्यानम् -

आशाम्बरा मुक्तकचा घनच्छविः -
ध्येया सचर्माऽसिकराऽहि भूषा।
दंष्ट्रोग्र वक्रा ग्रसिता ऽहितान्वया
प्रत्यङ्गिरा शङ्कर तेजसे रिता।।

ततः स्वहृदि देवीं लमित्यादि पञ्चोपचारपूजां कृत्वा - मूलमन्त्रं ऋचं जपेत्।

प्रत्यङ्गिरासूक्त मन्त्रः -

"ओं ह्रीं – यां कल्पयन्ति नोऽ(अ)रयः क्रूरां कृत्यां वधूमिव।
तां ब्रह्मणाऽ(अ)पनिर्णुद्मः प्रत्यक् कर्तार मृच्छतु - ह्रीं ओं।।"

एवं अष्टोत्तरसहस्रवारं जपित्वा - तद्दशांशेन -
आज्यैः - अपामार्ग समिद्भिः - कृसरान्नैश्च यथाविधि जुहुयात्।।

कृत्या सूक्तमन्त्रः (अन्यः ऋक्)

ओं ह्रीं - कृष्णवर्णि बृहद्रूपि बृहत्कण्ठि महद्भयि ।
देविदेवि महादेवि मम शत्रून् विनाशय।। - ह्रीं ओं

इति मन्त्रं प्रजपेत् ।।

प्रत्यङ्गिराङ्ग षोडशाक्षर मन्त्रोद्धार: (शत्रुनाशकमन्त्र: षट्देवता:)

मन्त्रं विरोधि शमकं प्रवक्ष्ये षोडशाक्षरम्।
प्रणव: केशव: सेन्दु र्वर्गाद्या: पञ्च सेन्दव:।।
वियच्चन्द्रान्वितं रान्तं सद्योजात: शशाङ्ग युक्।
माया त्रिकर्ण चन्द्राढ्यो भृगु: सर्गी सवर्म फट्।

जप क्रम:

स्वाहान्त: षोडशार्णो ऽयं मन्त्र: शत्रुविनाशन:।।
विधाताष्टि रऋषिश्छन्द: पर्वताब्ध्याग्नि वायव:।
धराकाशौ महापूर्वा: देवता: षट् परिकीर्तिता:।।
हुंबीजं पार्वती शक्ति: मायया तु षडङ्गकम्।।
एवं षड् देवता: ध्यात्वा सहस्राणि तु षोडश।।

होमविधि:

जपेन्मन्त्रं दशांशेन षड्द्रव्यै र्होम माचरेत्।। (२६७आहुतय: ६)
व्रीहय स्तण्डुला आज्यं सर्षपाश्च यवा स्तिला:।
एतै र्हुत्वा यथा भाग पीठे पूर्वादितो यजेत्।
अङ्ग दिक्पाल वज्राद्यै: एवं सिद्धो भवेन् मनु:।।

मन्त्राक्षरभावना

शत्रूपद्रव मापन्नो युञ्ज्यात् तन् नष्टये मनुम्।
अकारं पर्वताकारं धावन्तं शत्रु सम्मुखम्।
पतनोन्मुख मत्युग्रं प्राच्यां दिशि विचिन्तयेत्।
ककारं क्षुब्धकल्लोलं प्लावितारिवल भूतलम्।
समुद्र रूपिणं भीमं प्रतीच्यां दिशि संस्मरेत्।
वर्णं तदग्रिमं ज्वाला संघ व्याप्त नभ स्तलम्।
याम्ये रब्ध जगद्दाहं स्मरेत् प्रळय पावकम्।
तृतीयवर्ग प्रथमं प्रकम्पित जगत्त्रयम्।
युगान्त पवनाकारं उत्तरस्यां दिशि स्मरेत्।
तुरीय पञ्चमाद्यार्णौ पृथ्वी गगन रुपिणौ।।
शत्रुवर्गं बाधमानौ चिन्तयेत् नियतात्मवान्।
तदग्रिम त्रवर्णयुग्ं शत्रो र्निश्वास पद्धतिम्।

निरुन्धानं स्मरेन्मन्त्री विदधद्रिपुमाकुलम्।
मायादि वर्णत्रितयं शत्रो नेत्र श्रुती मुखम्।।
प्रत्येकं तु निरुन्धानं चिन्तयेत् साधकोत्तमः।।
वर्म संक्षोभितं त्वस्त्रं रिपोराधारदेशतः।
उत्थाप्य वह्निं तद्देहं प्रदहन् समनुस्मरेत्।
एवं वर्णान् स्मरन्मन्त्रं जपेन्मन्त्री सहस्रकम्।
मण्डल त्रितया दर्वाक् मारयत्येव विद्विषम्।
एवं यः कुरुते कर्म प्राणायाम जपादिभिः।
संशोधयित्वा स्वात्मानं स्वरक्षायै हरिं स्मरेत्।।
(इति श्री मन्त्रमहोद्रधौ मन्त्रप्रकाशनंनाम नवमस्तरङ्गः।)

रिपुमारक षोडशाक्षर मन्त्र जपविधिः (16वर्णाः)

अस्य - श्री (उग्रकृत्यादेव्याः) षोडशाक्षरमन्त्रस्य - ब्रह्मा ऋषिः - अनुष्टुप् छन्दः - महापर्वत - महाब्धि - महाग्नि - महावायु - महाधरा - महाकाशाः - षड्देवताः - हुं बीजम् - ह्रींशक्तिः - मम अभीष्टसिद्यर्थे - जपे विनियोगः। मायया अङ्गन्यासः कराङ्गन्यासौ कुर्यात्। (मायाबीजम् - ह्रीं) करन्यासः

करन्यासः	अङ्गन्यासः
ओं ह्रां अङ्गुष्ठाभयां नमः	ओं ह्रां हृदयाय नमः
ओं ह्रीं तर्जनीभ्यां नमः	ओं ह्रीं शिरसे स्वाहा
ओं ह्रूं मध्यमाभ्यां नमः	ओं ह्रूं शिखायै वषट्
ओं ह्रैं अनामिकाभ्यां नमः	ओं ह्रैं कवचा हुम्
ओं ह्रौं कनिष्ठिकाभ्यां नमः	ओं ह्रौं नेत्रत्रयाय वौषट्
ओं ह्रः करतलकरपृष्ठाभ्यां नमः	ओं ह्रः अस्त्राय फट्

भूर्भुवस्सुवरोम् - इति दशदिक्षु चोटिकया दिग्बन्धनं कृत्वा - देवताः ध्यायेत् -

महापर्वत ध्यानं
नाना रत्नार्चि राक्रान्तं वृक्षाम्भः स्त्रवणै र्युतम्।
व्याघ्रादि पशुभि र्व्याप्तं सानुयुक्तं गिरिं स्मरेत्।

महार्णव ध्यानम्

मत्स्य कूर्मादि बीजाढ्यं नवरत्न समन्वितम्।
घनच्छायं सकल्लोल मकूपारं विचिन्तयेत्।

महाग्नि ध्यानम्

ज्वालावती समाक्रान्त जगत् त्रितय मद्भुतम्।
पीतवर्णं महावह्निं संस्मरेत् शत्रुशान्तये।

महावायु ध्यानम्

धरासमुत्थ रेण्वौघ मलिनं रुद्ध भू दिवम्।
पवनं संस्मरेत् विश्वजीवनं प्राणरुपतः।।

महापृथ्वी ध्यानम्

नदी पर्वत वृक्षादि फलिता ग्राम संकुला।
आधारभूता जगतो ध्येया पृथ्वीह मन्त्रिणा।।

महागगन ध्यानम्

सूर्यादि ग्रह नक्षत्र कालचक्र समन्वितम्।
निर्मलं गगनं ध्यायेत् प्राणिना माश्रयप्रदम्।

स्वहृदये - लमित्यादिभिः पञ्चोपचारैः मानसिकपूजां विधाय - जपेत्।

मूल मन्त्रः - "ओं अं कं चं टं तं पं हं लों ह्रीं हुं सः हुं फट् स्वाहा "

(सिद्धये अत्र जपं कृत्वा - तद्दशांशेन - षड् द्रव्याहुतीभिः होमः कार्यः)

(अत्रमन्त्राक्षरान् यथोक्तविधिना मनसि विभावयन् प्रजपेत्।।८

प्रत्यङ्गिरास्त्र अस्त्र मन्त्र जपविधिः (100 वर्णाः)

(उत्तरकामिकागमे - प्रायश्चित्तविधिपटले शताक्षरः)

अस्य श्री प्रत्यङ्गिरास्त्र महामन्त्रस्य - भैरव ऋषिः - अनुष्टुप् छन्दः - श्री प्रत्यङ्गिरा देवता - ओं बीजं - ह्रीं शक्तिः - स्वाहा कीलकं - लोकस्य, मम च यजमानस्य च, शत्रुक्षयार्थे, पापक्षयार्थे, (यागार्थे) प्रत्यङ्गिरास्त्र देव्याः महाशान्ति होमाङ्गत्वेन (अक्षरलक्षजपे/ अक्षर अयुत संख्याक महाजपे कर्मणि) महाशान्तिहोमे विनियोगः

करन्यासः

ओं ह्रीं कृष्णवाससे – अङ्गुष्ठाभ्यां नमः
ओं सिंहवदने महावदने महाभैरवि – तर्जनीभ्यां नमः
ओं सर्वशत्रुकर्म विध्वंसिनि – मध्यमाभ्यां नमः
ओं परमन्त्रच्छेदिनि – अनामिकाभ्याम् नमः
ओं सर्वभूतदमनि – कनिष्ठिकाभ्यां नमः
ओं सर्वभूतान् बन्ध बन्ध, सर्व विघ्नान् छिन्धि छिन्धि -
सर्व व्याधीन् निकृन्त निकृन्त, सर्व दुष्टान् भक्ष भक्ष -
ज्वालाजिह्वे करळदंष्ट्रे प्रत्यङ्गिरे ह्रीं नमोस्तुते स्वाहा – करतल करपृष्ठाभ्यां नमः

अङ्गन्यासः

ओं ह्रीं कृष्णवाससे – हृदयाय नमः
ओं सिंहवदने महावदने महाभैरवि – शिरसे स्वाहा
ओं सर्वशत्रुकर्म विध्वंसिनि – शिखायै वषट्
ओं परमन्त्रच्छेदिनि – कवचाय हुम्
ओं सर्वभूतदमनि – नेत्रेभ्यो वौषट्
ओं सर्वभूतान् बन्ध बन्ध, सर्व विघ्नान् छिन्धि छिन्धि -
सर्वव्याधीन् निकृन्त निकृन्त, सर्व दुष्टान् भक्ष भक्ष -
ज्वालाजिह्वे कराळदंष्ट्रे प्रत्यङ्गिरे ह्रीं नमोस्तुते स्वाहा - अस्त्राय फट्।।

दशदिक्षु चोटिकया भूर्भुवस्सुवरों इति व्याहृत्या दिग्बन्धनं विधाय - महादेवीं भगवतीं प्रत्यङ्गिरां हृदि ध्यायेत्।।

प्रत्यङ्गिरा ध्यानम्

सिंह वक्रोग्र दंष्ट्राग्नि सप्रभोर्ध्व शिखान्विताम्।
कृष्णाजिन निभां वृत्त रक्त नेत्र त्रयान्विताम्।।
वहन्तीं सव्य हस्ताभ्यां त्रिशूलं डमरुं परम्।
वहन्तीं वाम हस्ताभ्यां मुण्ड शीर्षोऽथ पल्लवाम्।।
कृष्णाम्बर धरां सासृङ् मांसास्यां नर्तने रताम्।
मौक्तिका भरणै र्युक्तां सर्वा वयव भूषणाम्।।
अट्टहास रवोपेतां कृष्णाजिन समन्विताम्।
रोग विघ्नारि संहर्त्रीं ध्यायेत् प्रत्यङ्गिरा महम्।।

(अन्यत् ध्यानम्)

सिह्मीं सिह्ममुखीं सखीं भगवतः श्री भैरवोल्लसत् -
शूल स्थूल कपाल पाश डमरू व्यघ्राग्र हस्ताम्बुजाम्।
दंष्ट्रा कोटि विशङ्कटास्य कुहरां आरक्त नेत्र त्रयां -
बालेन्दु ज्वल मौलिकां भगवतीं प्रत्यङ्गिरां भावये ।।

स्वहृदये - देव्याः - लमित्यादि पञ्चोपचारपूजां विधाय।

ओं लं पृथि०यात्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

ततो अस्त्रविद्यां जपेत्।

प्रत्यङ्गिरास्त्र शताक्षरी विद्या (100 वर्णाः)

ओं ह्रीं कृष्णवाससे-सिंहवदने-महावदने-महाभैरवि-सर्वशत्रुकर्म विध्वंसिनि - परमन्त्रच्छेदिनि – सर्वभूतदमनि-सर्वभूतान् बन्ध बन्ध –सर्वविघ्नान् छिन्धि छिन्धि - सर्वव्याधीन् निकृन्त निकृन्त – सर्वदुष्टान् भक्ष भक्ष – ज्वालाजिह्वे – करालदंष्ट्रे - प्रत्यङ्गिरे – ह्रीं नमोस्तुते स्वाहा।।

जपसङ्ख्यान्ते - उत्तराङ्गत्वेन - हृदयादिन्यासं कृत्वा - ध्यात्वा - पञ्चोपचार पूजां कृत्वा

गुह्यातिगुह्य गोप्त्री त्वं गृहाणास्मत् कृतं जपम्।
सिध्दि र्भवतु मे देवि त्वत्प्रसादात् सुरेश्वरि।। इतिमन्त्रेण-कृतजपं-देव्यै-समर्पयेत्।।

प्रत्यङ्गिरा वेदमन्त्र जपविधिः

1. प्रत्यङ्गिरा प्रथमवर्गं प्रथमऋचः अगिरा ऋषिः - अनुष्टुप् छन्दः - उग्रकृत्या देवता – कृष्णाष्टमीमारभ्य यावत्पर्वपर्यन्तं औदुम्बरदण्डं पुरुषमात्रं धारयन्साध्यनामसंयुक्तं यां कल्पयन्तीतिमन्त्रं अष्टोत्तरशतं जपेत्। ततः शत्रोमृतिर्भवति। तद्दिवसादूर्ध्वं ब्रह्मापि रक्षितुं न समर्थोभवति।

मन्त्रः यां कल्पयन्ति नो ऽरयः क्रूरां कृत्यां वधू मिव।
तां ब्रह्मणा ऽपनिर्नुद्मः प्रत्यक् कर्तार मृच्छतु।।

2. प्रत्यङ्गिरा प्रथमवर्ग द्वितीयस्य शीर्षण्वती मित्यस्य ऋचः -अङ्गिरा ऋषिः -अनुष्टुप् छन्दः - उग्राकृत्या देवता –कृष्णप्रतिपदारभ्य चतुर्दशीपर्यन्तं विभीतकदण्डं अष्टप्रादेशमात्रं धारयन् - अष्टोत्तरशतं जपेत्। तेन शत्रुःव्याधिग्रस्तो भवति - म्रियते वा न सन्देहः।

मन्त्रः शीर्षण्वतीं कर्णवतीं विषुरूपां भयङ्करीम्।
यः प्राहिणोदिहाद्यत्वा वीतं त्वं योजयासुभिः।।

3. प्रथमवर्गस्य तृतीयस्य येनदिष्टेह वदसि इत्यस्यमन्त्रस्य वामदेवऋषिः गायत्री छन्दः प्रत्यङ्गिरासः उग्रा देवता- अर्कसमिधं कारस्करं वा भल्लातकश्लक्ष्णकं तैलेनाभ्यक्तं नित्यं अष्टोत्तरशतं नामसंयुक्तंजुहुयात्। सप्तरात्रैः शत्रुक्षयो भवति। केवलं जपमात्रात् मासान्तेज्वराभिभूतो भवति। तत्क्षणान्मृत्युर्भवति।।

मन्त्रः येन दिष्टेह वदसि प्रतिकूल मधायिनी।
तमेवेतो निवर्त्योपमास्मां ऋच्छोऽनागसः।।

4. प्रथमवर्गस्य चतुर्थस्य अभिवर्तस्व कर्तारं इत्यस्य वृद्धविष्णु ऋषिः अनुष्टुप् छन्दः कालाग्निरुद्रोदेवता – कृष्णाष्टमीमारभ्य यावत् पर्वपर्यन्तं केवल मष्टोत्तरसहस्रं जपेत्। तद्दिवसादूर्ध्वं ब्रह्मापि रक्षितुं न समर्थः। शत्रुक्षयोभवेदेव।

मन्त्रः अभिवर्तस्व कर्तारं निरस्ताऽस्माभि रोजसा।
आयु रस्य निकृन्तस्व प्रजां च पुरुषार्दिनी।।

5. प्रथमवर्गस्य पञ्चमस्य यस्त्वाकृत्ये त्यस्य मन्त्रस्य ब्रह्माऋषिः अनुष्टुप्छन्दः प्रत्यङ्गिरा देवता – शत्रुनिग्रहे विनियोगः ईश्वरालये तालपत्रेशत्र नामसंयुक्तंमन्त्रं विलिख्य अष्टोत्तरशतं जप्त्वाप्रादेशमात्रं खनित्वा शत्रुनिग्रहे निक्षिपेत्। तत्क्षणात् सर्वस्वं नष्टं भवति। तत्कुलक्षयो भवति। गोभूहिरण्यदक्षिणांदद्यात्।।

मन्त्रः यस्त्वा कृत्ये चकारेह त्वं तं गच्छ पुनर्न वे।
अरातीन् कृत्ये नाशय सर्वांश्च यातुधान्यः।।

प्रत्यङ्गिरा ऋक्समुदायस्य नवसहस्रजपः कार्यः - आज्येन दशांशेन – पुरश्चरणहोमः कार्यः - त्रिंशत्सहस्रं वा जपः कृत्वा तद्दशांशं होमयेत्।।

प्रत्यङ्गिराऋचां जपविधिः

ऋचां संख्या	ऋचां प्रारम्भः	ऋचोऋषिः	ऋचः छन्दः	देवता	विनियोगः
वर्गः1					
1-1	यां कल्पयन्तिनोऽरयः	ब्रह्मा	अनुष्टुप्	प्रत्यंगिरा	शत्रोर्मारणे
1–2	शीर्षण्वतीं कर्णवतीं	अङ्गिराः	अनुष्टुप्	उग्रा कृत्याः	शत्रुक्षये
1-3	येन दिष्टेहवदसि	वामदेवः	गायत्री	प्रत्यंगिरसः	रिपुक्षये
1-4	अभिवर्तस्व कर्तारं	वृद्धविष्णुः	अनुष्टुप्	कालाग्निरुद्रः	शत्रुनाशने
1-5	यस्त्वा कृत्ये चकारेह	ब्रह्मा	अनुष्टुप्	प्रत्यंगिरा	अरिक्षये
वर्गः2					
2-1	क्षिप्रं कृत्ये निवर्तस्व	वामदेवः	पङ्क्तिः	महादेवः	कृत्यनिवर्तने
2-2	यस्त्वा कृत्ये प्रजिघाय	अगस्त्यः	अनुष्टुप्	कृत्याः	शत्रुनिग्रहे
2-3	प्रतीचीं त्वापसेधतु	वसिष्ठः	अनुष्टुप्	रुद्राः	अरातिक्षये
2-4	यथा त्वाङ्गिरसः पूर्वे	अत्रिः	गायत्री	ब्रह्माणः	रिपुनाशने
2-5	यस्ते परूंषि सन्दधौ	अग्निः	जगती	अग्नयः	रिपुनाशने
वर्गः3					
3-1	यो नः कृत्ये रणस्थो वा	भृगुवर्धः	अनुष्टुप्	कृत्याः	रिपुनाशने
3-2	भवा शर्वा देवहेळिमस्यतं	अगस्त्यः	त्रिष्टुप्	कृत्याः	रिपुनाशने
3-3	यो नो शिवासः पन्थानः	महादेवः	उष्णिक्	गायत्र्यः	रिपुनाशने
3-4	यो नः कश्चिद् द्रुहारातिः	अग्निः	अनुष्टुप्	इन्द्रः	रिपुनाशने
3-5	ये नासिकृत्ये प्रहिता दूत्ये	गौतमः	अनुष्टुप्	कृत्याः	शत्रुक्षये

प्रत्यङ्गिरायाः श्रौतऋचां जपविधिः

ऋचां संख्या	ऋचां प्रारम्भः	ऋचोऋषिः	ऋचः छन्दः	देवता	विनियोगः
वर्गः4					
4-1	यद्युपैपिद्विपद्यस्मान्यदि	अङ्गिराः	गायत्री	कालाग्नयः	शत्रुक्षये
4-2	यो नश्शपादशपतो यश्च	ज्वरः	अनुष्टुप्	मृत्यवः	शत्रुक्षये
4-3	यं द्विष्मो यश्च द्वेष्ट्यघायु	कपिलः	अनुष्टुप्	ब्रह्माणः	शत्रुक्षये
4-4	यश्च सापत्नः शपथोयश्च	ब्रह्मा	अनुष्टुप्	रैवाः	शत्रुक्षये
4-5	सबन्धुश्चासबन्धुश्च यो	काश्यपः	अनुष्टुप्	बृहस्पतयः	शत्रुक्षये
वर्गः5					
5-1	अभि प्रेहि सहस्राक्ष युक्ताशु	आपान्तृत्युः	बृहती	कालाग्निरुद्रः	शत्रुक्षये
5-2	परिणो घृन्धि शापथं दहन्	सत्यतपः	अनुष्टुप्	कृत्याः	
5-3	शत्रून्मे प्रोथशपथान्	अङ्गिराः	त्रिष्टुप्	कृत्याः	
5-4	असपत्नं पुरस्तान्नः शिवं	गालवः	गायत्री	हयग्रीवविष्णुः	
5-5	परे हि कृत्ये मा तिष्ठ	ब्रह्मा	अनुष्टुप्	ब्रह्माणः	
वर्गः6					
6-1	अभ्यक्ताक्तास्स्वलंकृतास्	शर्वः	अनुष्टुप्	शर्वाः	
6-2	यथा हन्ति पूर्वासिनं तथैवे	वरुणः	त्रिष्टुप्	सूर्यः	
6-3	उत्तिष्ठैव परे भीता अज्ञाते	इन्दुः	गायत्री	अश्विनौ	
6-4	स्वायसास्सन्ति नोसधो	गालवः	त्रिष्टुप्	मित्रः	
6-5	मास्योच्छिषो द्विपदं मोत	विष्णुः	अनुष्टुप्	विष्णवः	

ऋचां संख्या	ऋचां प्रारम्भः	ऋचोऋषिः	ऋचः छन्दः	देवता	विनियोगः
वर्गः7					
7-1	शत्रूयता प्रहितासिमां	ब्रह्मा	अनुष्टुप्	रुद्राः	शत्रुक्षये
7-2	एवं त्वं निकृतास्माभिः	परब्रह्मा	अनुष्टुप्	वसवः	रिपुक्षये
7-3	यथा विद्युत् हतोवृक्ष आमूला	परब्रह्मा	पङ्क्तिः	वसवः	अरिक्षये
7-4	यथा प्रतिशुका भूत्वा तमेव	अग्निः	पङ्क्तिः	रुद्रः	शत्रुघाते
7-5	यो नस्वो अरणो यश्च	शातातपः	त्रिष्टुप्	परमात्मा	रिपुध्वंसे
7-6	अव ब्रह्म द्विषो जहि	परब्रह्मा	एकपदा	ब्रह्मा	रिपुक्षये
वर्गः8					
8-1	कुबेरं तु मुखं रौद्रंनन्दिमा	कुत्साग्निः	अनुष्टुप्	कालमृत्युः	रिपुक्षये
8-2	यो मे करोति प्रद्वारे योगृहे	आङ्गीरस काश्यपौब	पङ्क्तिः	रुद्रः	रिपुक्षये
8-3	यो नो दमे दारु धर्मेशयानं	ब्रह्मा	अनुष्टुप्	उग्रा	रिपुक्षये
8-4	यो नो रयिं दुश्चरितासो अग्ने	आङ्गीरसाः	अनुष्टुप्	कृत्या प्रतिकर्त्री	रिपुक्षये
8-5	प्रतिसा प्रतिधाव कुमार्येव	अङ्गिरसः	अनुष्टुप्	प्रत्यंगिरा	रिपुक्षये
8-6	कृष्णवर्णि बृहद्रूपि बृहत्कष्ठि	ब्रह्मा	अनुष्टुप्	प्रत्यंगिरा	रिपुक्षये
वर्गः9					
9-1	खट् फट् जहि महाकृत्ये	ब्रह्मा	अनुष्टुप्	प्रत्यंगिरा	रिपुक्षये
9-2	गृध्रकर्णि विरूपाक्षि	प्रत्यंगिराः	अनुष्टुप् लम्बस्तानि	उग्राकाली	रिपुक्षये

ऋचां संख्या	ऋचां प्रारम्भः	ऋचोऋषिः	ऋचः छन्दः	देवता	विनियोगः
9-3	अग्न्यास्ये घोर रूपे विषरूपे	ब्रह्मा	अनुष्टुप्	उग्रा	शत्रुक्षयः
9-4	त्वमिन्द्रो यमो वरुणः त्वमा	अङ्गिराः	अनुष्टुप्	कृत्या	रिपुक्षये
9-5	आवर्तध्वं निवर्तध्वं ऋतवः	ब्रह्मा	अनुष्टुप्	कृत्या	अरिक्षये
9-6	त्वमिन्द्रं यमं वरुणं सोम	अङ्गिराः	अनुष्टुप्	धात्री	रिपुक्षये
9-7	ये द्रुह्यान्न्र जवेमह्यमग्ने	प्रत्यङ्गिराः	अनुष्टुप्	प्रत्यङ्गिरा	रिपुक्षये
1.	परिवार देव्याः जप्य मन्त्रः जातवेदसे सुनवाम सोम	भगवान् दूर्वासाः	त्रिष्टुप्	जातवेदः	सर्वारिष्ट विनाशार्थे
2.	तामग्निवर्णां तपसा ज्वलन्तीं	भगवान् दूर्वासाः	त्रिष्टुप्	जातवेदः	सर्वारिष्ट विनाशार्थे
3.	अग्ने त्वं पा रया नव्यो	भगवान् दूर्वासाः	त्रिष्टुप्	जातवेदः	सर्वारिष्ट विनाशार्थे
4.	विश्वानि नो दुर्गहा जातवेद	भगवान् दूर्वासाः	त्रिष्टुप्	जातवेदः	सर्वारिष्ट विनाशार्थे
5.	पृतना जितं सहमान मुग्रम्	भगवान् दूर्वासाः	त्रिष्टुप्	जातवेदः	सर्वारिष्ट विनाशार्थे

प्रत्यङ्गिरा ऋच: जपविधि:

अस्य श्री प्रत्यङ्गिरा सूक्तस्य प्रथमवर्गस्य प्रथम ऋच्:-यां कल्पयन्तीत्यस्य - ब्रह्मा ऋषि:-अनुष्टुप्छन्द:-प्रत्यङ्गिरा देवता - (अथवा-अंगिरा ऋषि:-उग्राकृत्या देवता)

पञ्चाङ्गन्यास:

यां कल्पयन्ति नोऽरय:	-	हृदयाय नम:
क्रूरां कृत्यां	-	शिरसे स्वाहा
वधू मिव	-	शिखायै वषट्
तां ब्रह्मणाऽपनिर्नुद्म:	-	कवचाय हुम्
प्रत्यक्कर्तारमृच्छतु	-	अस्त्राय फट्

मन्त्रपदन्यास:

1. याम् नम: - भ्रूमध्ये
2. कल्पयन्ति नम: - वामनेत्रे
3. न: नम: - दक्षिणनेत्रे
4. अरय: नम: - गणे
5. क्रूरां नम: - वामबाहौ
6. कृत्यां नम: - दक्षिणबाहौ
7. वधूं नम: - हृदये
8. इव नम: - नाभौ
9. तां नम: - वामपार्श्वे
10. ब्रह्मणा नम: - दक्षिणपार्श्वे
11. अपनिर्नुद्म: नम: - वाम कट्याम्
12. प्रत्यक् नम: - दक्षिण कट्याम्क
13. कर्तारं नम: - वामपादे
14. ऋच्छतु नम: - दक्षिणपादे।

इति पदानि न्यस्त्वा भूर्भुवस्सुवरोम् इति दिग्बन्ध: - ध्यानम् –

खड्ग चर्म धरा कृष्णा मुक्तकेशी दिगम्बरा।
सदंष्ट्रा सर्वभूषाढ्या ध्येया सर्वारि भक्षणा।।

मन्त्रऋक् – ओं यां कल्पयन्ति नो ऽरय: क्रूरां कृत्यां वधू मिव।
तां ब्रह्मणा ऽपनिर्नुद्म: प्रत्यक् कर्तार मृच्छतु।।

कृष्णाष्टमीमारभ्य यावत्पर्वपर्यन्तं औदुम्बरदण्डं पुरुषमात्रं धारयन्

शत्रुनामसंयुक्तं अष्टोत्तरशतं जपेत्। तत: शत्रो: मृति: भवति। तद्दिवसात् ऊर्ध्वं शत्रुं ब्राह्मापि रक्षितुं न समर्थ:।

मालामन्त्रस्य उद्धार विधिः
(प्रत्यङ्गिरा माल मन्त्रस्य - सिद्धिप्रकारविधिः)

तारो माया नमः कृष्ण वाससे शतवर्णकाः।
सहस्र हिंसिनि पदं सहस्र वदने पुनः।
महा बले पदं पश्चा दुच्चरे दपराजिते।
प्रत्यङ्गिरे परं सैन्य परकर्म सदृग्जलम्।
ध्वंसिनि पर मन्त्रो त्सादिनि सर्व पदं ततः।
भूतान्ते दमनि प्रान्ते सर्वदेवान् समुच्चरेत्।
बन्ध युग्मं सर्वविद्या श्छिंधि युक् क्षोभय द्वयम्।
परयन्त्राणि संकीर्त्य स्फोटय द्वितयं ज्वलत्।
ज्वालाज्ह्वे करालान्ते वदने प्रत्यमुच्चरेत्।
गिरे माया नमोन्तोऽयं शरसूर्याक्षरो मनुः।। (125 अक्षराः)

जपविधिः

ऋष्यादिकं पूर्व मुक्तं मायया स्यात् षडङ्गकम्।
ध्यायेत् प्रत्यङ्गिरां देवीं सर्वशत्रु विनाशिनीम्।

- ध्यानम् -

सिंहारुढा ऽतिकृष्णं त्रिभुवन भयकृत् रूप मुग्रं वहन्ती -
ज्वालावक्रा वसाना नववसन युगं नीलमण्याभ कान्तिः।
शूलं खड्गं वहन्ती निजकर युगले भक्त रक्षैक दक्षा -
सेयं प्रत्यङ्गिरा सं क्षपयतु रिपुभि र्निर्मितं वो ऽभिचारम्।।

अयुतं प्रजपेन् मन्त्रं सहस्रं तिल राजिकाः।
हुत्वा सिद्धमनुं मन्त्र प्रयोगेषु शतं जपेत्।।
ग्रह भूतादिका विष्टं सिंचेन् मन्त्रं जपन् जलैः।
विनाशयेत् परकृतं यन्त्र मन्त्रादि कर्मणाम्।

आशाम्बरा मुक्तकचा घनच्छविः।
ध्येया स चर्मासि कराऽहिभूषणा।
दंष्ट्रोग्रवक्त्रा ग्रसिताऽहितान्वया
प्रत्यङ्गिरा शङ्कर तेजसे रिता।।

स्वहृदि देव्यै लमित्यादि पञ्चभूतबीजैः पञ्चोपचारैः मानसपूजां परिसमाप्य - एकाग्रमानसः प्रत्यङ्गिरामूलविद्यां प्रजपेत्।। (125 वर्णात्मकः)

ओं ह्रीं नमः कृष्णवाससे – शतसहस्त्र हिंसिनि – सहस्त्रवदने – महाबले - अपराजिते – प्रत्यङ्गिरे – परसैन्य परकर्म विध्वंसिनि – परमन्त्रोत्सादिनि - सर्वभूतदमनि – सर्वदेवान् बन्ध बन्ध - सर्वविद्याः श्छिन्धि छिन्धि - क्षोभय क्षोभय – परयन्त्राणि स्फोटय स्फोटय – सर्वश्रृङ्खलाः त्रोटय त्रोटय – ज्वलज्ज्वालाजिह्वे – कराळवदने- प्रत्यङ्गिरे ह्रीं नमः स्वाहा ।।

मायाबीज मन्त्रोद्धारः (ह्रीं बीजाक्षरोद्भवः जपमाला मन्त्रः)

पुष्करं शिखि सूक्ष्माढ्यं बिन्दु सूक्ष्मान्वितं भवेत्।
आकाश शशि संयुक्तं सिध्यै हृदय संयुतम्।
एष पञ्चाक्षरो मन्त्रो मालायाः परिकीर्तितः।
ग्रहणे स्थापने चैव पूजने विनियोजयेत्।।

(पुषकरं = हकारः + शिखी = रेफः + सूक्ष्मः = ईकारः + बिन्दु अर्धचन्द्राभ्यां युतम् सिध्यै = इति रूपम्। हृदयं = नमः इति पदं = ह्रीं सिध्यै नमः इति मालायाः मन्त्रः)

उग्रकृत्या प्रत्यङ्गिरा महामालामन्त्र जपविधिः

ओं – अस्य - श्रीप्रत्यङ्गिरा उग्रकृत्यादेवी महामन्त्रस्य – प्रत्यङ्गिरा ऋषिः - अनुष्टुप् छन्दः - श्री शक्ति प्रत्यङ्गिरा उग्रकृत्यादेवी देवता – ह्रीं बीजम् – क्रीं शक्तिः - श्रीं कीलकम्। मम सर्वशत्रु संहारणार्थे-परमन्त्र परयन्त्र परतन्त्र परकर्म परविद्या ऽभिचारि वा विभेदनार्थे – मम क्षेम स्थैर्य वीर्य विजय आयुरारोग्य ऐश्वर्याभिवृद्ध्यर्थे- श्री अथर्वण निगमस्तुता उग्रकृत्या महादेवी प्रीत्यर्थे श्री उग्रकृत्या प्रत्यङ्गिरा महामालामन्त्र जपे विनियोगः।।

करन्यासः

ओं अं ह्रां ह्रीं	सहस्रवदनायै आं	अङ्गुष्ठाभ्यां नमः
ओं इं ह्रीं ह्रीं	अष्टादशभुजायै ईं	तर्जनीभ्यां नमः
ओं उं ह्रूं ह्रीं	त्रिनेत्रायै उूं	मध्यमाभ्यां नमः
ओं एं ह्रैं ह्रीं	रक्तमाल्याम्बरधरायै ऐं	अनामिकाभ्यां नमः
ओं ओं ह्रौं ह्रीं	सर्वाभरण भूषितायै औं क	निष्ठिकाभ्यां नमः
ओं अं हः ह्रीं	महाभयनिवारिण्यै अः	करतल-करपृष्ठाभ्यां नमः

अङ्गन्यासः

ओं अं ह्रां ह्रीं	सहस्रवदनायै आं	हृदयाय नमः
ओं इं ह्रीं ह्रीं	अष्टादशभुजायै ईं	शिरसे स्वाहा
ओं उं ह्रूं ह्रीं	त्रिनेत्रायै उूं	शिखायै वषट्ओं
एं ह्रैं ह्रीं	रक्तमाल्याम्बरधरायै ऐं	कवचाय हुम्
ओं ओं ह्रौं ह्रीं	सर्वाभरण भूषितायै औं	नेत्रेभ्यो वैषट्
ओं अं हः ह्रीं	महाभयनिवारिण्यै अः	अस्त्राय फट्

एवमेव एतैः षड्भिः मन्त्रैरेव – हृदयादिषडङ्गन्यासं च पूर्ववत्कृत्वा – ओं भूर्भुवस्सुवरोम् – इतिमन्त्रेण चोटिकामुद्राभिः दशदिम्बन्धनं कृत्वा – भगवतीं उग्रकृत्यां ध्यायेत्।

उग्रकृत्या स्वरूपध्यानम्

सहस्त्र वदनां देवीं शतबाहु त्रिलोचनाम्।
रक्तमाल्याम्बरधरां सर्वाभरण भूषिताम्।
शक्तिं प्रत्यङ्गिरां देवीं प्रतिकूल निवारिणीम्।
मन्त्रसिद्धिं च तां देवीं चिन्तयामि हृदम्बुजे।
प्रत्यङ्गिरां शापहरां भूतप्रेत विनाशिनीम्।
चिन्तयेत् उग्रकृत्यां तां परमैश्वर्य दायिनीम्।।

स्वहृदि देव्यै लमित्यादि पञ्चभूतबीजैः पञ्चोपचारैः मानसपूजां परिसमाप्य - एकाग्रमानसः प्रत्यङ्गिरामूलविद्यां प्रजपेत्।।

महामालामन्त्रः

ओं ह्रीं क्रूं श्रीं ग्लौं श्रीं सौं ऐं हुं नमः कृष्णवसने – शतसहस्त्र सिंहवदने – अष्टादशभुजे- अजिते – अपराजिते- देवि - प्रत्यङ्गिरे – परसैन्य परकर्म विध्वंसिनि – परमन्त्र छेदिनि- परयन्त्र परतन्त्र उच्छाटिनि – परविद्या ग्रासकरे – सर्वभूत दमनि – क्षं ग्लौं सौं ईं ह्रीं क्रीं क्रां एहि एहि प्रत्यङ्गिरे – चिदचिद्रूपे – सर्वोपद्रवेभ्यः - सर्वरोगेभ्यः- प्रत्यङ्गिरे – मां रक्ष रक्ष - हां हीं हूं हैं हौं हः - क्षां क्षीं क्षूं क्षैं क्षौं क्षः - ग्लां ग्लीं ग्लूं ग्लैं ग्लौं ग्लः प्रत्यङ्गिरे- परब्रह्ममहिषि –परमकारुणिके – एहि मम शरीरे आवेशय आवेशय –मम हृदये स्फुर स्फुर - ममांसे प्रस्फुर प्रस्फुर - सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय - कीलय कीलय –बुद्धिं विनाशय विनाशय – प्रत्यङ्गिरे - महाकुण्डलिनि - चन्द्रखण्डावतंसिनि- वेताळवाहने – प्रत्यङ्गिरे – कपालमालाधारिणि – त्रिशूल वज्राङ्कुश बाण बाणासने- पानपात्र पूरितं मम शत्रूशोणितं पिब पिब - मम शत्रूणांमांसं खादय खादय – मम शत्रून् ताडय ताडय – मम वैरिजनान् दह दह - मम विद्वेषकारिणः शीघ्रमेव भक्षय भक्षय – श्री प्रत्यङ्गिरे – भक्त कारूणिके – शीघ्रमेव दयां कुरु कुरु – सद्यो ज्वरजाड्य मुक्तिंकुरु कुरु - बेताळ ब्रह्मराक्षसादीन् झहि झहि – मम शत्रून् ताडय ताडय- प्रारब्ध सञ्चित क्रियमाणान् दह दह – दूषकान् सद्यो दीर्गरोगयुक्तान् कुरु कुरु - प्रत्यङ्गिरे प्राणशक्तिमये – मम वैरिजन प्राणान् हन हन – मर्दय मर्दय-नाशय नाशय- ओं ह्रीं श्रीं क्रीं सौं ग्लौं प्रत्यङ्गिरे महामाये देवि - मम वाञ्छितं कुरु कुरु – मां रक्ष रक्ष - प्रत्यङ्गिरे स्वाहा।।

जपान्ते पूर्वोक्तवत् षड्भिर्मन्त्रैः हृदयादि षडङ्गन्यासं विधाय पुनः – देवीं ध्यात्वा- पञ्चाङ्गपूजांविधाय – देव्यै जपसमर्पणं कुर्यात् ।। (इति कालीतन्त्रे स्तवराजोक्तमन्त्रः)

श्री महा महा प्रत्यङ्गिरा महा खड्गमाला स्तोत्रम्
(द्विसहस्राक्षरी महाविद्या 2000 वर्णाः)

महामालामन्त्र जपविधिः

देवीरूपध्यानम्

सिंहीं सिंहमुखीं सखीं भगवतः श्री भैरवोल्लसत् -
शूल स्थूल कपाल पाश डमरु व्याग्राग्र हस्ताम्भुजाम् ।
दंष्ट्राकोटि विशङ्कटास्य कुहरां आरक्त नेत्रत्रयीं
वालेन्दद्युति मौलिकां भगवतीं प्रत्यङ्गिरां भावये॥

प्रत्यङ्गिरा स्वरूपम्

श्रीविद्यां मधुरां काळीं महा प्रत्यङ्गिरां शुभाम्।
कपाल शूल डमरु नागपाशं च बिभ्रतीम्॥
सिंहारूढां ज्वलज्जिह्वां सर्व सौभाग्य दायिनीम् ।
शान्त्यतीतां सदा ध्यायेत् सादाख्य निधि सिद्धये॥

खड्गमाला मन्त्रजपक्रमः

श्रीभगवतीं प्रत्यङ्गिरां प्रणम्य - लब्धानुज्ञः - आदौ तत्वाचमनं कृत्वा -

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोप शान्तये॥

इति विघ्नेश्वरं संप्रार्थ्य प्रत्यङ्गिरा मूलविद्यया - प्राणायामत्रयं कृत्वा – देश काल निमित्तादिना संकल्पं कुर्यात्। तत्र सङ्कल्पः - ममोपात्त - समस्त - दुरित क्षयद्वारा - श्री परमेश्वर परमेश्वरी प्रीत्यर्थं - आचन्द्रार्कतारकं मम वंश कुटुंबेषु - श्री परमेश्वर परमेश्वरी - महाषोडशी – महाप्रत्यङ्गिरा मधुरकाळी - श्रीमातृणां - परिपूर्ण कृपाकटाक्ष - परमानुग्रह - क्षिप्रप्रसाद सिद्ध्यर्थं च - द्विसहस्राक्षरी - महाविद्या श्री महाप्रत्यङ्गिरा खड्गमाला महास्तोत्र पारायणं – यथा शक्ति अर्चनं च करिष्ये - इति सङ्कल्प्य - भगवतीं प्रणम्य - जपेत्॥

ऋष्यादिन्यासः

अस्य श्री अथर्वण भदरकाळी महा महा प्रत्यङ्गिरा परमेश्वरी - शुद्ध शक्तिसंबुद्धन्त - माला महा मन्त्रस्यभ उपस्थेन्दिरयाधिष्ठायी - वरुणादित्य अङ्गिरा विजय भैरवादि - स्वर्णाकर्षणभभैरवात्मक ध्यान परिपूर्णानन्द परशिव ऋषिः - अनुष्टुप् छन्दः महोग्र क्षकार भट्टारक महापीठिस्थित महाकालङ्कनिलाया - श्री ब्राह्मी नारायणी रौद्री उग्रकृत्या – महाकृत्यात्मक अथर्वणभदरकाळी - महा महा प्रत्यङ्गिरापरमेश्वरी - श्रीमाता देवता - क्षं बीजं - फट् शक्तिः - स्वाहा कीलकम् - श्री महाप्रत्यङ्गिरा खङ्गसिद्धौ विनियोगः - क्षां – क्षीं - क्षूं – क्षैं - क्षौं - क्षः - इत्यादिना करन्यासं षडङ्गन्यासं च विधाय – ततो – भगवतीं ध्यायेत्

(ध्यानम्)

ब्रह्म स्वरूपे ब्रह्मेशि ब्रह्मास्त्र खङ्ग धारिणि।
ब्रह्मि प्रत्यङ्गिरे देवि अव ब्रह्म द्विषो जहि॥

आशांबरा मुक्तकचा घनच्छविः
ध्येया सचर्मासि कराहि भूषणा ।
दंष्ट्रोग्र वक्त्रा ग्रसिता ऽहिता न्वया -
प्रत्यङ्गिरा शङ्कर तेजसे रिता ॥



लमित्यादिभिः मानसिकपूजां कृत्वा -
एकाग्रचित्तस्सन् मालामन्त्रं जपेत्।।

ओं ऐं ह्रीं क्लीं क्ष्म्रौं क्रीं श्रीं ळं क्षं हुं फट् ओं नमो प्रत्यङ्गिरे - हृदयदेवि - शिरोदेवि - शिखादेवि – कवचदेवि - नेत्रदेवि – अस्त्रदेवि-काळि-कपालिनि - कुल्ले - कुरुकुल्ले - विरोधिनि - विप्रचित्ते - उग्रे - उग्रप्रभे - दीप्ते - नीले - घने - वलाके - मात्रे - मुद्रे - मिते - महाऽसिते - परमेश्वरपरमेश्वरि - अङ्गिरा प्रत्यङ्गिरा मयि - महादेव्यम्बे -महादेवा नन्दमयि - त्रिपुरानन्दमयि - भैरवानन्दमयि - ब्रह्मानन्दमयि - पूर्णदेवानन्दमयि - चलच्चित्तानन्दमयि - चलचलानन्दमयि - कुमारानन्दमयि - क्रोधानन्दमयि - वरदानन्दमयि - स्मरदीपानन्दमयि - मायाम्बे - मायावत्यम्बे - विमलानन्दमयि-कुशलानन्दमयि- श्रीमत्सेनानन्दमयि - सुधाकरानन्दमयि - प्रह्लादानन्दमयि-सनकानन्दमयि-वसिष्ठानन्दमयि-बोधानन्दमयि-मीनानन्दमयि- गोरक्षकानन्दमयि - भोजदेवानन्दमयि - प्रजापत्यानन्दमयि-मूलदेवानन्दमयि - रन्तिदेवानन्दमयि - विघ्नेश्वरानन्दमयि - हुताशनानन्दमयि-समयानन्दमयि-

सन्तोषानन्दमयि-गाणेशि-दुर्गे-वटुकेश्वरि-क्षेत्रपालेम्बे-सरस्वति- लक्ष्मि- शङ्खनिधे-पद्मनिधे-क्षेत्रपालेश्वरि-अघोरे-शरभेश्वरि-महासुदर्शनशक्ते - ऐन्द्रि-आग्नेयि-याम्ये - नैऋत्ये -वारुणि-वायव्ये-कौबेरि-ईशानि-ब्राह्मि-वैष्णवि - वास्तुपुरुषमयि-वज्रिणि-शक्तिनि-दण्डिनि-खड्गिनि-पाशिनि-अङ्कुशिनि-कुन्तिनि-शूलिनि-पद्मिनि- चक्रिणि-सर्वस्तंभिनि-मुद्राशक्ते-भूपुरात्मके-त्रैलोक्य-सर्वसंमोहनचक्र-स्वामिनि-नीलकण्ठ भैरवशक्ति सहित जयादि प्रथमाष्ट कोटि योगिनीवृन्द मयूखावृते ।। -

कौलानन्दमयि-परमाचार्यमयि-परमगुरुमयि-परमेष्टिगुरुमयि-प्रह्लादानन्दनाथमयि-सकलानन्दनाथमयि - कुमारानन्दनाथमयि - दिव्यौघमयि - वसिष्ठानन्दनाथमयि - क्रोधानन्दनाथमयि - सुरानन्दनाथमयि - सिद्धौघमयि - ध्यानानन्दनाथमयि - बोधानन्दनाथमयि - शुकानन्दनाथमयि - मानवौघ मयि - सर्वसम्मोहिनी मुद्राशक्ते - त्रिवलयरूप गुरुमण्डलात्मक सृष्टिचक्रस्वामिनि - विश्वरूप - भैरवशक्ति सहित प्रेतासनादि द्वितीयाष्ट कोटि योगिनीवृन्द मयूखावृते -।।

असिताङ्ग-भैरवि-ब्राह्मि - रुरु-भैरवि- माहेश्वरि-चण्ड-भैरवि-कौमारि-क्रोध-भैरवि-वैष्णवि-उन्मत्तभैरवि - वाराहि-काल-भैरवि-माहेन्द्रि - भीषण-भैरवि -चामुण्डे-संहार-भैरवि- नारसिंहि- सर्वसंक्षोभिणीमुद्राशक्ते - षोडशदळरूप अष्ट-भैरव शक्तिसहित अष्टमातृकात्मक –सर्वाकर्षणचक्रस्वामिनि - मेघनाथ भैरव - शक्ति सहित ऊर्ध्वकेशीत्यादि तृतीयाष्ट कोटि योगिनीवृन्द मयूखावृते -

कामरूपपीठ शक्त्यात्मिके-मलयगिरि पीठात्मके-कोलगिरि पीठेश्वरि-कालान्तक पीठशक्ते-चौहार पीठाम्बे – जालन्धर पीठरूपिणि- ओड्याण पीठस्थिते- देवकूट पीठश्रि – सर्वविद्राविणी मुद्राशक्ते – अष्टदळ ग्रन्थिस्थानरूप अष्टशक्ति पीठात्मक अन्तर्बहिर्महाशत्रुसंहारचक्र स्वामिनि- गदाधरभैरव - शक्तिसहित - राक्षसीत्यादि तुरीयाष्टकोटि योगिनीवृन्द मयूखावृते -

हेतुकभैरवि-वेताळभैरवि-त्रिपुरान्तकभैरवि-अग्निजिह्वभैरवि-कालान्तकभैरवि-कपालभैरवि-एकपादभैरवि-भीमरूपभैरवि-मलयभैरवि-हाटकेश्वरभैरवि-सर्वजृम्भिणी मूद्राशक्ते – वृत्तमण्डलरूप दशभैरवि शक्त्यात्मक सर्वस्थूलभेदनचक्र स्वामिनि - संहारभैरव शक्तिसहित भैरवीत्यादि पञ्चमाष्ट कोटि योगिनीवृन्द मयूखावृते-

सर्वस्तंभिनि-सर्वसंमोहिनि-सर्वक्षोभिणि-सर्वविद्राविनि-सर्वजृंभिणि-सर्वभ्रामणि-सर्वरौद्रिणि-सर्वसंहारिणि-सर्वबीज मुद्राशक्ते-द्विचतुरश्र अष्टयोनिरूप अष्टमुद्रा

शक्त्यात्मक सर्वसूक्ष्म उच्चाटन चक्रस्वामिनि-कुलभैरव शक्तिसहित कालीत्यादि षष्ठाष्टकोटि योगिनीवृन्द मयूखावृते -

हृदयशक्ति वामिनि-शिरश्शक्ति नीलिनि-शिखाशक्ति चक्रिणि-कवचशक्ति खड्गिनि - नेत्रशक्ति पाशाङ्गि-अस्त्रशक्ति कम्पिनि-सर्वसंहारिणि मुद्राशक्ते -षड्कोणरूप षडङ्गशक्त्यात्मक सर्वलयाङ्ग चक्रस्वामिनि-त्रिनेत्रभैरव शक्तिसहित केशिन्यादि सप्तामाष्टकोटि योगिनीवृन्द मयूखावृते- मधुरकाळि – भद्रकाळि – नित्याकाळि - सर्वयोनिमुद्राशक्ते-महायोनिरूप अष्टोत्तरशत महाकाळी शक्त्यात्मक सर्वतिरोधान चक्रस्वामिनि – ईशभैरव शक्तिसहित मुण्डाग्र धारिणीत्यादि अष्टमाष्टकोटि योगिनीवृन्द मयूखावृते -

विजयभैरव महावीरशक्ते- सर्वाकर्षण-भैरवनाथे-महाकाल काल-भैरव प्राणनाडि-दक्षिणकाळि- दरकाळि –रुद्रभूकाळि - कालकाळि-गुह्यकाळि-कामाकलाकाळि-धनकाळि-सिद्धिकाळि-चण्डिकाळि नवकाल्यादिरूपे-श्रीमच्छ्रीप्रत्यंङ्गिरे-वटुकेश्वरि-योगिनि -अहःक्षेत्रपालमयि-गाणेशि-सुधामयि-द्वादशादित्यमयि-एकादशरुद्रमयि-सर्वभूतमयि-सर्वत्रिखण्ड मुद्राशक्ते -शूलिनि-कपालिनि-पाशिनि-डमरुकवति-ब्राह्मी प्रत्यंङ्गिरे-नारायणी प्रत्यंङ्गिरे- रौद्री प्रत्यंङ्गिरे- उग्रकृत्या प्रत्यंङ्गिरे- अथर्वण-भद्रकाळी

प्रत्यंङ्गिरे-महाकृत्या प्रत्यंङ्गिरे- अक्षमाला कुण्डिका पद्म पानपात्र बाणा चाप खड्ग चर्म कुलिश दण्ड गदा – चक्र पाश त्रिशूल घण्टा परशु शङ्खादि सहस्रकोट्यायुध धारिणि- शतसहस्रकोटि सिंहासने-सहस्रवदने-सिहंवक्रो -ज्वालाजिह्वे-करालदंष्ट्रे-अजिते-अपराजिते-सर्वविघ्ननाशिनि- सर्वसङ्कट निवारिणि-सर्वार्थ सुमन्त्र सिद्धिप्रदे-सर्वदुर्मन्त्र विध्वंसिनि- परमन्त्रोच्चाटिनि-परमानुग्रह क्षिप्रप्रसादिनि-सर्वानन्द परिपूर्ण शुद्ध चैतन्य महामहा ज्वलज्ज्वाल महाबिन्दु चक्रस्वामिनि- महा चतुष्षष्टिकोटि -भैरवशक्तिसहित महाचतुष्षष्टिकोटि योगिनीवृन्द मयूखावृते-।।

सर्वतन्त्रात्मिके-सर्वयन्त्रात्मिके-सर्वमन्त्रात्मिके-सर्वनादात्मिके-सर्वविद्यात्मिके-सर्वसर्वात्मिके- श्रीशारदे – महामहा माये- महामहा काळि- महामहा मारि-महा योगेश्वरि- महा कालरात्रि- महा मोहरात्रि-महा महारात्रि-महाकालचक्रिणि -महासाम्राज्ञि-महेश्वर महाकल्प महाताण्डव महासाक्षिणि-अखिलाण्डकोटि ब्रह्माण्डनायिके- महामहा प्रत्यङ्गिरे- नमस्ते नमस्ते नमस्ते नमस् स्वाहा ओं फट् हुं क्षं ळं श्रीं क्रीं क्ष्म्रौं क्लीं ह्रीं ऐं ओं ॥

ततो उत्तराङ्ग न्यासं - ततो हृदयादि न्यासं -

ततो ध्यानं - ततो लमित्यादि पञ्चपूजां च कृत्वा – जपं समर्पयेत्।

गुह्याति गुह्य गोप्त्रि त्वं गृहाण अस्मत् कृतं जपम्॥

सिद्धि भर्वतु देवेशि त्वत् प्रसादात् मयि स्थिरा॥

ततः तत्वाचमनं कुर्यात् ओं शान्तिः शान्तिः शान्तिः ॥

(जपान्ते देवी प्रार्थना)

ब्रह्म स्वरूपे ब्रह्मेशि ब्रह्मास्त्र खड्ग धारिणि।

ब्राह्मि प्रत्यङ्गिरे देवि अव ब्रह्म द्विषो जहि॥

विष्णुस्वरूपे वैष्णवि चक्रास्त्र खड्ग धारिणि।

नारायणि प्रत्यंङ्गिरे मम शत्रून् विद्वेषय॥

रुद्र स्वरूपे रुद्रेशि रुद्रास्त्र खड्ग धारिणि।

रौद्री प्रत्यंङ्गिरे देवि मम शत्रू नुच्चाटय॥

उग्रस्वरूपे उग्रेशि उग्रास्त्र खड्ग धारिणि।

उग्रकृत्ये प्रत्यंङ्गिरे उग्राभिचारा न्नाशय॥

अथर्वेशि भद्रकाळि अथर्व खड्ग धारिणि।

महाप्रत्यङ्गिरे देवि रक्ष मां शरणा गतम्॥

महाकृत्ये माहेश्वरि महास्त्र खड्ग धारिणि।

महाकृत्ये प्रत्यंङ्गिरे महा क्षुद्रान् विनाशय॥

नवनाथावृतात्मिकां षिड्रंशत् तत्व नायिकाम्।

नित्या षोडशिकां वन्दे घटिका वरणैर्युताम्॥

तिथि वार नक्षत्रादि योग करण रूपिणीम्।

कालचक्रात्मिकां ध्यायेत् कालस्योल्लासिनीं चराम्॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः॥

फलश्रुतिः (खड्गमालाजपस्यफलम्)

स्मृति मात्रा हि विद्यैषा भोग मोक्ष प्रदायिनी।
सर्वकाम रहस्यार्था स्मरणात् पाप नाशिनी॥
अपस्मार ज्वर व्याधि मृत्यु क्षामादिजे भये।
आपत्काले ग्रहभये व्यसने ष्विभचारिके॥
अन्येष्वपि च दोषेषु मालामन्त्रं स्मरेन् नरः।
सर्वोपद्रव निर्मुक्तो साक्षात् शिवमयो भवेत् ॥
मालामन्त्र मिदं गुह्यं पूर्णानन्द प्रकीर्तितम्।
एकवार जप ध्यानात् सर्वपूजा फलं भवेत् ॥
सर्वाबाधा प्रशमनं धान्य गोत्र धनेच्चयः।
प्रत्यङ्गिरा प्रसादेन भविष्यति न संशयः॥
ब्राह्मी नारायणी रौद्री उग्रकृत्या महाकृतिः।
भद्रकाल्याः प्रसादेन सर्वत्र विजयी भवेत्॥
सर्वेषां स्वस्ति भर्वतु सर्वेषां शान्ति भर्वतु।
सर्वेषां पूर्णं भवतु सर्वे भवन्तु सुखिनः।
सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु॥

असतो मा सद्गमय॥ तमसो मा ज्योतिर्गमय॥ मृत्योर्मा अमृतं गमय ॥ ओं-शिवम् ॥

श्री गुरुभ्यो नमः

महाकाळभैरव जपविधिः

अस्यश्री महाकाळभैरव महामन्त्रस्य वामदेव ऋषिः अनुष्टुप् छन्दः श्री महाकालो (महाभैरवो) देवता हुं बीजम् ह्रीं शक्तिः फट् कीलकम् मम सवभयविनाशाय - महाकालप्रसाद सिध्यर्थे यन्त्र पूजाहोमाङ्गत्वेन जपे विनियोगः (ह्रीं बीजं - क्षं शक्तिः - हुं फट् कीलकम् इतिवा संप्रदायः)

करन्यासः		अङ्गन्यासः	
ह्रां (क्षां)	अङ्गुष्ठाभ्यां नमः	ह्रां	हृदयाय नमः
ह्रीं (क्षीं)	तर्जनीभ्यां नमः	ह्रीं	शिरसे स्वाहा
ह्रूं (क्षूं)	मध्यमाभ्यां नमः	ह्रूं	शिखायै वषट्द
ह्रैं (क्षैं)	अनामिकाभ्यां नमः	ह्रैं	कवचाय हुम्म
ह्रौं (क्षौं)	कनिष्ठकाभयां नमः	ह्रौं	नेत्रेभ्यो वौषड्व
ह्रः (क्षः)	करतलकरपृष्ठाभ्यां नमः	ह्रः	अस्त्राय फट्

दिग्बन्धः ओं भूर्भुवस्सुवरों इति दिग्बन्धः

ध्यानम् :

सुधासिन्धु मणिद्वीपे पारिजात वनावृते।
प्रज्वलत्पितृमध्ये प्रेतहृत्सुप्त मीश्वरम्।
विपरीत रतासक्तं दक्षिणाविलसद्युतिम्।
चतुर्भाहुं त्रिनयनं अञ्जनाद्रि समप्रभम्।
जटाजूटधरं देवं शशांक कृत शेखरम्।
भुजङ्गमेखलायुक्तंदिग्वाससमनाकुलम्।
डमरुं च कपालं च वरं शूलं क्रमात् करैः।
दधतं विकटैर्दन्तैः कराळवदनं विभुम्।
ध्यात्वैवं साधकश्रेष्ठो जपन् सिद्धिं समश्नुते।

हृत्पूजा

ओं लं पृथि॰यात्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

जप्य मूलमत्र:
ओं ऐं ह्रीं क्लीं महाकालाय ह्रीं ह्रीं ह्रीं फट् फट् फट् हुं नमस्स्वाहा।।

(अन्यमन्त्र:)

ओं ह्रूं स्फ्रौं यां रां लां वां क्रौं महाकालभैरव सर्वविघ्नान्नाशयनाशय ह्रीं श्रीं फट् स्वाहा।

उत्तर अङ्गन्यास : पूर्वोक्तवत् षड्भिः हृदयादिषु न्यस्त्वा - पूर्ववत् ध्यायेत्। पुनर्पूजां - पूर्ववत् पञ्चोपचार पूजां कृत्वा - जपसङ्ख्यां पुष्पेण समर्पयेत्।।



महाकालभैरव मन्त्रजप विधिः

अस्य श्री महाकालभैरव महामन्त्रस्य महादेवऋषिः अनुष्टुप्छन्दः - श्री महाकालभैरवो देवता - ह्रीं बीजं - क्षं शक्तिः - हुंफट् कीलकम् - (हुंबीजं - ह्रीं शक्तिः - फट् कीलकं) श्री महाकालभैरव प्रसादसिध्यर्थे अभीष्ट सिध्यर्थे जपे विनियोगः -

करन्यासः		अङ्गन्यासः	
ओं ह्रां	अङ्गुष्ठाभ्यां नमः	ओं ह्रां	हृदयाय नमः
ओं ह्रीं	तर्जनीभ्यां नमः	ओं ह्रीं	शिरसे स्वाहा
ओं ह्रूं	मध्यमाभ्यां नमः	ओं ह्रूं	शिखायै वषट्
ओं ह्रैं	अनामिकाभ्यां नमः	ओं ह्रैं	कवचाय हुम्
ओं ह्रौं	कनिष्ठिकाभ्यां नमः	ओं ह्रौं	नेत्रत्रयाय वौषट्
ओं ह्रः	करतलकरपृष्ठाभ्यां नमः	ओं ह्रः	अस्त्राय फट्।

ओं भूर्भुवस्सुवरों इति दिग्बन्धः - ध्यानम्

ध्यानम्ः
महाकालं यजेत् देव्या दक्षिणे धूम्रवर्णकम्।
बिभ्रतं दण्ड खट्वाङ्गौ दंष्ट्रा भीममुखं शिवम्।।
त्रिणेत्र मूर्ध्व केशं च मुण्डमाला विभूषितम्।।
जटाभीषण सच्चन्द्र खण्डं तेजोज्वलन्निव।

हृत्पूजा
ओं लं पृथि०यात्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

21अर्णः मूलमन्त्रः - ओं ह्रीं क्ष्रौं ह्रूं महाकाळाय ह्रौं महादेवाय क्रीं कालिकायै ह्रौं।।

देवतागायत्री मन्त्रः
1. महाकाळाय विद्महे भीमदंष्ट्राय धीमहि तन्नो काळःप्रचोदयात्।
2. महाकालाळाय विद्महे दण्डहस्ताय धीमहि तन्नःकालः प्रचोदयात्।
3. जटाधराय विद्महे मुण्डमालाय धीमहि तन्नो काळः प्रचोदयात्।।

उत्तर अङ्गन्यास : पूर्वोक्तवत् षड्भिः हृदयादिषु न्यस्त्वा - पूर्ववत् ध्यायेत्। पुनर्पूजां - पूर्ववत् पञ्चोपचार पूजां कृत्वा - जपसङ्ख्यां पुष्पेण समर्पयेत्।।

कालभैरव मन्त्र जपविधिः

विश्वेशं माधवं डुण्डिं दण्डपाणिं च भैरवम्।
वन्दे काशीं गुहां गङ्गा भवानीं मणिकर्णिकाम्।।

श्री गुरुपादुकाभ्यां नमः - ह्रीं नमश्श्रीकालगणपतये डुण्डिराजाय नमः।
ओं ह्सौः ह्रीं क्ष्फ्रौं नमः श्री कालभैरवाय नमः। आचम्य सङ्कल्प्य।
अस्य श्री कालभैरव द्वादशाक्षरीमहामन्त्रस्य - आनन्दभैरव ऋषिः।
जगती छन्दः - श्री कालभैरवो देवता – ह्रीं बीजं - हसौः शक्तिः।
क्ष्फ्रौं कीलकम् - श्री कालभैरव प्रसादसिध्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः

ह्रीं आनन्दभैरवऋषये नमः - शिरसि
जगतीछन्दसे नमः - मुखे - श्रीकालभैरव देवतायै नमः -हृदये।
ह्रीं बीजाय नमः - गुह्ये - - ह्सौः शक्तये नमः - स्तनयोः
क्ष्फ्रौं कीलकाय नमः - नाभौ - विनियोगाय नमः - सर्वाङ्गे।
मूलेन करौ संशोध्य - करन्यासं अङ्गन्यासं च कुर्यात्। तद्यथा -

करन्यासः	अङ्गन्यासः
क्ष्फ्रां - अङ्गुष्ठाभ्यां नमः	क्ष्फ्रां - हृदयाय नमः।
क्ष्फ्रीं – तर्जनीभ्यां नमः	क्ष्फ्रीं - शिरसे स्वाहा।
क्ष्फ्रूं – मध्यमाभ्यां नमः	क्ष्फ्रूं - शिखायै वषट्।
क्ष्फ्रैं – अनामिकाभ्यां नमः	क्ष्फ्रैं - कवचाय हुम्।
क्ष्फ्रौं – कनिष्ठिकाभ्यां नमः	क्ष्फ्रौं - नेत्रत्रयाय वौषट्।
क्ष्फ्रः - करतल करपृष्ठाभ्यां नमः	क्ष्फ्रः - अस्त्राय फट्।

ओं क्ष्फ्रौं भूर्भुवस्वरोम् इति दिग्बन्धः - ध्यानम् -

कारुण्यामृत सागरं त्रिनयनं श्री दण्डपाणिं विभुं -
विद्या मूलनिधिं जगत्प्रभु वरं मन्त्रेश्वरं मुक्तिदम्।
ध्यायेत् ब्रह्मकपाल कर्बरधरं तं सारमेय स्थितं -
कान्ता संयुत कालभैरव गुरुं काशीपुरा धीश्वरम्।।

हृत्पूजा

ओं लं पृथि०यात्मकं गन्धं कल्पयामि
ओं हं आकाशात्मकं पुष्पं कल्पयामि।
ओं यं वाय्वात्मकं धूपं कल्पयामि
ओं रं अग्न्यात्मकं दीपं कल्पयामि।
ओं वं अमृतात्मकं नैवेद्यं कल्पयामि
ओं सं सर्वात्मकं सर्वोपचारं कल्पयामि।

इति लमित्यादिभिः पञ्चोपचारपूजां कृत्वा - मूलं - प्रजपेत्।

मूलमन्त्रः "ओं ह्सौः ह्रीं क्ष्फ्रौं सहसे कालभैरवाय नमः।"

रक्षाप्रार्थना

खड्गं कपालं डमरुं त्रिशूलं – हस्ताम्बुजै स्सन्दधतं त्रिनेत्रम्।
दिगम्बरं भस्म विभूषिताङ्गं – नमाम्यहं भैरव मिन्दुचूडम्।। (पञ्चरत्ने)

पाणिभ्यां परितः प्रपीड्य सुदृढं निश्चोद्य निश्चोद्य च -
ब्रह्माण्डं सकलं पचेलिमरसा लोचैःफलाभं मुहुः।
पायं पाय मपायतः त्रिजगतीं उन्मत्तवत्तै रसैः -
कृत्यं ताण्डव डम्बरेण विधिना पायान् महाभैरवः।।

स्वर्णाकर्षणभैरवस्तुति:

स्वर्णादि मध्य मणिमण्डप कल्पवृक्षे
पीता रुणाम्बुज निविष्ट सुवर्ण वर्णम्।
माणिक्य पात्र मभयं दधतं च दोर्भ्यां
स्वर्णादि कर्षण विनोद निधिं नमामि।। (त्रिपुरासिद्धान्ते)

स्वर्णाकर्षण भैरव स्तुति:

स्वर्ण काल भैरवं त्रिशूल युक्त पाणिनं –
वेदरूप सारमेय संयुतं महेश्वरम्।
स्वाश्रितेषु सर्वदा समस्त वस्तु दायिनं –
महेन्द्र वंश पूर्वपुण्य रूपिणं समाश्रये ।।

सहस्रारे महाचक्रे कर्पूर धवळे गुरुः।
पातु मां वटुको देवो भैरवः सर्व कर्मसु।।

श्री स्वर्णाकर्षण भैरवमन्त्र जपविधिः (चिदम्बररहस्ये)

अस्य श्री स्वर्णाकर्षण भैरव महामन्त्रस्य महाभैरव ब्रह्मा ऋषिः -
त्रिष्टुप् छन्दः - त्रिमूर्तिरूपी भगवान् स्वर्णाकर्षण भैरवो देवता।
ह्रीं बीजं – सः शक्तिः - वं कीलकं - मम दारिद्र्यनाशार्थे जपे विनियोगः।

करन्यासः		अङ्गन्यासः	
ओं	अङ्गुष्ठाभ्यां नमः	आपदुद्धारणाय	हृदयाय नमः।
ऐं	तर्जनीभ्यां नमः	अजामलबद्धाय	शिरसे स्वाहा।
क्लां ह्रां	मध्यमाभ्यां नमः	लोकेश्वराय	शिखायै वषट्।
क्लीं ह्रीं	अनामिकाभ्यां नमः	स्वर्णाकर्षणभैरवाय	कवचाय हुम्।
क्लूं ह्रूं	कनिष्ठिकाभ्यां नमः	मम दारिद्र्य विद्वेषणाय	नेत्रत्रयाय वौषट्।
सः वं	करतल करपृष्ठाभ्यां नमः	ओं ह्रीं श्रीमहाभैरवायनमः	अस्त्राय फट्।

रं रं रं ज्वलत्प्रकाशाय नमः।

रूपध्यानम्।

पीतवर्णं चतुर्बाहुं त्रिनेत्रं पीत वाससम्।
अक्षयं स्वर्ण माणिक्य तडित्पूरित पात्रकम्।
अभिलसन् महाशूलं चामरं तोमरो द्वहम्।
सततं चिन्तये देवं भैरवं सर्व सिद्धिदम्।

अन्यत् ध्यानम्।

मन्दार द्रुम कल्प मूल सहिते माणिक्य सिंहासने –
संविष्टो दरभिन्न चम्पकरुचा देव्या समालिङ्गितः।
भक्तेभ्यः कर रत्नपात्र भरितं स्वर्ण ददानो ऽनिशं –
स्वर्णाकर्षण भैरवो विजयते स्वर्णाकृतिः सर्वदा।।

पञ्चोपचार मानसपूजा।। मूलमन्त्रः = (स्वर्गापवर्गप्रदः मन्त्रः)
ओं ऐं क्लां क्लीं क्लूं ह्रां ह्रीं ह्रूं सः वं आपदुद्धारणाय - अजामलबद्धाय - लोकेश्वराय - स्वर्णाकर्षणभैरवाय - मम - दारिद्र्य विद्वेषणाय - ओं ह्रीं महाभैरवाय नमः।

(दशसहस्रजपः) कृष्णपक्ष अष्टमी समारभ्य चतुर्दशीपर्यन्तम् (विशेषजपकालः)

आकाशभैरव मन्त्र जपविधि:

अघोरऋषि: - विरादछन्द: - सर्वजित्वर आकाशभैरवो देवता - भं बीजं - फट् शक्ति: - भामित्यादिभि र्न्यास: पूर्ववत् - ध्यानम् -

करन्यास:	अङ्गन्यास:
भां अङ्गुष्ठाभ्यां नम:	भां हृदयाय नम:।
भीं तर्जनीभ्यां नम:	भीं शिरसे स्वाहा।
भूं मध्यमाभ्यां नम:	भूं शिखायै वषट्।
भैं अनामिकाभ्यां नम:	भैं कवचाय हुम्।
भौं कनिष्ठिकाभ्यां नम:	भौं नेत्रत्रयाय वौषट्।
भ: करतल करपृष्ठाभ्यां नम:	भ: अस्त्राय फट्।

रं रं रं ज्वलत्प्रकाशाय नम:। ओं क्ष्फ्रौं भूर्भुवस्वरोम् इति दिग्बन्ध: - ध्यानम् -

कालांबुद श्यामळ मायतास्यं -
कराळ मव्याहत मप्रमेयम्।
लोलोलकं लोकविनाश हेतुं
लुटत् रिपुं नौमि धृताट्टहासम्।।

ध्यानम्

सहस्र पाणि पद्मक्रं सहस्र त्रय लोचनम् ।
सर्वाभीष्ट प्रदं देवं ध्यायेत् आकाश भैरवम् ।।

इतिध्यात्वा - हृदये - पञ्चोपचारपूजां कृत्वा - मूलमन्त्रं जपेत्।

मन्त्र: = ओं नमो भगवते उग्रभैरवाय सर्वविघ्न नाशाय ठठ स्वाहा

भैरव मन्त्रजपविधि: - आनन्दभैरव ऋषि: - गायत्री छन्द: - श्रीं बीजं - हुं शाक्ति: - आकाशभैरवो देवता – सर्वाभीष्ट सिद्ध्येर्थे विनियोग:।

हां – हीं – हूं – हैं – हौं – ह: इति षड्भि: करन्यासाङ्गन्यासौ – ध्यानं च कुर्यात्।

मालामन्त्र: = ओं नमो भगवते आकाशभैरवाय श्रीं ह्रीं क्लीं विघ्नश्छेदं कुरु कुरु रक्ष रक्ष श्रीं क्लीं क्ष्म्र्यूं क्लीं- ह्रीं श्रीं ब्रह्मणे स्वाहा।।

भैरवाष्टमूर्तीश्वर नामानि

अनल श्चाग्निशिख श्चैव कराळश्च तृतीयकः।
घण्टाखो महाक्रोधः षष्ठो वै पिशिताशनः।
सप्तमः पिङ्गलाक्षश्च ऊर्ध्वकेश स्तथाऽष्टमः।
एते च मूर्तिपा श्चैव विन्यसेत क्रमशो बुधः।।

भैरवेश्वरयागे सप्तविंशतिमूर्तयः (27 देवताः)

शान्ति र्गणपति श्चैव नरकान्तक एव च।
इन्द्र सूर्य स्तथा ग्निश्च विद्या स्कन्दश्च भीमकः।
यमश्च वास्तु र्नैरृति र्विष्णु श्चापि निवृत्तिका।
वटुकश्चैव रक्तश्च वरुणो लक्ष्मि वायुकौ।
भक्तः प्रतिष्ठा दुर्गा च विजय स्सोम एव च।
गुरु रीशश्च ब्रह्मा च सप्तविंशति देवताः।।
द्वारपौ चण्ड मुण्डौ तु याग रक्षार्थ भैरवौ।।
द्वारा ग्रे पूजये त्सिंहं वाहनं श्वान मेववा।।

भैरव मन्त्रोद्धारः

प्रणवं पूर्व मुच्चार्य श्री बीजञ्च द्वितीयकम्।
कुरु कुर्वटुका येति आपदुद्धारणाय च।
क्षं क्षेत्रपाल इत्येते चतुर्थ्यन्तं समुच्चरन्।
नमोन्त मुच्चरेत् पश्चात् भाष्योच्चारन्तु पूर्ववत्।। (उत्तरकारणागमे)
मूलमन्त्रः "ओं श्रीं कुरु कुरु वटुकाय आपदुद्धारणाय क्षं क्षेत्रपालाय नमः"

नमो नागभूषं महत्शूल पाणिं
नमः कालकालं नमो रुद्रमालम्।
नमः कालिका प्रेम लोलं करालं –
नमो भैरवं काशिका क्षेत्रपालम्।।

भैरव मूर्तिभेद ध्यानानि

1. क्षेत्रपालरूपध्यानम्

रक्त ज्वाल जटाधरं शशिधरं रक्ताङ्ग तेजोमयं -
हस्ते शूल कपाल पाश डमरुं लोकस्य रक्षाकरम्।
निर्वाणं शुनवाहनं त्रिणयनं आनन्दकोलाहलं -
वन्दे भूत पिशाचनाथ वटुकं तं क्षेत्रपालं शिवम्।।

वेदमन्त्र: क्षेत्रस्य पतिना वयं .... सनो मृडाधीदृशे।।

मन्त्रोद्धार: ळान्तं तु क्षेत्रपालस्य बीजं षष्ठ स्वरान्वितम्।
त्रयोदशान्त संयुक्तं बिन्दु नाद समन्तिम्।

आगममन्त्र: ओं क्षं क्षत्रपालाय नम: (अष्टाक्षरमन्त्र:)

मूलमन्त्र : मिदं प्रोक्तं तस्मिन् अंगानि कल्पयेत् (रौरवागमे – ५१)

गायत्रीमन्त्र: ओं श्वानवाहाय विद्महे - शूलहस्ताय धीमहि -
तन्नो वटु: प्रचोदयात्।

2. वटुकनाथ ध्यानम्

करकलित कपाली कुण्डली दण्डपाणिः -
गरळ तिमिर नीलो व्याळ यज्ञोपवीती।
क्रतु समय सपर्या विघ्न विच्छेद दक्षः -
जयतु वटुकनाथः सिद्धिद स्साधकानाम्।।

मूलमन्त्रः ओं वं वटुकाय नमः इति मूलेन वा -
ओं श्रीं ह्रीं क्लीं कुरु कुरुवटुकाय नमः इति मूलेन वा संयजेत्।

3. आपदुद्धारणमूर्ति ध्यानम्

उद्यात् भास्कर सन्निभं त्रिणयनं फुल्लोल्लसत् कुन्तळं -
वालं दण्ड कपाल पाणि युगळं ताटङ्क कर्ण द्वयम्।
हर्यक्षाजिन कञ्चुकं विवसनं जान्वंघ्रिकान्त क्वणत् -
घण्टादाम कृतोपवीत मनिशं नौम्याप दुद्धारणम्।।

मूलमन्त्राः ओं नमो भगवते वटुकाय वामन कञ्चुक धारणाय आपदोद्धारणाय नमः इति मूलेन पूजयेत्। यद्वा -

ओं ऐं श्रीं ह्रीं क्लीं क्षम्र्यूं वं वटुकाय वामन कञ्चुक धारणाय अपादोद्धारणाय नमः

ओं श्रीं कुरु कुरु वटुकाय आपदुद्धारणाय क्षं क्षेत्रपालाय नमः।

ओं श्रीं ह्रीं कुरु कुरु वटुकाय आपदुद्धारणाय क्षं क्षेत्रपालाय नमः।

गायत्री ओं बालरूपाय विद्महे - दण्डहस्ताय धीमहि तन्नो वटुः प्रचोदयात्।
ओं ह्रीं ऐं क्लीं उन्मत्तानन्द भैरव – सर्वशत्रु नाशं - कुरु कुरु स्वाहा।

4. भैरवेश्वर ध्यानम्

एकास्यं तु चतुर्भुजं त्रिणयनं कृष्णं सुवृत्तेक्षणं -
शूलं ब्रह्म कपालकं डमरुकं नागं वहन्तं करैः।
ज्वालाकेश भयंकरं शशिधरं दंष्ट्रा कराळाननं -
घण्टादाम विभूषितं श्वनयुतं श्रीभैरवेशं भजे।।

मूलमन्त्रः ओं नमो भगवते उग्रभैरवाय सर्वविघ्नं नाशय हं क्षं स्वाहा।
ओं ह्रीं क्रीं हूं ह्रीं कात्तभैरवाय नमः।।

5. क्षेत्रपालमूर्ति ध्यानम्

निर्वाणं निर्विकल्पं निरुपम मचलं निर्विकारं क्षकारं -
हुंकारं वज्रदंष्ट्रं हुतवह नयनं रौद्र मुन्मत्त वेषम्।
फट्कारं बद्धनागं भ्रुकुटित सुमुखं भैरवं शूलपाणिं -
खट्वाङ्गं व्योमनीलं डमरुकसहितं क्षेत्रपालं नमामि।।

मूल मन्त्र: ओं ऐं श्रीं ह्रीं क्लीं क्ष्म्रूं वं वटुकाय आपदुद्धारणायकुरु कुरु - वटुकाय क्ष्म्रूं क्लीं ह्रीं श्रीं ऐं ओं स्वाहा।।

6. श्वानारूडभैरवध्यानम्

नग्नरूपं त्रिणेत्रं च सर्वाभरण भूषितम्।
रत्नकुण्डल संयुक्तं शिरोमाला विभूषितम्।
खड्ग शूल कपालं च डमरुं भीम दंष्ट्रकम्। बि
भ्राणं श्वानका रुढं क्षेत्रपाल महं भजे।।

मूलमन्त्र : ओं श्रीं वं क्षं श्वानारूढाय वटुकाय क्षेत्रपालाय नम:।।
श्वानमोहाय विद्महे शूलहस्ताय धीमहि तन्नोवटु: प्रयोदयात्।

7. यज्ञेश भैरव ध्यानम्

त्रिणेत्रं नग्नरूपञ्च शूलपाश कपालकम्।
डमरुं रक्तवर्णाभं किंकिणी मालया युतम्।
क्रूर दंष्ट्रो ग्ररूपञ्च यज्ञ रक्षा धिकारिणम्।
श्वानकं च ज्वलत्केशं क्षेत्रपाल शिवं भजे।।

ग्रामशान्तौ सुमुखीकरणे अयं मन्त्र: प्रयोक्तव्य:

मूलमन्त्र: ओं ह्रीं क्लीं क्ष्म्रूं वं भैरवाय सर्वव्याधिशान्तिं कुरु कुरु सुमुखीभव सुमुखीभव स्वाहा।।

गायत्री: श्वानध्वजाय विद्महे शूलहस्ताय धीमहि तन्नो भैरव: प्रचोदयात्।

कारणागमे

8. विष्णु कञ्चुकधारण कृष्णभैरव ध्यानम् (श्यामभैरवः)

मूलमन्त्र : ओं ऐं - क्लां क्लीं - क्लूं - ह्रां ह्रीं ह्रूं - वं सः अपादोद्धारणाय – अजामिळबन्धनाय - लोकेश्वराय - श्री स्वर्णाकर्षण भैरवाय - मम दारिद्य - विद्वेषणाय - आं श्रीं महा भैरवाय स्वाहा।

ओं नमो भगवते - स्वर्णाकर्षण धनधान्य वृद्धिकराय -शीघ्रं स्वर्णं देहि देहि -वश्यं कुरु कुरु - स्वाहा।

ओं श्रीं ह्रीं क्लीं स्वर्णभैरवाय हुं फट् स्वाहा।

9. स्वर्णाकर्षणभैरव ध्यानम् (षट्भुजः)

पीतवर्णं च षड्बाहुं त्रिणेत्रं पीत वाससम्।
अक्षय्य स्वर्ण माणिक्कं तटित् स्फुटित पात्रकम्।
अभीप्सित महाशूलं चामरं तोमर द्वयम्।
सततं चिन्तयेत् देवं भैरवं स्वर्ण सिद्धिदम्।।

द्विभुजं च द्विनेत्रं च वृत्तपिङ्ग जटाधरम्।
श्वेतवर्ण समायुक्तं कुण्डलं कर्ण पत्रकम्।
अभयं दण्डसंयुक्तं नागयज्ञोपवीतिनम्।
श्यामकञ्चुक संयुक्तं लम्बितं स्तनपार्श्वयोः।
शूलाभं लम्बितं चैव मणिमाला विभूषितम्।
वृश्चिका भरणो पेतं शिरोमाला विभूषितम्।
कटिसूत्रा कृतिं नागराज युग्मेन संयुतम्।
पद्मपीठोपरिस्थश्च ह्रस्वदेह समन्वितम्।
किञ्चित् दंष्ट्रं महाभीमं विष्णुकञ्चुकधारिणम्।
एवं ध्यात्वा महादेवं इष्टसिद्धि र्भविष्यति।। (कारणागमे प्रोक्तः)

ग्रामशान्ति विधौ मन्त्रः

ओं ह्रीं क्लीं क्ष्म्रूं वं वटुकाय आपदुद्धारणाय कुरु कुरु – मां रक्ष रक्ष अस्य ग्राम जनं रक्ष रक्ष श्रीं ह्रीं क्लीं क्ष्म्रूं क्षं हुं फट् स्वाहा।।

10. जटिलभैरव ध्यानम् – (जटाभारयुत: अष्टहस्त:)

उरग डमरु कांकु शाख्य घण्टा -
असि कपाल वरा भयाष्ट बाहुम्।
मरग तमणि नील मिन्दु मौळिं -
वटुक विभुं जटिलं भजे त्रिणेत्रम्।।

मूलमन्त्र: ओं श्रीं ह्रीं क्लीं क्ष्म्रूं वं वटुकाय भैरवाय क्षु हुं फट् स्वाहा।
गायत्री : तीक्ष्णदंष्ट्राय विद्महे क्षेत्रपालाय धीमहि तन्नो भैरव: प्रचोदयात्।
प्रार्थना : अतिक्रूर महाकाय कल्पान्त दहनोपम।
भैरवाय नम स्तुभ्यं अनुज्ञां दातु मर्हसि।।

11. अष्टभैरव समष्टि ध्यानम्

असिताङ्गो रुरु श्चण्ड: क्रोध नोन्मत्त भैरव:।
कपाल भीषण श्चैव संहार श्चाष्ट भैरवा:।।
पूर्वा द्यैशान पर्यन्तं पूजये त्तु विशेषत:।।
कपाल शूल सहितं अभयं वरदा न्तिम्।।
नीलमेघ निभाकारं त्र्यक्षं चन्द्रार्ध शेखरम्।
प्रणवादि नमो न्तश्च विन्यसेत् क्रमशो बुध:।।

12. भैरवाष्टमूर्तीश्वरा:

अनल श्चाग्निशिख श्चैव कराळश्च तृतीयक:।
घण्टारवो महाक्रोध: षष्ठो वै पिशिताशन:।
सप्तम: पिङ्गलाक्षश्च ऊर्ध्वकेश स्तथाऽष्टम:।
एते च मूर्तिपाश्चैव विन्यसेत क्रमशो बुध:।।

13. भैरवेश्वरयागे सप्तविंशतिमूर्तय: (देवता:)

शान्ति र्गणपति श्चैव नरकान्तक एव च।
इन्द्र सूर्य स्तथा ग्निश्च विद्या स्कन्दश्च भीमक:।
यमश्च वास्तु र्नैरृति र्विष्णु श्चापि निवृत्तिका।
वटुकश्चैव रक्तश्च वरुणो लक्ष्मि वायुकौ।
भक्त: प्रतिष्ठा दुर्गा च विजय स्सोम एव च।
गुरु रीशश्च ब्रह्मा च सप्तविंशति देवता:।।
द्वारपौ चण्ड मुण्डौ तु याग रक्षार्थ भैरवौ।।
द्वाराग्रे पूजयेत्सिंहं वाहनं श्वानमेववा।।

14. खड्गभैरव ध्यानम्

खड्गं कपालं डमरुं त्रिशूलं -
हस्ताम्बुजै स्सन्दधतं त्रिणेत्रम्।
दिगम्बरं भस्म विभूषि ताङ्गं -
नमा म्यहं भैरव मिन्दु चूडम्।।

भैरव मन्त्रोद्धारः

प्रणवं पूर्व मुच्चार्य श्री बीजञ्च द्वितीयकम्।
कुरु कुर्वटुका येति आपदुद्धारणाय च।
क्षं क्षेत्रपाल इत्येते चतुर्थ्यन्तं समुच्चरन्।
नमोन्त मुच्चरेत् पश्चात् भाष्योच्चारन्तु पूर्ववत्।। (उत्तरकारणागमे)

मूलमन्त्रः ओं श्रीं कुरु कुरु वटुकाय आपदुद्धारणाय क्षं क्षेत्रपालाय नमः

15. शक्त्युग्रवटुक ध्यानम्

भैरवं परमं देवं सर्वकाम प्रसाधकम्।
पूजाया मग्रतो देव्याः सर्वाभीष्ट फलप्रदम्।
भीषणास्यं त्रिनयनं अर्धचन्द्र विभूषितम्।
स्फटिकाभं कङ्कणादि भूषा शत समावृतम्।।
अष्टवर्ष वयस्कं च कुण्डलो ल्लसितं भजे।।
धारयन्तं दण्ड शूले भैरव्यादि समायुतम्।

मूलमन्त्रः ओं श्रीं ह्रीं क्लीं क्ष्म्र्यूं वटुकाय आपदुद्धारणाय –
कुरुकुरुवटुकाय ह्रीं स्वाहा।

16. महाकाळ भैरवध्यानम्

महाकालं यजेद् देव्या दक्षिणे धूम्र वर्णकम्।
बिभ्रतं दण्ड खट्वाङ्गौ दंष्ट्रा भीममुखं शिवम्।
व्याघ्र चर्मा वृत कटिं तुन्दिलं रक्त वाससम्।
त्रिणेत्र मूर्ध्व केशञ्च मुण्डमाला विभूषितम्।
जटाभीषण सच्चन्द्र खण्डं तेजो ज्वलन्निव।

17. द्विभुजक्षेत्रपालध्यानम्

व्यालंबाग्र जटाधरं त्रिणयनं नीलाञ्जनादि प्रभं -
दो र्द्वन्द्वात्त कपाल शूल मरुण स्रग्वस्त्र गन्धोल्बणम्।
घण्टा मेखल घर्घर ध्वनि मिळत् हुंकार भीमं विभुं -
वन्दे संहित सर्प कुण्डल धरं तं क्षेत्रपालं सदा।।

18. द्विभुजक्षेत्रपालध्यानम्

दंष्ट्रोग्र दन्तुर महीश्वर भोग भूषं -
अशाम्बरं कर धृतोग्र गदा कपालम्।
वृत्तोग्र चक्षुष मुदग्र पिशंग केशं -
तं क्षेत्रपाल मनिशं चरणं भजामि।।

19. गुरुभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
टङ्कं कृष्णमृगं पात्रं बिभ्राणं च कृपाणकम्।
महेश्वर्या युतं देवं वृषारूढं स्मिताननम्।
शुद्ध स्फटिक संकाशं नमामि गुरु भैरवम्।।

20. अश्वारूढभैरव ध्यानम्

सितहय वरपत्रं हार संभूषिताङ्गं -
परिवृत मति घोरैः सप्तभि स्सारमेयैः।
कनक गिरि समाभं नैशचूर्णा भिरामं -
सकल निगम गुह्यं भैरवेशं नमामि।।

21. क्षेत्रपाल ध्यानम् (चतुर्भुज)

नीलवर्णं त्रिणेत्रं च कटिसूत्रं तु सर्पकम्।
नग्नरूपं द्विपादं च श्वानवाहन संयुतम्।
चतु र्बाहु समायुक्तं भीमरूपं जटाधरम्।
शूलं डमरुकं चैव दक्षयो र्हस्तयो र्धृतम्।

कपाल नागपाशौ च वाम हस्त द्वये तथा।।
किंकिणी मालया भूष्यं छन्नवीरं च नूपुरम्।
उग्ररूपं सुदंष्ट्रं च सर्वाभरण भूषितम्।
क्षेत्रपाल मिदं प्रोक्तं सर्वकामफलप्रदम्।।

22. षड्भुजभैरवः

श्यामवर्णं द्विनेत्रं च एकवक्त्रं द्विपादकम्।
षडभुजं च कराळास्यं भीमरूपं जटाधरम्।
शूलं खड्गं च दण्डं च दक्षिणे तु करे धृतम्।
पाशं खेटं कपालं च वाम भागे तु धारिणम्।
किंकिणी मालया यष्ट्या छन्नवीर समन्वितम्।
पाद नूपुर संयुक्तं सर्वा भरण भूषितम्।।

23. वटुक भैरव ध्यानम्

अशनि दण्ड कपाल जटाधरं -
अरुण वासस मेखलया वृतम्।
कनक पुञ्ज निभं कम लेक्षणं
वटुक नाथ शिवं प्रण माम्यहम्।।

24. अश्वारूढमूर्ति ध्यानम्

रक्तं षोडश वर्षका कृतिधरं रक्तोज्वल त्कुण्डलं -
रत्नाबद्ध किरीटकं शशिधरं हारादि भूषान्तिम्।
पालाशाभ हयाधिरूढ ममलं सव्यातपत्रान्वितं -
वामे रज्जुधरं वराम्बर धरं अश्वाधिरूढं भजे।।

25. क्षेत्रपालकध्यानम्

रक्तज्वाल जटाधरं त्रिणयनं दंष्ट्रा कराळाननं -
हस्ते पाश कपाल शूल डमरु दक्षे ऽन्यतो बिभ्रतम्।
नग्नं नाग विभूषितं शुनयुतं कृष्णं सुवृत्तेक्षणं -
घण्टादाम समेत जंघ ममलं तं क्षेत्रपालं भजे।।

26. कञ्चुकभैरव ध्यानम्

पादौ पादुक भूषितौ प्रतिपद न्यास क्वण न्नूपुरौ -
हस्ते शूल कपाल पाश डमरून् कर्णौं च ताटंकिनौ।
गात्रं लम्बित कञ्चुकं सतिलकं वक्रं च वक्रालकं -
यस्य स्तौ भरणी दिने धृततनुं तं भैरवं भावये।।

27. अष्टभुजभैरवस्वामी

कृष्णाभं ज्वालकेशं त्रिणयन मुरगी भूषणं वृत्त नेत्रं -
दिक् बाहुं चन्द्रचूडं त्रिशिख डमरुकं खड्ग बाणौ च सव्ये।
घण्टा पाशौ कपालं धनु रपर करै र्बिभ्रतं मुण्डमालं -
नग्नं रौद्रं सुदंष्ट्रं दनुज मदहरं भैरवा कार मीडे।।

28. उग्रभैरव ध्यानम् (अष्टहस्त: नीलवर्ण:)

एकवक्रं त्रिणेत्रं च ऊर्ध्वकेशं भुजाष्टकम्।
दक्षिणे चाभयं शूलं घण्टां सर्पं च धारिणम्।
वामे कपालं पाशौ च डमरुं वर मेव च।
नीललेघ समाभासं शिरोमाला विभूषितम्।
किंकिणी मालया भूष्यं पाद नूपुर शोभितम्।
सर्वाभरण संयुक्तं उग्रदंष्ट्रं तथैव च।
एवं ध्यात्वा विशेषेण श्वान वाहन संयुतम्।।

29. अघोरभैरव ध्यानम् (शूलभैरव:) अघोरास्त्र:)

सजल घन समाभं भीम दंष्ट्रं त्रिणेत्रं -
भुजग धर मघोरं रक्त वस्त्राङ्ग रागम्।
परशु डमरु खड्गं खेटकं बाण चापं -
त्रिशिक नरकपाले बिभ्रतं भावयामि।।

30. बालवटुक ध्यानम्

वन्दे बालं स्फटिक सदृशं कुन्तळो ल्लासिवक्रं -
दिव्याकल्पै र्नव मणिमयै: किंकिणी नूपुराद्यै:।
दीप्ताकारं विशद वदनं सुप्रसन्नं त्रिणेत्रं -
हस्ताब्जाभ्यां वटुक मनिशं पात्र दण्डौ दधानम्।।

वटुकभैरवमूलमन्त्र: ओं ह्रीं वं वटुकायआपदुद्धारणाय कुरु कुरु –
वंवटुकाय ह्रीं स्वाहा।

31. महाकाळभैरवध्यानम्

धूम्राभं त्रिवि लोचनं शशि युतं दंष्ट्रा कराळाननं -
भस्माङ्गं त्रिशिखं कपाल डमरुं पाशं करै र्बिभ्रतम्।
काल्यासक्त सुमानसं कटितटे वैय्याघ्र चर्मांबरं -
सर्पावेष्टित तुन्दिलं इह महा काळं सदा भावये।।

32. एकपादवटुक ध्यानम्

एक मूर्ति धर मेक पादकं -
शूल टङ्क वरदा भया न्वितम्।
काल कण्ठ मति भीषणंशिवं -
लोक पूजित पदं भजा म्यहम्।।

33. दशभूमिपालकनामानि

हेतुकं त्रिपुरघ्नं च वेताल श्चाग्नि जिह्वकम्।
काळं कराळिनं भीमं चैकपादं तथैव च।
पूर्वा दीशान पर्यन्तं पूजयेत्तु यथा क्रमम्।
आकाशे अचल श्चैव पाताळे हाटकेश्वरम्।
एवं तु भूमिपालानां गन्ध पुष्पा दिभि र्यजेत्।।

वटुकभैरव ध्यानम् (श्वाधिरूढभैरवः)

शूल खड्ग डमरु लसत्करं –
सव्य हस्त मपरं करोज्वलम्।
सन्ततं हृदि भजामि भैरवं –
श्वाधिरूढ मधिकार सिद्धये।।

वटुकनाथ ध्याम्

दिग्वाससं कमलपत्र विशाल नूत्रं –
भस्माङ्गरागमभयं प्रभुमादिदेवम्।
ध्यायामि तं वटुकनाथ महर्निशं मे –
सर्वार्थसिद्धि मतुलां कृपया दिशन्तम्।।

महावटुक ध्यानम्

आनील कुन्तल मलक्तक रक्तवर्णे –
मौनी कृतं हृद मनोज्ञ मुखार विन्दम्।
कल्याण कीर्तिं कमनीय कपाल पाणिं –
वन्दे महा वटुकनाथ मभीष्ट सिध्यै।।

आकाशभैरव ध्यानम्

कालाम्बुद श्यामळ मायतास्यं -
कराळ मव्याहत मप्रमेयम्।
लोलोलकं लोक विनाश हेतुं -
लुठत्रिपुं नौमि धृताट्ट हासम्।।

मूलमन्त्रः ओं नमो भगवते उग्रभैरवाय सर्वविघ्नं नाशाय ठःठः स्वाहा।

जपविधिः अघोर ऋषिः। विराट् छन्दः - सर्वजित्वरभैरवो देवता – भं बीजं –

फट् शक्तिः- स्वेच्छा संहार सिध्यर्थे – विनियोगः। भामित्यादिभिःकरांगन्यासौ – कृत्वा ध्यानं कुर्यात्।

अष्टभैरव समष्टि ध्यानम्

असिताङ्गो रुरु श्चण्डः क्रोध नोन्मत्त भैरवः।
कपाल भीषण श्चैव संहार श्चाष्ट भैरवाः।।
पूर्वा दैशान पर्यन्तं पूजये त्तु विशेषतः।।
कपाल शूल सहितं अभयं वरदा न्तिम्।।
नीलमेघ निभाकारं त्र्यक्षं चन्द्रार्ध शेखरम्।
प्रणवादि नमोन्तश्च विन्यसेत् क्रमशो बुधः।।

वटुकभैरव ध्यानम्

उद्यत् भास्कर सन्निभं त्रिनयनं रक्ताङ्ग रागस्रजं –
स्मेरास्यं वरदं कपाल मभयं शूलं दधानं करैः।
नीलग्रीव मुदार भूषण युतं शीतांशु खण्डोज्वलं –
बन्धूकारुण वाससं भयकरं देवं सदा भावयेत् ।।

मन्त्रजपविधिः - बृहदारण्यक ऋक्षिः । अनुष्टुप् छन्दः। वं - बीजं ह्रीं शक्तिः। कं - कीलकं । अभीष्टसिध्यर्थे विनियोगः - ह्रामित्यादिभिःषड्भिः करन्यासाङ्गन्यासौ ध्यानं च कुर्यात् । –

मूलमन्त्रः ह्रीं वं वटुकाय आपदुद्धारणाय कुरु कुरु वं वटुकाय ह्रीं स्वाहा।

सिद्धभैरव ध्यानम् ।

जलद पटल नीलं दीप्यमानोर्ध्व केशं –
त्रिशिख डमरु हस्तं चन्द्ररेखा वतंसम्।
विमल वृषनिरूढं चित्र शार्दूल वासं -
विमल मनिश मीडे विक्रमोद्धण्डचण्डम्।।

मालामन्त्रः ओं नमो विजय भैरवाय – प्रळयान्तकाय – महाभैरव्यै – महाभैरवाय – सर्वथविघ्न निवारणाय – शक्तिधराय – चक्रपाणये – वटमूल निषण्णाय – अखिल गण नायकाय – आपदुद्धारणाय – आकर्षयआकर्षय – आवेशय आवेशय- मोहय मोहय- भ्रामय भ्रामय –भाषय भाषय – शीघ्रं भाषय शीघ्रं भाषय – ह्रां ह्रीं त्रिपुरताण्डवाय भाषयस्वाहा।।

स्वर्णाकर्षणभैरव ध्यानम्

गाङ्गेय पात्रं डमरुं त्रिशूलं –
वरं करै स्सन्दधतं त्रिणेत्रम् ।
देव्या युतं तप्त सुवर्ण वर्णं -
स्वर्णा कर्षण भैरव माश्रयामि।।

जपविधिः ब्रह्मा ऋषिः - पङ्क्तिः छन्दः - ह्रां बीजं – ह्रीं शक्तिः - ह्रूं कीलकं - अभीष्टसिद्धये – विनियोगः - ह्रामित्यादिभिः कराङ्गन्यासौ – कृत्वा – ध्यानं कुर्यात्।

मूलमन्त्रः ओं एं ऐं क्लीं क्लूं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः गं आपदुद्धारणाय - अजामलवत्ताय - लोकेश्वराय - स्वर्णाकर्षणभैरवाय – मम दारिद्य ध्वंशनाय – धनाकर्षण सिद्धिदाय - ओं श्रीं महा स्वर्णाकर्षण भैरवाय नमः।।

अन्यमन्त्रः ओं ऐं ह्रीं श्रीं ऐं श्रीं आपदुद्धारणाय ह्रां ह्रीं ह्रूं अजामलवत्ताय- लोकेश्वराय –स्वर्णाकर्षणभैरवाय मम दारिद्र्यविद्वेषणाय महाभैरवाय नमः - श्रीं ह्रीं ऐं।

(रुद्रयामलतन्त्रे)

अष्टभैरव ध्यानानि

1. असिताङ्गभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं मुण्डमाला विभूषितम्।
श्वेतवर्णं कृपामूर्तिं भैरवं कुण्डलो ज्वलम्।
गदा कपाल संयुक्तं कुमारं च दिगम्बरम्।
पानपात्रं च शंखं च अक्षमालां कमण्डलुम्।
नाग यज्ञोपवीतं च धारिणं सुवि भूषितम्।
ब्रह्माणी शक्ति सहितं हंसारूढं सुरूपिणम्।
सर्वा भीष्टप्रदं नित्यं असिताङ्गं भजाम्यहम्।

2. रुरुभैरव ध्यानम्

त्रिनेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
टङ्कं कृष्णमृगं पात्रं बिभ्राणं च कृपाणकम्।
माहेश्वर्या युतं देवं वृषारूढं स्मिताननम्।
शुद्ध स्फटिक सङ्काशं नमामि रुरु भैरवम्।।

3. चण्डभैरवध्यानम्

त्रिनेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
धनुर्बाणं च बिभ्राणं खड्गं पात्रं तथैव च।
कौमारी शक्ति सहितं शिखिवाहन संस्थितम्।
गौरवर्णं युतं देवं वन्दे श्री चण्ड भैरवम्।।

4. क्रोधभैरव ध्यानम्

त्रिनेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
गदां शङ्ख च चक्र ञ्च पानपात्रं च धारिणम्।
वैष्णवी शक्ति सहितं गरुडासन संस्थितम्।
नीलवर्णं सुभूषाढ्यं वन्दे श्री क्रोध भैरवम्।

5. उन्मत्तभैरवध्यानम्

त्रिनेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
हेमवर्णं महादेवं अश्व वाहन सुस्थितम्।
खड्गं कपालं मुसलं दधतं खेटकं तथा।
वाराही शक्ति सहितं वन्दे उन्मत्त भैरवम्।।

6. कपाल भैरवध्यानम्

त्रिनेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
पाशं वज्रं तथा खड्गं पानपात्रं च धारिणम्।
इन्द्राणी शक्ति सहितं गजवाहन सुस्थितम्।
कपाल भैरवं वन्दे पद्मराग प्रभं शुभम्।

7. भीषणभैरवध्यानम्



त्रिनेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
खड्गं शूलं कपालं च धारिणं मुसलं तथा।
चामुण्डा शक्ति सहितं प्रेतवाहन सुस्थितम्।
रक्तवर्णं महादेवं वन्दे भीषण भैरवम्।।

8. संहारभैरवध्यानम्

दशबाहुं त्रिनेत्रं च सर्प यज्ञोपवीतिनम्।
दंष्ट्रा कराळ वदनं अष्टैश्वर्य प्रदायकम्।

दिगम्बरं कुमारं च सिंह वाहन संस्थितम्।
शूलं डमरुकं शङ्ख गदां चक्रं च धारिणम्।
खड्गं पात्रं च खट्वाङ्गं पाशमङ्कुश मेव च।
दैत्यशीर्ष कपालोग्र बृहन्माला धरं वटुम्।
उग्ररूपं मदोन्मत्तं बाडबानल भैरवम्।
चण्डिका शक्ति सहितं ध्यायेत् संहार भैरवम्।।

असिताङ्गदीनां शक्तयः - (अष्टभैरवि नामानि)

1. श्री भैर०यै नमः 2. महा भैर०यै नमः
3. सिंह भैर०यै नमः 4. धूम्र भैर०यै नमः
5. भीम भैर०यै नमः 6. उन्मत्त भैर०यै नमः
7. वशीकरण भैर०यै नमः 8. मोहन भैर०यै नमः

भैरव पञ्चावरण लघु पूजाक्रमः

प्रथमावरणे - ओं हों ईशानमूर्धाय नमः इत्यादि ओं हः अस्त्राय नमः इत्यन्तम् पञ्चब्रह्मषडङ्गानां संहितामन्त्र मूर्तयः शिवस्योक्तवत् पूज्याः।

द्वितीयावरणे – पूर्वादि अष्टदिक्षु असिताङ्गादि अष्टभैरवान् पूजयेत्।

तृतीयावरणे – पूर्वादि अष्टदिक्षु – हेतुघ्नादीन् अष्टभूमिपालान्यजेत्। तद्यथा -

ओं हां हेतुघ्नाय नमः - ओं हां त्रिपुरघ्नाय नमः - ओं हां वह्नये नमः -

ओं हां यमजिह्वाय नमः - ओं हां कालाय नमः - ओं हां कराळिने नमः -

ओं हां एकाङ्घ्रिये नमः ओं हां भीमाय नमः इति संपूजयेत्।

चतुर्थावरणे – पूवादि अष्टक्षिु इन्द्रादि अष्टदिग्पालकानभ्यर्च्ययेत् ।

पञ्चमावरणे – पूर्वादि अष्टदिक्षु इन्द्रादीनां आयुधान् वज्रादीनर्चयेत्।

पश्चात् क्षेत्रपालं मूलेनाभ्यर्च्य – धूपदीपनैवेद्यादिकं दत्वा -पुष्प दूर्वाक्षत सहितं नित्यपवित्रं दत्वा – आरात्रिकं विधाय - मन्त्रजपं कृत्वा - निवेदयेत्।।

श्वानवाहन ध्यानम् (भैरवस्य वाहनपूजा)

सारमेयं चतुष्पादं शुक्लवर्णं तु दंष्ट्रिणम्।
लाङ्गूलेन समायुक्तं अतिवेग दुरासनम्।।

ओं हां श्वां श्रुतिश्वानवाहनाय नमः। इति आवाह्य - भैरवान्तिके -

"सारमेयाय विद्महे भीम दंष्ट्राय धीमहि तन्नः श्वानः प्रचोदयात्।" इति गात्रीमन्त्रैण सर्वोपचारैः संपूजयेत्।

पूजायां गायत्रीमन्त्र प्रयोगविधिः

गायत्र्या सर्व मेतत् हि कार्यं तन्त्रविदा सदा।
यस्मिन् यस्मिन् न मन्त्रोऽस्ति तस्मिन् तस्मिन् सदा भवेत्।
गायत्री कर्मणि श्रेष्टा सर्वसिद्धि प्रदायिनी।
सर्वं सर्वेषु कार्येषु नात्र कार्या विचारणा।। (मतङ्गपारमेश्वरागमे)

शरभेश्वर मन्त्र जपविधिः

अस्य श्री शरभेश्वर महामन्त्रस्य – कालाग्निरुद्रः ऋषिः - जगती छन्दः - श्री शरभेश्वरो देवता - खें बीजम् - (स्वाहा) खां शक्तिः - खं फट् कीलकम् - श्री शरभेश्वर प्रसादसिध्यर्थे - जपे विनियोगः ।।

करन्यासः

ओं खें खां	अंगुष्ठाभ्यां नमः
खं फट्	तर्जनीभ्यां नमः
प्राणग्रहासि प्राणग्रहासि हुंफट्	मध्यमाभ्यां नमः
सर्वशत्रु संहारकाय	अनामिकाभ्यां नमः
शरभसाळुवाय	कनिष्ठिकाभ्यां नमः
पक्षिराजाय हुंफट् स्वाहा	करतल करपृष्ठाभ्यां नमः

अङ्गन्यासः

ओं खें खां	हृदयाय नमः।
खं फट्	शिरसे स्वाहा।
प्राणग्रहासि प्राणग्रहासि हुंफट्	शिखायै वषट्।
सर्वशत्रु संहारकाय	कवचाय हुम्
शरभसाळुवाय	नेत्रेभ्यो वौषट्।
पक्षिराजाय हुंफट् स्वाहा	अस्त्राय फट्।

इति करन्यासं अङ्गन्यासं कृत्वा - भूर्भुवस्सुवरोमितिदिग्बन्धः - ध्यानम् -



हुंकारी शरभेश्वरोऽष्टचरणः पक्षी चतुर्बाहुकः
पादाकृष्ट नृसिंह विग्रहधरः कालाग्निकोटिद्युतिः।
विश्वक्षोभ नृसिंह दर्पशमनः ब्रह्मेन्द्र मुख्यैस्तुतः
गङ्गाचन्द्रधरः पुरस्थ शरभः सद्यो रिपुघ्नोऽस्तु नः।।

(यद्वा – अन्यत् ध्यानम)

ज्वलन कुटिल केशं सूर्य चन्द्राग्नि नेत्रं -
निशित कर नखाग्र स्यूत सिंहास्य देहम्।
शरभ मथ मुनीन्द्रैः सेव्यमानं सिताभं -
प्रणत भय विनाशं भावये पक्षिराजम्।।

इतिध्यात्वा - हृदये - पञ्चोपचारपूजां कृत्वा - मूलमन्त्रं जपेत्।

शरभेश मूलमन्त्रः

ओं खें खां खं फट् प्राणग्रहासि प्राणग्रहासि हुंफट् सर्वशत्रु संहारणाय - शरभ साळुवाय - पक्षिराजाय - हुंफट् स्वाहा।।

(इतिमन्त्रेण जपः तर्पणं होमः कार्यः)

शरभेश गायत्रीमन्त्रः

1. अष्टपादाय विद्महे पक्षिराजाय धीमहि तन्नश्शरभः प्रचोदयात्।

2. साळुवेशाय विद्महे पक्षिराजाय धीमहि तन्नो रुद्रः प्रचोदयात्।

3. शरभेश्वराय विद्महे शत्रुनाशाय धीमहि तन्नो रुद्रः प्रचोदयात्।

शरभेश मालामन्त्रः

ओं नमो भगवते शरभाय ज्वल ज्वल प्रज्वल प्रज्वल असाध्यं - साधय साधय रक्ष रक्ष सर्वभूतेभ्यो हुंफट् स्वाहा।।शरभमन्त्रविधाने)

पक्षिराज शरभेश्वर मन्त्र जपविधि:

अस्य श्री शरभेश्वरमन्त्रस्य वामदेव: ऋषि: - अतिजगती - छन्द: - श्री शरभेश्वरो देवता – (ओं) खें बीजं – स्वाहा शक्ति: - मम कार्यसिध्यर्थे जपे विनियोग: - ऋष्यादिन्यास: - ओं वामदेवऋषये नम: - शिरसि – ओं अतिजगतीछन्दसे नम: मुखे- ओं शरभेश्वरदेवतायै नम: - हृदये – ओं खें बीजाय नम: गुह्ये- ओं स्वाहा शक्तये नम: पादयो: – ओं हां विनियोगाय नम: सर्वाङ्गे। अथ करन्यास: - हृदयादिन्यासश्च -

मन्त्राक्षरा:	प्रथमवारे करन्यास:	द्वितीयवारे अङ्गन्यास:
ओं खें खां खं फट्	- अङ्गुष्ठाभ्यां नम:	- हृदयाय नम:।
प्राणग्रहासि प्राणग्रहासि हुंफट्	- तर्जनीभ्यां नम:	- शिरसे स्वाहा।
सर्वशत्रु संहारकाय	- मध्यमाभ्यां नम:	- शिखायै वषट्।
शरभ सालुवाय	- अनामिकाभ्यां नम:	- कवचाय हुम्।
पक्षिराजाय	- कनिष्ठिकाभ्यां नम:	- नेत्रत्रयाय वौषट्।
हुंफट् स्वाहा	- करतल करपृष्ठाभ्यां नम:	- अस्त्राय फट्।।

ध्यानम् –

1. मृग स्त्वर्ध शरीरेण पक्षाभ्यां चञ्चुना द्विज:।
घोरवक्र श्चतुष्पाद: उूर्ध्वनेत्र श्चतुर्भुज:।।
कालान्तदहन: पुण्यो नीलजीमूत निस्वन:।
अरिस्तद्द दर्शनादेव विनष्ट बल विक्रम:।।

अथवा

2. चन्द्रार्काग्नि स्त्रिदष्टि: कुलिश वरनख श्चञ्चलो ऽत्युग्र जिह्व: -
काली दुर्गा च पक्षौ हृदय जठरगो भैरवो बाडबाग्नि:।
उूरुस्थौ व्याधिमृत्यू शरभ वर खग श्चण्डवाता तिवेग:-
संहर्ता सर्वशत्रून् स जयति शरभ: सालुव: पक्षिराज:।।

अथवा

3. रुद्र: पिङ्गल कुन्तल स्त्रिनयनो ऽत्युग्र: सपक्षो हरि: -
सर्पा लङ्करण स्तथा ऽष्टचरण स्तुर्य: शुक: सालुव:।
क्षोभं श्री नरसिंहजं शमयितुं नीता वतारो हर: -
पायाद्द श्री शरभेश्वरो विहगराट् सर्वार्थद: शङ्कर:।।

अथवा

4. काली दुर्गा पक्षयो र्यस्य संस्थे –
स्वान्ते साक्षात् सुन्दरी राजमाना ।
क्षोभं यातः श्री नृसिंहो यत स्तं –
देवं भीमं सालुवाख्यं नमामः।। (आकाशभैरवकल्पम्)

1. मूल मन्त्रः
ओं खें खां खं फट् प्राणग्रहासि प्राणग्रहासि हुंफट्
सर्वशत्रु संहारकाय – शरभ सालुवाय पक्षिराजाय हुंफट् स्वाहा।

2. अन्यमन्त्र :
ओं नमो ऽष्टपादाय - सहस्त्रबाहवे - द्विशिरसे - त्रिनेत्राय-
द्विपक्षाया - ऽग्निवर्णाय - मृगविहङ्गरूपाय - वीरशरभेश्वराय - ओं।

3. ओं नमो भगवते आकाशभैरवाय - श्रीं ह्रीं क्लीं - विघ्नच्छेदं कुरुकुरु रक्षरक्ष
श्रीं ह्रीं क्लीं क्ष्म्र्यूं क्लीं ह्रीं श्रीं ब्रह्मणे स्वाहा।।

साळुव शरभेश्वर मन्त्र जपविधि:

अस्य श्री शरभेश्वर महामन्त्रस्य – कालाग्निरुद्र: ऋषि: -

जगती छन्द: - श्री शरभेश्वरो देवता - खें बीजम् - (स्वाहा)

खां शक्ति: - खं फट् कीलकम् - श्री शरभेश्वर प्रसादसिध्यर्थे - जपे विनियोग: ।।

करन्यास:	अङ्गन्यास:
ओं खें खां - अंगुष्ठाभ्यां नम:	ओं खें खां - हृदयाय नम:।
खं फट् - तर्जनीभ्यां नम:	ओं खें खां - शिरसे स्वाहा।
प्राणग्रहासि प्राणग्रहासि हुंफट् मध्यमाभ्यां नम:	ओं खें खां - शिखायै वषट्।
सर्वशत्रु संहारणाय - अनामिकाभ्यां नम:	ओं खें खां - कवचाय हुम्
शरभसाळुवाय - कनिष्ठिकाभ्यां नम:	ओं खें खां - नेत्रेभ्यो वौषट्।
पक्षिराजाय हुंफट् स्वाहा – करतल करपृष्ठाभ्यां नम:	ओं खें खां - अस्त्राय फट्।

इति करन्यासं अङ्गन्यासंचकृत्वा - भूर्भुवस्सुवरोमितिदिग्बन्ध: - ध्यानम् -

हुंकारी शरभेश्वरोऽष्टचरण: पक्षी चतुर्बाहुक:
पादाकृष्ट नृसिंह विग्रहधर: कालाग्निकोटिद्युति:।
विश्वक्षोभ नृसिंह दर्पशमन: ब्रह्मेन्द्र मुख्यैस्तुत:
गङ्गाचन्द्रधर: पुरस्थ शरभ: सद्यो रिपुघ्नोऽस्तु न:।।

(यद्वा – अन्यत् ध्यानम्)

ज्वलन कुटिल केशं सूर्य चन्द्राग्नि नेत्रं
निशित कर नखाग्र स्यूत सिंहास्य देहम्।
शरभ मथ मुनीन्द्रै: सेव्यमानं सिताभं
प्रणत भय विनाशं भावये पक्षिराजम्।।

इतिध्यात्वा - हृदये - पञ्चोपचारपूजां कृत्वा - मूलमन्त्रं जपेत्।

शरभेश मूलमन्त्र: =

ओं खें खां खं फट् प्राणग्रहासि प्राणग्रहासि - हुंफट् – सर्वशत्रु संहारणाय – शरभ साळुवाय - पक्षिराजाय - हुंफट् स्वाहा।। (इतिमन्त्रेण जप: तर्पणं होम: कार्य:)

शरभेश्वर मन्त्र प्रयोगः

द्विषन्त मुद्दिश्य सहस्त्रवारं - जप्त्वा घृतं तेन हुनेत् हुताशे।
दिना वसानात् पुरतो रिपूणां - शरीर नाशाय सुसिद्ध मन्त्री।।

शरभस्य अथर्वण वेदमन्त्रः
पाया न्नो देव श्शरभ स्त्वपायात्
सदा ऽरेः रोगाद् विपिनो रगाभ्याम्।
वैश्वानरा ऽखु करि ऋक्ष केभ्यो
परेभ्यो भूतेभ्यो रुपः कृतान्तात्।। (आथर्वण शरभमन्त्रः)

आथर्वण मिदं मन्त्रं अमोघं दुरितापहम्।
सर्व संरक्षणं श्रेष्ठं सर्व सौभाग्य दायकम्।।

रुद्रयामलतन्त्रे –
श्री पक्षिराज शरभेश्वर आकाशभैरवमूर्तिः

चन्द्रार्काग्नि स्त्रिदृष्टिः कुलिश वरनख श्चञ्चलो ऽत्युग्र जिह्वः -
काली दुर्गा च-पक्षौ हृदय जठरगो भैरवो बाडबाग्निः।
ऊरुस्थौ व्याधिमृत्यू शरभ वर खग श्चण्डवाता तिवेगः-
संहर्ता सर्वशत्रून् स जयति शरभः सालुवः पक्षिराजः।। 1

कनक जठर गोद्यद् रक्त पानो न्मदेन -
प्रथित निखिल पीडा नारसिंहेन जाता।
शरभ वर शिवेश त्राहि नः सर्व पापात् –
अनिश मिह कृपाब्धे सालुवेश प्रभो त्वम्।। 2

दंष्ट्रा नखाढ्यः शरभः सपक्षः चतुर्भुज श्चाष्टपदः सहेतिः।
कोटीर गङ्गेन्दुधरो नृसिंह – क्षोभापहो मद् रिपुहा स्तु शम्भुः।। 3

हुङ्कारी शरभेश्वरो ऽष्ट चरणः पक्षी चतुर्थः शुकः - (चतुर्बाहुकः)
पादाकृष्ट नृसिंह विग्रह धरः कालाग्नि कोटि र्यती।
विश्व क्षोभ करः सहेति रनिशं ब्रह्मेन्द्र मुख्यैः स्तुतः -
गङ्ग चन्द्र धरः पुरत्रय हरःसद्यो ऽरिहन्ता ऽस्तु नः।। 4

नृसिंह मृत्यून्नत दिव्य तेजः - प्रकाशितं दानव भङ्ग दक्षम्।
प्रशान्ति मन्तं विदधाति योमं – सोऽस्मान पायात्शरभेश्वरो ऽव्यात्।। 5

योऽभूत् सहस्रांशु शतप्रकाशः - सपक्षि सिंहाकृति रष्टपादः।
नृसिंह संक्षोभ समात्त रूपः - पायादपाया च्छरभेश्वरो माम्।। 6

मृग स्त्वर्ध शरीरेण पक्षाभ्यां चञ्चुना द्विजः।
घोरवक्र श्चतुष्पादः ऊर्ध्वनेत्र श्चतुर्भुजः।।
कालान्तदहनः पुण्यो नीलजीमूत निस्वनः।
अरिस्तद् दर्शनादेव विनष्ट बल विक्रमः।। 7

सटा छटोग्र रूपाय पक्ष विक्षिप्त भूभृते।
अष्ट पादाय रुद्राय नमः शरभ मूर्तये।। 8

श्रीशरभेश्वरस्तुतिः (निग्रहदारुण सप्तकम्)

कोपो द्रेकाति निर्यन् निखिल परिचरत् ताम्रभार प्रभूतं –
ज्वाला मालाग्र दग्ध स्मरतनु सकलं त्वा महं शालुवेश।
याचे त्वत्पादपद्म प्रणिहित मनसं द्वेष्टि मां यः क्रियाभिः -
तस्य प्राण प्रयाणं परशिव भवतः शूल भिन्नस्य तूर्णम्।। 1

शम्भो त्वद्धस्त कान्त क्षत रिपु हृदया न्निस्स्रव ल्लोहितौघं –
पीत्वा पीत्वातिदीर्घा दिशि दिशि विचरा स्त्वद्गणा श्चण्ड मुख्याः।
गर्जन्तु क्षिप्र वेगा निखिल जय करा भीकराः खेललोलाः -
सन्त्रस्ता ब्रह्मदेवाः शरभ खगपते त्राहि नः शालुवेश।। 2

सर्वाद्यं सर्व निष्ठं सकल भयहरं त्वत्स्वरूपं हिरण्यं-
याचे ऽहं त्वा ममोघं परिकर सहितं द्वेष्टि मां यः क्रियाभिः।
श्रीशम्भो त्वत्कराब्ज स्थित कुलिश वरा घातवक्षः स्थलस्य –
प्राणाः प्रतेश दूत ग्रहगण परिखाः क्रोशपूर्वं प्रयान्तु।। 3

दिष्मः क्षोण्यां वयं यां स्तव पद कमल ध्यान निर्धूत तापाः -
कृत्या कृत्यै र्विमुक्ता विहग कुलपते खेलया बद्ध मूर्तेः।
तूर्णं त्वत्पाद पद्म प्रधृत परशुना तुण्ड खण्डी कृताङ्गः -
तद्द्वेषी यातु याम्यं पुर मतिकलुषं कालपाशाग्र बद्धः।। 4

भीमश्री शालुवेश प्रणत भयहर प्राणजिद् दुर्मदानां –
याचेऽहं चास्य वर्गप्रशमन मिह ते स्वेच्छया बद्धमूर्तेः।
त्वामेवाशु त्वदङ्घ्र्यष्टक नख विलसद् ग्रीव जिह्वोदरस्य-
प्राणा यान्तु प्रयाणं प्रकटित हृदय स्यायु रल्पायतेश।। 5

श्रीमूलं ते कराग्र स्थित मुसल गदा वृत्त वात्या भिघाताद् –
यातायातारि यूथं त्रिदश रविघनो द्धूत रक्त च्छटार्दम्।
सद्धृष्ट्वाऽऽयोधने ज्या मखिल सुर गण श्चाशु नन्दन्तु नाना
भूता वेताल पूगः पिबतु तदखिलं प्रीत चित्तः प्रमत्तः।। 6

अल्पं दो र्दण्डबाहु प्रकटित विनम च्चण्ड कोदण्ड मुक्तैः -
बाणै र्दिव्यै रनेकैः शिथिलित वपुषः क्षीण कोला हलस्य।
तस्य प्राणा वसानं पर शरभ विभो ऽहं त्व दिज्या प्रभावैः -
तूर्णं पश्यामि यो मां परि हसति सदा त्वादि मध्यान्त हेतो।। 7

इति निशि प्रयतस्तु निरासनो मममुखः शिवभाव मनुस्मरन्।
प्रतिदिनं दशवार दिनत्रयं जपति निग्रह दारुण सप्तकम्।।
इति गुह्यं महाबीजं परमं रिपुनाशनम्। भानुवारं समारभ्य मङ्गलान्तं जपेत् सुधीः।।
इति आकाशभैरवकल्पे – प्रत्यक्षसिद्धिप्रदे नरसिंहकृता शरभ स्तुतिः।।

श्री गुरुभ्यो नमः

श्री शूलिनी दुर्गामन्त्र जपविधिः

अस्यश्री शूलिनीदुर्गामहामन्त्रस्य दीर्घतमा ऋषिः ककुप् छन्दः श्री शूलिनी दुर्गा देवता, हुं बीजं, स्वाहा शक्तिः मम सर्वाभीष्ट सिद्धयर्थेजपे विनियोगः

करन्यासः

शूलिनि दुर्गे देवसिद्धसुपूजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- अंगुष्ठाभ्यां नमः

शूलिनि वरदे देवसिद्धसुपूजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- तर्जनीभ्यां नमः

शूलिनि विंध्यवासिनि देवसिद्धपुजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- मध्यमाभ्यां नमः

शूलिनि असुरमर्दिनि देवसिद्धसुपूजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- अनामिकाभ्यां नमः

शूलिनि युद्धप्रिये त्रास्य त्रासय देवसिद्धसुपूजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- कनिष्ठिकाभ्यां नमः

हृदयादिन्यासः

शूलिनि दुर्गे देवसिद्धसुपूजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- हृदयाय नमः

शूलिनि वरदे देवसिद्धसुपूजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- शिरसे स्वाहा

शूलिनि विंध्यवासिनि देवसिद्धपुजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- शिखायै वषट्।

शूलिनि असुरमर्दिनि देवसिद्धसुपूजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- कवचाय हुम्

शूलिनि युद्धप्रिये त्रास्य त्रासय देवसिद्धसुपूजिते नन्दिनि मां रक्ष रक्ष महा योगेश्वरि हुं फट्
- अस्त्राय फट्

दिग्बन्धः भूर्भुवस्सुवरोम् इति दिग्बन्धः

ध्यानम् : बिभ्राणा शुलबाणास्यरि सदरगदा चापपाशान् कराब्जैः
मेघश्यामा किरीटील्लिखितजलधरा भीषणा भूषणाढ्या।
सिंहस्कन्धाधिरूढा चतसृभिरसिखेटान्विताभिः परीता
कन्याभिर्भिन्नदैत्या भवतु भवभय ध्वंसिनी शूलिनी वः।।

इतिध्यात्वा - हृदये - पञ्चोपचारपूजां कृत्वा - मूलमन्त्रं जपेत्।

मूल मन्त्रः - ज्वल ज्वल शूलिनि दुष्टग्रह हुं फट् स्वाहा

हृदयादिन्यासः, भूर्भुवस्सुवरोमिति दिग्विमोकः, ध्यानं, लमित्यादि पूजा - जपसमर्पणम् - दुर्गास्तुतिः।

अरिशङ्ख कृपाणखेटबाणान् –
सधनुशूलक तर्जनीं दधाना।
मम सा महिषोत्तमाङ्ग संस्था
नव दूर्वा सदृशी श्रियेस्तु दुर्गा।।

श्री आसुरीदुर्गा मन्त्रजप:

अस्यश्री आसुरी दुर्गा महामन्त्रस्य - अंगिरा: ऋषि: - विराट् छन्द: - आसुरी दुर्गा देवता - ओं बीजं - स्वाहा शक्ति: - हुं कीलकं - श्री आसुरी दुर्गा प्रसादसिद्ध्यर्थे जपे विनियोग: -

करन्यास:

1. ओं कटुके कटुकपत्रे हुं फट् स्वाहा - अंगुष्ठाभ्यां नम:
2. सुभगे आसुरी हुं फट् स्वाहा - तर्जनीभ्यां नम:
3. रक्ते रक्त वाससे हुं फट् स्वाहा - मध्यमाभ्यां नम:
4. अथर्वणस्य दुहिते हुं फट् स्वाहा - अनामिकाभ्यां नम:
5. अघोरे घोरकर्मकारिके हुं फट् स्वाहा - कनिष्ठिकाभ्यां नम:
6. अमुकस्य गतिं दह दह उपविष्टस्य गुदं दह दह सुप्तस्य मनो दह दह प्रबुद्धस्य हृदयं दह दह हन हन पच पच तावद्दह तावत्पच यावन्मे वशमायाति हुं फट् स्वाहा - करतलकरपृष्ठाभ्यां नम:

हृदयादिन्यास:

1. ओं कटुके कटुकपत्रे हुं फट् स्वाहा - हृदयाय नम:
2. सुभगे आसुरी हुं फट् स्वाहा - शिरसे स्वाहा
3. रक्ते रक्त वाससे हुं फट् स्वाहा - शिखायै वषट्
4. अथर्वणस्य दुहिते हुं फट् स्वाहा - कवचाय हुम्
5. अघोरे घोरकर्मकारिके हुं फट् स्वाहा - नेत्रत्रयाय वौषट्
6. अमुकस्य गतिं दह दह उपविष्टस्य गुदं दह दह सुप्तस्य मनो दह दह प्रबुद्धस्य हृदयं दह दह हन हन पच पच तावद्दह तावत्पच यावन्मे वशमायाति हुं फट् स्वाहा - अस्त्राय फट्

दिग्बन्धः भूर्भुवस्सुवरोम् इति दिग्बन्ध:

ध्यानम् :

शरच्चन्द्रकान्ति: वराभीति शूलान्
श्रृणिं हस्तपद्मै र्दधानांबुजस्था।
विभूषांबराढ्याऽहि यज्ञोपवीता
मुदो ऽथर्वपुत्री करो त्वासुरी न:।।

अन्यच्च : बालेन्दु श्वेतवर्णां विकसित नयनां वामहस्त त्रिशूलां -
दक्षे स्थाल्यंकुशाढ्यां हृदरुणवदनां नागयज्ञोपवीताम्।
नानालंकार युक्तां सुललित वदनां तुर्यवेदस्य पुत्रीं -
दुर्गां पद्मासनस्थां अखिल वशकरीं आसुरीं त्वां नमामि।।

मूल मन्त्र: ओं कटुके कटुकपत्रे सुभगे आसुरि रक्ते रक्तवाससे अथर्वणस्य दुहिते अघोरे घोरकर्मकारिके अमुकस्य गतिं दहदह, अपविष्टस्य गुदं दह दह, सुप्तस्य मनो दह दह, प्रबुद्धस्य हृदयं दह दह हन हन पच पच तावद्दह तावत्पच यावन्मे वशमायाति हुं फट् स्वाहा।।
(अत्र अमुकस्य इत्यत्र शत्रोः नाम षष्ट्यन्तं वक्तव्यम्)

ध्यानं : लमित्यादि पूजा
जप समर्पणम् स्तोत्र वन्दनम् च कुर्यात्।

जातवेदो मन्त्र दुर्गा रक्षाकर यन्त्र विधानम् (प्र-सा-सा-सं)

मायां मध्ये चाष्ट कोणेषु कृत्वा - पादा नष्टौ मातृकार्णं प्रवीतान्।
भू गेहस्थं सर्व भूता ऽमयघ्नं - रक्षा ऽयुश्श्री कीर्ति पुत्रप्रदं च।।

अस्य जातवेदोमन्त्रस्य - मरीचि: काश्यप: ऋषी - त्रिष्टुप् छन्द: - जातवेदोग्नि:देवता- हुं बीजं - ह्रीं शक्ति: - मन्त्रपदै: करन्यास: षडङ्गन्याश्च ।

करन्यास:		अङ्गन्यास:
जातवेदसे सुनवाम	- अङ्गुष्ठाभ्यां नम:	जातवेदसे सुनवाम - हृदयाय नम:
सोम मराती यत:	- तर्जनीभ्यां नम:	सोम मराती यत: - शिरसे स्वाहा
निजहातिवेद:	- मध्यमाभ्यां नम:	निजहातिवेद: - शिखायै वषट्
स न: पर्षदति	- अनामिकाभ्यां नम:	स न: पर्षदति - कवचाय हुम्
दुर्गाणि विश्वा नावेव	- कनिष्ठिकाभ्यां नम:	दुर्गाणि विश्वा नावेव- नेत्रेभ्यो वौषट्
सिन्दुन्दुरिता त्यग्नि:	- करतलकरपृष्ठाभ्यांनम:	सिन्दुन्दुरिता त्यग्नि:- अस्त्राय फट्।

(विधिवत् चतुश्चत्वारिंशद्वर्णन्यास: मन्त्रपदानांन्यासश्च उक्तस्थानेषु कृत्वा)

भूर्भुवस्सुवरोम् इति दिग्बन्ध: - ध्यानम्

उद्यद् विद्युत् कराळा कुलहरि गळ संस्थाऽरि शङ्खासि खेटेषु -
अस्त्रासाख्य त्रिशूला नरिगण भयदा तर्जनीं चा दधाना।
चर्मा स्युद्द घूर्ण दोर्भि: प्रहरण निपुणा भिर्वृता कन्यकाभि: -
दद्यात् कार्शा नवीष्टान् त्रिणयन लसिता चापि कात्यायनी व:।।

सर्वोपचार पूजान्ते – जातवेदसे इति मन्त्र: जप्य:।अभीष्टफलप्रदानोयं मन्त्र:। विशेषतो रक्षाकरप्रधानश्च।।तत्र मध्यत्रिकोणे - भुवनेश्या: मायाबीजं विलिख्य - अष्टकोणेषु - जातवेदोमन्त्रस्य - पादाष्टकं - विलिख्य - तद्बहि: पञ्चाशन्नमातृकाभि: वेष्टयेत्। चतुष्कोणेषु दुं लिखेत् ।।

दुर्गायाः रक्षाकरयन्त्रम् (धारणयन्त्रम्)



दुर्गारक्षाकरयन्त्रम्

जातवेदोमन्त्र यन्त्रलक्षणम् (प्रपञ्चसार सङ्ग्रहं)

मायां मध्ये चाष्टकोणेषु कृत्वा-पादा नष्टौ मातृकार्णं प्रवीतान्।
भूगेहस्थं सर्वभूतामयघ्नम् -रक्षाऽयुश्श्री कीर्तिं पुत्रप्रदं च ।।

ग्रहग्रस्त क्रिया नियमः (शूलिनीकल्पे)

ताक्ष्य मार्जार सिंहाश्वा सर्पान्धु करिणः शशाः।

आगच्छन्त्युदयाद् यैन्द्राद् अर्धयामे प्रदक्षिणम्।

ताक्ष्या दिषु चतुर्दिक्षु क्वचिद्वै न्यवसन् स्वयम्।

सर्पादि रूपिणं ग्रस्तं ध्यात्वा कुर्यात् क्रियान्तरम्।

स्वासन स्थान मज्ञात्वा यः पश्यति ग्रहादिकम्।

तद् ग्रहाभिभवे नैव लघुत्वं याति मन्त्रवित्।।श्री गुरुभ्यो नमः

कृत्या शान्तिकर यन्त्र विधानम्

अथ त्रिष्टुभो विधाने कृत्या नश्यति। तस्मिन् वीक्षन्ते न ग्रहादयो भीत्या इति – कृत्याशान्तिकर प्रयोगप्रसङ्गात् कृत्याशान्तिकरं – यांकल्पयन्तीयन्त्रं मन्त्रसारोक्तं अत्र योग्यतावशात् लिख्यते। प्रथमं अष्टपत्रं पद्मं विलिख्य – तत्कर्णिकामध्ये प्रणवं विलिख्य – तदन्तः साध्यनामादीन् विलिखेत्। अष्टपत्रेषु – (यांकल्पयन्तीतिऋचः द्वात्रिंशदर्णान्) मन्त्रस्य चतुरश्चतुरो वर्णान् विलिखेत्। तद्बहिः मातृकावर्णैः संवेष्ट्य - तद्बहिः चतुरश्रं विलिख्य - कोणेषु क्ष्रौं इति विलिखेत्। एवं यन्त्रं विलिख्य धृते उक्तफलं भवति।। (प्रपञ्चसारसारसङ्ग्रहे २९ पटले)



प्रत्यङ्गिरायाः कृत्याशान्तिकर यन्त्रम् (धारणयन्त्रम्)



धात्रीकृत्याशान्तिकरयन्त्रम्

यांकल्पयन्तीमन्त्र यन्त्रलक्षणम्

अष्टपत्रस्य पद्मस्य कर्णिकायां विलिख्य च।
तारं पत्रेषु मन्त्राणां चतुरश्चतुरस्ततः।।
मातृकार्णैश्च संवेष्ठ्य क्ष्रौं बीजं कुग्रहाश्रिषु।

यन्त्रधारणफलम्

यां कल्पयन्ती यन्त्रं तु धारयेत् यो यथाविधि।।
कृत्यादि भय निर्मुक्तः जीवेत् स शरदां शतम्।।
(प्रपञ्चसारसंग्रहे)

वीरभद्र मन्त्र जपविधिः

अस्य - श्री वीरभद्रमहामन्त्रस्य - कालाग्निरुद्रो (अघोररुद्रो) ऋषिः - अनुष्टुप्छन्दः - श्री वीरभद्रो देवता - ह्रौं बीजं - हुं फट् शक्तिः - स्वाहा कीलकं - अभीष्टसिध्दये – जपे विनियोगः - मूलेन करन्यासषडङ्गन्यासौ कुर्यात् ।।

करन्यासः

ओं ह्रां ह्रौं	अङ्गुष्ठाभ्यां नमः
ओं वीरभद्राय	तर्जनीभ्यां नमः
ओं अतिक्रूराय	मध्यमाभ्यां नमः
ओं रुद्रकोप संभवाय	अनामिकाभ्यां नमः
ओं सर्वदुष्ट निबर्हनाय	कनिष्ठिकाभ्यां नमः
ओं हुं फट् स्वाहा	करतल करपृष्ठाभ्यां नमः

अङ्गन्यासः

ओं ह्रां ह्रौं	हृदयाय नमः।
ओं वीरभद्राय	शिरसे स्वाहा।
ओं अतिक्रूराय	शिखायै वषट्।
ओं रुद्रकोप संभवाय	कवचाय हुं।
ओं सर्वदुष्टनिबर्हनाय	नेत्रत्रयाय वौषट्।
ओं हुं फट् स्वाहा	अस्त्राय फट्।।

इति करन्यासाङ्गन्यासौ कृत्वा - भूर्भुवस्सुवरोमिति दिग्बन्धः - ध्यानम् -

नीलाभं रक्तवस्त्रं भ्रुकुटियुतमुखं ज्वालकेशं त्रिणेत्रं -
सव्ये खड्गं च दण्डं त्रिशिख परशुकं वामभागे कपालम्।
खेटं घण्टां वहन्तं मुसल मपि दधत् किङ्किणी मालयाढ्यं
सिंहत्वक् वीतबन्धं स्फुरतु ममपुरो वीरभद्र स्वरूपम् ।।

इतिध्यात्वा - हृदब्जे – लमित्यादिना पञ्चोपचारपूजां समाप्य - मूलमन्त्रं जपेत्।

1. मूलमन्त्र: ओं हां हौं वीरभद्राय अतिक्रूराय रुद्रकोप सम्भवाय सर्वदुष्ट निबर्हनाय हुंफट् स्वाहा।।
जपान्ते उत्तराङ्गानि कुर्यात्।।

2. अन्यमन्त्र: = ओं ह्रीं नमश्शिवाय – हं - वीरभद्राय - अतिक्रूराय - रुद्रकोप सम्भवाय – सर्वदुष्ट निवारणाय - अभयवरदाय - मम रक्ष रक्ष - ते कुरुकुरु हुंफट् स्वाहा।

3. अन्यमन्त्र: = ओं क्लीं श्रीं ह्रीं वीरभद्राय जय जय नमस्स्वाहा।।

4. गायत्रीमन्त्र: =

1. वीरभद्राय विद्महे अतिक्रूराय धीमहि तन्नो क्रूर: प्रचोदयात्। (स्वायम्भुवागमे)
2. अतिक्रूराय विद्महे खङ्गहस्ताय धीमहि तन्नो वीर: प्रचोदयात्।
3. वीरभद्राय विद्महे खङ्गहस्ताय धीमहि तन्नोरुद्र: प्रचोदयात्।

5. अस्त्रखङ्गमन्त्र := ओं ह्रीं क्लीं खं भूतेश ह्रीं ह्रां खङ्गरावणाय नम:।

6. क्षुरिकास्त्रमन्त्र: अष्टाक्षर: = "ओं शिं छिं क्षुरिकास्त्राय फट्।"

7. वाहन भूत वेताळमन्त्र: = ओं छ्रां छ्रीं छ्रूं छ्रैं छ्रौं छ्र: ऐं श्रीं श्रीं छ्रां प्रेतभूताधिपतये - महापिशाच कपाल च्छत्रों छत्रों ठि गतमनाय अधिपाय वेताळाय तुभ्यं नमस्स्वाहा।।

वीरभद्रमन्त्र जपविधिः

अस्य श्री वीरभद्र महामन्त्रस्य कालरुद्रऋषिः - जगती छन्दः - श्री वीरभद्रो देवता - वं बीजं - हुं शक्तिः - फट् कीलकम् - शत्रु निग्रहार्थे जपे विनियोगः - व्यां – व्यीं – व्यूं – व्यैं – व्यौं – व्यः - इति करन्यासः अङ्गन्यासश्च -

करन्यासः	अङ्गन्यासः
व्यां अङ्गुष्ठाभ्यां नमः	व्यां हृदयाय नमः
व्यीं तर्जनीभ्यां नमः	व्यीं शिरसे स्वाहा
व्यूं मध्यमाभ्यां नमः	व्यूं शिखायै वषट्
व्यैं अनामिकाभ्यां नमः	व्यैं कवचाय हुम्
व्यौं कनिष्ठिकाभ्यां नमः	व्यौं नेत्रेभ्यो वौषट्
व्यः करतल करपृष्ठाभ्यां नमः	व्यः अस्त्राय फट्

एवं अङ्गानि विन्यस्य – भूर्भुवस्सुवरोम् इति दिग्बन्धः - ध्यानम्

मरगत मणिनीलं किङ्किणी जालमालं -
प्रकटित मुख मीशं भानु सोमाग्नि नेत्रम्।
हरि हर मसि खेट त्र्यग्र दण्डाग्र हस्तं -
विधु धर महि भूषं वीरभद्रं नमामि।।

स्वहृदि लमित्यादि पञ्चोपचारपूजां विधाय - मूलमन्त्रम् - प्रजपेत् -

मूलमन्त्रः = ओं नमो वीरभद्राय – वैरिवंश विनाशनाय –
सर्वलोक भयङ्कराय –भीम वेषाय - हुंफट् विजय
विजय ह्रीं हुंफट् स्वाहा।। (गुडपायसान्नेन जुहुयात)

वीरभद्रमन्त्र जपविधिः (रक्षाप्रधानोयंमन्त्रः)

अस्य श्रीवीरभद्रमन्त्रस्य ब्रह्मा ऋषिः - अनुष्टुप् छन्दः - वीरभद्रो देवता -हौं वीजं - हुंशक्तिः - स्वाहाकीलकम्।

ओं हौं वीरभद्राय	- अङ्गुष्ठाभ्यां नमः	- हृदयाय नमः
ओं अतिक्रूराय	- तर्जनीभ्यां नमः	- शिरसे स्वाहा
ओं रुद्रकोपसंभवाय	- मध्यमाभ्यां नमः	- शिखायै वषट्
ओं सर्वदुष्ट	- अनामिकाभ्यां नमः	- कवचाय हुम्
ओं निबर्हणाय	- कनिष्ठिकाभ्यां नमः	- नेत्रत्रयाय वौषट्
ओं हुंफट् स्वाहा	- करतलकरपृष्ठाभ्यां नमः	- अस्त्राय फट्

ओं भूर्भुवस्वरों - हः अस्त्रायहुंफट् - इतिमन्त्रेण दशादिग्बन्धः - ध्यानम् -

गोक्षीराभं दधानं परशु डमरुकौ खड्ग खेटौ कपालं -
शूलं चाभीतिदाने त्रिणयन लसितं व्याघ्रचर्मा म्बराढ्यम्।।
चेताळारूढ मुग्रं कपिशतर जटा बद्ध शीताम्शु खण्डं -
ध्यायेद्ग भोगीन्द्रभूषं निजगण सहितं सन्ततं वीरभद्रम्।।

लमित्यादिभिः मनसि देवं पञ्चोपचारैस्संपूज्य मूलं प्रजपेत्।

मूलमन्त्रः = ओं हौं वीरभद्राय - अतिक्रूराय - रुद्रकोपसंभवाय -
सर्वदुष्टनिबर्हणाय हुंफट् स्वाहा।। (द्वात्रिंशदर्णः)

पुनः हृदयादिषडङ्गन्यासः - ध्यानं -दिग्विमोकः - जपसमर्पणं च कुर्यात्।

मूलमन्त्र द्वादशलक्षजपः - रक्तहयारिपुष्पैः रक्ताब्जैर्वा होमः कार्यः।

वीरभद्रपूजाक्रमः (लघुपक्षः)

आवरणपूजा

प्रथमावरणे -पञ्चब्रह्मषडङ्गनि पूजयेत्।। वामे - भद्रकाळीं देवी मर्चयेत्।।

द्वितीयावृतौ - ईशानादि दिक्षु - ब्रह्मयादि चण्डिकान्ताःमातरः अष्टौ पूजयेत्।

तृतीयावरणे - इन्द्रादयः तद्बाह्येपूज्याः। पूजान्ते वीरभद्रगणेभ्यो बलिं दद्यात्।

स्वगणबलिमन्त्रः ओंनमो रुद्रगणेभ्यो सर्वशान्तिकरेभ्यो प्रतिगृह्णन्त्विमं बलिं स्वाहा इति दद्यात्।।

नवयोनिन्यासः - श्रोत्रयोः चुबुके - गण्डयो रास्ये - दृशो र्नासिकायाम् - अंसयो हृदये -कूर्परयोः कुक्षौ - जान्वो रण्डे - पादयोः स्वाधिष्ठाने - पार्श्वयो हृदये - स्तनयोः कण्ठे च - एवं मूलमन्त्रेणखण्डत्रयेण न्यसेत्।।

भद्रकाळी मन्त्र जपविधिः

अस्य श्री भद्रकाळी महामन्त्रस्य प्रत्यङ्गिरा ऋषयः -

उष्णिक् छन्दः - भद्रकाळी देवता – ह्रीं बीजम् -

हुं शक्तिः - (क्रीं) फट् कीलकम् – अभीष्टसिध्यर्थे - जपे विनियोगः।

करन्यासः	अङ्गन्यासः
ओं ह्रां भ्रां अङ्गुष्ठाभ्यां नमः	ओं ह्रां भ्रां हृदयाय नमः।
ओं ह्रीं भ्रीं तर्जनीभ्यां नमः	ओं ह्रीं भ्रीं शिरसे स्वाहा।
ओं ह्रूं भ्रूं मध्यमाभ्यां नमः	ओं ह्रूं भ्रं शिखायै वषट्।
ओं ह्रैं भ्रैं अनामिकाभ्यां नमः	ओं ह्रैं भ्रैं कवचाय हुम्।
ओं ह्रौं भ्रौं कनिष्ठिकाभ्यां नमः	ओं ह्रौं भ्रौं नेत्रत्रयाय वौषट्।
ओं ह्रः भ्रः करतलकरपृष्ठाभ्यां नमः	ओं ह्रः भ्रः अस्त्राय फट्।

भूर्भुवस्सुवरोमिति दिग्बन्धः - ध्यानम् -

श्यामाभां रक्तवस्त्रां ज्वलन शिखयुतां अष्टहस्तां त्रिणेत्रां -
शूलं भेताळ खड्गं डमरुक सहितां वामहस्ते कपालम्।
अन्ये घण्टान्तु खेटां अभय वर युतां चापहस्तां सुदंष्ट्रां -
चामुण्डीं भीमरूपां भुवन भयकरीं भद्रकाळीं नमामि।।

इतिध्यात्वा - स्वहृदि – लमित्यादि पञ्चोपचारपूजां कृत्वा – ततो मूलमन्त्रं जपेत्।

मूलमन्त्राः =

1. ओं ऐं ह्रीं श्रीं भं भद्रकाळि हुं फट् स्वाहा। (दशाक्षरी 10)
2. ओं श्रीं ह्रीं क्लीं ठं ठं भं भं भद्रकाल्यै नमः स्वाहा। (षोडशाक्षरी 16)
3. ओं श्रीं भद्रकाळिके स्वाहा (नवाक्षरीविद्या) (नवाक्षरी 9)

गायत्रीमन्त्रः =

1. भद्रकाल्यै च विद्महे विशालाक्ष्यै च धीमहि तन्नः काली प्रचोदयात्।
2. सिंहध्वजायै विद्महे खड्गहस्तायै धीमहि तन्नः काळी प्रचोदयात्।
3. खगध्वजायै विद्महे खड्ग हस्तायै धीमहि तन्नो भद्रा प्रचोदयात्।।

भद्रकाळी मालामन्त्राः (मन्त्रभेदः)

1. ओं भं भद्रकाळि - त्रिणेत्रि - कालवर्णि – जयशूल कपालधारिणि - प्रेतवाहिणि - सौं रें श्रां रुद्ररूपि - शीतसंपूर्णवक्रि - नवत्वाधिष्ठिते - देवि - महाकाळि - हुंफट् स्वाहा।

2. ओं त्रिणेत्रि - कौशिकाङ्गि - भं गं हं णं मुं ह्रीं घ्रीं श्रीं चामुण्ड्यै नमः।

3. ओं नमो भगवति - महाकाळि - त्रिनेत्रि - अष्टभुजाङ्गि - शूलकपालधारिणि - प्रेतवाहिनि - सौकाररूपिणि - ओंकार भाविनि - शवर्ग हृदयि - पञ्चाङ्ग षडङ्गिनि - ओं ह्रीं श्रीं महाकालिन्यै नमस्स्वाहा।

4. ओं ऐं ह्रीं क्लीं नमो भगवति - महाकाळि - पराभट्टारिके – सर्वजन मनोहारिणि - सर्वमुखरञ्जनि - सर्वराज्यवशंकरि - सर्वस्त्रीपुरुष वशंकरी – सर्वलोकवशंकरि - भक्तपाप क्षयङ्करि – शरणागताना मभययङ्करि - त्रैलोक्यं मे वश मानयानय – प्रसन्ना वरदा नित्यं सन्निध्यं मिह कल्पय – सर्वदुष्ट चित्त वाक् चक्षु मुख जिह्वा गति मति मन्त्र यन्त्र विषचूर्णा भिचार भूत प्रेत पिशाचादि दुष्टानां स्तम्भनं कुरु कुरु - मां रक्ष रक्ष - मम सर्वाणि साधय साधय - ओं ऐं भं भद्रकाल्यै नमो हुंफट् स्वाहा।।

भद्रकाळीमन्त्र जपविधिः (रक्षाकरमन्त्रोश)

अस्य श्री भद्रकाळीमन्त्रस्य ईश्वर ऋषिः त्रिष्टुप् छन्दः श्री भद्रकाळी देवता - लां बीजं - लीं शक्तिः - श्रीं कीलकम् - मम शत्रुसंहारार्थे जपे विनियोगः

करन्यासः	अङ्गन्यासः
लां अङ्गुष्ठाभ्यां नमः	लां हृदयाय नमः
लीं तर्जनीभ्यां नमः	लीं शिरसे स्वाहा
लूं मध्यमाभ्यां नमः	लूं शिखायै वषट्
लैं अनामिकाभ्यां नमः	लैं कवचाय हुम्
लौं कनिष्ठिकाभ्यां नमः	लौं नेत्रेभ्यो वौषट्
लः करतलकरपृष्ठाभ्यां नमः	लः अस्त्राय फट्

भूर्भुवस्सुवरों - हःअस्त्राय हुंफट् - इति दिग्बन्धः - ध्यानम्

या भस्मोद्धूळिताङ्गी भुजग परिवृता व्याघ्रचर्मोत्तरीया -
निर्मांसी मांसभक्षी विगत नरशिरो बद्धमाला कराळी।
चामुण्डा रक्तकर्णी शवशय निरता बद्धमुण्ड प्रचण्डा -
निश्शङ्का कोटराक्षी भय दुरितहरी भद्रकाळी प्रसन्ना।।

लमित्यादिभिः मनसि देव्याः पञ्चोपचारपूजां कृत्वा प्रजपेत्।

मूलमन्त्रः "लां लीं लूं काळि कपालि स्वाहा" (इतिदशाक्षरीमन्त्रः)

भद्रकाळीमन्त्रः जपविधिः

अस्य श्री भद्रकाळी मन्त्रस्य ईशात्रृषिः - पङ्क्तिः छन्दः भद्रकाळी देवता -भां बीजं - भीं शक्तिः - भूं - कीलकं - भद्रकाळी प्रसाद् सिद्ध्यर्थे जपे विनियोगः - भामित्यादि नामाद्यक्षरेणाङ्गानिन्यसेत्।

करन्यासः	अङ्गन्यासः
भां - अंगुष्ठाभ्यां नमः	भां- हृदयाय नमः
भीं - तर्जनीभ्यां नमः	भीं - शिरसे स्वाहा
भूं - मध्यमाभ्यां नमः	भूं - शिखायै वषट्
भैं - अनामिकाभ्यां नमः	भैं - कवचाय हुम्
भौं - कनिष्ठिकाभ्यां नमः	भौं - नेत्रेभ्यो वौषट्
भः - करतलकरपृष्ठाभ्यां नमः	भः अस्त्राय फट्

भूर्भुवस्सुवरोमिति दिग्बन्धः ध्यानम्

खड्गं कपालं डमरुं त्रिशूलं
संबिभ्रतीं चन्द्रकलावतंसाम्।
पिङ्गोर्ध्वकेशीं सितभीमदंष्ट्रां
ध्यायेत् विभूत्यै मम भद्रकाली।।

लमित्यादि पञ्चोपचारपूजां विधाय - मूलमन्त्रंप्रजपेत्।।

"ओं भं भद्रकाल्यै नमः" (इतिअष्टाक्षर मन्त्रः) (प्रपञ्चसारसङ्ग्रहे)

स्तोत्र प्रदक्षिण वन्दनादिकं विधाय - अभीष्टंप्रार्थयेत्।

रक्तचामुण्डी मन्त्र जपविधिः

अस्य श्री रक्तचामुण्डी महामन्त्रस्य शङ्करऋषिः - ह्रीं बीजं – श्रीं शक्तिः - फट् कीलकम् - अनुष्टुप् छन्दः - श्री रक्तचामुण्डी - देवता – अभीष्ट फलसिध्यर्थे - शत्रुक्षयार्थे - चामुण्डीप्रसादसिध्यर्थे - जपे विनियोगः

करन्यासः		अङ्गन्यासः	
ओं श्रीं	अङ्गुष्ठाभ्यां नमः	ओं श्रीं	हृदयाय नमः
ओं ह्रीं	तर्जनीभ्यां नमः	ओं ह्रीं	शिरसे स्वाहा
ओं श्रीं	मध्यमाभ्यां नमः	ओं श्रीं	शिखायै वषट्
ओं ह्रीं	अनामिकाभ्यां नमः	ओं ह्रीं	कवचाय हुम्
ओं श्रीं	कनिष्ठिकाभ्यां नमः	ओं श्रीं	नेत्रेभ्यो वौषट्
ओं ह्रीं	करतल करपृष्ठाभ्यां नमः	ओं ह्रीं	अस्त्राय फट्

एवं करन्यासं अङ्गन्यासं च विधाय – भूर्भुवस्सुवरोमिति दिग्बन्धनं कृत्वा - ध्यायेत्। ध्यानम्

रक्ताभां पीतवस्त्रां स्मित मुख कमलां इन्दुरेखा वतंसां -
दिव्यै र्माणिक्य मुक्ता मणिगण खचितै र्भूषणै र्दीप्यमानाम्।
पुण्ड्रेक्ष्विक्ष्वास बाणारि जलज भुजां फुल्ल पद्मा यताक्षीं -
चामुण्डीं सृङ्ङ् नृमुण्डीं रिपुकुल मथनां शाङ्करीं भावयामि।।

इति ध्यात्वा - स्वहृदि लमित्यादि पञ्चोपचारै र्देवीं संपूज्य - मूलं जपेत्।

मूलमन्त्रः - ओं श्रीं ह्रीं फट् रक्तचामुण्डेश्वरि - शत्रुजीवित नाशिनि - एह्येहि – शीघ्र मिष्टान् आकर्ष याकर्षय स्वाहा।। (३५वर्णाः)

(पञ्चत्रिंशद्वर्णात्मिकाविद्या - अक्षरसहस्रजपेन सिद्धिः)

चामुण्डी मालामन्त्रः

ओं ऐं ह्रीं श्रीं दुं महादुर्गे – नवाक्षरि – नवदुर्गे – नवात्मिके – नवचण्डि - महामाये-महामोहे – महायोगनिद्रे – जये – मधुकैटभ विद्राविणि – महिषासुर मर्दिनि – धूम्रलोचन संहर्त्रि - चण्डमुण्ड विनाशिनि – रक्तबीजान्तके – निशुम्भ विध्वंसिनि – शुम्भ दर्पघ्नि – देवि – अष्टादश बाहुके – कपाल खट्वाङ्ग शूल खड्ग खेटक धारिणि – छिन्नमस्तक धारिणि – रुधिर मांस भोजिनि – समस्त भत प्रेतादि योग विध्वंसिनि – ब्रह्मेन्द्रादि स्तुते – देवि - मां रक्ष रक्ष –मम शत्रून् नाशय नाशय - ह्रीं फट् – हूं फट् - ओं ऐं ह्रीं क्लीं चामुण्डायै विच्चे स्वाहा।।





महाशास्तृ मन्त्र जपविधिः

अस्य श्री महाशास्तृ महामन्त्रस्य - अर्धनारीश्वरो ऋषिः - अनुष्टुप् छन्दः - महाशास्ता देवता - ह्रीं बीजं – श्रीं शक्तिः - इष्टसिध्यर्थे जपे विनियोगः - ह्रीं इत्यादिभिः मन्त्रपदैर्वा षडङ्गानि न्यसेत्।

करन्यासः	अङ्गन्यासः
ह्रां अङ्गुष्ठाभ्यां नमः	ह्रां हृदयाय नमः
ह्रीं तर्जनीभ्यां नमः	ह्रीं शिरसे स्वाहा
ह्रूं मध्यमाभ्यां नमः	ह्रूं शिखायै वषट्
ह्रैं अनामिकाभ्यां नमः	ह्रैं कवचाय हुम्
ह्रौं कनिष्ठिकाभ्यां नमः	ह्रौं नेत्रेभ्यो वौषट्
ह्रः करतल करपृष्ठाभ्यां नमः	ह्रः अस्त्राय फट्

इति अङ्गानि विन्यस्य – भूर्भुवस्सुवरोम् इति दिग्बन्धः - ध्यानम्

ध्यानम् – आश्याम कोमल विशाल तनुं विचित्र
वासो वसान मरुणोत्पल दान हस्तम्।
उत्तुङ्ग रत्न मकुटं कुटिलाग्र केशं
शास्तार मिष्टवरदं शरणं प्रपद्ये।।

मूलमन्त्रः ओं श्रीं ह्रीं हरिहरपुत्राय पुत्रलाभाय शत्रुनाशाय मदगजवाहनाय महाशास्त्रे नमः। (33000 जपः)

धात्री स्वरूपोक्तिः (वैखानसागमे) अथर्वण भद्रकाळी

ऐशान्यां – रक्ताभा – श्यामाम्बरधरा – उग्रनयना – महारौद्री – दंष्ट्राभ्या मलङ्कृता – बालमौल्युक्तरांसगा – त्रिशूला – षड्भुजा – भ्रूभङ्गविकटा – कपाल पाश हस्ता – रक्तकुञ्चित मूर्धजा – अट्टहास सहिता – अवग्रपीठ समासीना – डमरूक ध्वनियुता – नाम आद्यक्षरबीजा – पिशाच ध्वजवाहना – आर्द्रा नक्षत्रजाता- धात्री – ध्येया – तां – धात्रीं- महोदरीं – रौद्रीं – महाकाळी मिति – चतुर्भिः नामभिः संयजेत्।। (इति श्री बैखानसागमे - सप्तप्राकार विष्णोरालये परिवारविधौ मरीचिसंहितायां गद्यरूपे विंशतितमे अध्याये प्रोक्तं काली स्वरूपम्)

प्रत्यङ्गिरा रूपभेद ध्यानानि

1. सिंही ध्यानम्

रोगो पद्रव शत्रु भीति विधि कृत् क्रूराहि शूकोल्बणो
दुष्ट रिष्ट पिशा चजाः बहु विधा स्ता आपदो ह्यामयाः।
यद् ध्यानात् प्रशमं प्रयान्ति सहसा सा प्रत्यङ्गिरा ऽवतात्
डक्का शूल कपाल पन्नग करा सिंही मृगेन्द्रासना।।

2. रिपुनाशिनी प्रत्यङ्गिरा ध्यानम्

श्यामाभाञ्च त्रिनेत्रां तां सिंहवक्त्रां चतुर्भुजाम्।
ऊर्ध्वकेशीं च सिंहस्थां चन्द्राङ्कित शिरोरुहाम्।
कपाल शूल डमरू नागपाश धरां शुभाम्।
प्रत्यङ्गिरां भजे नित्यं सर्वशत्रु विनाशिनीम्।।

3. भैरवीप्रत्यङ्गिराध्यानम्

सिंहीं सिंहमुखीं सखीं भगवतः श्री भैरवोल्लसत् -
शूल स्थूल कपाल पाश डमरु व्यग्राग्र हस्ताम्बुजाम्।
दंष्ट्रा कोटि विशंक टास्य कुहरा मारक्त नेत्र त्रयां -
बालेन्दु ज्वल मौळिकां भगवतीं प्रत्यङ्गिरां भावये।।

4. शाङ्करीप्रत्यङ्गिराध्यानम्

आशाम्बरा मुक्तकचा घनच्छविः ध्येया स चर्मासि कराऽहिभूषणा।
दंष्ट्रोग्र वक्त्रा ग्रसिता ऽहिता न्वया - प्रत्यङ्गिरा शङ्कर तेजसे रिता।।

5. कृष्णाप्रत्यङ्गिराध्यानम्

सिंहारूढा ऽति कृष्णं त्रिभुवन भय कृत् रूप मुग्रं वहन्ती -
ज्वाला वक्त्रा वसाना नव वसन युगं नील मण्याभ कान्तिः।
शूलं खड्गं वहन्ती निजकर युगले भक्त रक्षैक दक्षा -
सेयं प्रत्यङ्गिरा सं क्षपयतु रिपुभि र्निर्मितं वो ऽभिचारम्।।

6. रक्ताधन्विनीप्रत्यङ्गिराध्यानम्

भुजैश्चतुर्भिर्धृततीक्ष्ण बाण
धनु र्वराभी श्च शवांघ्रि युग्मा।
रक्ताम्बरा रक्त तनु स्त्रिनेत्रा
प्रत्यङ्गि रेयं प्रणतं पुनातु।।

7. रोगघ्नाप्रत्यङ्गिराध्यानम्

श्यामाभां दवेहस्तां त्रिनयन लसितां सिंहवक्रोर्ध्व केशीं
शूलं मुण्डं च सर्पं डमरु भुज युतां कुन्तला दुग्र दंष्ट्राम्।
रक्ते ष्वालीड जिह्वां ज्वल दनल गायत्रि सावित्रि युक्तां
ध्यायेत् प्रत्यङ्गिरां तां मरण रिपु विष व्याधि दारिद्र्य नाशाम्।

8. जगदीश्वरी प्रत्यंगिराध्यानम्

एकवक्रां त्रिनयनां ऊर्ध्वकेश समन्विताम्।
श्यामवर्ण समायुक्तां चतु र्दोर्दण्ड मण्डिताम्।
प्रसन्न वदनां देवीं दुकूल वसना न्विताम्।
शूलं डमरुकं चैव कपालं पाश मेवच।
बिभ्रतीं फुल्ल नयनां नानाभरण भूषिताम्।
सर्वाभरण संयुक्तां सर्वावयव सुन्दरीम्।
शयनं वामपादं च लम्बितं सव्यपादकम्।
दिव्य सिंहासनासीनां दिव्यमाल्यानु भूषिताम्।
एवं ध्यात्वा विशेषेण पूजयेत् जगदीश्वरीम्।।

9. भद्रकालीप्रत्यङ्गिराध्यानम्

श्यामाभां रक्तवस्त्रां ज्वलन शिख युतां अष्ट हस्तां त्रिनेत्रां -
शूलं भेताळ खड्गं डमरुक सहितां वाम हस्ते कपालम्।
अन्ये घण्टां तु खेटां अभय वरयुतां चापहस्तां सुदंष्ट्रां -
चामुण्डीं भीमरूपां भुवन भयकरीं भद्रकालीं नमामि।।

10. भीमाकालीध्यानम्

खड्गं कपालं डमरुं त्रिशूलं - सं बिभ्रतीं चन्द्रकला वतंसाम्।
पिङ्गोर्ध्व केशीं सित भीमदंष्ट्रां - भूयात् विभूत्यै मम भद्रकाळी।।

11. मुण्डमालिनीकालीध्यानम्

कालाभ्रां श्यामलाङ्गीं विगळित चिकुरां खड्ग मुण्डा भिरामां -
त्रास्य त्राणेष्ट दात्रीं कुणप गण शिरो मालिनीं दीर्घ नेत्राम् ।
संसार स्यैक सारां भव जनन हरां भावितो भावनाभि: -
क्षन्तव्यो मे ऽपराध: प्रकटित वदने कामरूपे कराळे ।।

12. उग्रकृत्या प्रत्यङ्गिरा ध्यानम्

सहस्त्र वदनां देवीं शतबाहु त्रिलोचनाम्।
रक्तमाल्याम्बरधरां सर्वाभरण भूषिताम्।
शक्तिं प्रत्यङ्गिरां देवीं प्रतिकूल निवारिणीम्।
मन्त्रसिद्धिं च तां देवीं चिन्तयामि हृदम्बुजे।
प्रत्यङ्गिरां शापहरां भूतप्रेत विनाशिनीम्।
चिन्तयेत् उग्रकृत्यां तां परमैश्वर्य दायिनीम्।।

13. महाकृत्या प्रत्यङ्गिरा ध्यानम्

ध्यायेत् समस्त शत्रुघ्नीं सर्वसौख्य दयालयाम् ।
कालीं कङ्काल वदनां काल जीमूत सन्निभाम्॥
भीम दंष्ट्रां ज्वलन्नेत्रीं भूयो ज्वाला शिखोज्वलाम्।
अष्ट नाग कृता कल्पां अष्ट दिग्पूर्ण विग्रहाम्॥
सहस्त्र भुज दण्डोध्यत् सहस्रायुध शोभिताम्।
बिभ्रतीं किंकिणी मालां आपाद दल लंबिकाम्॥
समस्त शत्रु रुधिर पानोन्मत्तां परां शिवाम्।
पर प्रयुक्त कर्मध्नीं परराष्ट्र प्रदायिनीम् ।
एवं ध्यायेत् महाकृत्यां सर्वसंपत् समृद्धये ॥

14. घोरकालिका ध्यानम्

क्षुत्श्यामां कोटराक्षीं प्रळय घनघटां घोररूपां प्रचण्डां -
दिग्वस्त्रां पिङ्ग केशीं डमरु सृणि धृतां खड्ग पाश भयानि।
नागं घण्टां कपालं कर सरसि रुहैः कालिकां कृष्णवर्णां -
ध्यायामि ध्येयमानां सकल सुखकरीं कालिकां तां नमामि।।

15. वरदा प्रत्यङ्गिरा ध्यानम्

रोगो पद्रव शत्रु भीति विधि कृत् क्रूराहि शूकोल्बणो -
दुष्टा रिष्ट पिशा चजाः बहु विधा स्ता आपदो ह्यामयाः।
यद् ध्यानात् प्रशमं प्रयान्ति सहसा सा प्रत्यङ्गिरा ऽवतात्
डक्का शूल कपाल पन्नग करा सिंही मृगेन्द्रासना।।

16. शत्रुघ्नीप्रत्यंगिराध्यानम्

उूर्ध्वकेशीं च सिंहस्थां चन्द्रांकित शिरोरुहाम्।
कपाल शूल डमरू नागपाश धरां शुभाम्।
प्रत्यङ्गिरां भजे नित्यं सर्वशत्रु निवाशिनीम्।।

17. प्रत्यङ्गिरायाः स्वरूप ध्यानम्।

सिंहवक्त्रोग्र दंष्ट्राग्नि सप्रभोर्ध्व शिखान्विताम्।।
कृष्णाञ्जन निभां वृत्त रक्त नेत्र त्रयान्विताम्।
वहन्तीं सव्यहस्ताभ्यां शूलं डमरुकं परम्।।
वहन्तीं वामहस्ताभ्यां मुण्डं शेषे तु पल्लवम्।
अट्टहासादि शब्दैस्तु गर्जितां मुदिता मपि।।
कृष्णाम्बरधरां सासृङ् मांसास्यां नर्तने रताम्।
मौक्तिका भरणै र्योग्यैः सर्वा वयव भूषिताम्।।
कृष्णाजिन धरां नाम्ना भैरवी मर्चितां सुरैः।
देवीं ध्यात्वैक चित्तस्तु सर्वशत्रून् विनाशयेत्।।
ध्वंसयेत् सर्वरोगांश्च परमन्त्रान् निवारयेत्।

18. क्रूरकाली ध्यानम्

ज्वालाकेश समन्वितां त्रिनयनां चानन्द कोलाहलां -
हस्तै श्शूल कपालकान् विमलजै पाशाङ्कुशं बिभ्रतीम्।
सव्ये लम्बित वाम निद्रित पदां पद्मासने संस्थितां -
क्रूरां रत्नविभूषितां च शुभदां देवीं भजे काळिकाम्।।

19. रिपुनाशिनी प्रत्यङ्गिराध्यानम्

श्यामाभाञ्च त्रिनेत्रां तां सिंहवक्त्रां चतुर्भुजाम्।
ऊर्ध्वकेशीं च सिंहस्थां चन्द्राङ्कित शिरोरुहाम्।
कपाल शूल डमरु नागपाश धरां शुभाम्।
प्रत्यङ्गिरां भजे नित्यं सर्वशत्रु विनाशिनीम्।।

20. संहारिणीकालीध्यानम्

काळीं मेघ समप्रभां त्रिनयनां वेताळ कण्ठ स्थितां -
खड्गं खेट कपाल दारुक शिरः धृत्वा कराग्रेषु च।
भूत प्रेत पिशाचयिइतृ सहितां मुण्ड स्रजा लङ्कृतां -
वन्दे दुष्टतमासुरादि विमदां संहारिणीमी श्वरीम्।।

21. वरदाकालीध्यानम्

चतुर्भुजां त्रिणेजां च कालकण्ठीं च कर्णिकाम्।
दंष्ट्रा कराळ वदनां व्याघ्र चर्माम्बरा वृताम्।
पाशं डमरुकं चैव कपालं शूल मेव च।
किङ्किणी मालया युक्तां भजेत् काळी वरप्रदाम्।।

अष्टमातृ ध्यानानि

ब्राह्मी ध्यानम्

चतुर्भुजां चतुर्वक्त्रां पीत माल्याम्बरो ज्वलाम्।
वरदा भय हस्तां च साक्षमालां स गण्डिकाम्।
जटा मकुट संयुक्तां हंस वाहन सं स्थिताम्।
सर्वाभरण संयुक्तां ब्राह्मीं ध्यात्वा प्रपूजयेत्।।

माहेश्वरी ध्यानम्

एकवक्त्रां त्रिणेत्रां च महादेवीं चतुर्भुजाम्।
जटामकुट संयुक्तां शुक्लवर्णां सुशोभिताम्।
वरदाभय हस्तां तां मृगं टङ्कं च धारिणीम्।
वृषवाह समारूढां वन्दे माहेश्वरीं शुभाम्।

कौमारी ध्यानम्

एकवक्त्रां द्विनेत्रां च चतुर्भुज समन्विताम् ।
जटामकुट संयुक्तां नीलवर्णां सु यौवनाम्।
वरदाभय हस्तां तां वज्रं शक्तिं च धारिणीम्।
सर्वलक्षण सम्पन्नां कौमारीं तां विभावयेत्।।

वैष्णवी ध्यानम्

एकवक्त्रां द्विनेत्रां च चतुर्भुज समन्विताम् ।
वराभयकरां श्यामां शङ्खं चक्रं च धारिणीम्।
नव यौवन सम्पन्नं श्रीमद् गरुड वाहिनीम्।
सर्व लक्षण संपन्नां वैष्णवीं देविकां भजे।।

वाराही ध्यानम्

एकवक्त्रां द्विनेत्रां च चतुर्भुज समन्विताम्।
कृष्णाम्बर धरां देवीं वराह चक्र संयुताम्।
हल मुसल हस्तां तां वराभय कराम्बुजाम्।
सिंहवाह समारूढां किरीट मकुटोज्वलाम्।
सर्वालङ्कार संपन्नां वाराहीं पूजये त्ततः।

इन्द्राणीध्यानम्

एकवक्त्रां द्विनेत्रां च चतुर्भुज समन्विताम् ।
सरत्न मकुटोपेतां हेमवर्ण स्वरूपिणीम्।
वराभय कराम्बुजां वज्रं शक्तिं च धारिणीम्।
माहेन्द्रीं मातरं वन्दे गज वाहन संस्थिताम्।।

चामुण्डाध्यानम्

चतुर्भुजां त्रिणेत्रां च कालमेघ समप्रभाम्।
दंष्ट्रा कराळ वदनां व्याघ्र चर्माम्बरो ज्वलाम्।
सखड्गां शूलहस्तां च कपाला ऽभय धारिणीम्।
किङ्किणी मालया युक्तां नरवाहन संस्थिताम्।
पीनस्तनीं यौवनां च चामुण्डां भावयेत् सदा।।

चण्डिका ध्यानम्

एकवक्त्रां शिरोज्वालां रक्तनेत्रां भुजाष्टकाम्।
नीलाङ्गीं घोरदंष्ट्रां च नाना लङ्कार भूषिताम्।
चाप बाण कपालासि शूल चक्र गदा युधाम्।
वन्दे चण्डीं सिंह संस्थां विजितासुर सैनिकाम्।।



ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

मन्त्राणां पुरश्चरण विषयाः

विभागः - 6

पुरश्चरण प्रयोगः
(मन्त्रोपासकानां मन्त्रप्रयोग विधिः)

मन्त्र पुरश्चरणस्य आवश्यकता

जीवहीनो यथा देहो सर्व कर्मसु न क्षमः।
पुरश्चरण हीनो ऽपि तथा मन्त्रः प्रकीर्तितः।।

पुरश्चरणक्रिया परिचयः

पुरश्चरणम् = पुरो = अग्रतः, चरणं = मन्त्रजपादि पञ्चाङ्ग कर्माचरणम्।। पुरश्चरणक्रिया तु स्वेष्टदेवतायाः मन्त्रसिद्ध्यर्थं तद्देवता पूजापूर्वकं मन्त्रस्य जप होम तर्पणा भिषेक ब्राह्मण भोजनरूप पञ्चाङ्गसाधना भवति।

स्थाननिर्णयः

पुण्यक्षेत्रं नदीतीरं गुहा पर्वत मस्तकम्।
तीर्थप्रदेशः सिन्धूनां सङ्गमः पावनं वनम्।
देवतायतनं कूलं समुद्रस्य निजं गृहम्।
साधनेषु प्रशस्तानि स्थाना न्येतानि मन्त्रितम्।
अथवा निवसेत् तत्र यत्र चित्तं प्रसीदति।। (योगिनीहृदये)

वर्ज्य भक्ष्यादि नियमः।

विवर्जयेन् मधु क्षार लवणं तैल मेव च।
ताम्बूलं कांस्यपात्रं च दिवा भोजन मेव च।
मैथुनं तत्कथाऽऽलापं तद्गोष्ठीः परिवर्जयेत्। (योगिनीतन्त्रे)

साधकस्य आचरणीयाः धर्माः

भूशय्या ब्रह्मचारित्वं मौन माचार्य सेविता।
नित्यपूजा नित्यदानं देवता स्तुति कीर्तनम्।
नित्यं त्रिषवणं स्नानं क्षुद्रकर्म विवर्जनम्।
नैमित्तिकार्चनं चैव विश्वासो गुरुदेवयोः।
जपनिष्ठा द्वादशैते धर्माः स्यु र्मन्त्र सिद्धिदाः।। (कुलार्णवतन्त्रे)

जपविधौ पूजाविधिः

त्रिसन्ध्यं प्रजपेन्मन्त्रं पूजनं तत्समं भवेत्।
एकदा सा भवेत्पूजा न जपेत् पूजनं विना।।
जपान्ते वा भवेत्पूजा पूजान्ते वा जपेत् मनुम्। (कुलार्णवे)

जपकालेवर्ज्याः नियमाः

आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम्।
नीचाङ्ग स्पर्शनं कोपं जपकाले विवर्जयेत्।।

जपनियमः

एकभुक्त विधानेन विलम्बं त्वरितं विना।
उक्तसङ्ख्यं जपं कुर्यात् पुरश्चरण सिद्धये।।

जपकाले भावनाविधिः

देवता गुरु मन्त्राणां ऐक्यं संभावयन् धिया।
जपेत् एकमनाः प्रातः कालं मध्यन्दिनावधि।। (कुलार्णवतन्त्रे)

होमनियमः

ततो जपदशांशेन होमं कुर्यात् दिने दिने।
अथवा लक्ष संख्यायां पूर्णायां होम माचरेत्।।
होमाभावे जपः कार्यो होमसङ्ख्या चतुर्गुणः।।

गुरुपूजा

गुरवे दक्षिणां दद्यात् भोजनाच्छादनादिभिः।
गुरुसन्तोष मात्रेण मन्त्रसिद्धि र्भवेद् ध्रुवम्।।
गुरोरभावे पुत्राय तत्पत्न्यै वा निवेदयेत्।
तयो रभावे देवशि ब्राह्मणेभ्यो निवेदयेत्।।

सुवासिनीपूजा

तदन्ते महतीं पूजां कुर्यात् साधक सत्तमः।
सुवासिनीं कुमारीं च भूषणै रपि भूषयेत्।।

मिष्टान्नं बहुशः कार्यं भुञ्जीत बन्धुभिः सह।
एवं सिद्धमनु र्मन्त्री साधयेत् सकलेप्सितान्।।

ग्रहणकाले पुरश्चरणम्

चन्द्र सूर्योपरागे चेत् स्नात्वा प्रयत मानसः।
स्पर्शनादि विमोक्षान्तं जपेन् मन्त्रं समाहितः।
जपात् दशां शतो होमं तथा होमात् तु तर्पणम्।
एवं कृत्वा तु मन्त्रस्य जायते सिद्धिरुत्तमा।।

पुश्चरणकालः

कार्तिकाश्विन वैशाख माघेऽथ मार्गशीर्षके।
फाल्गुने श्रावणे दीक्षा पुरश्चर्या प्रशस्यते।।

पुरश्चरण प्रयोग: (मन्त्रोपासकानां)

पुरश्चरणात् प्राक् – तृतीयदिवसे – पुण्यक्षेत्रादिकं गत्वा – भूमेः परिग्रहं कुर्यात्। तथाहि – अमुकमन्त्रस्य (अत्रसाध्यमन्त्रनाम) यथाहि प्रत्यङ्गिरामन्त्रस्य इति- पुरश्चरणसिद्धये – मया – इयं भूमिः गृह्यते मन्त्रोऽय सिध्यता मिति भूमिदेवीं संप्रार्थ्य- पुण्यक्षेत्र भूमिं आदे प्रणम्य-

पुण्यक्षेत्रादिकं गत्वा कुर्यात् भूमेः परिग्रहम्।
तथा ह्यमुक मन्त्रस्य पुरश्चरण सिद्धये।
मयेयं गृह्यते भूमिः मन्त्रोऽयं सिध्यता मिति।
क्षेत्रपालादिकं तत्र पूजयेत् विधिवत् ततः।
क्षेत्रेशं वास्तुनामानं विघ्नराजं समर्चयेत्।
दिक्पालेभ्यो बलिं दद्यात् ततः क्षेत्रं समाविशेत्।।

ततः क्षेत्रपालभैरवं संपूज्य - संप्रार्थ्य - तत्र - वास्त्वधिपतिं ब्रह्माणं चाभ्यर्च्य - बल्यादिभिः सन्तोष्य - तत्र पूर्वं - विघ्नराजं - हरिद्राबिम्बकूर्चादिषु समभ्यर्च्य -निर्विघ्नाय प्रार्थयेत्। पूर्वाद्यष्टदिक्षु - इन्द्रादिभ्यो - माषभक्त दध्यन्नेन बलिं दत्वा, पूजितदेवताभ्यो बलिं दद्यात्।

ततः स्नात्वातु गायत्र्याः सहस्रं प्रयतो जपेत्।
ज्ञाताज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः।। इतिवचनप्रकारेण -

ततः प्रातः स्नात्वा पापक्षयार्थं गायत्रीं - सहस्रवारं प्रयतो जपेत्।
ततः उपवासं हविष्यभोजनं वा कुर्यात् - तत्परदिने उषसि
स्नानादिकं कृत्वा - स्वस्तिवाचनपूर्वकं -सङ्कल्पं कुर्यात्।।

शुभे शोभने मुहूर्ते -श्री परमेश्वरप्रीत्यर्थं -अमुक गोत्रः -
अमुकशर्मा नामाऽहं -अमुकदेवतायाः -(प्रत्यंगिराम्बायाः इतिवत्)

अमुकमन्त्रसिद्धि – प्रतिबन्धकता अशेष दुरित क्षयपूर्वक - तन्मन्त्र सिद्धिकामो - अद्य आरभ्य यावता कालेन सेत्स्यति तावत्कालं अमुकदेवतायाः (प्रत्यङ्गिरायाः) अमुकमन्त्रस्य षड्विंशार्णमन्त्रस्य) इयत् सङ्ख्यजप (अक्षरलक्षजप) तद्दशांश होम – तद्दशांशतर्पण – तद्दशांशाभिषेक - तद्दशांश ब्राह्मणभोजनरूपं - पुरश्चरण महं करिष्ये। इति सङ्कल्प्य।

जपक्रमः = अथ प्राणायामादिकं कृत्वा -भूतशुद्धि पूर्वक स्वदेह मन्त्रन्यासदिना -अन्तर्यजन हवन ध्यान समाधि - प्रार्थनादिकं विधाय - तत्र -प्रज्वलिते अनिर्वाण प्रदीपे - पूज्यचक्रे वा स्वस्व - पूजापद्धत्युक्तप्रकारेण -स्वगुरूपदिष्टमार्गेन - इष्टदेवतां - संपूज्य - प्रज्वलितदीपे - देवतां विचिन्त्य - स्वहृदये - देवतां ध्यायन् - अनन्यमानसः - प्रातःकाला दारभ्य - मध्यंदिनंयावत् -निश्चितसङ्ख्यया - जपं कुर्यात्।

होमक्रमः = दशांशं हवनं होमात् दशांशं तर्पणं ततः।
दशांशं मार्जनं तस्मात् दशांशं विप्रभोजनम्।।

इत्युक्तवत् जप्तसङ्ख्यायाः दशांशसङ्ख्यया वह्नौ आहुतीभिः विधिवत् होमं कुर्यात्।

तर्पणक्रमः = होमान्ते - तन्मन्त्रेणैव - नमोन्तेन - तर्पयामीत्युत्त्वा - सुगन्धक्षीरसलिलैः - देवतां - सन्तर्पयेत्। तद्यथा–

तर्पणं तु ततः कुर्यात् तीर्थोदैश्चन्द्र मिश्रितैः।
जले देवं समावाह्य पाद्याद्यै रुदकात्मकैः।
संपूज्य विधिवत् भक्त्या परिवार समन्वितम्।
एकैकं अञ्जलिं तोयं परिवारान् प्रतर्पयेत्।
ततो होमात् दशोशेन तर्पयेत् परदैवतम्।।

तर्पणवाक्यं तु = प्रणवादि नमोन्तं च मूलमन्त्रं श्री अमुकं तर्पयामिनमः इति। ओं ह्रीं प्रत्यङ्गिरांतर्पयामि नमः'' इति मन्त्रेण तर्पयेत्।

मार्जनक्रमः = मन्त्रान्ते नामचोच्चार्य सिञ्चामीति नमः पदम्। इत्युक्तवत् नमोन्तमूलेन श्री अमुकं सिञ्चामि नमः इति मन्त्रेण अभिषिञ्चेत्। चक्रमध्ये कुशकूर्चोपरि वा जलेन - जप्तमूलमन्त्रान्ते ''ओं ह्रीं प्रत्यङ्गिरां सिञ्चामि नमः।। इति कराञ्जलितीर्थेन यथा सङ्ख्या अभिषिञ्चेत्।

ब्राह्मणभोजनक्रमः = ततो ब्राह्मणान् आहूय - वस्त्र गन्ध पुष्पादिभिः तान् उपचारैः - सन्तोष्य - षड्रसोपेतं अन्नं भोजयित्वा - ततः दक्षिणा ताम्बूलैश्च सन्तोषयेत् तेभ्यो आशीः स्वीकुर्यात्।। एवं कृते प्रत्यङ्गिरायाः मन्त्रसिद्धिं प्राप्नुयात्।।

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

मन्त्राणां प्रयोग विषयाः

विभागः - 7

दिनास्त्र कृत्यास्त्र मन्त्रयोः प्रयोगविधिः

अथोदितास्त्रं कृत्यास्त्रं वक्ष्ये शत्रु विमर्दनम्।
अतिदुर्गां मनुं प्राहुः दिनास्त्रं मन्त्र वित्तमाः।।

अतिदुर्गेय मित्याद्या षडन्ता त्रिष्टु बीरिता।
प्रतिलोम मिमं मन्त्रं कृत्यास्त्रं प्रतिचक्षते।।

दिनास्त्रस्य षडङ्गादीन् प्रतिलोमादिकान्विदुः।``

मूलमन्त्र प्रतिलोम क्रमः

पूर्वोक्ता एव मुन्याद्या मन्त्र स्यास्य प्रकीर्तिताः।।

वर्ण न्यास पद न्यासौ विदध्यात् प्रतिलोमतः।
ध्यानभेदान् विजानीयात् गुर्वादेशान् नचान्यथा।।

पूर्ववत् जप क्लृप्ति स्स्यात् जुहुयात् पूर्व सङ्ख्या।
पञ्चगव्य सुपक्केन चरुणा तस्य सिद्धये।।

अर्यनं पूर्ववत् कुर्यात् शक्तिस्तु प्रतिलोमतः।
सर्वत्र देशिकः कुर्यात् गायत्र्या द्विगुणं जपम्।। (शारदातिलके)

मन्त्रवर्ण प्रयोग विधिः

क्रूर कर्माणि कुर्वीत प्रतिलोम विधानतः।
शान्तिकं पौष्टिकं कर्म कर्तव्य मनुलोमतः।। (प्रयोगसारे)

सर्वमन्त्राणां साधारण चतुरङ्गविधिः

जपश्च तर्पणं होमः ब्राह्मणाराधनं तथा।
चतुरङ्ग मिति ख्यातं तस्मात् यत्नेन कारयेत्।
स्वात्मनाथ मुखात् मन्त्रं शुश्रुवे विधिवद् यदा।
तदाऽदि सिद्धिपर्यन्तं गर्भस्था मन्त्रदेवता।
जपे पूर्णे तत स्स्वन्ते जायते मन्त्रदेवता।
तन्मनो दर्शनं यत्तत् प्रथमाङ्ग मुदाहृतम्।
ततश्च तर्पणात्पूर्वं मन्त्र्य देवो न वर्धते।
वरेण्यं तर्पणं तस्मात् यत्ने नापि समाचरेत्।
वर्धमानो भवेद् देवः तर्पणा रम्भणादितः।
समाप्तौ वर्धितं यत्तत् द्वितीयाङ्ग मुदाहृतम्।
विधिनोक्तेन होमेन मन्त्रदेवः प्रभु र्भवेत्।
सर्वाधिकं प्रभुत्वं यत् तृतीयाङ्ग मुदाहृतम्।
ब्राह्मणा राधनाद् देवी दयावान् वरदो भवेत्।
तेन लब्धं प्रसादं यत् तत् चतुर्थं मुदाहृतम्।
मन्त्तिणां मन्त्रसिद्ध्यर्थं चतुरङ्ग मुदाहृतम्। (प्रयोगसारे)

೨

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

काळीपूजाङ्ग मन्त्रन्यासावळिः

विभागः - 8

भद्रकाळी प्रतिष्ठायागशाला कलशस्थानानि च



1.चन्द्र:पालिका:
2. सूर्य:
3. शान्तिकला
4. कालरात्री
5. महाकाली
6. विद्याकला
7. शङ्खिनी
8. विजया
9. निवृत्तिकला
10. वारुणी
11. सिंहासनी
12. प्रतिष्ठाकला
13. दाक्षायिनी
14. कलाधरी
15. सावित्री
16. महालक्ष्मी
17. यागेश्वर:
18. यागेश्वरी
19. शचीदेवी
20. स्वाहादेवी
21. मालिनी
22. जाता
23. गङ्गा
24. समीरणी
25. हेमाम्बा
26. रुद्राणी
27. वागीश्वरी
28. नारायणी
29. विघ्नेश्वर:
30. सप्तगुरव:
31. चतुर्वेदमूर्तय:

भद्रकाळीप्रतिष्ठा यागमण्डप देवतार्चनम् (उत्तरकारणे)

पूर्वद्वारतोरणे = शान्ति कलायै - आदिशक्त्यै – कुंभिनी तोरणायै - नमः इति
दक्षिणद्वारतोरणे = विद्या कालायै - इच्छाशक्त्यै - निकुंभिनी तोरणायै – नमः इति
उत्तरद्वारतोरणे = प्रतिष्ठा कलायै - ज्ञानशक्त्यै – जृम्भिनी तोरणायै – नमः इति
पश्चिमद्वारतोरणे = निवृत्ति कलायै - क्रियाशक्त्यै – मग्गिनी तोरणायै – नमः इति

पूर्वद्वार वामपार्श्वे – ओं नन्दिन्यै नमः
पूर्वद्वार दक्षिणपार्श्वे – ओं कुण्डोदर्यैनमः
दक्षिणद्वार पूर्वपार्श्वे – ओं काल्यै नमः
दक्षिणद्वार पश्चिमपार्श्वे – ओं काळरात्र्यै नमः
पश्चिमद्वार दक्षिणपार्श्वे – ओं भद्रायै नमः
पश्चिमद्वार उत्तरपार्श्वे – ओं कोमल्यै नमः
उत्तरद्वार पश्चिमपार्श्वे – ओं यामळ्यै नमः
उत्तरद्वार पूर्वपार्श्वे – ओं पाशाङ्ग्यै नमः

तृतीयावरणे अष्टकलशेषु पूज्या:

1. पूर्वद्वारे दक्षिणे ओं काळरात्र्यै नमः
2. पूर्वद्वारे वामे ओं महाकाल्यै नमः
3. दक्षिणद्वारस्य दक्षिणे ओं शङ्खिन्यै नमः
4. दक्षिणद्वारस्य वामे ओं विजयायै नमः
5. पश्चिमद्वारस्य दक्षपार्श्वे ओं वारिण्यै नमः
6. पश्चिमद्वारस्य वामपार्श्वे ओं सिंहवक्त्र्यै नमः
7. उत्तरद्वारस्य दक्षपार्श्वे ओं दाक्षायण्यै नमः
8. उत्तरद्वारस्य वामपार्श्वे ओं हलधर्यै नमः।

पूर्वाद्यष्टदिग्स्थित कृष्णध्वजेषु –

1. स्तंभिन्यै - 2. मोहिन्यै - 3. ज्वालामुख्यै - 4. तटाकेश्यै -
5. स्वच्छन्दायै - 6. त्रिशिरायै - 7. बहुरूपिण्यै – 8. विलासिन्यै -

कालीयागमण्डपस्य पश्चिमद्वारबह्ये नित्यद्वारदेवताः

पश्चिमद्वार सव्ये ओं कपालिन्यै नमः -
द्वार असव्ये - ओं त्रिदश मोहिन्यै नमः -
द्वार उत्तरे ओं मनस्यैनमः - तदुत्तरे - ओं मानस्यै नमः -
द्वारस्य सव्यदेहळयां - ओं उद्यान भैरवाय नमः
द्वारस्या वाम देहल्यां - ओं मन्युभैरवाय नमः
द्वारोत्तरे देहळीवामे - ओं विकृत्यै नमः
द्वारोत्तरे देहळीदक्षिणे - ओं कोटराक्ष्यै नमः
अधोदुम्बरे - ओं अस्त्राय नमः इतिसंपूज्य – ततो –

यागालयस्य स्तम्भेषु - अनन्तादि महानागेभ्यो नमः - नागमातृभ्यो नमः इति संपूज्य-

कालीयागमण्डपे = पूर्वादीशानान्त - लोकपालस्थानस्थित - कलशेषु – तृतीयावरणदेवताः यजेत् - तद्यथा-

1. ओं कोटराक्ष्यै नमः
2. ओं विशालाक्ष्यै नमः
3. ओं मुक्तकेश्यै नमः
4. ओं सुभीषण्यै नमः
5. ओं हरिवक्रयै नमः
6. ओं हयग्रीव्यै नमः
7. ओं तिम्मिरिलिन्यै नमः
8. ओं नीललोचन्यै नमः

कालीआलयनित्यद्वारपूजा

द्वारदक्षिणे - ओं अङ्ग भूतायै नमः
द्वारोत्तरे - ओं संहार भूतायै नमः
दक्षिण कवाटे - ओं नर भोजिन्यै नमः

उत्तर कवाटे - ओं शुष्काङ्ग्यै नमः
अधो देहल्यां - ओं अधोमुख्यै नमः
ऊर्ध्व देहल्यां - ओं ऊर्ध्वकेश्यै नमः
दक्षिण स्तम्भे - ओं कालदूत्यै नमः
उत्तर स्तम्भे - ओं पैशाचेन्द्यै नमः
द्वारोर्ध्वे - मध्ये - ओं अकाशमात्रे नमः
द्वाराग्रे - ओं सिंहशक्त्यै नमः
द्वारपार्श्वे - ओं हेतुक भेताळाय नमः
द्वारपार्श्वे - ओं एकपाद भेताळाय नमः

इति नित्यद्वारदेवतास्संपूज्य – काल्यालय द्वारदेवताभ्यस्स्वाहा - इति अर्घ्यं दत्सा - नमस्कारमुद्रां प्रदर्श्य – ततः अन्तः प्रविशेत् ।।



काळीपूजाङ्ग मन्त्रन्यासावळिः

कालिका ब्रह्मशक्तिन्यासः

ओं ह्रीं श्रीं क्रों ईशानायै उमायै नमः मूर्ध्नि

ओं ह्रीं श्रीं क्रें तत्पुरुषायै गौर्यै नमः वक्त्रे

ओं ह्रीं श्रीं क्रुं अघोरायै गंगायै नमः हृदये

ओं ह्रीं श्रीं क्रिं वामदेवायै गणाम्बिकायै नमः नाभौ

ओं ह्रीं श्रीं क्रं सद्योजातायै अम्बिकायै नमः पादयो

पञ्चकला शक्तिन्यासः

ओं क्रां क्रीं हौं शान्त्यतीतकलायै नमः मूर्ध्नि

ओं क्रां क्रीं ह्यैं शान्तिकलायै नमः वक्त्रे

ओं क्रां क्रीं ह्रूं विद्याकलायै नमः हृदये

ओं क्रां क्रीं ह्रीं प्रतिष्ठाकलायै नमः नाभौ

ओं क्रां क्रीं ह्लां निवृत्तिकलायै नमः पादयोः

पञ्च कालिकान्यासः

ओं श्रीं ह्रीं क्रीं उग्रकाल्यै नमः मूर्ध्नि

ओं श्रीं ह्रीं क्रीं निग्रहकाल्यै नमः मुखे

ओं श्रीं ह्रीं क्रीं अनुग्रहकाल्यै नमः हृदये

ओं श्रीं ह्रीं क्रीं भद्रकाल्यै नमः नाभौ

ओं श्रीं ह्रीं क्रीं महाकाल्यै नमः सर्वाङ्गे

मातृगण शक्तिन्यास कारिका

ब्रह्माणीं मूर्धि विन्स्य ललाठे च महेश्वरीम्।

कौमारीं आस्य मध्येतु वैष्णवीं स्तनमध्यमे।

वाराहीं नाभिमध्ये तु इन्द्राणीं पाद युग्मयोः।

वीरभद्रं दक्षहस्ते विघ्नेशं वाम हस्तके।

सर्वांगेषु च चामुण्डीं जीवन्यासं विधीयते।।

मातृगणन्यासः

ओं श्रीं ह्रीं क्लीं ब्रह्माण्यै नमः - मूर्ध्नि

ओं श्रीं ह्रीं क्लीं माहेश्वर्यै नम - ललाटे

ओं श्रीं ह्रीं क्लीं कौमार्यै नमः - आस्ये

ओं श्रीं ह्रीं क्लीं वैष्णव्यै नमः - स्तनमण्डले

ओं श्रीं ह्रीं क्लीं वाराह्यै नमः - नाभौ

ओं श्रीं ह्रीं क्लीं इन्द्राण्यै नमः - पादयोः

ओं श्रीं ह्रीं क्लीं वीरभद्राय नमः - दक्षिणहस्ते

ओं श्रीं ह्रीं क्लीं वीरविघ्नेश्वराय नमः - वामहस्ते

ओं श्रीं ह्रीं क्लीं चामुण्डायै नमः - सर्वाङ्गे

अष्टत्रिंशत्कलान्यासः (38 कला)

ओं श्रीं ह्रीं क्लीं शशिन्यै नमः - शिरस्यूर्ध्वे

ओं श्रीं ह्रीं क्लीं अंगदायै नमः - शिरःपूर्वे

ओं श्रीं ह्रीं क्लीं इष्टायै नमः - शिरोदक्षिणे

ओं श्रीं ह्रीं क्लीं मरीच्यै नमः - शिरस्युत्तरे

ओं श्रीं ह्रीं क्लीं ज्वालिन्यै नमः - शिरःपश्चिमे

ओं श्रीं ह्रीं क्लीं शान्त्यै नमः - वक्त्रपूर्वे

ओं श्रीं ह्रीं क्लीं विद्यायै नमः - वक्त्र दक्षिणे

ओं श्रीं ह्रीं क्लीं प्रतिष्ठायै नमः - आस्योत्तरे

ओं श्रीं ह्रीं क्लीं निवृत्यै नमः - मुखपश्चिमे

ओं श्रीं ह्रीं क्लीं तमायै नमः - हृदये

ओं श्रीं ह्रीं क्लीं मोहायै नमः - ग्रीवायां

ओं श्रीं ह्रीं क्लीं रक्षायै नमः - दक्षाम्से

ओं श्रीं ह्रीं क्लीं निष्ठायै नमः - वामाम्से

ओं श्रीं ह्रीं क्लीं मृत्युदायै नमः - नाभौ

ओं श्रीं ह्रीं क्लीं मायायै नमः - जठरे
ओं श्रीं ह्रीं क्लीं भयायै नमः - पृष्ठे
ओं श्रीं ह्रीं क्लीं जयायै नमः - उरसि
ओं श्रीं ह्रीं क्लीं रजायै नमः - गुह्ये
ओं श्रीं ह्रीं क्लीं रक्षायै नमः - योनौ
ओं श्रीं ह्रीं क्लीं रत्यै नमः - दक्षिणोरौ
ओं श्रीं ह्रीं क्लीं पाल्यै नमः - वामोरौ
ओं श्रीं ह्रीं क्लीं कामायै नमः - दक्षिण जानुनि
ओं श्रीं ह्रीं क्लीं संयमिन्यै नमः - वाम जानुति
ओं श्रीं ह्रीं क्लीं क्रियायै नमः - दक्षिण जङ्घायां
ओं श्रीं ह्रीं क्लीं बुध्यै नमः - वाम जङ्घायां
ओं श्रीं ह्रीं क्लीं कार्यै नमः - दक्षिणस्फिजि
ओं श्रीं ह्रीं क्लीं धात्रये नमः - वामस्फिजि
ओं श्रीं ह्रीं क्लीं भ्रामिण्यै नमः - कट्याम्
ओं श्रीं ह्रीं क्लीं मोहिन्यै नमः - दक्षिणपार्श्वे
ओं श्रीं ह्रीं क्लीं भवायै नमः - वामपार्श्वे
ओं श्रीं ह्रीं क्लीं सिध्यै नमः - दक्षिण पादे
ओं श्रीं ह्रीं क्लीं (समृध्यै) ऋध्यै नमः - वामपादे
ओं श्रीं ह्रीं क्लीं द्युत्यै नमः - दक्षिणपाणौ
ओं श्रीं ह्रीं क्लीं लक्ष्म्यै नमः - वामपाणौ
ओं श्रीं ह्रीं क्लीं मेधायै नमः - नासिकायां
ओं श्रीं ह्रीं क्लीं कान्त्यै नमः - शिरसि
ओं श्रीं ह्रीं क्लीं स्वधायै नमः - दक्षिणबाहौ
ओं श्रीं ह्रीं क्लीं धृत्यै नमः - वामबाहौ (इत्यष्टत्रिंशत्कलान्यासः)

पञ्चविंशति गौरीकला न्यासः (25 कलाः)

ओं श्रीं ह्रीं क्लीं तारायै नमः - शिरसि
ओं श्रीं ह्रीं क्लीं विद्यायै नमः - वक्त्रे
ओं श्रीं ह्रीं क्लीं स्मृत्यै नमः - हृदये
ओं श्रीं ह्रीं क्लीं श्रद्धायै नमः - गले
ओं श्रीं ह्रीं क्लीं रजायै नमः - वामबाहौ
ओं श्रीं ह्रीं क्लीं मायायै नमः - दक्षिणबाहौ
ओं श्रीं ह्रीं क्लीं स्वधायै नमः - जठरे
ओं श्रीं ह्रीं क्लीं स्वस्त्यै नमः - नाभौ
ओं श्रीं ह्रीं क्लीं पालिन्यै नमः - गुह्ये
ओं श्रीं ह्रीं क्लीं शालिन्यै नमः - वामोरौ
ओं श्रीं ह्रीं क्लीं कृष्णायै नमः - दक्षिणोरौ
ओं श्रीं ह्रीं क्लीं धृत्यै नमः - वामजानौ
ओं श्रीं ह्रीं क्लीं काञ्चनायै नमः - दक्षिणजानौ
ओं श्रीं ह्रीं क्लीं मत्यै नमः - वामजंघे
ओं श्रीं ह्रीं क्लीं प्रजायै नमः - दक्षिणजंघे
ओं श्रीं ह्रीं क्लीं चिन्तायै नमः - वामपृष्ठे
ओं श्रीं ह्रीं क्लीं भूत्यै नमः - दक्षिणपृष्ठे
ओं श्रीं ह्रीं क्लीं क्रियायै नमः - वामपार्श्वे
ओं श्रीं ह्रीं क्लीं कान्त्यै नमः - दक्षिणपार्श्वे
ओं श्रीं ह्रीं क्लीं शान्त्यै नमः - वामपादे
ओं श्रीं ह्रीं क्लीं दान्त्यै नमः - दक्षिणपादे
ओं श्रीं ह्रीं क्लीं दयायै नमः - वामहस्ते
ओं श्रीं ह्रीं क्लीं श्रुत्यै नमः - दक्षिणहस्ते
ओं श्रीं ह्रीं क्लीं दूत्यै नमः - वामस्तने
ओं श्रीं ह्रीं क्लीं सन्ध्यायै नमः - दक्षिणस्तने

कालीगायत्री न्यासः



महा काल्यै नमः	- मुखे
विद्महे नमः	- कर्णयोः
खड्गहस्तायै नमः	- हृदये
धीमहि नमः	- नाभौ
तन्नो नमः	- ऊर्वोः
काली नमः	- जान्वोः
प्रचोदयान् नमः	- पादयोः

इति गायत्रीन्यासः - काळी गायत्री मन्त्राः - प्रभेदाः-

1. महाकाल्यै च विद्महे खड्ग हस्तायै धीमहि। तन्नश्श्यामा प्रचोदयात्।
2. महाभैरव्यै विद्महे शूलहस्तायै धीमहि तन्नःकाली प्रचोदयात्।
3. भद्रकाल्यै च विद्महे शवारूढायै धीमहि तन्नः श्यामा प्रचोदयात्।
4. सिंहध्वजायै विद्महे वीरभद्रायै धीमहि तन्नः काली प्रचोदयात्।
5. शवारूढायै विद्महे शूलहस्तायै धीमहि तन्नश्श्यामा प्रचोदयात् ।

विश्वमातृन्यासः (प्रकारान्तरेण)

ओं श्रीं ह्रीं क्लीं	वीरभद्र्यै नमः	मूर्ध्नि
ओं श्रीं ह्रीं क्लीं	विघ्नेश्वर्यै नमः	ललाटे
ओं श्रीं ह्रीं क्लीं	ब्रह्माण्यै नमः	नेत्रेषु
ओं श्रीं ह्रीं क्लीं	माहेश्वर्यै नमः	नासिकायाम्
ओं श्रीं ह्रीं क्लीं	कौमार्यै नमः	कण्ठे
ओं श्रीं ह्रीं क्लीं	वैष्णव्यै मनः	बाहुषु
ओं श्रीं ह्रीं क्लीं	वाराह्यै नमः	हृदये
ओं श्रीं ह्रीं क्लीं	माहेन्द्र्यै नमः	नाभौ
ओं श्रीं ह्रीं क्लीं	चामुण्डायै नमः	सर्वाङ्गे

त्रितत्वशक्ति न्यासः

ओं श्रीं ह्रीं क्लीं	आत्मतत्वाधिपायै -	क्रियाशक्त्यै नमः	पादादि जान्वन्ते
ओं श्रीं ह्रीं क्लीं	विद्यातत्वाधिपायै -	ज्ञानशक्त्यै नमः	जान्वदि गलान्ते
ओं श्रीं ह्रीं क्लीं	शिवतत्वाधिपायै -	इच्छाशक्त्यै नमः	कण्ठादि मूर्धान्ते

अन्तर्मातृका सप्तपीठेश्वरी न्यासः

षडाधारषड्चक्ररूपम्

आधारे लिङ्ग नाभौ हृदय सरसिजे तालुमूले ललाटे –
द्वे पत्रे षोडशारे द्विदश दशदले द्वादशार्धे चतुष्के।
वा सान्ते बा ल मध्ये ड फ क ठ सहिते कण्ठदेशे स्वराणां -
हं क्षं तत्वार्थरूपं सकल मनुवृतं वर्णरूपं नमामि।। 1

आधारस्तु चतुर्दलो ऽरुणरुचिः वासान्त वर्णात्मकः -
स्वाधिष्ठान मनेक वैद्युत निभं बालान्त षट् पत्रकम्।
रक्ताभं मणिपूरकं दशदलं डाद्यैः फकारान्तकं -
पत्रै र्द्वादशभि स्त्वनाहतपुरे हैमं कठार्णान्तकम्।। 2

मात्राभि र्दल षोडश स्वर युतं ज्योति र्विशुद्धाम्बुजं -
ह क्षे त्यक्षर युग्मपत्र कमले मुक्ताभं आज्ञाम्बुजम्।
तस्मादूर्ध्व मधोमुखं विकसितं पद्मं सहस्रच्छदं -
नित्यानन्दमयं परात्परतरं भक्त्या परं भावये।। 3

1. मूलाधारस्य वीणादण्ड मूले (सुषुम्नानाडीमूले) शाकिनी

मूलाधारस्थ पद्मे श्रुतिदल सहिते पञ्चवक्त्रां त्रिणेत्रां -
स्वर्णाभां अस्थिसंस्थां सृणि मपि कमलं पुस्तकं ज्ञानमुद्राम्।
बिभ्राणां बाहुदण्डैः सुललित वरदा द्याभिवीतां मनोज्ञां -
मुद्रान्नासक्त चित्तां मधुमद मुदितां शाकिनीं भावयेत् ताम्।।
ओं वं शं षं सं इति मूलाधारपीठ चतुर्दलपद्म निवासिन्यै -
अस्थिसंस्थितायै शाकिन्यै नमः (मूलाधारे अस्थिनि विचिन्त्य)

2. स्वाधिष्ठानस्य लिंगोर्ध्वे - काकिनी

स्वाधिष्ठानाख्य पद्मे रसदल लसिते वेदवक्त्रां त्रिणेत्रां -
पीताभां धारयन्तीं त्रिशिख गुण कपालाभयान् ज्ञान्तवर्गाम्।
मेदो धातु प्रतिष्ठा मलिमद मुदितां बन्धिनीं पूगशक्त्या -
पीतां दध्यन्नसक्ता मभिमत फलदां काकिनीं भावयेत् ताम्।।

ओं बं भं मं यं रं लं इति षड्दलपद्म स्वधिष्ठानपीठ - निवासिन्यै -
मेधोनिष्ठायै - काकिन्यै नमः (स्वाधिष्ठाने मेधसि विचिन्त्य)

3. मणिपूरके नाभौ - लाकिनी।

नाभौ दिक्पत्र पद्मे त्रिवदन विलस त्तीक्षणां कृष्णवर्णा -
शक्तिं दम्भोळि दण्डा भय मपि च भुजैः धारयन्तीं महोग्राम्।
डामर्याद्यैः परीतां पशुजन भयदां माम्सधात्वा सनस्थां -
गौडान्नासक्त चित्तां सकल सुखकरीं संस्मरेत् लाकिनीं ताम्।।

ओं डं ढं णं तं थं दं धं नं पं फं इति दशदलपद्मनिवासिन्यै
मणिपूरकचक्रेश्वर्यै माम्सनिष्ठायै लाकिन्यैनमः (मणिपूरके मांसे विचिन्त्य)

4. अनाहते हृदये - राकिनी।

हृत्पद्मे भानुपत्रे द्विवदन विलसत् दंष्ट्रिणीं श्यामवर्णा -
टंकं शूलं कपालं डमरु मपि भुजैः धारयन्तीं त्रिणेत्राम्।
रक्तस्थां कालरात्रि प्रभृति परिवृतां शुद्धरक्ते प्रवृत्तां -
श्रीमत् वीरेन्द्र वन्द्यां अभिमत फलदां राकिनीं भावयेत् ताम्।।

ओं कं खं गं घं ङं चं छं जं झं ञं टं ठं इति द्वादशदल कमलनिवासिन्यै
- अनाहत पीठेश्वर्यै - रुधिरसंस्थायै राकिन्यै नमः (अनाहते हृदये रुधिरे विचिन्त्य)

5. विशुद्धौ तालुमूले - डाकिनी।

ग्रीवा कूपे विशुद्धे स्वरदल कमले रक्तवर्णां त्रिणेत्रां -
श्रीखट्वाङ्गं कपालं त्रिशिख मणिमहा चर्म सं धारयन्तीम्।
वक्त्रे णैकेन युक्तां पशु जन भयदां पायसान्न प्रसक्तां -
त्वक्स्थां वन्दे ऽमृतौघैः परिवृत वपुषां डाकिनीं वीरचण्डाम्।।

ओं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति -
षोडशदल पद्मनिवासिन्यै - विशुद्धिचक्रेश्वर्यै - त्वक्स्थायै डाकिन्यै नमः
(विशुद्धौत्वचिविचिन्त्य)

6. आज्ञायां भ्रुवोर्मध्ये -

भ्रूमध्ये बिन्दुपद्मे द्विदल विलसिते शुभ्रवर्णां कराब्जैः -
बिभ्राणां ज्ञानमुद्रां डमरुक ममलं चाक्षमालां कपालम्।
षड्वक्त्रां मज्जसंस्थां त्रिणयन ललितां हंसगत्यादि युक्तां -
हारिद्रान्ने प्रसक्तां सकल सुरनुतां हाकिनीं भावयेत् ताम्।।

ओं हं क्षं (ळं क्षं) द्विदल पद्मनिवासिन्यै -
आज्ञाचक्रेश्वर्यै मज्जासंस्थायै हाकिन्यै नमः।।

(आज्ञायां मज्जास्थाने विचिन्त्य)

7. ब्रह्मरन्ध्रे सहस्रारे - याकिनी

मुण्ड व्योमस्थ पद्मे सहस्र दलयुते याकिनीं भैरवीं तां -
यक्षिण्याद्यां समस्थायुध लसितकरां सर्ववर्णां समष्टिम्।
रादीनां सर्ववक्त्रां सकल सुखकरीं सर्वधातु स्वरूपां -
सर्वान्ना सक्तचित्तां परशिव रसिकां भावयेत् याकिनीं ताम्।।

ओं सर्ववर्णात्मक सहस्रदलकमल निवासिन्यै - जालन्धरपीठेश्वर्यै -
सर्वधातु स्थितायै याकिन्यै नमः।। (ब्रह्मरन्ध्रे सर्वधातुषु चिन्तयेत्)

(इति अन्तर्मातृका - सप्तपीठेश्वरी - न्यासः समाप्तः)

काली बहिर्मातृकान्यासः

लिपिमातृका वाग्देवता वन्दनम् (अन्मर्तातृका न्यासादि)

पञ्चाशल् लिपिभि र्विभक्त मुख दोः यन्मध्य वक्षस्थलां
भास्वन्मौलि निबद्ध चन्द्रशकला मापीन तुङ्ग स्तनीम्।
मुद्रा मक्षगुणं सुधाढ्य कलशं व्याख्यां च हस्ताम्बुजे
बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता माश्रये।।

ओं	अं	निवृत्यै	भवान्यै नमः	(करान्ते) शिरसि
ओं	आं	प्रतिष्ठायै	भीमायै नमः	ललाटे
ओं	इं	विद्यायै	सुन्दर्यै नमः	दक्षिणनेत्रे
ओं	ईं	ईशान्यै	कलाभुवनायै नमः	वामनेत्रे
ओं	उं	इन्धिकायै	व्याप्ति व्यापकायै नमः	दक्षिण श्रोत्रे
ओं	ऊं	दीपिकायै	व्याप्य व्यापकायै नमः	वाम श्रोत्रे
ओं	ऋं	रोचिकायै	काल दहनायै नमः	दक्षिणनासापुटे
ओं	ॠं	मोचिकायै	काल सिंहनादायै नमः	वामनासापुटे
ओं	ऌं	सूक्ष्मायै	ऊर्ध्वमुख नादायै नमः	दक्षिणकण्ठे

ओं	लॄं	परायै	अतिसूक्ष्मायै नमः	वामकण्ठे
ओं	एं	ज्ञानायै	ज्योतिनादायै नमः	ऊर्ध्वौष्टे
ओं	ऐं	अमृतायै	वेतालवाहिन्यै नमः	अधरोष्टे
ओं	ओं	आप्यायिन्यै	षडंगिन्यै नमः	ऊर्ध्वदन्तपंक्तौ
ओं	औं	व्याप्यायिन्यै	कामेश्वर्यै नमः	अधोदन्तपंक्तौ
ओं	अं	व्योमरूप्यै	सोमधार्यै नमः	जिह्वायाम्
ओं	अः	अनन्तायै	चक्रेश्वर्यै नमः	आस्ये
ओं	कं	सृष्ट्यै	विश्वरूप्यै नमः	दक्षिणबाहु मूले
ओं	खं	ऋद्ध्यै	मेधायै नमः	कूर्परे
ओं	गं	शार्वर्यै	काकिन्यै नमः	दक्षिणबाहु मणिबन्धे
ओं	घं	ख्यात्यै	वृत्यै नमः	दक्षिणह स्ततले
ओं	ङं	कान्त्यै	धूम्राक्ष्यै नमः	दक्षिण कराग्रे
ओं	चं	लक्ष्म्यै	विश्वरूप्यै नमः	वामबाहुमूले
ओं	छं	नवदूत्यै	भैरव्यै	वामबाहु कूर्परे
ओं	जं	वीरायै	कामिन्यै नमः	वाम बाहु मणिबन्धे
ओं	झं	स्थित्यै	कालरात्र्यै नमः	वाम हस्ततले
ओं	ञं	स्मृत्यै	योगिन्यै नमः	वाम कराग्रे
ओं	टं	जटायै	पालिन्यै नमः	दक्षिणोरु मूले
ओं	ठं	मोहिन्यै	कमलायै नमः	दक्षिणो जानुनि
ओं	डं	शारदायै	भार्गव्यै नमः	दक्षिण जंघायाम्
ओं	ढं	ईश्वर्यै	ज्ञानदायै नमः	दक्षिण पादतले
ओं	णं	रत्यै	पुष्कलायै नमः	दक्षिण पादाग्रे
ओं	तं	कामिन्यै	वरदायै नमः	वाम पादोरुमूले
ओं	थं	मालिन्यै	प्रीत्यै नमः	वाम जानुनि
ओं	दं	दयायै	शाकिन्यै नमः	वाम जंघायाम्
ओं	धं	ह्लादिन्यै	साकिन्यै नमः	वामपादतले
ओं	नं	दीर्घायै	महामायायै नमः	वामपादाग्रे

ओं	पं	तीक्ष्णायै	शक्त्यै नमः	दक्षिण पार्श्वे
ओं	फं	रौद्र्यै	बिन्दुशक्त्यै नमः	वामपार्श्वे
ओं	बं	हयायै	काल्यै नमः	पृष्ठभागे
ओं	भं	भद्रकाल्यै	मित्रायै नमः	नाभिदेशे
ओं	मं	महालक्ष्म्यै	मन्त्रशक्त्यै नमः	हृदये
ओं	यं	क्षुधायै	क्षुद्रशक्त्यै नमः	त्वचि
ओं	रं	क्रोधायै	भगवत्यै नमः	रुधिरे
ओं	लं	क्रियायै	कुलधार्यै नमः	माम्से
ओं	वं	उत्कायै	मोहायै नमः	मेधसि
ओं	शं	मृत्युरेतायै	सुरेश्वर्यै नमः	अस्थिनि
ओं	षं	प्रीतायै	श्यामलायै नमः	मज्जास्थाने
ओं	सं	सत्कृत्यै	श्वेतायै नमः	रेतसि
ओं	हं	अरुणायै	हंकार्यै नमः	हृदये
ओं	ळं	वेदायै	गायत्र्यै नमः	नाडिषु
ओं	क्षं	सर्वसिध्यै	भुवनेश्वर्यै नमः	सर्वाङ्गेषु

(इति बहि र्मामातृकान्यासः समाप्तः)



श्रीकण्ठादि मातृकान्यास:

अस्य - श्रीकण्ठमातृकान्यास मन्त्रस्य - श्री दक्षिणामूर्तिः ऋषिः - गायत्री छन्दः - अर्धनारीश्वरो देवता – अं बीजं(हलो बीजानि) क्षं शक्तिः (स्वराः शक्तयः) बिन्दवः - कीलकम् (उमामहेश्वर) प्रत्यङ्गिराकाली प्रसादसिद्ध्यर्थे - सर्वार्थसिद्ध्यर्थे न्यासे विनियोगः।

ऋष्यादिन्यास:

ओं ऐं ह्रीं श्रीं - ओं ह्रौं - मेधादक्षिणामूर्तिऋषये नमः - शिरसि -
ओं ऐं ह्रीं श्रीं - ओं ह्रीं - गायत्रीछन्दसे नमः - हृदये -
ओं ऐं ह्रीं श्रीं - ओं हं - (अकाराय नमः) हल्भ्यो बीजेभ्यो नमः - गुह्ये -
ओं ऐं ह्रीं श्रीं - ओं अं-क्षं - स्वरेभ्यो शक्तिभ्यो नमः - पादयोः
ओं ऐं ह्रीं श्रीं - ओं अं कं - बिन्दवे - कीलकाय नमः - नाभौ -
ओं ऐं ह्रीं श्रीं - ओं क्ष्म्र्यूं - अर्धांबिकासहित - अर्धनारीश्वराय नमः - सर्वाङ्गे -

करन्यास:

ओं ऐं ह्रीं श्रीं - हसां स्हां - अं कं खं गं घं ङं आं - अङ्गुष्ठाभ्यां नमः
ओं ऐं ह्रीं श्रीं - ह्सीं स्हीं - इं चं छं जं झं ञं ईं - तर्जनीभ्यां नमः
ओं ऐं ह्रीं श्रीं - ह्सूं स्हूं - उं टं ठं डं ढं णं ऊं - मध्यमाभ्यां नमः
ओं ऐं ह्रीं श्रीं - ह्सैं स्हैं - एं तं थं दं धं नं ऐं - अनामिकाभ्यां नमः
ओं ऐं ह्रीं श्रीं - ह्सौं स्हौं - ओं पं फं बं भं मं औं - कनिष्ठिकाभ्यां नमः
ओं ऐं ह्रीं श्रीं - ह्सः स्हः - अं यं रं लं वं शं षं सं हं ळं क्षं अः -
करतल – करपृष्ठाभ्यां नमः

हृदयादिअङ्गन्यासः

ओं ऐं ह्रीं श्रीं - ह्सां स्हां - अं कं खं गं घं ङं आं – हृदयाय नमः

ओं ऐं ह्रीं श्रीं – ह्सीं स्हीं - इं चं छं जं झं ञं ईं – शिरसे स्वाहा

ओं ऐं ह्रीं श्रीं - हसूं स्हूं - उं टं ठं डं ढं णं ऊं – शिखायै वषट्

ओं ऐं ह्रीं श्रीं - ह्सैं स्हैं - एं तं थं दं धं नं ऐं – कवचाय हुम्

ओं ऐं ह्रीं श्रीं - ह्सौं स्हौं - ओं पं फं बं भं मं औं – नेत्रत्रयाय वौषट्

ओं ऐं ह्रीं श्रीं – ह्सः स्हः - अं यं रं लं वं शं षं सं हं ळं क्षं अः - अस्त्राय फट्

भूर्भुवस्सुवरोम् – इति दशदिग्बन्धनं कृत्वा – भगवत्यार्धदेहयुतं अर्धनारीश्वरंध्यायेत्।

उमार्धविग्रहध्यानम्

अतिश्यामां त्रिनयनां पद्मासन सुसंस्थिताम्।
बिभ्रतीं विविधाकल्पां चतुर्दिक्षु शिवायुताम्।
पाशाङ्कुश वरास्त्रक्पा ण्यर्ध नारीश्वरं भजे।

बन्धूक काञ्चननिभं रुचिराक्षमालां
पाशांकुशौ च वरदं निज बाहुदण्डैः।
बिभ्राण मिन्दु शकला भरणं त्रिणेत्रं
अर्धाम्बिकेश मनिशं हर माश्रयामि।।

तारंश्री शक्ति संयुक्तं वाग्भवं बिन्दुसंयुतम्।
प्रतिपङ्क्तौ मातृकादीन् श्रीकण्ठं विन्यसेत् क्रमात्।।

इति वचनप्रकारेण प्रणव बीजत्रयेण च न्यासः कार्यः

(ओं - ऐं ह्रीं श्रीं - अं श्रीकण्ठेशमूर्ति पूर्णोदरीशक्तिभ्यां - नमश्शिवाभ्यां नमः - शिरसि एवं पञ्चाशदक्षरन्यासेपि वदेत्) ॐ श्री गुरुभ्यो नमः

श्रीकण्ठादि मातृका न्यासः

ओं ऐं ह्रीं श्रीं – अं – श्रीकण्ठेश – पूर्णोदरीभ्यां नमः - शिरसि

ओं ऐं ह्रीं श्रीं – आं – अनन्तेश - विरजाभ्यां नमः - मुखे

ओं ऐं ह्रीं श्रीं – इं – सूक्ष्मेश – शाल्मलीभ्यां नमः - दक्षिणनेत्रे

ओं ऐं ह्रीं श्रीं – ईं - त्रिमूर्तीश – लोलाक्षीभ्यां नमः - वामनेत्रे

ओं ऐं ह्रीं श्रीं – उं – अमरेश – वर्तुलाक्षीभ्यां नमः - दक्षिणकर्णे

ओं ऐं ह्रीं श्रीं – ऊं – अर्धीशा (अर्धीश) – दीर्घघोणाभ्यां नमः - वामकर्णे

ओं ऐं ह्रीं श्रीं – ॠं – भारभूतेश - (भूतेश) दीर्घमुखीभ्यां नमः - दक्षिणनासापुटे

ओं ऐं ह्रीं श्रीं – ॠं – तिथीश – (निधनेश/निधीश) – गोमुखीभ्यां नमः - वामनासापुटे

ओं ऐं ह्रीं श्रीं – ऌं – स्थाण्वीश – दीर्घजिह्वाभ्यां नमः - दक्षिण कपोले

ओं ऐं ह्रीं श्रीं – ॡं – ह रेश – कुण्डोदरीभ्यां नमः - वामकपोले

ओं ऐं ह्रीं श्रीं – एं – झिण्टीश (चण्डीश/नन्दीश)– ऊर्ध्वकेशिनीभ्यां नमः - ऊर्ध्वोष्ठे

ओं ऐं ह्रीं श्रीं – ऐं – भौतिकेश – विकृतमुखीभ्यां नमः - अधरे (उर्ध्वमूखीभ्यां)

ओं ऐं ह्रीं श्रीं – ओं – सद्योजातेश – ज्वालामुखीभ्यां नमः - ऊर्ध्वे दन्तपङ्क्तौ

ओं ऐं ह्रीं श्रीं – औं – अनुग्रहेश – उल्कामुखीभ्यां नमः - अधो दन्तपङ्क्तौ

ओं ऐं ह्रीं श्रीं – अं – अक्रूरेश – श्रीमुखीभ्यां नमः - जिह्वाग्रे (अंकुरेश)

ओं ऐं ह्रीं श्रीं – अः - महासेनेश – विद्याभ्यां नमः - कण्ठे (आस्ये)

ओं ऐं ह्रीं श्रीं – कं – क्रोधीश – महाकालीभ्यां नमः - दक्षिण बाहुमूले।

ओं ऐं ह्रीं श्रीं – खं – चण्डेश – सरस्वतीभ्यां नमः - दक्षिण कूर्परे

ओं ऐं ह्रीं श्रीं – गं – पञ्चान्तकेश – सिद्धिगौरीभ्यां नमः - दक्षिणमणिबन्धे (सिद्धिकरीभ्यां)

ओं ऐं ह्रीं श्रीं – घं – शिवोत्तमेश – त्रैलोक्यवन्द्याभ्यां नमः -
दक्षिणहस्ततले (करांगुलिमूले) (विद्याभ्यां)

ओं ऐं ह्रीं श्रीं – ङं – एकरुद्रेश – मन्त्रशक्तिभ्यां नमः - दक्षिण कराङ्गुलयग्रे

ओं ऐं ह्रीं श्रीं – चं – कूर्मेश – आत्मशक्तिभ्यां नमः - वामबाहु मूले

ओं ऐं ह्रीं श्रीं – छं – ऐकनेत्रेश - भूतमातृभ्यां नमः - वाम कूर्परे

ओं ऐं ह्रीं श्रीं – जं – चतुराननेश – लम्बोदरीभ्यां नमः - वाम मणिवन्धे

ओं ऐं ह्रीं श्रीं – झं – अजेश – द्राविणीशक्तिभ्यां नमः - वाम करांगुलिमूले

ओं ऐं ह्रीं श्रीं – ञं – सर्वेश – नागरीभ्यां नमः - वाम करांगुल्यग्रे (चन्द्रनगरीभ्यां)

ओं ऐं ह्रीं श्रीं – टं – सोमेश – खेचरीभ्यां नमः - दक्षिण पादोरुमूले। (दक्षोरौ)

ओं ऐं ह्रीं श्रीं – ठं – लाङ्गलीश – मञ्जरीभ्यां नमः - दक्षिण जानुनि

ओं ऐं ह्रीं श्रीं – डं – दारुकेश – विकृतिरुपिणीभ्यां नमः - दक्षिण जङ्घायाम्।

ओं ऐं ह्रीं श्रीं – ढं – अर्धनारीश – स्वैरिणीशक्तिभ्यां नमः - दक्षिण पादतले

ओं ऐं ह्रीं श्रीं – णं – उमाकान्तेश – काकोदरीभ्यां नमः
- दक्ष पादांगुल्यग्रे ।(खादिरीभ्यां)

ओं ऐं ह्रीं श्रीं – तं – आषाढीश - भद्रकालीभ्यां नमः - वाम जानुनि (षडीश-)

ओं ऐं ह्रीं श्रीं – थं – डिण्डीश - भद्रकालीभ्यां नमः वामजानुनि। (चण्डीश)

ओं ऐं ह्रीं श्रीं – दं – आत्रीश – योगिनीभ्यां नमः - वाम जङ्घायाम् - (अत्रिगोमती)

ओं ऐं ह्रीं श्रीं – धं – मीनेश – शङ्खिनीभ्यां नमः - वाम पादतले (ईशान)

ओं ऐं ह्रीं श्रीं – नं – मेषेश – तर्जनीभ्यां नमः - वाम पादांगुल्यग्रे । (गर्जिनीभ्यां)

ओं ऐं ह्रीं श्रीं – पं – लोहितेश – कालरात्रीभ्यां नमः - दक्षिणपार्श्वे।

ओं ऐं ह्रीं श्रीं – फं – शिखीश – कुब्जिनीभ्यां नमः - वाम पार्श्वे।

ओं ऐं ह्रीं श्रीं – बं – छागण्डेश – कपर्दिनीभ्यां नमः - पृष्ठे।
(छगलण्डेश - कामिनीभ्यां)

ओं ऐं ह्रीं श्रीं – भं – द्विरण्डेश – वज्रशक्तिभ्यां नमः - नाभौ।

ओं ऐं ह्रीं श्रीं – मं – महाकालेश – जयाभ्यां नमः - जठरे (उदरे/हृदये)

ओं ऐं ह्रीं श्रीं – यं – त्वगात्मने - बालीश– सुमुखेश्वसरीभ्यां नमः - हृदये (त्वचि) (पालीश)

ओं ऐं ह्रीं श्रीं – रं - असृगात्मने – भुजङ्गेश – रेवतीशक्तिभ्यां नमः - दक्षांसे (रक्तात्मने) (रुधिरगोचरे)

ओं ऐं ह्रीं श्रीं – लं – मांसात्मने - पिनाकीश – माधवीभ्यां नमः - ककुदि (मांसे)

ओं ऐं ह्रीं श्रीं – वं - मेदात्मने - खड्गीश – वारुणीभ्यां नमः - वामांसे मेदसि (स्कन्धे) (मेदोमयाय)

ओं ऐं ह्रीं श्रीं – शं – अस्थ्यात्मने – केशवेश – वायवीभ्यां नमः - दक्षिणकक्षे (बेकेश) (हृदयादि वामकरांगुल्यन्ते)

ओं ऐं ह्रीं श्रीं – षं – मज्ज्ञात्मने – श्वेतेश – रक्षोविदारिणीभ्यां नमः - वामकक्षे - (हृदयादि वामकरांगुल्यन्ते)

ओं ऐं ह्रीं श्रीं – सं – शुक्रात्मने – भृग्वीश – सहजाभ्यां नमः - दक्षिण – पाणि - पादान्ते (हृदयादि दक्षपादांगुल्यन्ते)

ओं ऐं ह्रीं श्रीं – हं – प्राणात्मने – नकुलीश – लक्ष्मीभ्यां नमः वामपाणिपादान्ते (लकुळीश) - (हृदयादि वामपादांगुल्यन्ते)

ओं ऐं ह्रीं श्रीं – ळं – (लिंगात्मने/तमोरूपेश) परमात्मने शिवेश- व्यापिनीभ्यां नमः - हृदयादिमूर्धान्ते । (कट्यादिपादांगुल्यन्तं)

ओं ऐं ह्रीं श्रीं – क्षं – ज्ञानशक्त्यात्मने – संवर्तकेश – महामायाभ्यां नमः - मूर्धादिपादान्ते (कट्यादि मस्तकान्ते/लिंगमूले)

इति श्रीकण्ठादि मातृकान्यासः समाप्तः (केचन पाठभेदास्सन्ति)

प्रत्यङ्गिरा मातृकान्यासः

वर्णात्मिका वाणी ध्यानम्

वाणीं पूर्ण निशाकरो ज्वलमुखीं कर्पूर कुन्दप्रभां
चन्द्रार्धांकित मस्तकां निजकरै स्संबिभ्रती मादरात्।
वीणा मक्षगुणं सुधाढ्य कलशं विद्यां च तुङ्गस्तनीं
दिव्यै राभरणै र्विभूषित तनुं हंसाधिरुढां भजे।।

ओं ऐं ह्रीं श्रीं	-	अं -	प्रत्यङ्गिरायै नमः	-	शिरसि
ओं ऐं ह्रीं श्रीं	–	आं –	सिंहमुख्यै नमः	-	मुखे
ओं ऐं ह्रीं श्रीं	–	इं –	ज्वालामुख्यै नमः	-	दक्षिण नेत्रे
ओं ऐं ह्रीं श्रीं	–	ईं –	शिवायै नमः	-	वाम नेत्रे
ओं ऐं ह्रीं श्रीं	–	उं -	वैष्णव्यै नमः	-	दक्षिण कर्णे
ओं ऐं ह्रीं श्रीं	–	ऊं -	नारसिंह्यै नमः	-	वाम कर्णे
ओं ऐं ह्रीं श्रीं	–	ऋं –	त्रिमात्रे नमः	-	दक्षिण नासापुटे
ओं ऐं ह्रीं श्रीं	–	ॠं -	शाङ्कर्यै नमः	-	वाम नासापुटे

ओं ऐं ह्रीं श्रीं	–	लृं -	परायै नमः	-	दक्षिण कपोले
ओं ऐं ह्रीं श्रीं	–	लॄं -	अर्धमात्रायै नमः	-	वाम कपोले
ओं ऐं ह्रीं श्रीं	–	एं –	भगवत्यै नमः	-	ऊर्ध्वोष्ठे
ओं ऐं ह्रीं श्रीं	–	ऐं -	शूलिन्यै नमः	-	अधरोष्ठे
ओं ऐं ह्रीं श्रीं	–	ओं -	शुम्भ मर्दिन्यै नमः	-	ऊर्ध्व दन्तपङ्क्तौ
ओं ऐं ह्रीं श्रीं	–	औं -	शशाङ्क धारिण्यै नमः	-	अधो दन्तपङ्क्तौ
ओं ऐं ह्रीं श्रीं	–	अं -	भीषिकायै नमः	-	जिह्वाग्रे
ओं ऐं ह्रीं श्रीं	–	अः -	कपालिन्यै नमः	-	कण्ठे
ओं ऐं ह्रीं श्रीं	–	कं –	उग्रायै नमः	-	दक्षिण बाहुमूले
ओं ऐं ह्रीं श्रीं	–	खं -	वीरायै नमः	-	दक्षिण कूर्परे
ओं ऐं ह्रीं श्रीं	–	गं –	महाज्वलायै नमः	-	दक्षिण मणिबन्धे
ओं ऐं ह्रीं श्रीं	–	घं -	हाकिन्यै नमः	-	दक्ष कराङ्गुलिमूले
ओं ऐं ह्रीं श्रीं	–	ङं –	विश्वरूपिण्यै नमः	-	दक्ष कराङ्गुल्यग्रे
ओं ऐं ह्रीं श्रीं	–	चं -	स्तुत्यायै नमः	-	वाम बाहुमूले
ओं ऐं ह्रीं श्रीं	–	छं -	ज्वलिन्यै नमः	-	वाम कूर्परे
ओं ऐं ह्रीं श्रीं	–	जं -	लक्ष्म्यै नमः	-	वाम मणिबन्धे
ओं ऐं ह्रीं श्रीं	–	झं –	तमिस्त्रायै नमः	-	वाम कराङ्गुलिमूले
ओं ऐं ह्रीं श्रीं	–	ञं -	सर्वतोमुख्यै नमः	-	वाम कराङ्गुल्यग्रे
ओं ऐं ह्रीं श्रीं	–	टं –	वरेण्यायै नमः	-	दक्ष ऊरुमूले
ओं ऐं ह्रीं श्रीं	–	ठं –	तोतुलायै नमः	-	दक्ष जानुनि
ओं ऐं ह्रीं श्रीं	–	डं –	मुख्यायैनमः	-	दक्ष जङ्घायाम्
ओं ऐं ह्रीं श्रीं	–	ढं –	ख्यातिदायै नमः	-	दक्ष पादाङ्गुलि मूले
ओं ऐं ह्रीं श्रीं	–	णं –	नृमुण्डमालायै नमः	-	दक्ष पादाङ्गुल्यग्रे
ओं ऐं ह्रीं श्रीं	–	तं -	सिंह्यै नमः	-	वामऊरुमूले
ओं ऐं ह्रीं श्रीं	–	थं –	हन्त्र्यै नमः	-	वाम जानुनि
ओं ऐं ह्रीं श्रीं	–	दं –	भीमायै नमः	-	वाम जङ्घायाम्
ओं ऐं ह्रीं श्रीं	–	धं –	खण्डिन्यै नमः	-	वाम पादाङ्गुलिमूले
ओं ऐं ह्रीं श्रीं	–	नं –	तारिण्यै नमः	-	वामपादाङ्गुल्यग्रे

ओं ऐं ह्रीं श्रीं	–	पं –	भयदायै नमः	-	दक्षिणपार्श्वे
ओं ऐं ह्रीं श्रीं	–	फं –	द्राविन्यै नमः	-	वामपार्श्वे
ओं ऐं ह्रीं श्रीं	–	बं –	मृत्युरूपिण्यै नमः	-	पृष्ठे
ओं ऐं ह्रीं श्रीं	–	भं –	मृत्यु कार्यै नमः	-	नाभौ
ओं ऐं ह्रीं श्रीं	–	मं –	मृत्यु हारिण्यै नमः	-	उदरे
ओं ऐं ह्रीं श्रीं	–	यं –	मृत्युन्नतायै नमः	-	हृदये
ओं ऐं ह्रीं श्रीं	–	रं –	नति प्रियायै नमः	-	दक्षांसे (असृगात्मनि)
ओं ऐं ह्रीं श्रीं	–	लं –	प्रियायै नमः	-	ककुदि (मांसात्मनि)
ओं ऐं ह्रीं श्रीं	–	वं –	मालिन्यै नमः	-	वामांसे (मेदात्मनि)
ओं ऐं ह्रीं श्रीं	–	शं –	ज्ञानरूपायै नमः	-	हृदादि दक्षकराङ्गुल्यन्ते (अस्थिनि)
ओं ऐं ह्रीं श्रीं	–	षं –	हंसिन्यै नमः	-	हृदयादि वामकराङ्गुल्यन्ते (मज्जात्मनि)
ओं ऐं ह्रीं श्रीं	–	सं –	शिखण्डिण्यैनमः	-	हृदादि दक्षपादाङ्गुल्यन्ते (शुक्रात्मनि)
ओं ऐं ह्रीं श्रीं	–	हं –	कुण्डिन्यै नमः	-	हृदादिवामपा दाङ्गुल्यन्ते (आत्मनि)
ओं ऐं ह्रीं श्रीं	–	ळं –	क्षान्त्यै नमः		कट्यादि पादाङ्गुल्यन्ते (परमात्मनि)
ओं ऐं ह्रीं श्रीं	–	क्षं –	कुरूपायै नमः		कट्यादिमस्तकान्ते (ज्ञानशक्तौ)

इति प्रत्यङ्गिराम्बायाः बहिर्मातृकान्यासः

अन्तमातृकाभैरवन्यासः (षट्चक्रमातृकान्यासः)

बहिर्मातृका वाणी ध्यानम्

सिन्दूरकान्ति मसिता भरणां त्रिनेत्रां -
विद्या क्षसूत्र मृगपोत वरं दधानाम्।
पार्श्वस्थितां भगवती मपि काञ्चनाङ्गीं -
ध्यायेत् कराब्ज धृत पुस्तक वर्णमालाम्।।

ओं ऐं ह्रीं श्रीं क्षं – कं खं गं घं ङं – अनन्तकोटि – भूचरीकुलसहितायै – आं क्षां मङ्गलाम्बादेव्यै आं क्षां ब्रह्माण्यम्बादेव्यै अनन्तकोटि भूचर कलसहिताय – मङ्गलानाथाय – अं क्षं असिताङ्गभैरवनाथाय नमः - मूलाधारे। वीणादण्डमूले

ओं ऐं ह्रीं श्रीं क्षं – चं छं जं झं ञं –अनन्तकोटि – खेचरीकुल सहितायै – ईं लां चर्चिकाम्बादेव्यै- ईं लां माहेश्वर्यम्बादेव्यै- अनन्तकोटि- वेतालकुलसहिताय – चर्चिकानाथाय – इं लं रुरुभैरव नाथाय नमः - स्वाधिष्ठाने। लिङ्गोर्ध्वे

ओं ऐं ह्रीं श्रीं क्षं – टं ठं डं ढं णं – अनन्तकोटि – पातालचरीकुल सहितायै – ऊं हां योगेश्वर्यम्बादेव्यै – ऊं हां कौमार्यम्बादेव्यै – अनन्तकोटि पिशाचकुल सहिताय – योगोश्वरीनाथाय उं हं चण्डभैरव नाथाय नमः - मणिपूरके – नाभौ ।

ओं ऐं ह्रीं श्रीं क्षं – तं थं दं धं नं – अनन्तकोटि – दिक्करीकुल सहितायै – ॠ सां हरसिद्धाम्बादेव्यै – ऋ सां वैष्णव्यम्बादेव्यै – अनन्तकोटि – अपस्मारकुल सहिताय- हरसिद्धानाथाय – ॠ सं क्रोधभैरव नाथायनमः - अनाहते - हृदये।

ओं ऐं ह्रीं श्रीं क्षं – पं फं बं भं मं – अनन्तकोटि – सहचरीकुल – सहितायै – ॡं षां भट्टिण्यि म्बादेव्यै – ॡंषां वाराह्यम्बादेव्यै – अनन्तकोटि ब्रह्मराक्षसकुल सहिताय- भट्टिनीनाथाय – ॡं षं उन्मत्त भैरवनाथाय नमः - विशुद्धौ -तालुमूले।

ओं ऐं ह्रीं श्रीं – यं रं लं वं – अनन्तकोटि – गिरिचरीकुल सहितायै- ऐं शां किलकिलाम्बादेव्यै – ऐं शां इन्द्राण्यम्बादेव्यै – अनन्तकोटि चेटक कुल सहिताय किलकिला नाथाय – एं शं कपाल भैरव नाथाय नमः आज्ञायां - भ्रुवोर्मध्ये

ओं ऐं ह्रीं श्रीं – शं षं सं हं – अनन्तकोटि- वनचरी कुल सहितायै –औं वां कालरात्र्यम्बादेव्यै – औं वां चामुण्डाम्बादेव्यै - अनन्तकोटि प्रेत कुल सहिताय- कालरात्रिनाथाय –ओं वं भीषण भैरव नाथाय नमः -फाले - निटिले ।

ओं ऐं ह्रीं श्रीं क्षं – ळं क्षं – अनन्तकोटि जलचरीकुल सहितायै – अः लां भीषणाम्बादेव्यै – अः लां महालक्ष्म्यम्बादेव्यै अनन्तकोटि कूष्माण्डकुल सहिताय- भीषणा नाथाय – अं लं संहार भैरवनाथाय नमः -ब्रह्मरन्ध्रे – शिरोर्ध्वबिले।

ओं ऐं ह्रीं श्रीं क्षं – अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः - कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं नमः समस्त मातृका भैरव देवताभ्यो - श्री परामबा –अथर्वणभद्रकाली प्रत्यङ्गिरायै नमः - सर्वाङ्गे। इति देवीदेहे सर्वाङ्गेषु मातृकाः व्यापकं विन्यस्यवि भावयेत्।।

भैरव्यम्बा न्यासः

वर्णेश्वरी वाणीध्यानम् (वर्णन्यासादौध्येया)

अक्षस्रजं हरिणपोत मुदग्रटङ्कं
विद्यां करै रविरतं दधतीं त्रिनेत्राम्।
अर्धेन्दुमौलि भरणां अरविन्दवासां
वर्णेश्वरीं प्रणमत स्तनभारखिन्नाम्।।

ओं ऐं ह्रीं श्रीं क्षं – अं कं खं गं घं ङं आं - क्षां – श्रीभैरव्यै नमः - मूलाधारे ।

ओं ऐं ह्रीं श्रीं क्षं – इं चं छं जं झं ञं ईं – क्षां – महाभैरव्यैनमः - स्वाधिष्ठाने ।

ओं ऐं ह्रीं श्रीं क्षं – उं टं ठं डं ढं णं ऊं –क्षां – सिंहभैरव्यै नमः - मणिपूरके ।

ओं ऐं ह्रीं श्रीं क्षं – ऋं तं थं दं धं नं ॠं – क्षां – धूम्रभैरव्यै नमः - अनाहते ।

ओं ऐं ह्रीं श्रीं क्षं – लृं पं फं बं भं मं लॄं – क्षां - भीमभैरव्यै नमः - विशुद्धौ ।

ओं ऐं ह्रीं श्रीं क्षं – एं यं रं लं वं ऐं - क्षां – उन्मत्तभैरव्यै नमः - आज्ञायाम्।।

ओं ऐं ह्रीं श्रीं क्षं – ओं शं षं सं हं औं – क्षां – वशीकरणभैरव्यैनमः - निटिले।

ओं ऐं ह्रीं श्रीं क्षं – अं ळं क्षं अः - क्षां- मोहन भैरव्यै नमः - ब्रह्मरन्ध्रे ।

ओं ऐं ह्रीं श्रीं क्षं – सर्ववर्णात्मिकाये ह्रीं क्षां - प्रत्यङ्गिराभैरव्यै नमः -सर्वाङ्गे ।

भद्रकाळी मालामन्त्रपद न्यासः

ओं आं ह्रीं क्रों	प्रणवात्मनि –	ज्वालाकाल्यै नमः	- शिरसि -
ओं क्रों ह्रीं आं	अष्टभुजे –	कपालकाल्यै नमः	- वदने -
ओं ह्रीं आं क्रों	शूलकपालधारिणि –	वह्निकाल्यै नमः	- दक्षिणनेत्रे -
ओं आं क्रों ह्रीं	प्रेतवाहिनि –	रक्तकाल्यै नमः	- वामनेत्रे -
ओं क्रों भं	सौःकाररूपिणि -	स्तम्भनकाल्यै नमः	- ऊर्ध्वदन्ते
ओं भं क्रों	ओङ्कारभाविनि –	त्रोटनकाल्यै नमः	- अधस्सिंहदन्ते -
ओं भं ह्रीं	युद्धोत्कारभैरवि –	संहारकाल्यै नमः	- दक्षनासिकायाम्-
ओं ह्रीं भं	शत्रुभीषणि –	द्वेषणकाल्यै नमः	-वाम नासिकायाम्-
ओं श्रीं क्रों	दंष्ट्राकराळवदने –	फट्काल्यै नमः	- दक्षिणगळे -
ओं भ्रीं श्रीं	अत्युग्रचर्माम्बरे –	चण्डकाल्यै नमः	- वाम गळे -
ओं श्रीं क्लीं	सिंहदन्तोग्रयुगळे –	मोहनकाल्यै नमः	- ऊर्ध्वोष्टे -
ओं ऐं भ्रं	शत्रुनाशिनि-	क्रोधनकाल्यै नमः	- अधरोष्टे -
ओं क्रों भ्रैं	असुरमर्दिनि –	द्राविणीकाल्यै नमः	- दक्षश्रवणे -
ओं भ्रैं क्रों	क्रोधवेषे –	क्षुद्रकाल्यै नमः	- वामश्रोत्रे -
ओं क्रों क्लीं	महाप्रळयसञ्चारिणि –	प्रचण्डकाल्यै नमः	- जिह्वायाम् -
ओं ह्रीं श्रीं	सिंहवाहिनि –	क्षोभणकाल्यै नमः	- जिह्वाग्रे -
ओं क्षं क्रां	षट् चक्रसञ्चारिणि –	जृम्भणकाल्यै नमः	- दक्षिणहस्ते -

ओं ह्रीं क्षौं	पैशाचगणसेविते –	घोषणकाल्यै नमः	- वामहस्ते -
ओं ओं क्ष्म्यूं रं	घोररूपिणि –	उन्मत्तकाल्यै नमः	- हृदये -
ओं ह्रीं क्लीं	वीरभयङ्करि –	आकर्षणकाल्यै नमः	- दक्षिणस्तने -
ओं श्रीं क्लीं	वीरशक्ति –	विराट् काल्यै नमः	- वामस्तने -
ओं भ्रं क्रों	कालकण्ठि -	भीषणकाल्यै नमः	- नाभौ -
ओं रं क्षीं	सप्तकोटि महामन्त्र स्वरूपे –	रौद्रकाल्यै नमः	- दक्षिणपार्श्वे -
ओं क्षों रं	भ्रमरानन्दिनि –	भेदनकाल्यै नमः	- वामपार्श्वे -
ओं क्ष्म्यूं ऐं -	रणभद्रि -	हुंकारकाल्यै नमः	- कट्याम् -
ओं क्लीं म्रं	त्रिकोणचक्र स्थिते –	भ्रमरकाल्यै नमः	- योनौ
ओं भ्रं ह्रीं	दुष्टवर्जिते –	गर्जितकाल्यै नमः	- पृष्ठयोः -
ओं ओं क्षं ह्रीं	बिन्दुशक्ति –	भूतकाल्यै नमः	- ऊर्वोः -
ओं रुं दुं	त्रैलोक्यभीषणि –	तुष्टिकाल्यै नमः	- दक्षिणजानु पादान्ते-
ओं हुं रं	संहारवेषे –	खड्गकाल्यै नमः	- वामजानु पादान्ते-
ओं आं ह्रीं	महिष मर्दिनि-	वषट्काल्यै नमः	- त्वचि -
ओं ह्रीं भ्रं	पञ्चप्रेताधिशायिनि –	ब्रह्मकाल्यै नमः	- माम्से -
ओं क्षं रं	विषनाशिनि –	संहारकाल्यै नमः	- अस्थिनि -
ओं श्रीं ऐं	त्रिपुरनाशिनि –	घोरकाल्यै नमः	- मेधसि -
ओं ह्रीं क्रीं	कालिके हुंफट्-	भद्रकाल्यै नमः	- प्राणाधारे

इति कालीमन्त्रपदन्यासः समाप्तः।

षडङ्गशक्तिन्यासः

ओं श्रीं ह्रीं क्रां काली हृदयदेव्यै - वामिन्यै मः हृदये

ओं श्रीं ह्रीं क्रीं कालीशिरोदेव्यै - नीलिन्यै नमः शिरसि

ओं श्रीं ह्रीं क्रूं कालीशिखादेव्यै - चक्रिण्यै नमः शिखायां

ओं श्रीं ह्रीं क्रैं कालीकवचदेव्यै - खड्गिन्यै नमः अङ्गेषु

ओं श्रीं ह्रीं क्रौं कालीनेत्रदेव्यै - पाशहस्तायै नमः नेत्रेषु

ओं श्रीं ह्रीं क्रः काली अस्त्रदेव्यै - गांभिण्यै नमः हस्तेषु

प्रत्यङ्गिरा प्राणप्रतिष्ठा न्यासः
(इष्ठदेवताप्राणस्थापन प्रकारः)

ओं अस्य – श्री प्रत्यङ्गिराम्बायाः - प्राणप्रतिष्ठा मन्त्रस्य –ब्रह्मविष्णुमहेश्वराः ऋषयः - ऋग्यजुस्सामाथर्वण श्छन्दांसि- प्राणाद्यादिनी – चैतन्यमयी – सकल जगत् सृष्टिस्थिति संहारकारिणी – प्राणशक्तिः - परादेवता – आं बीजम् – ह्रीं – शक्तिः - क्रों- कीलकम्- श्री प्रत्यङ्गिराम्बा प्रसादसिद्ध्यर्थे – जपे (भूतशुद्ध्यन्ते – मम शरीरे श्रीमत्प्रत्यङ्गिराम्बादेवता प्रतिष्ठापने – प्राणस्थापने - विनियोगः।

1. **ऋष्यादिन्यासः**

ओं ऐं ह्रीं श्रीं क्षं ब्रह्मविष्णुमहेश्वर ऋषिभ्यो नमः -शिरसि -

ओं ऐं ह्रीं श्रीं क्षं ऋग्यजुस्सामाथर्वण - छन्देभ्यो नमः - मुखे -

ओं ऐं ह्रीं श्रीं क्षं प्राणशक्ति – दैंवतायै नमः - हृदये

ओं ऐं ह्रीं श्रीं क्षं आंइतिपाशबीजाख्य – बीजाय नमः - गुह्ये -

ओं ऐं ह्रीं श्रीं क्षं – ह्रींइति मायाबीजाख्य - शक्तये नमः - पादयोः।

ओं ऐं ह्रीं श्रीं क्षं – क्रों इति अंकुशबीजाख्य - कीलकाय नमः - नाभौ।

ओं ऐं ह्रीं श्रीं क्षं – ह्सौं स्हौं प्राणशक्ति देवताभ्यो नमः - सर्वाङ्गे।

2. करन्यास:

1. ओं ऐं ह्रीं श्रीं क्षं ओं - अं - कं खं गं घं ङं - आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं नभोवाय्वग्निर्जलभूम्यात्मने – प्राणात्मने क्रों ह्रीं आं आं अङ्गुष्ठाभ्यां नम: (ओं क्षं सं हंस: ह्रीं ओं हंस: इति सप्ताक्षरमन्त्र:)

2. ओं ऐं ह्रीं श्रीं क्षं ओं - इं - चं छं जं जं झं ञं - आं ह्रीं क्रों – यरलवशषसहों – हंसस्सोहं – शब्दस्पर्शरूपरसगन्धात्मने – अपानात्मने – क्रो ह्रीं आं - ई – तर्जनीभ्यां नम:

3. ओं ऐं ह्रीं श्रीं क्षं ओं - उं टं ठं डं ढं णं – आं ह्रीं क्रों – यरलवशषसहों - हंसस्सोहं – श्रोत्रत्वक् चक्षुर्जिह्वाघ्राणात्मने - व्यानात्मने- क्रों ह्रीं आं - ऊं – मध्यमाभ्यां नम:

4. ओं ऐं ह्रीं श्रीं क्षं –ओं ॠं - एं - तं थं दं धं नं - ओं ह्रीं क्रों - यरलवशषसहों - हंसस्सोहं -वाक्पाणिपादपायूपस्थात्मने - उदानात्मने – क्रों ह्रीं आं - ॠं – ऐं - अनामिकाभ्यांनम:

5. ओं ऐं ह्रीं श्रीं क्षं ओं - ॡं – ओं - पं फं बं भं मं - आं ह्रीं क्रों –यरलवशषसहों -हंसस्सोहं - वचनादानगमन विसर्गानन्दात्मने–श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात् मने - समानात्मने - क्रों ह्रीं आं ॡं – औं - कनिष्ठिकाभ्यां नम: -

6. ओं ऐं ह्रीं श्रीं क्षं ओं एं – अं आं ह्रीं क्रों - यरलवशषसहों - ळ क्षं - हंसस्सोहं - मनो बुद्धि रहंकार चित्त ज्ञानात्मने – विसर्गानन्दात्मने –क्रों ह्रीं आं - ऐं - अ: करतल करपृष्ठाभ्यां नम: - इतिकरयोर्विन्यस्य ततो अङ्गेषुन्यसेत्।

3. अङ्गन्यास: (हृदयादिषडङ्गन्यास:)

सप्ताक्षरमन्त्र:

1. ओं ऐं ह्रीं श्रीं क्षं ओं – अं - कं खं गं घं ङं - आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं

2. ओं क्षं सं हंस: ह्रीं ओं हंस: नभोवाय्वग्निर्जलभूम्यात्मने – प्राणात्मने - क्रों ह्रीं आं - आं हृदयाय नम:

3. ओं ऐं ह्रीं श्रीं क्षं ओं - इं - चं छं जं जं झं ञं - आं ह्रीं क्रों – यरलवशषसहे – हंसस्सोहं – शब्दस्पर्शरुपरसगन्धात्मने – अपानात्मने – क्रों ह्रीं आं – ई – शिरसे स्वाहा -

4. ओं ऐं ह्रीं श्रीं क्षं ओं - उं टं ठं डं ढं णं – आं ह्रीं क्रों – यरलवशषसहों – हंसस्सोहं – श्रोत्रत्वक् चक्षुर्जिह्वाघ्राणात्मने - व्यानात्मने- क्रों ह्रीं आं – ऊं – शिखायै वषट् -

5. ओं ऐं ह्रीं श्रीं क्षं – ओं ॠं - एं तं थं दं धं नं - ओं ह्रीं क्रों - यरलवशषसहों - हंसस्सोहं - वाकपाणिपादपायूपस्थात्मने - उदानात्मने – क्रों ह्रीं आं - ॠं - ऐं कवचाय हुम् -

6. ओं ऐं ह्रीं श्रीं क्षं – ओं - ऌं ओं - पं फं बं भं मं - आं ह्रीं क्रों – यरलवशषसहो हंसस्सोहं - वचनादानगमनविसर्गानन्दात्मने – श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात् मने - समानात्मने - क्रों ह्रीं आं - ॡं औं - नेत्रत्रयाय वौषट् -

7. ओं ऐं ह्रीं श्रीं क्षं – ओं एं अं - आं ह्रीं क्रों - यरलवशषसहों - ळ क्षं – हंसस्सोहं - मनो बुद्धिरहंकारचित्तज्ञानात्मने – विसर्गानन्दात्मने –क्रों ह्रीं आं - ऐं अः अस्त्राय फट् -

4. व्यापकन्यासः

ओं ऐं ह्रीं श्रीं क्षं – आं नमः इति – पादादारभ्य नाभ्यन्तं पाशबीजं न्यसेत्।

ओं ऐं ह्रीं श्रीं क्षं – ह्रीं नमः – इति – नाभ्यादारभ्य हृदयान्तं मायाबीजं न्यसेत्।

ओं ऐं ह्रीं श्रीं क्षं – क्रों नमः - इति – हृदयादारभ्य मस्तकान्तं सृणिबीजं न्यसेत्।

ओं यं रं लं वं शं षं सं हं ळं क्षं नमः - इति मूर्धादि चरणावधि मूलबीज व्यापकं कुर्यात्।

5. त्वगादिन्यासः

ओं ऐं ह्रीं श्रीं क्षं- यं – त्वगात्मने नमः - देहे त्वचि

ओं ऐं ह्रीं श्रीं क्षं – रं – असृगात्मने नमः - रुधिरे

ओं ऐं ह्रीं श्रीं क्षं – लं – मांसात्मने नमः - मांसेषु

ओं ऐं ह्रीं श्रीं क्षं – वं – मेदात्मने नमः - मेधसि

ओं ऐं ह्रीं श्रीं क्षं – शं – अस्थ्यात्मने नमः - अस्थिनि

ओं ऐं ह्रीं श्रीं क्षं – षं – मज्जात्मने नमः - मज्जास्थाने

ओं ऐं ह्रीं श्रीं क्षं – सं – शुक्रात्मने नमः - शुक्रे

ओं ऐं ह्रीं श्रीं क्षं – ह्रों – ओजसात्मने नमः - ओजसि

ओं ऐं ह्रीं श्रीं क्षं – हूं – प्राणात्मने नमः - प्राणाधारे

ओं ऐं ह्रीं श्रीं क्षं – सं – जीवात्मने नमः - अणौ

ओं ऐं ह्रीं श्रीं क्षं - यं रं लं वं शं षं सं हं ळं क्षं सर्वात्मने नमः - सर्वाङ्गे

प्राणशक्ति पीठदेवतान्यासः (प्रयोगः)

ओं ऐं ह्रीं श्रीं क्षं – मं मण्डूकाय नमः - मूलाधारे

ओं ऐं ह्रीं श्रीं क्षं – कं कालाग्निरुद्राय नमः - स्वाधिष्ठाने

ओं ऐं ह्रीं श्रीं क्षं – कं कच्छपाय नमः - मणिपूरके

ओं ऐं ह्रीं श्रीं क्षं – आं आधारशक्तये नमः - अनाहते हृदये

ओं ऐं ह्रीं श्रीं क्षं – पं – प्रकृतये नमः - अनाहते

ओं ऐं ह्रीं श्रीं क्षं – कं कूर्माय नमः - हृदये

ओं ऐं ह्रीं श्रीं क्षं – अं अनन्ताय नमः - हृदये

ओं ऐं ह्रीं श्रीं क्षं – पृं पृथिव्यै नमः - हृदये

ओं ऐं ह्रीं श्रीं क्षं – क्षं क्षीरसमुद्राय नमः - हृदये

ओं ऐं ह्रीं श्रीं क्षं – रं रत्नद्वीपाय नमः - हृदये

ओं ऐं ह्रीं श्रीं क्षं – कं कल्पवृक्षाय नमः - हृदये

ओं ऐं ह्रीं श्रीं क्षं – मं मणिमण्डपाय नमः -हृदये

ओं ऐं ह्रीं श्रीं क्षं – सं स्वर्णसिंहासनाय नमः - हृदये

ओं ऐं ह्रीं श्रीं क्षं - धं धर्माय नमः - दक्षिणस्कन्धे

ओं ऐं ह्रीं श्रीं क्षं – ज्ञं ज्ञानाय नमः - वामस्कन्धे

ओं ऐं ह्रीं श्रीं क्षं – वं वैराग्याय नमः - दक्षिणोरौ (दक्षोरुपार्श्वे)

ओं ऐं ह्रीं श्रीं क्षं – ऐं ऐश्वर्याय नमः - वामोरौ (वामोरुपार्श्वे)

ओं ऐं ह्रीं श्रीं क्षं – अं अधर्माय नमः - मुखे

ओं ऐं ह्रीं श्रीं क्षं – अं अज्ञानाय नमः - दक्षिणपार्श्वे

ओं ऐं ह्रीं श्रीं क्षं – अं अवैराग्याय नमः - नाभौं

ओं ऐं ह्रीं श्रीं क्षं – अं अनैश्वर्याय नमः - वामपार्श्वे
ओं ऐं ह्रीं श्रीं क्षं – कं कल्पान्तकाराय अनन्ताय नमः - अनाहते
ओं ऐं ह्रीं श्रीं क्षं – पं पद्माय नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – आं पद्माय नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – आं आनन्दमय कन्दाय नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – सं संविन्मय नालाय नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – विं विकारमय केसरेभ्यो नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – पं प्रकृत्यात्मक पत्रेभ्यो नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – पं पञ्चाशद्वर्णकर्णिकायै नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – अं अग्निमण्डलाय दशकलात्मने नमः - नाभौ
ओं ऐं ह्रीं श्रीं क्षं – रं वह्निमण्डल धूम्रार्चिषादि दशकलाभ्यो नमः - नाभौ
ओं ऐं ह्रीं श्रीं क्षं – सं सूर्यमण्डलाय द्वादशकलात्मने नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – सं सूर्यमण्डल तपिन्यादि द्वादशकलाभ्यो नमः - हृदये
ओं ऐं ह्रीं श्रीं क्षं – चं चन्द्रमण्डलाय षोडशकलात्मने नमः - भ्रूमध्ये
ओं ऐं ह्रीं श्रीं क्षं – आं सोममण्डल अमृतादि षोडशकलाभ्यो नमः - भ्रूमध्ये
ओं ऐं ह्रीं श्रीं क्षं – सं सत्वायनमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – रं रजसे नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – तं तमसे नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – आं आत्मने नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – अं अन्तरात्मने नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – पं परमात्मने नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – ज्ञं ज्ञानात्मने नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – मं मायायै नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – कं कलातत्त्वाय नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – विं विद्यातत्वाय नमः - ललाटे
ओं ऐं ह्रीं श्रीं क्षं – पं परतत्वाय नमः - ललाटे

प्रत्यङ्गिरा पीठशक्तिन्यासः

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – जयायै नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – विजयायै नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – अजितायै नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – अपराजितायै नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – नित्यायै नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – विलासिन्यै नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – दोग्ध्रायै नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – अघोरायै नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – मङ्गलायै नमः - कर्णिकायाम्

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – मण्डूकादि परतत्वान्त पीठदेवताभ्यो नमः हृत्पद्मे -

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – पीठशक्तिभ्यो जयादिभ्यो नमः हृदये

ओं ऐं ह्रीं श्रीं क्षं – आं ह्रीं क्रों – सर्वशक्त्यात्मक पद्मपीठाय नमः - इति हृत्सरोजे -

प्राणशक्ति ध्यानानि (ध्यानत्रयम्)

ध्यानम्

रक्ताब्धि पोतारुण पद्मसंस्थां
पाशाङ्कुशेष्वास शराऽसिबाणान्।
शूलं कपालं दधतीं कराब्जैः
रक्तां त्रिनेत्रां प्रणमामि देवीम्।।

अन्यत् ध्यानम्

पाशं चापा सृक्कपाले सृणीषू
शूलं हस्तै र्बिभ्रतीं रक्तवर्णाम्।
रक्तोदन्वत्पोतरक्तांबुजस्थां
देवींध्यायेत् प्राणशक्तिं त्रिनेत्राम्।।

अन्यत् ध्यानम्

रक्ताम्भोधिस्थ पोतो ल्लस दरुण सरोजा धिरुढा कराब्जैः
पाशं कोदण्ड मिक्षूद्भव मळि गुण मप्यङ्कुशं पञ्च बाणान्।
बिभ्राणा ऽसृक्कपालं त्रिनयन लसिता पीन वक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः।।
एवं प्राणशक्तिस्वरुपं ध्यात्वा स्थापयेत्-

प्राणप्रतिष्ठामन्त्रन्यासः

ओं ऐं ह्रीं श्रीं क्षं क्रीं- आं ह्रीं क्रों – क्ष्म्र्यूं – यंरंलंवंशंषंसंहंळंक्षं ओंक्षंसंहंसः ह्रीं ओं हंसः सोहं हंसः (मम शरीरे) (मम) अस्याः महाभैरवशिव सहित महाभैरवि पराम्बिका प्रत्यंगिरा देव्याः - प्राणाः इहप्राणाः - आं ह्रीं क्रों – यरलवशषसहों – ओं क्षं सं हंसः ह्रीं ओं हंसःअस्याःजीव इह स्थितः आं ह्रीं क्रों यरलवशषसहों - ओं क्षंसं हंसः - ह्रीं ओं हंसः - अस्याः सर्वेन्द्रियाणि – (इहस्थितानि-) वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणा – मनोबुद्धिरहंकार – शब्दस्पर्शरूपरसगन्ध – वाक्पाणिपादपायूपस्थानि – त्वगसृक्मांस (रुधिर) मेदोऽस्थिमज्जाशुक्ल-चित्तात्म –प्राणापान व्यानोदान समानाः

इहैवागत्यागत्य – अस्मिन् – बिम्बे – अस्यां मूर्तौ – अस्मिन्यन्त्रे – अस्मिन् कुम्भे-दीपे / शूले / पटे / चित्रे / इत्यादि मूर्तिनिदेशः) सुखं चिरं तिष्ठन्तु स्वाहा - ओं क्षं संहंहंसः हों ओं ग्लौं स्थंभय स्थंभय ओं ठम्।

असुनीते पुनरस्मासु चक्षुः पुनः प्राण मिहनो धेहि भोगम्।

ज्योक्पश्येम सूर्य मुच्चरन्त मनु मते मृडया न स्वस्ति।

अंगुष्ठा नामिका युक्तया लेलिहान मुद्रया हृदये विन्यसेत्।

महापद्म वनान्तस्थे कारणानन्द विग्रहे।

सर्वभूतस्थिते मातः एह्येहि परमेश्वरि।।

अस्मिन् बिंबे सन्निध्यं कुरुकुरु स्वाहा – अष्टमातृसहित – कालि सान्निध्यं कुरुकुरु स्वाहा ।

सञ्चरन्ति भूताः सर्वे जीवने प्रवहन्ति च।

अरुणा (भा) सुषुम्नाशक्तिः प्राणान्सं स्थापयाम्यहम्।।

मम देहस्थायाः देवतायाः पञ्चदशवार प्रणवोच्छारणेन गर्भाधानादि - पञ्चदशसंस्कारान् - संपादयामि। ततो भैरवसहित भैरव्याः मनसा पञ्चोपचार पूजान्ते – पुष्पाञ्जलि त्रयं - दद्यात्।।

जीवन्यासे कर्तव्यविधिः

प्रत्येकं कदिवर्गैः प्रतिगत लिखिभिः बिन्दुयुक्तैर्लवाद्यैः

शब्दाद्यैश्श्रोत्रवर्गैः वदनकरमुखे चक्रनेमि क्रमेण।

बुध्यन्मध्यैश्चात्मनोन्तै रुपरि च विलसज्जातिभिष्पङ्भि रेवं

कुर्यादङ्गानि सम्यक् निदश पटुमितुं विश्वरुपस्य सिध्यै।

(प्राणप्रतिष्ठामन्त्रे वक्तव्याः)

1.कादिबर्गञ्चकवर्णाः 2.बीजाक्षरादयः 3. दिक्पाल बीजानि
4. हंस मन्त्रः 5. इन्द्रियादि तत्वानि 6. प्राणादि पञ्चवायवः।

एतेषां षण्णां न्यासेन जीवसिद्धि र्भवेत्।

दूतिका न्यासः (नवदूत्यः)

नवदूतिकानामानि

अमृता वैवस्वता चैव जीवहा प्राणहा तथा।
आकर्ष ग्रन्थिनी दूती प्रमदा विस्फुलिङ्गिनी।
क्षेत्रप्रतिहरी दूती प्राणदूत्यस्तु यादिकाः।।

नवदूतिकान्यासः (तद्यथा)

1. हृदयकमले – ओं आं ह्रीं क्रों यरलवशषसहों हंसस्सोहं सोहंहंसः - यं – अमृते दूति – आगच्छ आगच्छ – (अमुष्य)अस्याः हृदयं प्रविश्य – सजातीयं संग्राह्य - बलादाकृष्य - त्वग्रूपमानय आनय – कुम्भात् बिम्बं प्रवेशय प्रवेशय (कलाकर्षणेतु - बिम्बात् कुम्भं – प्रवेशय प्रवेशय इति वदेत्) स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिरा भव स्थिरा भव – वौषण्णमः- ओं आं ह्रीं क्रों यरलवशषसहों – हसस्सोहं हंसः (अमुष्यपरमेश्वरस्य) अस्याः देव्याः त्वगात्मनः - प्राण इह प्राण - जीव इह स्थितः (अमुष्य) अस्याः सर्वेन्द्रियाणि – वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राण प्राणाः - इहैवागत्य आगत्य – अस्मिन् बिम्बे (अस्यां प्रतिमायां/अस्मिन् यन्त्रे) अस्यां मूर्तौ - सुखं चिरं तिष्ठन्तु स्वाहा। ग्लौं स्थम्भय स्थम्भय ओं ठम्।

2. ओं आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं सोहंहंसः - रं – वैवस्वते दूति - आगच्छ आगच्छ - (अमुष्य) अस्याः हृदयं प्रविश्य –सजातीयं सङ्ग्राह्य – बलादाकृष्य – असृग् रुपमानय आनय – कुम्भात् बिम्बं प्रवेशय प्रवेशय – स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिराभव स्थिराभव वौषण्णमः ओं आं ह्रीं क्रों यरलवशषसहों - हंसस्सोहंहंसः -(अमुष्य) अस्याः असृगात्मनः प्राण - इह - प्राण –जीव इहस्थितः (अमुष्य) अस्याः सर्वोन्द्रियाणि – वाङ्मनश्चक्षुश्रोत्र जिह्वाघ्राणप्राणाः - इहैवागत्य आगत्य – अस्मात् कुम्भात् अस्मिन् बिम्बे सुखं चिरं तिष्ठन्तु स्वाहा। ग्लौं स्थंभय स्थंभय – ओं ठम्।

3. ओं आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं सोहंहंसः - लं जीवहे दूति - आगच्छ आगच्छ (अमुष्य) अस्याः हृदयं प्रविश्य –सजातीयं सङ्ग्राह्य - बलादाकृष्य – मांसरूपं आनय आनय – कुम्भात् बिम्बं प्रवेशय प्रवेशय - स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिराभव स्थिराभव - वौषण्णमः - ओं आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं - हंसः (अमुष्य) अस्याः मांसात्मनः प्राण इह प्राण –जीव इह स्थितः (अमुष्य) अस्याः सर्वोन्द्रियाणि – वाङ्मनश्चक्षुश्रोत्र जिह्वाघ्राणप्राणाः इहैवागत्यआगत्य – अस्मात् कुम्भात् अस्मिन् बिम्बे सुखंचिरंतिष्ठन्तुस्वाहा। ग्लौंस्थंभय स्थंभय – ओं ठम्।

4. ओं आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं सोहंहंसः - वं प्राणहे दूति - आगच्छ आगच्छ (अमुष्य) अस्याः हृदयं प्रविश्य –सजातीयं सङ्ग्राह्य - बलादाकृष्य – मेदोरूपं आनय आनय – कुम्भात् बिम्बं प्रवेशय प्रवेशय - स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिराभव स्थिराभव - वौषण्णमः - ओं आं ह्रीं क्रों -यरलवशषसहों – हंसस्सोहं - हंसः (अमुष्य) अस्याः मेदात्मनः प्राण इह प्राण –जीव इह स्थितः (अमुष्य) अस्याः सर्वोन्द्रियाणि – वाङ्मनश्चक्षुश्रोत्र जिह्वाघ्राणप्राणाः - इहैवागत्यआगत्य - अस्मात् कुम्भात् अस्मिन् बिम्बे सुखं चिरं तिष्ठन्तु स्वाहा – ग्लौं स्थंभय स्थंभय – ओं ठम्।

5. ओं आं ह्रीं क्रों यरलवश षसहों – हंसस्सोहंसोहंहंसः - शं आकर्षे - आगच्छ आगच्छ - (अमुष्य) अस्याः हृदयं प्रविश्य –सजातीयं सङ्ग्राह्य – बलादाकृष्य – अस्थिरूपं आनय आनय – कुम्भात् विम्वं प्रवेशय प्रवेशय – स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिराभव स्थिराभव वौषण्णमः ओं आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं हंसः - (अमुष्य) अस्याः अस्थ्यात्मनः प्राण इह प्राण –जीव इह स्थितः (अमुष्य) अस्याः सर्वोन्द्रियाणि – वाङ्मनश्चक्षुश्रोत्र जिह्वाघ्राणप्राणाः इहैवागत्यआगत्य – अस्मात् कुम्भात् - अस्मिन् बिम्बे – सुखं चिरं तिष्ठन्तु स्वाहा – ग्लौं स्थंभय स्थंभय – ओं ठम्।

6. ओं आं ह्रीं क्रों यरलवश षसहों – हंसस्सोहंसोहंहंसः - षं ग्रन्थिनि दूति - आगच्छ आगच्छ (अमुष्य) अस्याः हृदयं प्रविश्य –सजातीयं सङ्ग्राह्य – बलादाकृष्य – मज्जारूपं आनय आनय – कुम्भात् विम्वं प्रवेशय प्रवेशय – स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिराभव स्थिराभव वौषण्णमः ओं आं ह्रीं क्रों यरलवशषसहों हंसस्सोहंहंसः (अमुष्य) अस्याः मज्जात्मनः प्राणइहप्राण –जीव इहस्थितः (अमुष्य) अस्याः सर्वोन्द्रियाणि – वाङ्मनश्चक्षुश्रोत्र जिह्वाघ्राणप्राणाः इहैवागत्यआगत्य – अस्मात् कुम्भात् अस्मिन् बिम्बे सुखंचिरंतिष्ठन्तुस्वाहा। ग्लौंस्थंभय स्थंभय – ओं ठम्।

7. ओं आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं सोहंहंसः - सं प्रमदे दूति - आगच्छ आगच्छ (अमुष्य) अस्याः हृदयं प्रविश्य –सजातीयं सङ्ग्राह्य – बलादाकृष्य – शुक्लरूपं आनय आनय – कुम्भात् बिम्बं प्रवेशय प्रवेशय – स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिराभव स्थिराभव वौषण्णमः ओं आं ह्रीं क्रों - यरलवशषसहों - हंसस्सोहंहंसः (अमुष्य) अस्याः शुक्लात्मनः प्राण इह प्राण –जीव इह स्थितः (अमुष्य) अस्याः सर्वोन्द्रियाणि – वाङ्मनश्चक्षुश्रोत्र जिह्वाघ्राणप्राणाः इहैवागत्य आगत्य – अस्मात् कुम्भात् अस्मिन् बिम्बे – सुखं – चिरं – तिष्ठन्तु – स्वाहा – ग्लौं स्थंभय स्थंभय – ओं ठम्।

8. ओं आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं - सोहंहंसः - हं विस्फुलिङ्गिनि दूति - आगच्छ आगच्छ -(अमुष्य) अस्याः हृदयं प्रविश्य –सजातीयं सङ्ग्राह्य – बलादाकृष्य – प्राणरूपं आनय आनय – कुम्भात् बिम्बं प्रवेशय प्रवेशय – स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिराभव

स्थिराभव वौषण्णमः - ओं आं ह्रीं क्रों - यरलवशषसहों –हंसस्सोहं हंसः (अमुष्य) अस्याः प्राणात्मनः प्राण इह प्राण –जीव इह स्थितः (अमुष्य) अस्याः सर्वेन्द्रियाणि – वाङ्मनश्चक्षुश्रोत्र जिह्वाघ्राणप्राणाः इहैवागत्य आगत्य – अस्मात् कुम्भात् अस्मिन् बिम्बे – सुखं –चिरं – तिष्ठन्तु - स्वाहा – ग्लौं स्थंभय स्थंभय – ओं ठम्।

9. ओं आं ह्रीं क्रों - यरलवश षसहों – हंसस्सोहं सोहंहंसः - ळं क्षेत्रप्रतिहारि दूति - आगच्छ आगच्छ - (अमुष्य) अस्याः हृदयं प्रविश्य –सजातीयं सङ्ग्राह्य – बलादाकृष्य – जीवरूपं आनय आनय – कुम्भात् बिम्बं प्रवेशय प्रवेशय – स्थापय स्थापय – पुनरागच्छ आगच्छ – स्वस्थाने स्थिराभव स्थिराभव वौषण्णमः ओं आं ह्रीं क्रों - यरलवशषसहों – हंसस्सोहं हंसः - (अमुष्य) अस्याः जीवात्मनः प्राण इह प्राण –जीव इह स्थितः (अमुष्य) अस्याः सर्वेन्द्रियाणि – वाङ्मनश्चक्षुश्रोत्र जिह्वाघ्राणप्राणाः इहैवागत्य आगत्य – अस्मात् कुम्भात् अस्मिन् बिम्बे सुखं चिरं तिष्ठन्तु स्वाहा - ग्लौं स्थंभय स्थंभय – ओं ठम्।

नवयोनि न्यासविधिः (अवयवानां त्रिकोणाकारेषु)

नवयोन्या भिधे न्यासे नवकृत्वो मनुं न्यसेत्।
कर्णयो श्चिबुके न्यस्येत् शङ्खयो र्मुखपङ्कजे।।
नेत्रयो र्नासिकायां च स्कन्धयो रुदरे तथा।
न्यसेत् कूर्परयो र्नाभौ जानुनो र्लिङ्गमस्तके।
पादयो रपि गुह्ये च पार्श्वयो र्हृदये पुनः।
स्तनयोः कण्ठदेशे च वामाङ्गादि प्रविन्यसेत्।।

इत्युक्तप्रकारेण

प्रत्यङ्गिरायाः - ऐं ह्रीं श्रीं - इति बीजत्रयं प्रणवादि नमोन्तं नव त्रिकोणस्थानेषु नववारम् क्रमेण 1. श्रोत्रयोःचुबुके - 2. गण्डयोः आस्ये - 3. दृशोः नासिकायाम् - 4. अंसयोः हृदये - 5. कूर्परयोः कुक्षौ - 6. जान्वोः अण्डे - 7. पादयोः स्वाधिष्ठाने - 8. पार्श्वयोः हृदये - 9. स्तनयोः कण्ठे च - एवं मूलमन्त्रेण खण्डत्रयेण न्यसेत्।।

पञ्चमहाभूत न्यासः

ओं क्षितिरूपायमूलाधार चक्राय नमः वीणादण्डमूलकन्द देशे।
ओं आप्यरूपायस्वाधिष्ठानचक्राय नमः लिङ्गोर्ध्वे लिङ्गमूले
ओं तेजोरूपायमणिपूरकचक्राय नमः नाभिदेशे नाभौ
ओं वायुरूपाय अनाहत चक्राय नमः हृदये हृत्प्रदेशे
ओं व्योमरूपायविशुद्धिचक्राय नमः कण्ठे
ओं परमाकाशरूपाय आज्ञाचक्राय नमः भ्रूमध्ये बिन्धौ।

करन्यासः

ओं ह्रां - अंगुष्ठाभ्यां नमः
ओं ह्रीं - तर्जनीभ्यां नमः
ओं ह्रूं - मध्यमाभ्यां नमः
ओं ह्रैं - अनामिकाभ्यां नमः
ओं ह्रौं - कनिष्ठिकाभ्यां नमः
ओं ह्रः - करतलकरपृष्ठाभ्यां नमः

षडङ्गमन्त्र

ओं ह्रां - हृदयाय नमः - हृदये
ओं ह्रीं - शिरसे स्वाहा –शिरसि
ओं ह्रूं - शिखायै वषट् – शिखायां
ओं ह्रैं - कवचायहूं – बाहुस्कन्धयोः
ओं ह्रौं - नेत्रत्रयाय वौषट् – नेत्रयोः
ओं ह्रः - अस्त्रायफट् – दक्षहस्ततर्जनी भ्रमणेन हस्तयोः।

शक्तिबीज न्यासः

(भुवनेश्वरी कुण्डलिनीशक्तिबीज न्यासः)

ओं ह्रीं नमः - ब्रह्मरन्ध्रे
ओं ह्रीं नमः - भ्रूमध्ये
ओं ह्रीं नमः - ललाटे
ओं ह्रीं नमः - नाभौ
ओं ह्रीं नमः - गुह्ये
ओं ह्रीं नमः - मुखे
ओं ह्रीं नमः - सर्वाङ्गे

(तत्तत्स्थानेस्पृष्ट्वाविन्यसेत)

षोढान्यासः (षड्प्रकार न्यासः)

ओं ह्रीं अं ह्रीं प्रत्यङ्गिरायै नमः
अं क्षं श्रीकण्ठ मातृकान्यासः
ओं ह्रीं आं ह्रीं
ओं ह्रीं इं ह्रीं
ओं ह्रीं ईं ह्रीं

1. रुद्रनाम न्यासः

ह्रीं अं श्रीकण्ठेशाय नमः ललाटे।
ह्रीं आं अनन्तदेशाय नमः मुखवृत्ते।
ह्रीं इं सूक्ष्मेशाय नमः दक्षःनेत्रे।
ह्रीं ईं त्रिमूर्तीशाय नमः वाम नेत्रे

2. नवग्रह न्यासः

ओं ह्रीं अं आं ..अं अः रक्तवर्णसूर्याय नमः हृदये
ओं ह्रीं यं रं लं वं शुक्लवर्णसोमाय नमः - भ्रूमध्ये
ओं ह्रीं कं......डं – लोहितवर्णमङ्गलाय नमः - नेत्रत्रये
ओं ह्रीं चं छं जं झं ञं श्यामवर्णबुधाय नमः - हृन्मण्डले
ओं ह्रीं टं ठं डं ढं णं पीतवर्णबृहस्पतये नमः - कण्ठकूपे
ओं ह्रीं तं थं दं धं नं पाण्डुवर्ण शुक्राय नमः - गलदेशे
ओं ह्रीं पं फं बं भं मं नीलवर्णाशनैश्चराय नमः - नाभौ
ओं ह्रीं लंक्षं धूम्रवर्णकेतवे नमः - गुह्ये।
ओं ह्रीं शं षं सं हं धूम्रवर्णराहवे नमः - वदने।

3. लोकपाल न्यासः

मस्तकोपरि अष्टदिक्षु अष्टौ लोकपालान् क्रमेण न्यसेत्।
ओं ह्रीं अं आं कं खं गं घं ङं इन्द्राय नमः - पूर्वे
ओं ह्रीं इं ईं चं छं जं झं ञं अग्नये नमः - आग्नेये
ओं ह्रीं उं उुं टं ठं डं ढं णं यमाय नमः - दक्षिणे
ओं ह्रीं ॠं ॠं तं थं दं धं नं नैॠतये नमः - नैॠते
लृं लॄं पं फं बं भं मं वरुणाय नमः - पश्चिमे -
एं ऐं यं रं लं वं वायवे नमः - वायौ
ओं औं शं षं सं हं कुबेराय नमः - उत्तरे
अं अः ळं क्षं ईशानाय नमः - ऐशान्यां
ओं अं अनन्ताय नमः - अधोदेशे।
ओं आं ब्रह्मणे नमः - ऊर्ध्वदेशे।

4. शिवशक्तिन्यासः

ओं ह्रीं वं शं षं सं डाकिनीसहित ब्रह्मणे नमः - मूलाधारे।
ओं ह्रीं बं भं मं यं रं लं राकिणीसहितविष्णवे नमः - स्वाधिष्ठाने।
ओं ह्रीं डं ढं णं तं थं दं धं नं पं फं लाकिनी सहित रुद्राय नमः - मणिपूरके।
ओं ह्रीं कं खं गं घं ङं चं छं जं झं ञं टं ठं काकिनीसहितईश्वराय नमः - अनाहते।
अं आं इं ईं उं ऊं ॠं लृं लॄं एं ऐं ओं औं अं अः शाकिनीसहितसदाशिवाय नमः - विशुद्धौ
हं क्षं हाकिनीसहित परशिवाय नमः आज्ञाचक्रे।

5. तारादि शक्ति न्यासः

ओं ह्रीं अं आं इं ईं उं उूं ॠं ॠं लृं लॄं एं ऐं ओं औं अं अः तारायै नमः - ब्रह्मरध्रे।
ओं ह्रीं कं खं गं घं ङं उग्रायै नमः - ललाटे।
ओं ह्रीं चं छं जं झं ञं महोग्रायै नमः भ्रूमध्ये।
ओं ह्रीं टं ठं डं ढं णं वज्रायै नमः कण्ठगह्वरे।
ओं ह्रीं तं थं दं धं नं काल्यै नमः हृदये।
ओं ह्रीं पं फं बं भं मं सरस्वत्यै नमः नाभिदेशे।
ओं ह्रीं यं रं लं वं कामेश्वर्यै नमः लिङ्गे।
ओं ह्रीं शं षं सं हं ळं क्षं चामुण्डायै नमः - मूलाधारे।

6. पीठन्यासः (देहावयवेषुशक्तिपीठानि)

ओं ह्रीं अं आं कं खं गं घं ङं कामरूपपीठाय नमः - मूलाधारे
ओं ह्रीं इं ईं चं छं जं झं ञं जालन्धरपीठाय नमः - हृदि।
ओं ह्रीं उंऊं टं ठं डं ढं णं पूर्णागिरिपीठाय नमः - ललाटे।
ओं ह्रीं ऋं ॠं तं थं दं धं नं अड्डीयानपीठाय नमः - ललाटोर्ध्वे।
ओं ह्रीं लृं ॡं पं फं बं भं मं वाराणसीपीठाय नमः - भ्रवोर्मध्ये।
ओं ह्रीं एं ऐं यं रं लं वं ज्वलन्तीपीठाय नमः - लोचनत्रये
ओं ह्रीं ओं औं शं षं सं हं मायावतीपीठाय नमः - मुखमण्डले
ओं ह्रीं अं अः ळं क्षंमधुपुरीपीठाय नमः - कण्ठे।
ओं ह्रीं अचेभ्यः स्वरेभ्यो - अयोध्या पीठाय नमः - नाभिदेशे।
ओं ह्रीं हल्भ्यो मातृकाभ्यो - काञ्चीपीठाय नमः - कट्याम्।।
(इति रुद्रयामळेउत्तरतन्त्रे प्रोक्ताः षोडान्यासाः (पटले ६२) समाप्ताः)

योगिनीन्यासः

1. कण्ठे - कण्ठस्थितषोडशदलकमले शाकिनीशक्तिं ध्यायेत् -
कण्ठस्थाने विशुद्धौ नृपदल कमले श्वेतवर्णां त्रिनेत्रां
हस्तैः खट्वाङ्ग खड्गौ त्रिशिख मपि महा चर्म सन्धारयन्तीम्।
वक्रेणैकेन युक्तां पशुजन भयदां पायसान्नैकसक्तां
त्वक्स्थां वन्दे ऽमृताद्यैः परिवृत वपुषं शाकिनीं वीरवन्द्याम्।। (डाकिनी)

इतिध्यात्वा – विशुद्धिचक्र पद्मकर्णिका मध्ये – त्वगात्मिकां न्यसेत् - ओं ऐं ह्रीं श्रीं – शां शीं शूं – हसक्षमलवरयूं शाकिन्यै नमः - कण्ठे। - ओं ऐं ह्रीं श्रीं – अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः - मां रक्ष रक्ष त्वगात्मिके नमः - इति त्वचि विन्यस्य – तत्कमल षोढशपत्रेषु वामावर्ताप्रदक्षिणक्रमेण आवरणशक्तीःन्यसेत् -

1. ओं ऐं ह्रीं श्रीं – अं अमृतायै नमः
2. ओं ऐं ह्रीं श्रीं – आं आकर्षिण्यै नमः
3. ओं ऐं ह्रीं श्रीं – इं इन्द्राण्यै नमः
4. ओं ऐं ह्रीं श्रीं – ईं ईशान्यै नमः
5. ओं ऐं ह्रीं श्रीं – उं उमायै नमः
6. ओं ऐं ह्रीं श्रीं – ऊं ऊर्ध्वकेश्यै नमः
7. ओं ऐं ह्रीं श्रीं – ऋं ऋद्धिदायै नमः
8. ओं ऐं ह्रीं श्रीं – ॠं ॠकारायै नमः
9. ओं ऐं ह्रीं श्रीं – लृं लृकारायै नमः
10. ओं ऐं ह्रीं श्रीं – ॡं ॡकारायै नमः

11. ओं ऐं ह्रीं श्रीं – एं एकपदायै नमः 12. ओं ऐं ह्रीं श्रीं – ऐं ऐश्वर्यात्मिकायै नमः

13. ओं ऐं ह्रीं श्रीं – ओं ओंकारायै नमः 14. ओं ऐं ह्रीं श्रीं – ओं औषध्यै नमः

15. ओं ऐं ह्रीं श्रीं – अं अंबिकायै नमः 16. ओं ऐं ह्रीं श्रीं – अः अक्षरायै नमः

2. हृत्पद्मे

अनाहते हृदये द्वादशदलकमले- काकिनी शक्तिं ध्यायेत्।

हृत्पद्मे भानुपत्रे द्विवदनलसितां दंष्ट्रिणीं श्यामवर्णां -
अक्षं कपालं डमरु मपि भुजै धांरयन्तीं त्रिनेत्राम्।
रक्तस्थां कालरात्री प्रभृति परिवृतां स्निग्ध भक्तैकसक्तां -
श्रीमद्वीरेन्द्रवन्द्यां अभिमतफलदां काकिणीं भावयामः।।

एवंध्यात्वा – अनाहताब्जकर्णिकामध्ये – काकिनीशक्तिंन्यसेत्

ओं ऐं ह्रीं श्रीं – कां कीं कूं – हसक्षमलवरयूं काकिन्यै नमः हृदि।

ओं ऐं ह्रीं श्रीं – कं खं गं घं ङं चं छं जं झं ञं टं ठं मां रक्ष रक्ष असृगात्मिके नमः इति कालरात्र्यादिशक्त्यौघवृतांकांकिनीं न्यस्त्वा – तत्कमलपत्रेषु वामावर्त क्रमेण आवरणशक्तीः न्यसेत् – तद्यथा –

1. ओं ऐं ह्रीं श्रीं – कं – कालरात्र्यै नमः 2. ओं ऐं ह्रीं श्रीं - खं – खण्डितायै नमः
3. ओं ऐं ह्रीं श्रीं - गं – गायत्र्यै नमः 4. ओं ऐं ह्रीं श्रीं - घं – घण्टाकर्षिण्यै नमः
5. ओं ऐं ह्रीं श्रीं - ङं – ङार्णायै नमः 6. ओं ऐं ह्रीं श्रीं - चं – चण्डायै नमः
7. ओं ऐं ह्रीं श्रीं - छं – छायायै नमः 8. ओं ऐं ह्रीं श्रीं - जं – जयायै नमः
9. ओं ऐं ह्रीं श्रीं - झं – झङ्कारिणयै नमः 10. ओं ऐं ह्रीं श्रीं - ञं – ज्ञानरूपायै नमः
11. ओं ऐं ह्रीं श्रीं - टं – टङ्कहस्तायै नमः 12. ओं ऐं ह्रीं श्रीं - ठं – ठङ्कारिण्यै नमः

इति न्यस्त्वा – ततो नाभिदेशे मणिपूरकचक्रे

3. नाभौ – दशदलकमले – मांसनिष्ठांराकिनीशक्तिं ध्यायेत्

दिक्क पत्रे नाभि पद्मे त्रिवदन लसितां दंष्ट्रिणीं रक्तवर्णां -
शक्तिं दम्भोलि दण्डा वभय मपि भुजै र्धारयन्तीं महोग्राम्।
डामर्याद्यैःपरीतां पशुजनभयदां मांसधात्वेकनिष्ठां -
गौडान्नासक्तचित्तां सकलसुखकरीं राकिनीं भावयामः।।

एवं ध्यात्वा – मणिपूराब्ज कर्णिका मध्ये राकिनीशक्तिं न्यसेत्

ओं ऐं ह्रीं श्रीं – रां रीं रूं – हसक्षमलवरयूं – राकिन्यै नमः नाभौ।

ओं ऐं ह्रीं श्रीं – डं ढं णं तं थं दं धं नं पं फं मां रक्ष रक्ष मांसात्मिके नमः

इति – डामर्यादिशक्त्यौ घपरिवृतां राकिनीं विन्यस्य –

तत्कमलपत्रदशकेषु क्रमेणावरणशक्ती र्न्यसेत्। तद्यथा –

1. ओं ऐं ह्रीं श्रीं – डं – डामर्यै नमः 2. ओं ऐं ह्रीं श्रीं – ढं – ढङ्कारिण्यै नमः

3. ओं ऐं ह्रीं श्रीं – णं – णार्णायै नमः 4. ओं ऐं ह्रीं श्रीं – तं – तामस्यै नमः

5. ओं ऐं ह्रीं श्रीं – थं – स्थाणव्यै नमः 6. ओं ऐं ह्रीं श्रीं – दं – दाक्षायण्यै नमः

7. ओं ऐं ह्रीं श्रीं – धं – धात्र्यै नमः 8. ओं ऐं ह्रीं श्रीं – नं – नार्यै नमः

9. ओं ऐं ह्रीं श्रीं – पं – पार्वत्यै नमः 10. ओं ऐं ह्रीं श्रीं – फं – फट्कारिण्यै नमः

इति विन्यस्य – ततो लिंगमूलदेशस्थितेस्वाधिष्ठानचक्रे

4. लिङ्गोर्ध्वे – षड्दलकमले मेदोनिष्ठां लाकिनी शक्तिं ध्यायेत्

स्वाधिष्ठानाख्य पद्मे रसदल लसिते वेदवक्त्रां त्रिनेत्रां
हस्ताब्जै र्धारयन्तीं त्रिशिख गुण कपालाङ्कुशा नात्तगर्वाम्।
मेदो धातु प्रतिष्ठितामलिमुदितां बन्दिनी मुख्य युक्तां
पीतां दध्योदनेष्टा मभिमत फलदां लाकिनीं भावयामः ।। (का)

इति ध्यात्वा – स्वाधिष्ठानकमल कर्णिकामध्येलाकिनीशक्तिं न्यसेत्।

ओं ऐं ह्रीं श्रीं – लां लीं लूं – हसक्षमलवरयूं – लाकिन्यै नमः - लिंगोर्ध्वे।

ओं ऐं ह्रीं श्रीं – बं भं मं यं रं लं – मां रक्षरक्षमेदात्मिके नमः - इतिमेदसि

एवं बन्धिन्यादिभिरावृतां मेदात्मि कांलाकिनीशक्तिं विन्यस्य – तत्कमलपत्रषट्केषु वामावर्तक्रमेण आवरणाशक्तीः न्यसेत्।

ओं ऐं ह्रीं श्रीं – बं – बन्धिन्यै नमः

ओं ऐं ह्रीं श्रीं – भं – भद्रकाल्यै नमः

ओं ऐं ह्रीं श्रीं – मं – महामायायै नमः

ओं ऐं ह्रीं श्रीं – यं – यशस्विन्यै नमः

ओं ऐं ह्रीं श्रीं – रं – रक्तायै नमः

ओं ऐं ह्रीं श्रीं – लं – लम्बोष्ठ्यै नमः

इति विन्यस्य – ततो वीणादण्डमूलेयोनिदेशस्थेमूलाधारचक्रे –

5. मूलाधारे- योनिदेशे चतुर्दलकमलकर्णिकायां अस्थिस्थितां डाकिनी शक्तिं ध्यायेत्।

मूलाधारस्य पत्रे श्रुतिदल लसिते पञ्चवक्त्रां त्रिनेत्रां
धूम्राभां अस्थिसंस्थां सृणिमपिकमलं पुस्तकं ज्ञानमुद्राम्।
बिभ्राणां बाहुदण्डैः सुललित वरदां पूर्वशक्त्यावृतां तां
मुद्रान्ना सक्तचित्तां मधुमदमुदितां डाकिनीं भावयामः (शा)

इतिध्यात्वा – मूलाधार चतुर्दलकमल कर्णिकामध्ये डाकिनीशक्तिं व्यसेत्
ओं ऐं ह्रीं श्रीं – डां डीं डूं ह स क्ष म ल व र यूं – डाकिन्यै नमः - योनौ
ओं ऐं ह्रीं श्रीं – वं शं षं सं लं – मां रक्ष रक्ष अस्थ्यात्मिके नमः - अस्थिनि
इति वरदादि शक्त्यावृतां अस्थिसंस्थितां डाकिनीशक्तिं विन्यस्य – ततः तत्कमलपत्रचतुष्टये – क्रमेणावरण शक्तीर्न्यसेत्।

ओं ऐं ह्रीं श्रीं – वं – वरदायै नमः
ओं ऐं ह्रीं श्रीं – शं – श्रियै नमः
ओं ऐं ह्रीं श्रीं – षं – षडायै नमः
ओं ऐं ह्रीं श्रीं – सं – सरस्वत्यै नमः
मध्यकर्णिकायाम्
ओं ऐं ह्रीं श्रीं – ळं - लम्बोदरायै नमः

इति विन्यस्य – ततः भ्रुवोर्मध्ये आज्ञाचक्रे -

6. भ्रुवोर्मध्ये बिन्दौ द्विदलपद्मे मज्जात्मिकां हाकिनीशक्तिंध्यायेत्।

भ्रूमध्ये बिन्दुपद्मे दलयुगलयुते शुक्लवर्णां कराब्जैः
बिभ्राणां ज्ञानमुद्रां डमरुकमला मक्षमालां कपालाम्।
षड्वक्त्रां मज्जसंस्थांत्रिनयन लसितां हंसवत्यादि युक्तां
हारिद्रान्नैकसक्तां सकलसुखकरीं हाकिनीं भावयामः।।

एवंसञ्चिन्त्य – बिन्दुसरोजकर्णिकामध्येहाकिनीं न्यसेत्।

ओं ऐं ह्रीं श्रीं – हां हीं हूं – ह स क्ष म ल व र यूं हा किन्यै नमः - बिन्दौ
ओं ऐं ह्रीं श्रीं – हं क्षं – मां रक्ष रक्ष मज्जात्मिके नमः - मज्जास्थाने

इति हंसवतीक्षमावतीयुतां मज्जासंस्थांहाकिनीशक्तिं विन्यस्य – तत्कमल पत्रद्वये – क्रमेण शक्ति द्वयं संन्यसेत्। तद्यथा

ओं ऐं ह्रीं श्रीं – हं – हंसवत्यै नमः

ओं ऐं ह्रीं श्रीं – क्षं – क्षमावत्यै नमः इतिविन्यस्य –

ततः ब्रह्मरन्ध्रास्थित सहस्रदलकमलरुपसहस्रारचक्रे –

7. ब्रह्मरन्ध्रे – शिखामध्यबिले – सहस्रदलाब्जे सर्वात्मिकां साकिनीं ध्यायेत्

मुण्डव्योमस्थपद्मे दशशतदलके कर्णिकाचन्द्र संस्थां
रेतो निष्ठांसमस्तायुधकलितकरां सर्वतो वक्रपद्माम्।
आदिक्षान्तार्णशक्ति प्रकरपरिवृतां सर्ववर्णां भवानीं
सर्वान्नासक्तचित्तां परशिवरसिकां साकिनीं भावयामः

एवंविचिन्त्य – ब्रह्मबिल सहस्रदलकमलकर्णिकामध्ये साकिनीं न्यसेत्

ओं ऐं ह्रीं श्रीं – सां सीं सूं – हसक्षमलवरयूं – साकिन्यै नमः सहस्रारे

ओं ऐं ह्रीं श्रीं

अं आं इं ईं उं ऊं ऋं एं ऐं ओं औं अं अः

कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं

मां रक्ष रक्ष शुक्रात्मिकेनमः देहमध्ये

इति शुक्रसंस्थितां सर्वाम्किां साकिनीं विन्यस्य – तत्रैव समस्तावरण शक्तास्सन्नयसेत्

अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं ळं हं क्षं

1. ओं ऐं ह्रीं श्रीं - अं - अमृतायै नमः
2. ओं ऐं ह्रीं श्रीं - आं - आकर्षिण्यै नमः
3. ओं ऐं ह्रीं श्रीं - इं - इन्द्राण्यै नमः
4. ओं ऐं ह्रीं श्रीं - ई - ईशान्यै नमः
5. ओं ऐं ह्रीं श्रीं - उं - उमायै नमः
6. ओं ऐं ह्रीं श्रीं - हं - हंसवत्यै नमः
7. ओं ऐं ह्रीं श्रीं - क्षं - क्षमावत्यै नमः

कलामातृकान्यासः

ओं ऐं ह्रीं श्रीं – अं – निवृत्तिकलायै नमः - शिरसि

ओं ऐं ह्रीं श्रीं – आं – प्रतिष्ठकलायै नमः - मुखे

ओं ऐं ह्रीं श्रीं – इं – विद्याकलायै नमः दक्षिणनेत्रे

ओं ऐं ह्रीं श्रीं – ईं – शान्तिकलायै नमः - वाम नेत्रे

ओं ऐं ह्रीं श्रीं – उं – इन्धिकाकलायै नमः दक्षिणकर्णे

ओं ऐं ह्रीं श्रीं – ऊं – दीपिका कलायै नमः वामकर्णे

ओं ऐं ह्रीं श्रीं – ऋं – रोचिका कलायै नमः दक्षिणनासापुटे

ओं ऐं ह्रीं श्रीं – ॠं – मोचिका कलायै नमः वामनासापुटे

ओं ऐं ह्रीं श्रीं – ऌं – पराभिधा कलायै नमः दक्षिणकपोले

ओं ऐं ह्रीं श्रीं – ॡं – सूक्ष्मा कलायै नमः वामकपोले

ओं ऐं ह्रीं श्रीं – एं – अमृता कलायै नमः अधरोष्ठे

ओं ऐं ह्रीं श्रीं – ओं –आप्यायिनी कलायै नमः ऊर्ध्वदन्तपंक्तौ

ओं ऐं ह्रीं श्रीं – औं – व्यापिनी कलायै नमः अधोदन्तपंक्तौ

ओं ऐं ह्रीं श्रीं – अं – व्योमरूपी कलायै नमः जिह्वाग्रे

ओं ऐं ह्रीं श्रीं – अः - अनन्ता कलायै नमः कण्ठे

ओं ऐं ह्रीं श्रीं – कं - सृष्टि कलायै नमः दक्षिणबाहुमूले

ओं ऐं ह्रीं श्रीं – खं - ऋद्धि कलायै नमः दक्षिणकूर्परे

ओं ऐं ह्रीं श्रीं – गं - स्मृति कलायै नमः दक्षिणमणिबन्धे

ओं ऐं ह्रीं श्रीं – घं - मेधा कलायै नमः दक्षिणहस्ततले

ओं ऐं ह्रीं श्रीं – ङं - कान्ति कलायै नमः दक्षकरांगुल्यग्रे

ओं ऐं ह्रीं श्रीं – चं - लक्ष्मी कलायै नमः वामबाहुमूले

ओं ऐं ह्रीं श्रीं – छं - द्यूती कलायै नमः वामकूर्परे

ओं ऐं ह्रीं श्रीं – जं - स्थिरा कलायै नमः वाममणिबन्धे

ओं ऐं ह्रीं श्रीं – झं - स्थिति कलायै नमः वामकरतले

ओं ऐं ह्रीं श्रीं – ञं - सिद्धि कलायै नमः वामरांगुल्यग्रे

ओं ऐं ह्रीं श्रीं – टं - जरा कलायै नमः दक्षिणोरौ

ओं ऐं ह्रीं श्रीं – ठं - पालिनी कलायै नमः दक्षजानुनि

ओं ऐं ह्रीं श्रीं – डं - क्षान्ति कलायै नमः दक्षजङ्घायाम्

ओं ऐं ह्रीं श्रीं – ढं - ईश्वरी कलायै नमः दक्षपादतले (अंगुलिमूले

ओं ऐं ह्रीं श्रीं – णं - रति कलायै नमः दक्षपादांगुल्यग्रे

ओं ऐं ह्रीं श्रीं – तं - कामिनी कलायै नमः वामोरौ

ओं ऐं ह्रीं श्रीं – थं - वरदा कलायै नमः वामजानुनि

ओं ऐं ह्रीं श्रीं – दं - आह्लादिनी कलायै नमः वामजङ्घायाम्

ओं ऐं ह्रीं श्रीं – धं – प्रीति कलायै नमः वामपादांगुलिमूले

ओं ऐं ह्रीं श्रीं – नं – दीर्घा कलायै नमः दक्षिणपार्श्वे

ओं ऐं ह्रीं श्रीं – पं – तीक्ष्णा कलायै नमः दक्षिणपार्श्वे

ओं ऐं ह्रीं श्रीं – फं – रौद्री कलायै नमः वामपार्श्वे

ओं ऐं ह्रीं श्रीं – बं – भया कलायै नमः पृष्ठे

ओं ऐं ह्रीं श्रीं – भं – निद्रा कलायै नमः नाभौ

ओं ऐं ह्रीं श्रीं – मं – मांसात्मने - चन्द्रिका कलायै नमः उदरे

ओं ऐं ह्रीं श्रीं – यं – त्वगात्मने - क्षुधा कलायै नमः हृदये

ओं ऐं ह्रीं श्रीं – रं असृगात्मने - क्रोधिनी कलायै नमः ककुदि

ओं ऐं ह्रीं श्रीं – वं – मेदात्मने – उत्कारी कलायै नमः वामांसे

ओं ऐं ह्रीं श्रीं – शं – अस्थ्यात्मने – समृत्युकारी कलायै नमः हृदयादिदक्षकरांगुल्यन्तं

ओं ऐं ह्रीं श्रीं – षं – मज्जात्मने – पीता कलायै नमः हृदयादिवामरांगुल्यन्तम्

ओं ऐं ह्रीं श्रीं – सं – शुक्रात्मने – श्वेता कलायै नमः हृदयादि दक्षपादांगुल्यन्तं

ओं ऐं ह्रीं श्रीं – हं – आत्मने – अरुणा कलायै नमः हृदयादि वामपादान्तं

ओं ऐं ह्रीं श्रीं – ळं –परमात्मने – सिता कलायै नमः कट्यादिपादांगुल्यन्तम्

ओं ऐं ह्रीं श्रीं – क्षं – ज्ञानशक्त्यात्मने - अनन्ता कलायै नमः कट्यादि मस्तकान्म्

लोकमातृ शक्तिन्यासः

ओं ऐं ह्रीं श्रीं – अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः ब्राह्म्यै नमः - पादयोः

ओं ऐं ह्रीं श्रीं – कं खं गं घं ङं वैष्णव्यै नमः - दक्षजानौ

ओं ऐं ह्रीं श्रीं – चं छं जं झं ञं माहेश्वर्यै नमः - वामजानौ

ओं ऐं ह्रीं श्रीं – टं ठं डं ढं णं कौमार्यै नमः - दक्षपार्श्वे

ओं ऐं ह्रीं श्रीं – तं थं दं धं नं वाराह्यै नमः - वामपार्श्वे

ओं ऐं ह्रीं श्रीं – पं फं बं भं मं नारसिंह्यै नमः - दक्षांसे

ओं ऐं ह्रीं श्रीं – यं रं लं वं अपराजितायै नमः - वामांसे

ओं ऐं ह्रीं श्रीं – शं षं सं ऐन्द्र्यै नमः - कराङ्गुल्यग्रे

ओं ऐं ह्रीं श्रीं – हं ळं क्षं चामुण्डायै नमः - शिरसि

हंसन्यास:

अस्य श्री परमहंस स्तोत्रन्यास महामन्त्रस्य - अव्यक्त परब्रह्म ऋषि:- अनुष्टुप् अव्यक्तगायत्री छन्द: - हंसेति - बीजं – परमहंसेति - शक्ति: - श्रीदेवता प्रतिष्ठाङ्ग प्राणप्रतिष्ठाङ्ग हंसन्यासे विनियोग:।

ओं हं सां सूर्यात्मने अंगुष्ठाभ्यां नम: - हृदयायनम:
ओं हंसीं सोमात्मने तर्जनीभ्यां नम: - शिरसे स्वाहा
ओं हं सूं निरञ्जनात्मने मध्यमाभ्यां नम: - शिखायै वषट्
ओं हं सैं निराभासात्मने अनामिकाभ्यां नम: - कवचाय हुम्।
ओं हं सौं अव्यक्त सूर्यात्मने कनिष्ठिकाभ्यां नम: - नेत्रत्रयाय वौषट्।
ओं हं स: अव्यक्त बोधात्मने – करतल करप्टष्ठाभ्यां नम: - अस्त्राय फट्।

एवमेव हृदयादिषडंगन्यास: भूर्भुवस्सुवरोमिति दिग्बन्ध:। ध्यानम् -

गमागमस्थं गमनादिशून्यं चिद्रूपरूपंतिमिरापहारम्।
पश्यामि तेसर्वजनान्तरस्थं नमामिहंसंपरमात्मरूपम्।।

ओं हंसो हंस: परम हंस: सोहं हंस: ओं – इति मूल हंसमन्त्र: - ततो गायत्रीं जपेत्।

हंसहंसाय विद्महे परमहंसाय धीमहि तन्नो हंस: प्रचोदयात्।

(आवाहितेऽपि विभुत्वसिद्धि:) आवाहनविधि:

बिन्दु नाद श्शक्ति शिवौ लयाङ्गत्वेन कीर्तिता:। (लयमूर्तिभावनालिंगे)
कुम्भे चावाहये त्शंभो: तनुं भोग लयाह्वयम्। (भोगलयमूर्तिभावना – कुम्भे)
आवाहयेत् तथा वह्नौ तनुं चैवाधिकारिकम्। (अधिकारमूर्तिभावना – अग्नौ)



त्रिखण्डे देहे त्रिमूर्तिकला न्यासः

ब्रह्मभागे – पृथ्वीतत्वे - अकारकलायां – विजयादि दशकलाः - ध्येयाः - विजया - सौम्या - अंशु धृतिः मदना - बन्धिनी - मोचिनी - मायिका - मोहिनी - बोधिनी – एताभिस्सहिताय - ब्रह्मणे नमः

विष्णुभागे – अप्तत्वे – उकारकलायां – गुहादि षोडशकलाः ध्येयाः = गुहा - मनोरमा - दीप्ता – सुदीप्ता – परमा - कारिका - सुधूमृका - पिंगला - पीता - वारुणी - शीघ्रगा -चला - शशांका - सुप्रभांगा - ज्ञानदा - मोक्षदा – आभिर्युक्ताय महाविष्णवे नमः इति न्यसेत्।

रूद्रभागे - वह्नितत्वे - मकारकलायां - चतुर्विंशतिकलाःध्येयाः - श्रवणी - श्रावणी - कल्पाकरी - घ्राणवर्तिनी - सुशब्दा - वाहनी - ऊर्ध्वा - मननी - पाविनी - आह्लादिनी - प्रवाहा - योक्री - रेतोपवाहिनी - पितृमार्गानुगा देवमार्गानुगा - मार्गदर्शिनी - अपर्णी - प्राणबन्धनी - चित्तस्था - सुविध्दा - धूम्रा - ध्रुवा - दया - ज्ञानी आभिर्युक्ताय रुद्राय नमः इति न्यसेत्।

२

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

प्रत्यङ्गिरा पूजाविषयाः

विभागः - ९

श्री प्रत्यङ्गिरा पूजा चक्रम् (यन्त्ररूपम्)

त्वं माता त्वं पिता भ्राता त्वं सखा त्वं गुरुः प्रभुः ।
त्वमेव जगतां धात्री त्राहि मां भक्त वत्सले ।। (कौलार्णव तन्त्रे)



यन्त्रोद्धारः (चक्र कल्पनम्)

यन्त्रोद्धारं प्रवक्ष्यामि सर्वसिद्धि प्रवर्तकम् ।
सर्वसंमोहनं चक्रं सर्वाशा परिपूरकम् ।।

बिन्दु त्रिकोणं वसुकोण युक्तं -
वृत्ताष्टपत्रं च त्रिवृत्त युक्तम् ।
भूगेह लक्ष्मी रचितं च सिद्धिदं
प्रात्यङ्गिरं चक्र मेतन् मयोक्तम् ।।

श्री प्रत्यङ्गिरादेवी यन्त्र नवावरण लघुपूजा (सृष्टिक्रमः)

ओं आधारशक्तियादि सर्वशक्ति कमलासनाय नमः - तदुपरि – यन्त्रमध्यस्थे – बिन्दौ
ओं क्षं ह्रीं भैरवेश्वरसहितायै प्रत्यङ्गिरादेव्यै नमः - इति संपूज्य – त्रिकोणेषु –

अग्रे - ओं ह्रीं क्षं काल्यै नमः।

ऐशान्यां – ओं ह्रीं क्षं भद्रकाल्यै नमः।

आग्नेय्यां - ओं ह्रीं क्षं नित्यकाल्यै नमः इति संपूज्य – ततो –

1. त्रिकोणबाह्ये – परितः - आग्नेयादिषु –

आग्नेय्यां -	ओं ह्रां क्षां	– ओं ह्रीं क्षं	– हृदयाय	वामिन्यै नमः।
ऐशान्यां –	ओं ह्रीं : क्षीं	– भक्ष ज्वालाजिह्वे	– शिरसे	नीलिन्यै नमः।
नैऋत्यां -	ओं ह्रूं क्षूं	– कराळदंष्ट्रे	– शिखायै	चक्रिण्यै नमः।
वायव्यां -	ओं ह्रैं क्षैं	– प्रत्यङ्गिरे	– कवचाय	खड्गिन्यै नमः।
मध्ये -	ओं ह्रौं क्षौं	– क्षं ह्रीं	– नेत्रत्रयाय	पाशाङ्कीनमः।
पूर्वादिदिक्षु -	ओं ह्रः क्षः	- हुं फट्	– अस्त्राय	गाम्भिन्यै नमः।

2. बाह्ये – अष्टकोणेषु – अग्रादि त्रिकोणाष्टके –

1. ओं ह्रीं क्षं स्तम्भिन्यै भैरव्यै नमः
2. ओं ह्रीं क्षं क्षोभिन्यै भैरव्यै नमः
3. ओं ह्रीं क्षं द्राविन्यै भैरव्यै नमः
4. ओं ह्रीं क्षं भ्रामिण्यै भैरव्यै नमः
5. ओं ह्रीं क्षं मोहिन्यै भैरव्यै नमः
6. ओं ह्रीं क्षं जृम्भिण्यै भैरव्यै नमः
7. ओं ह्रीं क्षं रौद्रायै भैरव्यै नमः
8. ओं ह्रीं क्षं संहारिण्यै भैरव्यै नमः

3. वृत्तमण्डले अग्रादि दशदिक्षु

1. ओं ह्रीं क्षं हेतुक भैरव्यै नमः
2. ओं ह्रीं क्षं वेताळ भैरव्यै नमः
3. ओं ह्रीं क्षं त्रिपुरान्तक भैरव्यै नमः
4. ओं ह्रीं क्षं अग्निजिह्व भैरव्यै नमः
5. ओं ह्रीं क्षं कालान्तक भैरव्यै नमः
6. ओं ह्रीं क्षं एकपाद भैरव्यै नमः
7. ओं ह्रीं क्षं कपालाकराळ भैरव्यै नमः
8. ओं ह्रीं क्षं भीमरूप भैरव्यै नमः
9. ओं ह्रीं क्षं मलय भैरव्यै नमः
10. ओं ह्रीं क्षं हाटकेश्वर भैरव्यै नमः

4. अष्टदल ग्रन्थिस्थानेषु – दलमूलसन्धिषु –

1. ओं ह्रीं क्षं कामरूप पीठाय नमः
2. ओं ह्री क्षं मूलयगिरि पीठाय नमः
3. ओं ह्री क्षं कोलगिरि पीठाय नमः
4. ओं ह्रीं क्षं सौकार पीठाय नमः
5. ओं ह्रीं क्षं कालान्तक पीठाय नमः
6. ओं ह्रीं क्षं जालन्धर पीठाय नमः
7. ओं ह्रीं क्षं ओढ्यान पीठाय नमः
8. ओं ह्रीं क्षं देवकूट पीठाय नमः

5. अष्टदल मध्य स्थानेषु (उतषोडशदलेषुदम्पत्या)

1. ओं ह्रीं क्षं ब्राह्म्यै मात्रे नमः
2. ओं ह्रीं क्षं माहेश्वर्यै मात्रे नमः
3. ओं ह्रीं क्षं कौमार्यै मात्रे नमः
4. ओं ह्रीं क्षं वैष्णव्यै मात्रे नमः
5. ओं ह्रीं क्षं वाराह्यै मात्रे नमः
6. ओं ह्रीं क्षं माहेन्द्यै मात्रे नमः
7. ओं ह्रीं क्षं चामुण्डायै मात्रे नमः
8. ओं ह्रीं क्षं नारसिंह्यै मात्रे नमः

6. अष्टदलाग्र स्थानेषु (षोडशदलेषु मातृणां दक्षदलेषु)

1. ओं ह्रीं क्षं असिताङ्गभैरवाय नमः
2. ओं ह्रीं क्षं रुरु भैरवाय नमः
3. ओं ह्रीं क्षं चण्ड भैरवाय नमः
4. ओं ह्रीं क्षं क्रोधन भैरवाय नमः
5. ओं ह्रीं क्षं उन्मत्त भैरवाय नमः
6. ओं ह्रीं क्षं कपाल भैरवाय नमः
7. ओं ह्रीं क्षं भीषण भैरवाय नमः
8. ओं ह्रीं क्षं संहार भैरवाय नमः

7. भूपुरे – अन्तर्भूपुररेखायाम् –दशदिक्षु –

1. ओं ह्रीं क्षं लं इन्द्राय नमः
2. ओं ह्रींक्षं रं अग्नये नमः
3. ओं ह्रीं क्षं हं यमाय नमः
4. ओं ह्रीं क्षं षं निऋत्ऋतये नमः
5. ओं ह्रीं क्षं वं वरुणाय नमः
6. ओं ह्रीं क्षं यं वायवे नमः
7. ओं ह्रीं क्षं सं सोमाय नमः
8. ओं ह्रीं क्षं शं ईशानाय नमः
9. ओं ह्रीं क्षं ब्रं ब्रह्मणे नमः
10. ओं ह्रीं क्षं विं विष्णवे नमः

8. भूपुरे बाह्यरेखायां दशादिक्षु

1. ओं ह्रीं क्षं वज्राय हुंफण्णमः
2. ओं ह्रीं क्षं शक्तये हुंफण्णमः
3. ओं ह्रीं क्षं दण्डाय हुंफण्णमः
4. ओं ह्रीं क्षं खड्गाय हुंफण्णमः
5. ओं ह्रीं क्षं पाशाय हुंफण्णमः
6. ओं ह्रीं क्षं अङ्कुशाय हुंफण्णमः
7. ओं ह्रीं क्षं गदायै हुंफण्णमः
8. ओं ह्रीं क्षं त्रिशूलाय हुंफण्णमः
9. ओं ह्रीं क्षं पद्माय हुंफण्णमः
10. ओं ह्रीं क्षं सुदर्शनचक्राय हुंफण्णमः

9. भूपुर बाह्ये – दिक्षु - विदुक्षु - च क्रमेण –

1. पश्चिमे	-	ओं ह्रीं क्षं वां	वटुकाय नमः
2. उत्तरे	-	ओं ह्रीं क्षं यां	योगिनीभ्यो नमः
3. पूर्वे	-	ओं ह्रीं क्षं क्षां	क्षेत्रपालेभ्यो नमः
4. वायव्ये	-	ओं ह्रीं क्षं गं	गणपतये नमः
5. दक्षिणे	-	ओं ह्रीं क्षं वां	वसुभ्यो नमः
6. ऐशान्ये	-	ओं ह्रीं क्षं सुं	सुधायै नमः
7. आग्नेये	-	ओं ह्रीं क्षं षं	द्वादशादित्येभ्यो नमः
8. इतिसंपूज्य	–	ओं हां	एकादश रुद्रेभ्यो नमः
9. नैऋते	–	ओं ह्रीं क्षं सं	सर्वेभ्यो भूतेभ्यो नमः

पुनः देवीं मूलेन संपूज्य – धूप - दीप - नैवेद्य - ताम्बूलादिकं दत्वा – नीराजनं विधाय स्तोत्रवन्दनादिना - देवीं सन्तोषयेत्।।

इति प्रत्यङ्गिरा आवरणार्चनं संपूर्णम्

प्रत्यङ्गिरा सपर्या पद्धतिः

स्वगुरु वन्दनम्

अथ - ब्राह्मे मुहूर्त्ते - शयनतलात् उत्थाय - करचरणौ प्रक्षाल्य - निजासने - समुपविश्य - निज शिरसि - श्वेतवर्ण सहस्रदल कमल कर्णिकांतर्गत चन्द्रकान्त मण्डलोपरि - स्वगुरुं - शुक्लवर्णं – शुक्लालङ्कार भूषितम् – ज्ञानानन्द मुदित मानसं – सच्चिदानन्द विग्रहं - चतुर्भुजं – ज्ञानमुद्रा पुस्तक वरदाभय करं - त्रिनयनं – प्रसन्न वदनेक्षणं - सर्वदेवं - वामांगे – वामहस्त धृतकमलया - रक्तवसनाभरणया - स्वप्रियया – दक्षिणभुजेना लिंगितं – परमशिव स्वरूपं - ध्यात्वा। तच्चरण युगल कमल विगल दमृतधारया - स्वात्मानं – प्लुतं विभाव्य - मानसोपचारैः आराध्य - ओं ऐं ह्रीं श्रीं ह्स्ख्फ्रें हसक्षमलवरयऊं स्ह्ख्फ्रें सहक्षमलवरयईं ह्सौं।। ह्सौः श्रीमत् श्री अमुकानन्दनाथ .... श्रीपादुकां पूजयामि नमः - इति-दशधा विमृश्य-दण्डवत् प्रणामं मनसा कुर्यात् – तद्यथा -

गुरु - प्रणाममंत्राः -

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम्।
शिरसा योगपीठस्थं मुक्तिकामार्थ सिद्धये।। 1

श्रीगुरुं परमानन्दं वन्दे आनन्द विग्रहम्।
यस्य सान्निध्य मात्रेण चिदानंदायते परम्।। 2

अज्ञान तिमिरान्धस्य ज्ञानांजन शलाकया।
चक्षु रुन्मीलितं येन तस्मै श्री गुरवे नमः।। 3

गुरु र्ब्रह्मा गुरु र्विष्णु र्गुरुः साक्षा न्महेश्वरः।
गुरु रेव जग त्सर्वं तस्मै श्री गुरवे नमः।। 4

- इति प्रणाम मन्त्रान् पठेत् – अन्यान् च पठेत्।।

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
विद्यावतार संसिद्ध्यै स्वीकृतानेक विग्रहः।। 1

नवाय नव रूपाय परमा र्थैक रूपिणे।
सर्वाज्ञान तमो भेद भानवे चिद्घनाय ते।। 2

स्वतन्त्राय दया क्लृप्त विग्रहाय परात्मने।
परतन्त्राय भक्तानां भव्यानां भव्य रूपिणे।। 3

ज्ञानिनां ज्ञान रूपाय प्रकाशाय प्रकाशिनाम्।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम्।। 4

पुरस्तात् पार्श्वयो:पृष्ठे नमस्कुर्या मुपर्यध:।
सदा मच्चित्त रूपेण विधेहि भवदासनम्।। 5

- इति गुरुं प्रणम्य - सुप्रसन्नं विभाव्य - मनसा तदाज्ञां गृहीत्वा – ततः कुण्डलिनीं ध्यायेत् - ततो -

स्वदेह षड्चक्रार्चनम् (कुण्डलिनी योगाभ्यास:)

मूलाधारे – स्वर्ण चतुर्दल कमल कर्णिकान्तर्गत - त्रिकोणचक्र श्रृङ्गाटकोपरि परां शक्तिं कुण्डलिनीं - उद्यद्दिनकर सहस्त्रभास्वरां - विद्युत्कोटिसन्निभाम् - सकलमन्त्र मातरं - सर्वप्राणि जीवत्रिध धाम्नीं- सर्पाकारां – ऊर्ध्वमुखीं - सार्धत्रिवलयां – बिसतन्तु - तनीयसीं - ससुप्तां - विभाव्य - गुरूपदिष्ट - निज सहज नादेन बोधयित्वा - तत्र वं नम: - शं नम: - षं नम: - सं नम: - इतिमन्त्रेण सर्वतः संस्थाप्य – ततो -

स्वाधिष्ठाने - लिंगमूले विद्रुमवर्णे षड्दले– तां नीत्वा - तत्र बं नम: - भं नम: - मंनमः - यं नम: - रं नम: - लं नम: - इति पत्रेषु मध्ये मूलेन च संपूज्य - ततो

मणिपूरके - नाभौ - नीलवर्णे - दशदलकमले – तां नीत्वा - तत्र - डं नमः ढं नमः णं नमः तं नमः थं नमः दं नमः धं नमः नं नमः पं नमः फं नमः - इति पत्रेषु मध्ये मूलेन च प्रपूज्य - ततो-

अनाहते - वक्षसि - पिंगलवर्णे - द्वादशदलकमले - तां नीत्वा - तत्र कं नमः खं नमः गं नमः घं नमः ङं. नमः चं नमः छं नमः जं नमः झं नमः ञं नमः टं नमः ठं नमः इति पत्रेषु मध्ये मूलेन च सुपूज्य - इतिपत्रेषु मध्ये मूलेनच संपूज्य -

ततो - तेजो - विशुद्धौ - कंठे – धूम्रवर्णे - षोडशदलकमले – तां नीत्वा - तत्र - अं नमः - आं नमः- इं नमः- ईं नमः- उं नमः-ऊं नमः -ऋं नमः- ॠं नमः- ऌं नमः- ॡं नमः- एं नमः- ऐं नमः- ओं नमः- औं नमः- अं नमः- अः नमः।। इति पत्रेषु मध्ये मूलेन च संपूज्य – ततः-

ब्रह्मरन्ध्रे - सहस्त्रदलकमल – कर्णिकान्तर्गत - बिन्दुरूप - तेजोमय - परमशिवेन सहैकतां नीत्वा- तेनामृतेन - ततः - स्त्रवता संतर्प्य - तत्र - नादश्रवण तत्परो - मुहूर्तं – लयं विभाव्य – पुन रपि – तथैव –

आज्ञाचक्रादि क्रमेण - तेषु तेषु कमलेषु - तैस्तैरक्षरैः - संपूज्य - अवरोहेपि – तत्तन्मन्त्रेण कमलात्कमलं अवरोह्य – पुनरपि

मूलाधारे - स्वस्थाने – स्थापयेत् - इति आरोहा वरोह क्रमेण - परां देवीं – कुण्डलिनीं ध्यात्वा - प्राणायाम ऋष्यादि - कर षडंगन्यास ध्यानानि वक्ष्यमाण क्रमेण कृत्वा - यथाशक्ति जपं विधाय - पुनरपि - प्राणायामादिना - जपं समर्प्य - नित्यकृत्यं समर्पयेत् । प्रातः प्रभृति सायान्तं सायादि प्रातरन्ततः। यत्करोमि जगद्योने तदस्तु तव पूजनम्।। इति समर्प्य – स्वकार्यानुष्ठानाय - प्रार्थयेत् -तद्यथा -

त्रैलोक्य चैतन्य मये सुरेशि -
प्रत्यंगिरे त्व च्चरणाज्ञ यैव ।
प्रातः समुत्थाय तव प्रियार्थे
संसार यात्रां अनुवर्त यिष्ये ।। 1

संसार यात्रां अनुवर्त मानं -
त्वदाज्ञया श्री परमेशि देवि ।
स्पर्धा तिरस्कार कलि प्रमाद -
भयानि मां माभि भवन्तु मातः ।। 2

जानामि धर्मं न च मे प्रवृत्तिः जाना म्यधर्मं न च मे निवृतिः।
त्वया हृषीकेश हृदि स्थया ऽहं यथा नियुक्तो ऽस्मि तथा चरामि।।

इति देव्याज्ञां प्रार्थ्य - अजपा जपं - सहज सिद्धं - तत्तद्देवताभ्यः - संकल्प्य - समर्पयेत् – तद्यथा –



अजपा जप समर्पणम्

ओं अद्य – पूर्वेद्युः अहोरात्राचरितं – उच्छ्वास निश्श्वासात्मकं –षट् शताधिकं एकविंशतिसहस्त्र संख्याकं - अजपाजपं अहं करिष्ये - इतिसंकल्प्य – समर्प्पयेत्-

ओं ऐं ह्रीं श्रीं मूलाधार चक्रस्थाय गणपतये अजपा
जपानां षट् शतं समर्प्पयामि नमः।। (600)

ओं ऐं ह्रीं श्रीं स्वाधिष्ठान चक्रस्थाय ब्रह्मणे अजपाजपानां षट्
शहस्त्राणि समर्प्पयामि नमः।। (6000)

ओं ऐं ह्रीं श्रीं मणिपूर चक्रस्थाय -विष्णवे -अजपाजपानां षट्
शहस्त्राणि समर्प्पयामि नमः।। (6000)

ओं ऐं ह्रीं श्रीं अनाहत चक्रस्थाय - रुद्राय अजपाजपानां षट्
शहस्त्राणि समर्प्पयामि नमः।। (6000)

ओं ऐं ह्रीं श्रीं विशुद्ध चक्रस्थाय - जीवात्मने अजपाजपानां
सहस्त्रं समर्प्पयामि नमः।। (1000)

ओं ऐं ह्रीं श्रीं आज्ञा चक्रस्थाय परमात्मने अजपाजपानां
सहस्त्रम् समर्प्पयामि नमः।। (1000)

ओं ऐं ह्रीं श्रीं सहस्त्रदलकमल कर्णिकामध्यस्थाय श्रीगुरुपादुकायै
अजपाजपानां सहस्त्रं समर्प्पयामि नमः।। (1000)

इत्यजपाजपं समर्प्य – हंस हंसेति - अजपामन्त्रेण प्राणायामं कृत्वा - हंस मन्त्रस्य ऋष्यादिन्यासान् विधद्यात् -

हंसात्मने	- ऋषये नमः	- शिरसि -
अव्यक्तगायत्री	- छन्दसे नमः	- मुखे -
परमहंसाय	- देवतायै नमः	- हृदये -
ओं ऐं ह्रीं श्रीं हं	- बीजाय नमः	- मूलाधारे -
ओं ऐं ह्रीं श्रीं सः	- शक्तये नमः	- पादयोः -
ओं ऐं ह्रीं श्रीं सोहं	- कीलकाय नमः	- नाभौ -
ओं ऐं ह्रीं श्रीं	- ओंकारतत्वाय नमः	- हृदये -
ओं ऐं ह्रीं श्रीं	- उदात्तस्वराय नमः	- कंठे -
ओं ऐं ह्रीं श्रीं	- नभसे स्थानाय नमः	- मूर्ध्नि -
ओं ऐं ह्रीं श्रीं	- हैमाय वर्णाय नमः	- सर्वांगे - इति विन्यस्य -
मम मोक्षार्थे	- जपे विनियोगः	- इति कृताञ्जलिर्वदेत् - ततः

करन्यासः

ओं ऐं ह्रीं श्रीं - हं सां - सूर्यात्मने स्वाहा - अंगुष्ठाभ्यां नमः-
ओं ऐं ह्रीं श्रीं - हं सीं - सोमात्मने स्वाहा - तर्जनीभ्यां नमः-
ओं ऐं ह्रीं श्रीं - हं सूं - निरंजनात्मने स्वाहा - मध्यमाभ्यां नमः-
ओं ऐं ह्रीं श्रीं - हं सैं - निराभासात्मने स्वाहा - अनामिकाभ्यां नमः-
ओं ऐं ह्रीं श्रीं - हं सौं - कनिष्ठतनुः सूक्ष्मादेवी प्रचोदयात् स्वाहा
- कनिष्ठिकाभयां नमः
ओं ऐं ह्रीं श्रीं – हं सः - अव्यक्त बोधात्मने स्वाहा – करतल करपृष्ठाभ्यां नमः
-इति करन्यासः -

षडङ्गन्यासः

ओं ऐं ह्रीं श्रीं हं सां - सूर्यात्मने स्वाहा - हृदयाय नमः।।
ओं ऐं ह्रीं श्रीं हं सीं - सोमात्मने स्वाहा - शिरसे स्वाहा।।
ओं ऐं ह्रीं श्रीं हं सूं - निरंजनात्मने स्वाहा - शिखायै वषट् -
ओं ऐं ह्रीं श्रीं हं सैं - निराभासात्मने स्वाहा - कवचाय हुं -
ओं ऐं ह्रीं श्रीं हं सौ - कनिष्ठतनुः सूक्ष्मादेवी प्रचोदयात् स्वाहा
- नेत्रत्रयाय वौषट् -
ओं ऐं ह्रीं श्रीं हं सः - अव्यक्तबोधात्मने स्वाहा - अस्त्राय फट्
- इति करयोर्विन्यस्य -

- हृदये अप्येतानेव मंत्रान्विन्यस्य - ध्यानं कुर्यात्-

द्यां मूर्धानं यस्य विप्रा वदन्ति - खं वै नाभिं चंद्रसूर्यौ च नेत्रे ।
दिग्भिः श्रोत्रे यस्य पादौ क्षितिश्च - ध्यातव्यो ऽसौ सर्व भूता न्तरात्मा।।

इति विराट् स्वरूपं - स्वात्मानं ध्यात्वा – तदनु - संधायि प्राणवायोः निर्गम प्रवेशात्मकं अजपामन्त्रं - हंसः - इति पञ्चविंशतिवारं जप्त्वा समर्प्य -

गुरूपदिष्टमार्गेण नादानुसंधानपूर्वकं - निरस्त - समस्तोपाधिना - केनापि - चिद्विलासेन - प्रवर्तमानो - ऽस्मीति - विभाव्य – स्वकार्यानुष्ठानाय – धरां - संप्रार्थयेत्।।

भूमिदेवी प्रार्थना

समुद्र मेखले देवि पर्वत स्तन मण्डले ।
विष्णुपत्नि नम स्तुभ्यं पादस्पर्शं क्षमस्व मे।।

इति भूमिदेवीं प्रार्थ्य – श्वासानुसारेण - तस्यां - पादं निधाय - नद्यादौ गत्वा - वैदिकं स्नानं निर्वर्त्य - तान्त्रिक मारभेत् – तत्रादौ - मूलं आत्मतत्वाय स्वाहा – मूलं

तान्त्रिक स्नानम्

विद्यातत्वाय स्वाहा – मूलं - शिवतत्वाय स्वाहा - इति त्रिवारं जलंपीत्वा -

अथवा - ओं ह्रीं स्वाहा - इत्याचम्य – प्रत्यङ्गिरायाः मूलं स्मरन् – मलापकर्षणस्नानं विधाय –पुन राचम्य-

ओं अद्य – अमुक मासस्य – अमुक पक्षस्य .... तिथौ – अमुकायां – अमुके - क्षेत्रे – अमुक - शर्माहं - श्रीकुलदेवताप्रीतये - तांत्रिक विधिना - स्नान महं करिष्ये - इति संकल्पं कृत्वा - जले त्रिकोणचक्रं विलिख्य – सूर्यमंडलात् – जलं आकृष्य -

गंगे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिंधु कावेरि जले ऽस्मिन् सन्निधिं कुरु।।

इति अङ्कुशमुद्रया तीर्थ मावाह्य - पुरःकल्पित तीर्थे संयोज्य-आचम्य - स्वात्मानं प्रोक्ष्य - मूलेन मृत्तिकया - स्नपनं विधाय - मूलं पठन् – कुंभमुद्रया आवाहितां स्वदेवतां त्रिभि रभिषिच्य - श्रवणादि सप्तच्छिद्राणि निरुध्य - त्रिर्निमज्य - उन्मज्येत्। इति स्नानविधिः।।

शाक्तानुष्ठानम् (सन्ध्याप्रयोगः)

अथ संध्या - पूर्ववदाचम्य - स्वमूलेन प्राणायामः - ऋष्यादि करषडङ्ग न्यासान् विधाय- पूर्ववत् तीर्थ मावाह्य - वामहस्ते तज्जलं निधाय – दक्षहस्तेन आच्छाद्य - लं वं रं यं हं - इति त्रिरभिमंत्र्य - मूलमुच्चरन् - तत्व मुद्रया - मूर्ध्नि सप्तधा मूलेन च - त्रिधाभ्युक्ष्य - शेषजलं दक्षहस्ते समादाय – तेजोरूपं ध्यात्वा - इडया देहान्तःपापं प्रक्षाल्य - कृष्णवर्णं तज्जलं पापरूपं - पिंगलया विरेच्य - पुरः कल्पित वज्रशिलायां फडिति निक्षिपेत् – ततो ऽर्घ्यं विधाय - ओं ह्रां ह्रीं हंसः श्रीमार्तण्डभैरवाय

प्रकाशशक्तिसहिताय इदमर्घ्यं परिकल्पयामि स्वाहा ।। इति त्रिरर्घ्यं कुलसूर्य्याय दत्वा- हृत्पद्मात्सूर्यमण्डले - मूलदेवीं नीत्वा - तत्र विधिवत् ध्यात्वा - ओं प्रत्यङ्गिरायै विद्महे - शत्रुनिषूदिन्यै धीमहि - तन्नो देवी प्रचोदयात् - (इति मूलगायत्री) - अनया गायत्र्या चतसृषु संध्यासु सूर्यमण्डले मूलदेव्यै - अर्घ्यं दत्वा - यथाशक्ति जपेत्-

चतसृषु संध्यासु – क्रमशो – मूलाधार – हृत्कमल – भ्रूमध्य - ब्रह्मरंध्रेभ्यो - देवीतेजः - समाकृष्य - इडया विरेच्य –कलित - वह्नि – सूर्य – चन्द्र – तारा – मण्डलेषु – निक्षिप्य - ततः-देवीं –ध्यात्वा- स्वस्वगायत्र्या अर्घ्यं दत्वा - यथाशक्ति स्वस्वगायत्रीं जप्त्वा - पुनर्मूलगायत्रीं च जप्त्वा - स्वस्वबीजाक्षरं -सर्वं मूलं च जपित्वा- प्राणायामादिना -जपं समर्प्य -मण्डलेभ्यो देवीतेजः - स्वस्वस्थाने देवीं च -हृदि आनीय –ध्यायेत् ।। इति सन्ध्याविधिः।। ततस्तर्पणं कुर्यात् ।।

शाक्ततर्पणम् (प्रयोगः)

पूर्ववदाचम्य - प्राणायामादि कृत्वा - तीर्थं मावाह्य - मूलेन - जलं सप्तधा - अमृतमुद्रया - अमृतीकृत्य - तत्र जले - यन्त्रं ध्यात्वा - देवीं स्व हृदयात् सपरिवारा मानीय - षडंगयोगेन सङ्कलीकृत्य - कुण्डलिन्याः प्रयोगेन -अमृतेन – अभिषिच्य – विधिवत् – प्रपूज्य –

1. ऐशान्याम् - ओं ऐं ह्रीं श्रीं श्रीं अमुकानन्दनाथ भैरवः तृप्यतां इति त्रिवारं – सन्तर्प्य-

2. आग्नेय्यां – परमगुरु श्रीपादुकां तर्पयामि – 3. नैऋत्यां – परमाचार्यगुरुश्रीपादुकां तर्पयामि – 4. वायव्यां - परमेष्ठिगुरु – श्रीपादुकां तर्पयामि इतित्रिः - सकृद्वा - संतर्प्य - दिव्यसिद्धमानवौघानपि गुरून्सन्तर्प्य - जले यन्त्रं विभाव्य - मूलं भैरवसहिते प्रत्यंगिरे तृप्यता मिति त्रिःसंतर्प्य - परिवारानपि संतर्प्य-प्राणायामादि विधाय - देवीं स्वहृदि संयोज्य – विसृजेत्- इति - तीर्थं च विसृजेत् - स्वस्थाने - एवं तर्पणम् - कृत्वा - ततो गृहमागत्य – प्रत्यङ्गिरां भगवतीं संपूजयेत् ।।



गृहाराधनम् - (स्वगृहे - स्वार्थपूजनम्)

जलादिना द्वारदेवताः पूजयेत् – तद्यथा - ओं धां - धात्र्यै नमः - ओं विं विधात्र्यै नमः इति दक्षे – ओं गं - गंगायै नमः - ओं यं - यमुनायै नमः इति वामे - द्वारश्रियै नमः - देहल्यै नमः - इति ऊर्ध्वे - वास्तुपुरुषाय नमः - इति अधः - एवं संपूज्य - विरोधासनेनोपविश्य – भूमिदेवीं प्रार्थयेत्।।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्।। इति पृथ्वीं प्रार्थ्य -

संविदं यथामंत्रं स्वीकुर्यात् – तद्विधि र्यथा –

संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदा नघे।
ब्राह्मणानां च तृप्त्यर्थं पवित्रा भव सर्वदा ।। ओं ब्राह्मण्यै नमः स्वाहा-

सिद्धिमूलक्षये देवि हीनबोध प्रबोधिनि।
राजाप्रजावशंकरि शत्रुपक्ष निषूदिनि।। ऐं क्षत्रियायै नमः स्वाहा-

अज्ञानेन्धन दीप्ताग्नौ ज्ञानाग्नि ब्रह्मरूपिणी।
आनन्द स्याहुतिं प्रीतिं सम्यक् ज्ञानं प्रयच्छ मे ।। ह्रीं वैश्यायै नमः स्वाहा-

नमस्यामि नमस्यामि योगमार्ग प्रदर्शिनि।
त्रैलोक्य विजये मातः समाधि फलदा भव।।श्रीं शूद्रायै नमः स्वाहा-

इति अभिमन्त्र्य।। ओं अमृते - अमृतोद्भवे -अमृतवर्षिणि -अमृतं -आकर्षयाकर्षय - सिध्दिं देहि देहि - अमुकपदं-मे वशमानय स्वाहा-इतिउक्त्वा - तदुपरि सप्तधा मूलं च जप्त्वा – धेनुमुद्रया - अमृतीकृत्य –आवाहनादिमुद्राः संदर्श्य - छोटिकाभिः दिग्बन्धनं विधाय - ऐं वदवद वाग्वादिनि मम जिह्वाग्रे स्थिरी भव - सर्वसत्व वशंकरि स्वाहा - इत्यनेन मुखे जुहुयात् - ततः आनन्दमयो भूत्वा-

अपसर्पन्तु ये भूताः ये भूताः भुवि संस्थिताः।
ये भूताः विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया।।

पाखण्डकारिणो भूत्वा भूता भूम्यन्तरिक्षगाः।
दिवि लोके स्थिता ये च ते नश्यंतु शिवाज्ञया।।

इति तर्जनी मध्यमाभ्यां उर्ध्वे तालत्रयदानेन - वामपार्ष्णि घातत्रयेण - दिव्यदृष्ट्या च -त्रिविधान् विघ्नान् - उत्सार्य - छोटिकाभिः दशदिग्बन्धंन कृत्वा - चतुर्दिक्षु वह्निप्राकारं संचिंत्य- प्राणायामं कुर्यात् -

प्राणायामत्रयम्

तत्र प्रणवं षोडशवार मुच्चरन् - दक्षाङ्गुष्ठेन दक्षनासापुटं निरुध्य - वामेन पवनं पूरयेत् - ततस्तमेव चतुष्षष्टि वार मुच्चरन् - दक्ष अनामा कनिष्ठाभ्यां वामं पुटं च निरुध्य - द्वाभ्यां पवनं कुंभयेत् - ततस्तमेव द्वात्रिंशत् वार मुच्चरन् - वामं पुटं तथैव निरुध्य - दक्षेण पवनं रेचयेत् इत्येकः प्राणायामः - एष एव विपर्ययेण द्वितीयः प्रथमवत् तृतीयः।। इत्थं प्राणायामेन निरस्त सकल कलुषं - स्वदेहं - देवताराधनयोग्यं - विभाव्य – भूतशुद्धिं - कुर्यात् –

भूतशुद्धि क्रिया प्रयोगः

अथ - मूलाधारे -हंस इति मंत्रेण कुंडलिनीं पृथ्व्या सह स्वाधिष्ठाने आनीय - तत्र जले पृथ्वीं लीनां विभाव्य - तस्मात् जलेन सह मणिपूरे समानीय - तत्र वह्नौ जलं लीनं विचिन्त्य - तस्मात् वह्निना सह अनाहते समानीय तत्र वायौ वह्निं लीनं विचिन्त्य - तस्मात् वायुना सह विशुध्दे समानीय- तत्रस्थ आकाशे वायुं लीनं विचिन्त्य - तस्मात् आकाशेन सह आज्ञाचक्रे समानीय - तत्रस्थं मनसि आकाशं लीनं चिन्त्य मनः- नादेलीनं विभाव्य-ध्वनौ ध्वनिं समर्प्य- सहस्रदलकमल कर्णिकांतस्थ चन्द्रमण्डल मध्यगत त्रिकोणान्तर्गत तेजोमय बिन्दुरूप परमशिवे तं समर्प्य - प्राणायामविधिना यं इति वायुबीजं - धूम्रवर्णे षोडशधा जपन् - स्वशरीरे -

वामकुक्षिस्थितं पापपुरुषं कज्जल प्रभम् -
ब्रह्महत्या शिरस्कं च स्वर्णस्तेय भुज द्वयम्।।
सुरापान हृदा युक्तं गुरु तल्प कटि द्वयम्।।
तत्संसर्ग पद द्वंद्वं अङ्ग प्रत्यङ्ग पातकम्।।
उपपातक रोमाणं रक्त श्मश्रु विलोचनम्।।
खड्ग चर्म धरं क्रुध्दं पुण्यं पापं विचिन्त्य तम्।।

संशोष्य – रं इति वह्निबीजं रक्तवर्णं - चतुष्षष्टिवारं जपन् - तमेव संदह्य – वं इति सुधाबीजं शुक्लवर्णं सहस्रारे विचिन्त्य – द्वात्रिंशत्- वारं अमृत वृष्ट्या निष्पापं शरीर मुत्पाद्य - ललाटस्थ लं इति पृथ्वीबीजेन पीतवर्णेन षोडशधा जप्तेन सुदृढीकृत्य –ह्रीमिति षोडशधा जप्तेन मूलस्थेन साकाश शक्तिबीजेन ऐश्वर्य देहं विधाय -

"सोहं" इति मंत्रेण - कुण्डलिनीं अमृत लोलीभूतां - पञ्चभूतानि जीवात्मानं ब्रह्मपथेन स्वस्व स्थाने नियोजयेत्- ततो देवीरूपं आत्मानं विचिन्त्य - हृदि दक्षहस्तं निधाय - प्राणप्रतिष्ठां कुर्यात् -

प्राणप्रतिष्ठा मन्त्र:

ओं आं ह्रीं क्रौं - यं रं लं वं शं षं सं हं - लं क्षं ह्सौं हंस: - श्री प्रत्यङ्गिराया: प्राणा इह प्राणा: - ओं आं ह्रीं क्रौं - यं रं लं वं शं षं सं हं - लं क्षं ह्सौं हंस: श्री प्रत्यङ्गिराया: जीव इह स्थित: - ओं आं ह्रीं क्रौं - यं रं लं वं शं षं सं हं - ळं क्षं ह्सौं हंस: - सर्वेन्द्रियाणि - इह स्थितानि - ओं आं ह्रीं क्रों यं रं लं वं शं षं सं हं - लं क्षं ह्सौं हंस: - वाङ् मनस्त्वक् चक्षु: श्रोत्र घ्राण प्राणा:- इहागत्य - सुखं चिरं - तिष्ठन्तु स्वाहा - इति मन्त्रेण प्राणप्रतिष्ठां विधाय ।।

मूलमन्त्रऋष्यादि न्यास:

तत: स्वमूलमन्त्रस्य - ऋष्यादिस्मरणं - विदधीत – तद्यथा – अस्य - श्री प्रत्यङ्गिरामहामंत्रस्य – भैरव ऋषि: - अनुष्टुप् छन्द: - श्रीप्रत्यङ्गिरा देवता - ह्रीं बीजं - श्रीं शक्ति: - स्वाहा कीलकम् – विद्यासिध्यर्थे जपे विनियोग: - इति कृताञ्जलि: स्मृत्वा - यथाविधि न्यसेत - 1. भैरव ऋषये नम: - शिरसि – 2. अनुष्टुप् छन्दसे नम: मुखे – 3. श्रीप्रत्यङ्गिरादेवतायै नम: - हृदि - 4. ह्रीं बीजाय नम: - गुह्ये - 5. श्रीं शक्तये नम: - पादयो: - 6. स्वाहा कीलकाय नम: - नाभौ – 7. मम श्रीधर्मार्थकाममोक्षार्थे जपे - विनियोग: - सर्वाङ्गे - इति ऋष्यादिन्यासं -कृत्वा – करन्यासं - कुर्यात् ।

मूलमन्त्र करन्यास:	अथ स्वमूल करन्यास:
ऐं नम: नाभ्यादि पादान्तम्	ओं ऐं अङ्गुष्ठाभ्यां नम:
ह्रीं नम: कंठादि नाभ्यन्तम्	ओं ह्रीं तर्जनीभ्यां नम:
श्रीं नम: मूर्धादि कण्ठान्तम्	ओं श्रीं मध्यमाभ्यां नम:
ऐं नम: वामपाणि तले	ओं प्रत्यङ्गिरे - अनामिकाभ्यां नम:
ह्रीं नम: दक्षिणपाणि तले	ओं मम रक्ष रक्ष - कनिष्ठिकाभ्यां नम:
श्रीं नम: उभयो: करयो:	ओं मम शत्रूणां भक्ष भक्ष ओं स्वाहा – करतल - करपृष्ठाभ्यां नम:

इति करन्यास:

मूलमन्त्र षडङ्गन्यासः

अथ प्रत्यङ्गिरा षड्विंशति वर्णात्मिका विद्या – षडङ्गन्यासः

ओं ऐं हृदयाय नमः

ओं ह्रीं शिरसे स्वाहा

ओं श्रीं शिखायै वषट्

ओं प्रत्यंगिरे कवचाय हुम्

ओं मम रक्ष रक्ष नेत्रत्रयाय वौषट्

ओं मम शत्रूणां भक्ष भक्ष ओं स्वाहा - अस्त्राय फट् - इति षडङ्गन्यासः

मातृकान्यासक्रमः

ओं अस्य - श्री अन्तर्मातृकान्यासस्य - ब्रह्मा - ऋषिः - गायत्री - छंदः - श्री मातृकासरस्वती देवता - हलो - बीजानि - स्वराः - शक्तयः - अव्यक्तं - कीलकम् - मम श्री प्रत्यङ्गिरात्वेन न्यासे विनियोगः - इति प्राञ्जलिः -स्मृत्वा न्यसेत् - ब्रह्मऋषये नमः - शिरसि - गायत्रीछंदसे नमः -मुखे - श्रीअन्तर्मातृकादेवतायै नमः - हृदये - हलो बीजेभ्यो नमः -गुह्ये - स्वराः शक्तिभ्यो नमः - पादयोः - अव्यक्तं कीलकाय नमः - नाभौ - मम श्रीप्रत्यङ्गिरात्वेन न्यासे विनियोगः - इति सर्वांगे संकुर्यात् - तद्यथा -

करन्यासः

ओं ऐं ह्रीं श्रीं -अं कं खं गं घं ङं आं -अङ्गुष्ठाभ्यां नमः

ओं ऐं ह्रीं श्रीं - इं चं छं जं झं ञं ईं - तर्जनीभ्यां नमः

ओं ऐं ह्रीं श्रीं - उं टं ठं डं ढं णं ऊं - मध्यमाभ्यां नमः

ओं ऐं ह्रीं श्रीं - एं तं थं दं धं नं ऐं - अनामिकाभ्यां नमः
ओं ऐं ह्रीं श्रीं - ओं पं फं बं भं मं औं - कनिष्ठिकाभ्यां नमः
ओं ऐं ह्रीं श्रीं - अं यं रं लं वं शं षं सं हं लं क्षं अः - करतलकरपृष्ठाभ्यां नमः -
इति करन्यासः -

षडङ्गन्यासः -

ओं ऐं ह्रीं श्रीं - अं कं खं गं घं ङं आं - हृदयाय नमः।
ओं ऐं ह्रीं श्रीं - इं चं छं जं झं ञं ईं - शिरसे स्वाहा ।
ओं ऐं ह्रीं श्रीं - उं टं ठं डं ढं णं ऊं - शिखायै वषट्।
ओं ऐं ह्रीं श्रीं – एं तं थं दं धं नं ऐं - कवचाय हुम्।
ओं ऐं ह्रीं श्रीं - ओं पं फं बं भं मं औं - नेत्रत्रयाय वौषट् ।
ओं ऐं ह्रीं श्रीं - अं यं रं लं वं शं षं सं हं लं क्षं अः
अस्त्रायफट् इति करयो – रंगुष्ठादि तलान्तं विन्यस्य।।
एवमेव हृदयादि षडंगेष्वपि न्यसेत् -

ततो – षट्चक्र अन्तर्मातृका न्यासः-

1. अं नमः - आं नमः - इं नमः - ईं नमः - उं नमः - ऊं नमः - ऋं नमः - ॠं नमः - लृं नमः - ॡं नमः - एं नमः - ऐं नमः - ओं नमः - औं नमः अं नमः - अःनमः - इति विशुद्धिचक्रे - कंठे - षोडशदलेषु विन्यस्य ।

2. कं नमः - खं नमः - गं नमः - घं नमः - ङंः नमः - चं नमः - छं नमः - जं नमः - झं नमः - ञं नमः - टं नमः - ठं नमः - इति अनाहते हृदये द्वादशदले विन्यस्य

3. डं नमः ढं नमः णं नमः तं नमः थं नमः दं नमः धं नमः नं नमः पं नमः फं नमः इति मणिपूरके नाभौ दशदले विन्यस्य

4. बं नमः भं नमः मं नमः यं नमः रं नमः लं नमः इति स्वाधिषठाने लिंगमूले षट्दले विन्यस्य -

5. वं नमः शं नमः षं नमः सं नमः इति मूलाधारे चतुर्दले विन्यस्य -

6. हं नमः क्षं नमः इति आज्ञायां भ्रूमध्ये द्विदले विन्यस्य - इत्यन्तर्मातृकावदेव बहिर्मातृकान्यासं कुर्यात् - तद्यथा -

देहे - बहिर्मातृका न्यासः



ओं ऐं ह्रीं श्रीं	अं	नमः - शिरसि
ओं ऐं ह्रीं श्रीं	आं	नमः - मुखवृत्ते
ओं ऐं ह्रीं श्रीं	इं	नमः - दक्षनेत्रे
ओं ऐं ह्रीं श्रीं	ईं	नमः - वामनेत्रे
ओं ऐं ह्रीं श्रीं	उं	नमः - दक्षकर्णे
ओं ऐं ह्रीं श्रीं	ऊं	नमः - वामकर्णे
ओं ऐं ह्री श्रीं	ऋं	नमः - दक्ष नासापुटे
ओं ऐं ह्रीं श्रीं	ॠं	नमः - वाम नासापुटे
ओं ऐं ह्रीं श्रीं	ऌं	नमः - दक्ष गण्डे
ओं ऐं ह्रीं श्रीं	ॡं	नमः - वाम गण्डे
ओं ऐं ह्रीं श्रीं	एं	नमः - ऊर्ध्वोष्ठे
ओं ऐंह्रीं श्रीं	ऐं	नमः - अधरोष्ठे
ओं ऐं ह्रीं श्री	ओं	नमः - ऊर्ध्व दन्तपङ्क्तौ
ओं ऐं ह्रीं श्री	औं	नमः - अधो दन्तपङ्क्तौ
ओं ऐं ह्रीं श्रीं	अं	नमः - मूर्ध्नि
ओं ऐं ह्रीं श्रीं	अंः	नमः - अस्थिनि
ओं ऐं ह्रीं श्रीं	कं	नमः - दक्ष बाहु मूले
ओं ऐं ह्रीं श्रीं	खं	नमः - दक्षबाहु कुर्परे
ओं ऐं ह्रीं श्रीं	गं	नमः - दक्षबाहु मणिबन्धे
ओं ऐं ह्रीं श्रीं	घं	नमः - दक्षहस्तांगुलि मूले
ओं ऐं ह्रीं श्रीं	ङं	नमः - दक्षहस्तांगुल्यग्रे
ओं ऐं ह्रीं श्रीं	चं	नमः - वामबाहु मूले
ओं ऐं ह्रीं श्रीं	छं	नमः - वामबाहु कूर्परे
ओं ऐं ह्रीं श्रीं	जं	नमः - वामबाहु मणिबन्धे
ओं ऐं ह्रीं श्रीं	झं	नमः - वामहस्तांगुलि मूले -
ओं ऐं ह्रीं श्रीं	ञं	नमः - वामहस्तांगुल्यग्रे
ओं ऐं ह्रीं श्रीं	टं	नमः - दक्षपादमूले
ओं ऐं ह्रीं श्रीं	ठं	नमः - दक्षजानुनि।।
ओं ऐं ह्रीं श्रीं	डं	नमः - दक्षगुल्फे

ओं ऐं ह्रीं श्रीं ढं नमः - दक्षपादांगुलिमूले
ओं ऐं ह्रीं श्री णं नमः - दक्षपादांगुल्यग्रे
ओं ऐं ह्रीं श्रीं तं नमः - वामपादमूले
ओं ऐं ह्रीं श्रीं थं नमः - वामजानुनि
ओं ऐं ह्रीं श्रीं दं नमः - वामगुल्फे
ओं ऐं ह्रीं श्रीं धं नमः - वामपादांगुलिमूले
ओं ऐं ह्रीं श्रीं नं नमः - वामपादांगुल्यग्रे
ओं ऐं ह्रीं श्रीं पं नमः - दक्षपार्श्वे
ओं ऐं ह्रीं श्रीं फं नमः - वामपार्श्वे
ओं ऐं ह्रीं श्रीं बं नमः - पृष्ठे
ओं ऐं ह्रीं श्रीं भं नमः - नाभौ
ओं ऐं ह्रीं श्रीं मं नमः - उदरे

ओं ऐं ह्रीं श्रीं यं त्वगात्मने नमः - वामांसे
ओं ऐं ह्रीं श्रीं रं असृगात्मने नमः - दक्षांसे
ओं ऐं ह्रीं श्रीं लं मांसात्मने नमः - ककुदि
ओं ऐं ह्रीं श्रीं वं मेदसात्मने नमः - हृदादिदक्षकरान्तम्
ओं ऐं ह्रीं श्रीं शं अस्थ्यात्मने नमः - हृदादि दक्षकरान्तम्
ओं ऐं ह्रीं श्रीं षं मज्जात्मने नमः - हृदादि वामकरान्तम्
ओं ऐं ह्रीं श्रीं सं शुक्लात्मने नमः - हृदादि दक्षपादान्तम्
ओं ऐं ह्रीं श्रीं हं प्राणात्मने नमः - हृदादि वामपादान्तम्
ओं ऐं ह्रीं श्रीं लं जीवात्मने नमः - पादादि हृदन्तम्
ओं ऐं ह्रीं श्रीं क्षं परमात्मने नमः - हृदादि मूर्धोन्तम्।।

इति विन्यस्य - ततः स्वदेहं पञ्चाशत् वर्णरुपं मातृकादेवीरुरूपं ध्यायेत् – ध्यानम्

पंचाशत् वर्णरूपां च कपर्द शशि भूषणाम् ।
शुद्ध स्फटिक संकाशां शुद्ध क्षौम विराजिताम्।।
मुक्ता रत्न स्फुर द्भूषां जपमालां कमण्डलुम्।
पुस्तकं वरदानं च बिभ्रतीं परमेश्वरीम्।

एवं ध्यात्वा – मातृकाः विन्यस्य – ततो विद्यान्यासं कुर्यात् -

बीजत्रय विद्यान्यासः

तद्यथा – 1. ऐं नमः - दक्ष मणिबंधे – 2. ह्रीं नमः - दक्षकर तले – 3. श्रीं नमः दक्षकराग्रे - इति दक्षकरे 4. ऐं नमः वाम मणिबंधे - 5. ह्रीं नमः वामप्राणि तले - 6. श्रीं नमः वामकराग्रे - इति वामकरे - 7. ऐं नमः दक्षकक्ष्ये - 8. ह्रीं नमः दक्षकूर्परे - 9. श्रीं नमः दक्षपाणौ - 10. ऐं नमः वामकक्ष्ये - 11. ह्रीं नमः वामकूर्परे - 12. श्रीं नमः वामपाणौ – 13. ऐं नमः दक्षपादकक्ष्ये - 14. ह्रीं नमः दक्षजानुनि - 15. श्रीं नमः पादाग्रे - 16. ऐं नमः वामपादकक्ष्ये - 17. ह्रीं नमः वामजानुनि - 18. श्रीं नमः वामपादाग्रे - 19. ऐं नमः लिंगे - 20. ह्रीं नमः हृदि - 21. श्रीं नमः नादान्ते - एवं प्रत्यङ्गिरायाः विद्यान्यासः

नवयोनि न्यासः

ऐं नमः दक्षकर्णे - ह्रीं नमः वामकर्णे - श्रीं नमः चिवुके - ऐं नमः दक्षशंखे - ह्रीं नमः ब्रामशंखे - श्रीं नमः मुखे - ऐं नमः दक्षनेत्रे - ह्रीं नमः वामनेत्रे - श्रीं नमः कुक्षौ - ऐं नमः दक्षजानुनि - ह्रीं नमः वामजानुनि - श्रीं नमः नाभौ - ऐं नमः दक्षपादे - ह्रीं नमः वामपादे - श्रीं नमः हृदि - ऐं नमः दक्षजानुनि - ह्रीं नमः वामजानुनि - श्रीं नमः कंठे - एवं नवयोनिन्यासं कृत्वा ततः पुनरपि षडंगन्यासं समन्वयेन कुर्यात्।।

षडङ्गन्यासः

ऐं हृदयाय नमः - ह्रीं शिरसे स्वाहा - श्रीं शिखायै वषट् - प्रत्यंगिरे कवचाय हुं - मम रक्षरक्ष नेत्रत्रयाय वौषट् - मम शत्रूणां भक्षभक्ष - ओं स्वाहा - अस्त्रायफट् इति न्यासैर्देहं संनह्य -

मूलाधारे मूलविद्यां विद्युत्कोटि समप्रमाम्।
सूर्यकोटि प्रतीकाशां चन्द्रकोटि प्रभां प्रिये।।
बिसतन्तु स्वरूपां तां बिन्दु त्रि वलयां प्रिये।।
ऊर्ध्वशक्ति निपातेन सहजेन वरानने।।
मूलशक्ति दृढत्वेन मध्यशक्ति प्रबोधतः।।
परमानन्द सन्दोह मानन्दं चिन्तयेत् परम्।।

अन्तर्यजनं कृत्वा - न्यासेन - स्वदेहे पीठपूजां इत्युक्तवत् -स्वहृदि - कुर्यात्।।

देवीपीठपूजा (अर्चकदेहे)

मूलाधारे

ओं आधारशक्तये नमः-
ओं प्रकृत्यै नमः-
ओं कमठाय नमः-
ओं शेषाय नमः-
ओं पृथिव्यै नमः-
ओं सुधांबुधये नमः-
ओं मणिद्वीपाय नमः -
ओं चिन्तामणि गृहाय नमः-
ओं रत्नवेदिकायै नमः-
ओं मणिपीठाय नमः-
ओं रत्नमण्टपाय नमः -
ओं कल्पतरवे नमः -
ओं रत्नसिंहासनाय नमः -
ओं दिक्षु नाना मुनिगणेभ्यो नमः-
ओं नाना देवेभ्यो नमः-
ओं धर्माय नमः - दक्षांसे-
ओं ज्ञानाय नमः - वामांसे-
ओं वैराग्याय नमः - वामोरौ-
ओं ऐश्वर्याय नमः - दक्षोरौ-
ओं अधर्माय नमः - दक्षकुक्षौ-
ओं अज्ञानाय नमः - दक्षपृष्ठे-
ओं अवैराग्याय नमः - वामपृष्ठे-
ओं अनैश्वर्याय नमः - वामकुक्षौ-
ओं शेषाय नमः-
ओं पद्माय नमः-
ओं प्रकृतिमय पत्रेभ्यो नमः-
ओं विकृतिमय केसरेभ्यो नमः-
ओं पंचाशद्बीजभूषित कर्णिकायै नमः-
ओं सूर्य मण्डलाय नमः
ओं सोम मण्डलाय नमः
ओं वैश्वानर मण्डलाय नमः



ओं सं सत्वाय नमः
ओं रं रजसे नमः
ओं तं तमसे नमः
ओं आं आत्मने नमः
ओं अं अन्तरात्मने नमः
ओं पं परमात्मने नमः
ओं ह्रीं ज्ञानात्मने नमः

हृत्पद्म पत्रेषु

ओं वामायै नमः
ओं ज्येष्ठायै नमः
ओं रौद्र्यै नमः
ओं अंबिकायै नमः
ओं इच्छायै नमः
ओं ज्ञानायै नमः
ओं क्रियायै नमः
ओं कुब्जिकायै नमः।।
ओं चित्रायै नमः
ओं विषघ्निकायै नमः
ओं दूतायै नमः
ओं आनन्दायै नमः



मध्ये कर्णिकायां -

ओं सः मनोन्मन्यै नमः
ओं ऐं परायै नमः
ओं ह्रीं अपरायै नमः
ओं श्रीं विरूपायै नमः
ओं क्लीं परापरायै नमः



ओं ह्सौं सदाशिव महाप्रेतासनायै नमः
ओं ह्रीं ब्रह्मविष्णुरुद्रेश्वरसदाशिव महाप्रेत महापद्मासनाय नमः
ओं परमशिव पर्यङ्काय नमः
इति देवीपीठं विन्यस्य- ततो देवीं यजेत्।

देवीमानसपूजा

तत्रैव हृदये स्व अभेदेन - श्री प्रत्यंगिरां भगवतीं ध्यायेत्-

पाशं कपालं डमरुं त्रिशूलं
संबिभ्रती चन्द्र कला वतंसा।
पिङ्गोर्ध्व केशी सित भीम दंष्ट्रा
भूयात् विभूत्यै मम भद्रकाली।।

इति श्री प्रत्यङ्गिरां -ध्यात्वा – मानसोपचारै राराध्य - मनसा -यथाशक्ति जप होमादिकं च कृत्वा -कामकलां विचिन्त्य –तदुपरि – श्री प्रत्यंगिरां - यथोक्तां ध्यायन् –स्ववामभागे- षट्कोणान्तर्गत-त्रिकोणद्वयं बिंदुं वा स्ववृत्त चतुरश्रं कृत्वा - स्वदक्षे -त्रिकोणं - वृत्तं - बिंबमंडलं भूमौ विरच्य - तत्रा - आधारशक्तिं प्रपूज्य - तत्राधारं निक्षिप्य - तदुपरि - अस्त्रेण शोधितं - हृन्मन्त्रेण पूरितं पात्रे - शंखादिकं-वा -संस्थाप्य

शङ्खादिपात्रपूजा –



तत्र – गंगेत्यादि मन्त्रेण सूर्यमण्डलात् - तीर्थमावाह्य –

गङ्गेच यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जले ऽस्मिन् सन्निधिं कुरु।।

तस्मिन् – गन्धादीन् प्रणवेन निक्षिप्य - वह्नि सूर्य सोम कलाभिः संपूज्य - धेनुमुद्रां-प्रदर्श्य - स्वमन्त्रेण - संपूजये दिति विधिविहित - सामान्यार्घ्योदकेन –स्ववामे कृत चक्रं अभ्युक्ष्य - तत्र आधारशक्तिभ्यो नमः इत्यादि पीठपूजाक्रमेण संपूज्य - नमः इत्याधारं प्रक्षाल्य - मण्डलोपरि संस्थाप्य - रं वह्निमंडलाय - दशकलात्मने नमः इति प्रपूज्य- फडिति कलशं प्रक्षाल्य - कारणेन – आपूर्य – रक्तवस्त्र माल्यादिना संभूष्य - मध्ये संस्थाप्य - अं अर्कमंडलाय द्वादशकलात्मने नमः इति कलशं संपूज्य - ओं सं चन्द्रमण्डलाय षोडशकलात्मने नमः इति द्रव्ये च संपूज्य- फडिति संरक्ष्य - हुमित्यवकुण्ठ्य -मूलेन संवीक्ष्य- नमः इत्यभ्युक्ष्य -मूलेन गन्ध माघ्राय - कुंभे पुष्पं दत्वा – ततो शापमोचनं कुर्यात् -

मन्त्रशाप मोचनम्



एव मेव परं ब्रह्म स्थूल सूक्ष्म मयं ध्रुवम्।
कचोद्भवां ब्रह्महत्यां तेन ते नाशया म्यहम्।।

सूर्य मण्डल संभूते वरुणालय संभवे।
अमाबीजमये देवि शुक्रशापात् विमुच्यताम्।।

वेदानां प्रणवो बीजं ब्रह्मानन्द मयं यदि।।
तेन सत्येन हे देवि ब्रह्महत्यां व्यपोहतु।। इति त्रिवार मुच्चार्य- ततः -

1. ओं वां वीं वूं वैं वौं वः ब्रह्मशाप मोचिता सुरादेव्यै नमः इतिमन्त्रं त्रिवार मुच्चार्य -

2. ओं ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः - सुराकृष्णशापं मोचय मोचयअमृतं स्त्रावय स्त्रावय स्वाहा - इति त्रिवारमुचार्य

3. ओं हंसश्शुचिष द्वसुरन्तरिक्षस होता वेदिषद् अदिति र्दुरोणसत् - नृषद् वरसद् - व्योमस द्ब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् - इत्यपि त्रिवारमुच्चरेत् । ततः

तत्र आनन्दभैरवं सुराभैरवीं च ध्यात्वा - हसरक्षमलवयओं आनन्द भैरवाय वौषट् - सहक्षमलवरयहुं सुरादेव्यै वौषट् - इति देवदेव्यौ त्रिःसंपूज्य - द्रव्यमध्ये दक्षिणावर्तेन त्रिपंक्त्या अंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः लृंनमः ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः अंनमः अःनमः कंनमः खंनमः गंनमः घंनमः ङंनमः चंनमः छंनमः जंनमः झंनमः ञंनमः टंनमः ठंनमः डंनमः ढंनमः णंनमः तंनमः थंनम दंनमः धंतमः नंनमः पंनमः फंनमः बंनमः भंनमः मंनमः यंनमः रंनमः लंनमः वंनमः शंनमः षंनमः संनमः क्षंनमः इति शक्ति चक्रं विलिख्य- तन्मध्ये-हं नमः क्षं नमः तत्समावेशात् द्रव्यमध्येऽमृतं विचिंत्य धेनुमुद्रया अमृतीकृत्य - वमिति सुधाबीजं मूलं पठन् - घटं धृत्वा - आत्मश्रीचक्रयोर्मध्ये त्रिकोण षट्कोण वृत्त चतुरश्रे च विलिख्य - चतुरश्रे 1. पूर्णगिरिपीठाय नमः - 2. उड्डीयानपीठाय नमः - 3. कामरूपपीठाय नमः - 4. जालंधरपीठाय नमः - इतिसंपूज्य - षट्कोणे षडङ्गानि संपूज्य – त्रिकोणे – त्रिखण्डेन - कोणाग्रदक्षोत्तरं संपूज्य - मध्ये आधारशक्तिं संपूज्य - त्रिकोणगर्भे यन्त्रिकां संस्थाप्य - नमः इति सामान्यजलेनाभ्युक्ष्य - 1. पं धूम्रार्चिषे नमः - 2. रं ऊष्मायैनमः - 3. लं ज्वालिन्यै नमः 4. वं ज्वलिन्यै नमः 5. शं विस्फुलिंगिन्यै

नमः - 6. षं सुप्रियायै नमः 7. सं – स्वरूपायै नमः 8. हं कपिलायै नमः 9. ळं हव्यवाहायै नमः - 10. क्षं कव्यवाहायैनमः -इति दशकलाभ्यो नमः संपूज्य –मध्ये रं वह्निमंडलाय दशकलात्मने नमः इतिसंपूज्य -पात्रं फडिति प्रक्षाल्य -यन्त्रिकोपरि संस्थाप्य –तत्र कं भं - तपिन्यै नमः- खं बं तापिन्यै नमः - गं फं धूम्रायैनमः- घं पं मरीच्यै नमः -ङं नं ज्वलिन्यै नमः - चं धं रुच्यै नमः - छं दं सुषुम्णायै नमः- जं थं भोगदायै नमः - झं तं विश्वायै नमः- ञं णं बोधिन्यै नमः - टं ठं धारिण्यैनमः - ठं डं क्षमायै नमः -इति द्वादशकलाभ्यो नमः - अं अर्कमंडलाय द्वादशकलात्मने नमः इतिसंपूज्य –त्रिकोण वृत्त षट्कोणपत्रं विलिख्य -समस्त व्यस्त मन्त्रेण सुंपूज्य -

शङ्खं चन्द्रार्क दैवत्यं मध्ये वरुण दैवतम्।
पृष्ठे प्रजापतिश्चैव अग्रे गंगा सरस्वती।
त्रैलोक्यानिच तीर्थानि वासुदेवस्या चाज्ञया।
शंखे तिष्ठन्ति सततं तस्मात् शंखं प्रपूजयेत्।।



वरुणबीजं विलोममातृकां च पठन् - भूतेन त्रिकोणजलेनापूर्य -तत्र सुगन्धादि निक्षिप्य – षोडश सोमकलाः पूजयेत् ।।

1. अं अमृतायै नमः - 2. आं मानदायै नमः 3. इं पूषायै नमः - 4. ईं तुष्टै नमः - 5. उं पुष्ट्यै नमः - 6. ऊं रत्यैनमः - 7. ऋं धृत्यै नमः - 8.ॠं शशिन्यै नमः - 9.ऌं चन्द्रिकायै नमः - 10. ॡं कान्त्यै नमः - 11. एं ज्योत्स्नायै नमः - 12. ऐं श्रियै नमः - 13. ओं प्रीत्यै नमः - 14. औं अंगदायै नमः - 15. अं पूर्णायै नमः - 16. अः पूर्णामृतायै नमः - इति वं सं षोडशकलात्मने सोममंडलाय नमः - इतिसंपूज्य - पूर्ववन्मन्त्रद्रव्ये विलिख्य - त्रिकोण त्रिरेखायां – अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः - कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं - इति त्रिस्त्रिर्विलिख्य - मूलखंडत्रयेण - त्रिकोणं संपूज्य - षट्कोणे षडङ्गं च संपूज्य - गङ्गेत्यादिना - तीर्थमावाह्य -आनन्दभैरव्यौ स्वतन्त्रेण संपूज्य - पूर्वादिः- चतुर्दिक्षुमध्ये च -

1. ग्लूं गगन रत्नेभ्यो नमः - पूर्वे - 2. श्लूं स्वर्ग रत्नेभ्यो नमः - दक्षिणे - 3. प्लूं पातालरत्नेभ्यो नमः - पश्चिमे। 4. म्लूं मर्त्यरत्नेभ्यो नमः - उत्तरे - 5. न्लूं नागरत्नेभ्यो नमः - मध्ये - इति संपूज्य - मांसादि नैवेद्यं संशोध्य - हुं इत्यवकुण्ठ्य - अमृतीकृत्य - तालत्रयेण दिशःसंबध्य - तदुपरि सप्तधा - मूलं - संपूज्य - तत्र देवीमावाह्य - तालत्रयेण दिबन्धं - विधाय - अवकुण्ठ्या - अमृतीकृत्य

- योनि मुद्रां प्रदर्श्य - ह्सौं नमः संपूज्य – शंखमुद्रां – प्रदर्श्य –षडंगेन - संकलीकृत्य - मत्स्यमुद्रया आच्छाद्य - मूलं सुधाबीजं जप्त्वा - पात्रं देवीरूपं विभावयेदिति- ततो – देव्याज्ञामादाय - घटसमीपे चरूपात्रं - ततः शक्तिपात्रं - भोगपात्रं - स्वपात्रं - योगिनीपात्रं - वीरपात्रं - बलिपात्रं - पाद्यार्घ्याचमनीय पात्राणि च संस्थाप्य - चर्वणयुतकारणेन - तत्तन्मुद्रया - श्रीपात्रात्समुद्धृत्य - आनंदभैरवं तर्पयामि नमः - इति मन्त्रेण त्रिःसंतर्प्य - ततः गुरुं - श्रीमत् श्री अमुकानन्दनाथ श्रीपादुकां तर्पयामि नमः - इति त्रिः संतर्प्य - परमगुरुं - श्रीअमुकानंदनाथ श्रीपादुकां तर्पयामि नमः - इति त्रिःसंतर्प्य - परमाचार्यगुरू श्रीमत्श्री अमुकानन्दनाथ श्रीपादुकां तर्पयामि नमः इति त्रिःसंतर्प्य - श्रीपात्रामृतेन - मूलदेवीं सायुधां सवाहनां सपरिवारां तर्पयामि नमः - इति संतर्पयत् - इति कलशपूजाविधिः ।

आवाहनादि पूजनम् (प्रत्यङ्गिरा महायन्त्रे पूजाक्रमः)

चक्रोपरि - पीठोपरि पीठपूजां - पूर्ववद्विधाय - अथ श्री प्रत्यंगिरां ध्यात्वा - वायुबीजेन – वामनासापुटेन - देवीं स्वहृदयात् कुसुमांजलि मानीय - तत्रावाह्य –

ओं देवेशि भक्ति तुलने परिवार समन्विते।
यावत् त्वां पूजयिष्यामि तावद् देवि इहावह।।

इति पठित्वा - मूलं उच्चार्य - श्रीभैरवसहिते - श्रीप्रत्यंगिरे - इहागच्छ - इह सन्निरुद्धय - सन्निरुध्य - मम सर्वोपचारसहितां पूजां - गृह्ण गृह्ण -इत्यावाहनादिमुद्राः - प्रदर्श्य - प्राणप्रतिष्ठां - श्रीचक्रे - लेलिहानमुद्रया -विधाय - दशदिग्बन्धनं कृत्वा - अवकुण्ठ्य - संकलीकृत्य -परमीकृत्य –धेनुं योनिं च प्रदर्श्य – वराभय पुस्तकाक्षमाला ज्ञानांकुश पाशचाप बाणकपालादि मुद्राःप्रदर्श्य - श्रीपात्रामृतेन -सायुधां सवाहनां सपरिवारां सावरणां श्रीभैरवसहितां श्रीप्रत्यंगिरां तर्पयामि इति त्रिःसंतर्प्य -पुनरपि - मूलेन -प्रत्यङ्गिराश्रीपादुकां तर्पयामि नमः इति -त्रिःसंतर्प्य - मूलमुच्चार्य –एतत्पाद्यं श्रीभैरवसहितप्रत्यङ्गिरायै नमः पादयोः - एवमर्घ्यं स्वाहा शिरसि - आचमनीयं -मधुपर्कं च सुधां - मुखे - स्नानाय नमः - सर्वांगे - इति सुस्नाप्य - शुद्धदुकूलेनाङ्गं प्रोच्छ्य - विचित्रपट - वस्त्र कुंकुम - कस्तूरी चन्दन - सिन्दूर मुकुट - कुण्डल हार नूपुरादि - नानालंकारान् दत्वा - पुनराचमनीयं दद्यात् - ततो मध्यानामांगुष्ठाग्रैः गन्धो नमः इति गन्धं - अंगुष्ठतर्जनीभ्यां पुष्पाणि वौषट् इति पुष्पैः संपूज्य - धूपपात्रं फडिति सुपूज्य - पुरतः स्थापयित्वा - वामतर्जनीं संस्पृशन् -श्रीपात्रामृतेन धूपं निवेदयामि इति निवेद्य-तद्यथा।

धूपम् - ओं जगध्वनि मंत्रमात: स्वाहा इति घंटां संपूज्य -वामेन पाणिना – तां - घण्टां वादयन् –मध्यमा नामांगुष्ठैर्धूपं धृत्वा – देवी गायत्रीं मूलमंत्रं च पठन्

वनस्पति रसोत्पन्नो गंधाढ्यो गंध संयुत:।
आघ्रेय: सर्व देवानां धूपो ऽयं प्रतिगृह्यताम्।।

इति त्रेधोत्तोल्य - देवीं धूपयेत्।

दीपम् - ततो दीपं संमुखे संस्थाप्य - पूर्ववत्प्रोक्षणं पूजनं च कृत्वा - वाममध्यमया दीपपात्रं स्पृशन् -दीपं निवेदयामीति निवेद्य - पूर्ववत् घण्टां वादयन् - मध्यानामामध्ये दीपपात्रमंगुष्ठेन धृत्वा - दर्शयन् - गायत्रीं मूलं च पठन् -

सु प्रकाशो महादीप: सर्वत्र तिमिरापह:।
स बाह्याभ्यतरं ज्योति: दीपो ऽयं प्रति गृह्यताम् ।। इति दीपं सन्दर्शयेत्।

तत: स्वर्णादिपात्रे कुंकुमेन वा सुपात्रं चन्द्ररूपं चरुं कृत्वा - मध्ये दीपमेकनमष्टपत्रेषु दीपाष्टकं च संस्थाप्य –श्रीं -सौं –ग्लूं- म्लूं -स्लूं -प्लूं –ब्लूं-सौं। श्रीं रत्नेश्वर्यै नम: इति मूलेनाभ्यर्च्य –स्थाल कं मस्तकान्तं उद्धृत्य नववारं मूलं पठित्वा-

नीराजनम्



समस्त चक्र चक्रेशि युते देवि नवात्मिके।
आरार्तिक मिदं देवि गृहाण मम सिद्धये ।।

इति चक्रमुद्रया - नीराजयेत् – ततो नैवेद्यम् दद्यात् -

नैवेद्यम्

ततो नानानैवेद्यं स्वर्णादिपात्रे निक्षिप्य – हमित्य वकुण्ठ्य - धेनुमुद्रया अमृतीकृत्य - नैवेद्यपात्रं स्पृशन् – मूलांते

हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम् ।
पञ्चधा षड्रसोपेतं गृहाण परमेश्वरि ।।

इति नैवेद्यं निवेदयामि - इति दक्षानामांगुष्ठाभ्यामुत्सृजेत् - तत: पुनराचमनीयं दत्वा -मूलादितो कर्पूरादियुक्तताांबूलं निवेदयामीति पूर्ववद्दद्यात्-सर्वेषामर्घ्यपात्रजलेनोत्सर्ग: कार्य: - तत: तत्वमुद्रया देवीं त्रि:संतर्प्य - पूर्वोक्तमुद्रा: प्रदर्श्य – योनिं -हृदि - क्षोभिणीं मुखे – द्राविणीं - भ्रूमध्ये -आकर्षणीं ललाटे - यशिनीं ब्रह्मरंध्रे - आह्लादिनीं पंचमुद्रामयीं प्रदर्श्य - कृतांजलि: -श्रीप्रत्यङ्गिरायाः आवरणपूजां आरभेत् ।

प्रत्यङ्गिरा द्वादशावरणपूजा (लयक्रमा)
(बाह्य चतुरश्ररेखायाःआरभ्य मध्यान्तं क्रमेण पूजयेत्)

1. प्रथमावणरम्

तत्र – आदौ – पूर्वादितः पूर्वे - इन्द्रश्रीपादुकां पूजयामि तर्पयामि नमः - 2. आग्नेय्यां - अग्निश्रीपादुकां पूजयामि तर्पयामि नमः - 3. दक्षिणे - यमश्रीपादुकां पूजयामि तर्पयामि नमः - 4. नैरृत्यां -निरृति श्रीपादुकां पूजयामि तर्पयामि नमः - 5.पश्चिमे - वरुणश्रीपादुकां पूजयामि तर्पयामि नमः - 6. वायव्ये -वायु श्रीपादुकां पूजयामि तर्पयामि नमः - 7. उत्तरे - कुबेरश्रीपादुकां पूजयामि तर्पयामि नमः - 8. ऐशान्ये ईशान श्रीपादुकां पूजयामि तर्पयामि नमः - 9. इन्द्रेशानयोर्मध्ये – ब्रह्मा श्रीपादुकां पूजयामि तर्पयामि नमः - 10. वरुणराक्षसयोर्मध्ये -विष्णुश्रीपादुकां पूजयामि तर्पयामि नमः इति पूजयेत् तर्पयेच्च - ततस्तत्समीपे -

2. द्वितीयावरणम्

पुनस्तथैव – अन्तर्भूपुर रेखायां – पूर्वादितःक्रमेण

1.वज्र श्रीपादुकां पूजयामि तर्पयामि नमः 2.शक्ति श्रीपादुकां पूजयामि तर्पयामि नमः 3.दण्ड श्रीपादुकां पूजयामि तर्पयामि नमः 4.खड्ग श्रीपादुकां पूजयामि तर्पयामि नमः 5.पाश श्रीपादुकां पूजयामि तर्पयामि नमः 6.ध्वज श्रीपादुकां पूजयामि तर्पयामि नमः 7.गदा श्रीपादुकां पूजयामि तर्पयामि नमः 8.त्रिशूल श्रीपादुकां पूजयामि तर्पयामि नमः 9.पद्म श्रीपादुकां पूजयामि तर्पयामि नमः 10. चक्र श्रीपादुकां पूजयामि तर्पयामि नमः इति पूजयेत्तर्पयेत् च ।

3. तृतीयावरणम्

ततः त्रिवृत्ते – अष्टदिक्षु पूर्वादितः क्रमेण –

1.कौलानंदनाथ - श्रीपादुकां पूजयामि तर्पयामि नमः 2.परमगुरु - श्रीपादुकां पूजयामि तर्पयामिनमः 3.परमाचार्य - श्रीपादुकां पूजयामि तर्पयामि नमः 4.परमेष्ठि - श्रीपादुकां पूजयामि तर्पयामि नमः 5.दिव्यौघ - श्रीपादुकां पूजयामि तर्पयामि नमः 6.सिध्दौघ - श्री पादुकां पूजयामि तर्पयामि नमः 7.मानवौघ - श्रीपादुकां पूजयामि तर्पयामि नमः 8.पुनः स्वगुरु श्रीपादुकां पूजयामि तर्पयामि नमः इति पूजयेत्तर्पयेच्च।

4. चतुर्थावरणम् -

ततो अष्टदलेषु पूर्वादितः क्रमेण-

1. अं असितांगभैरव श्रीपादुकां पूजयामि तर्पयामि नमः - आं ब्राह्मी श्रीपादुकां पूजयामि - तर्पयामि नमः पूर्वे।
2. इं रुरुभैरव श्रीपादुकां पूजयामि तर्पयामि नमः - ईं माहेश्वरी श्रीपादुकां पूजयामि तर्पयामि नमः आग्नेये।
3. उं चण्डभैरव श्रीपादुकां पूजयामि तर्पयामि नमः - ऊं कौमारी श्रीपादुकां पूजयामि तर्पयामि नमः दक्षिणे।
4. ऋं क्रोधभैरव श्रीपादुकां पूजयामि तर्पयामि नमः - ॠं वैष्णवी श्रीपादुकां पूजयामि तर्पयामि नमः नैरृत्ते।
5. लृं उन्मत्तभैरव श्रीपादुकां पूजयामि तर्पयामि नमः - लॄं वाराही श्रीपादुकां पूजयामि तर्पयामि नमः पश्चिमे।
6. एं कपालिभैरव श्रीपादुकां पूजयामि तर्पयामि नमः - ऐं माहेंद्री श्रीपादुकां पूजयामि तर्पयामि नमः वायव्ये।
7. ओं भीषणभैरव श्रीपादुकां पूजयामि तर्पयामि नमः - औं चामुण्डी श्रीपादुकांपूजयामि तर्पयामिनमः उत्तरे
8. अं संहारभैरव श्रीपादुकां पूजयामि तर्पयामि नमः - अः नारसिंही श्रीपादुकां पूजयामि तर्पयामि नमः ईशान्ये। इति पूजयेत्तर्पयेच्च।



5. पञ्चमावरणम्

ततो ग्रन्थिस्थानेषु पश्चिमादितः

1. पश्चिमे - कामरूपपीठ श्रीपादुकां पूजयामि तर्पयामि नमः।
2. वायव्ये - मलयगिरिपीठ श्रीपादुकां पूजयामि तर्पयामि नमः।
3. उत्तरे - कोलगिरिपीठ श्रीपादुकां पूजयामि तर्पयामि नमः।
4. ईशान्ये – कालांतकपीठ श्रीपादुकां पूजयामि तर्पयामि नमः।
5. पूर्वे - चौहारपीठ श्रीपादुकां पूजयामि तर्पयामि नमः।
6. आग्नेये – जालंधरपीठ श्रीपादुकां पूजयामि तर्पयामि नमः।

7. दक्षिणे - उड्डीयानपीठ श्रीपादुकां पूजयामि तर्पयामि नमः।
8. नैरृऋते – देवकूटपीठ श्रीपादुकां पूजयामि तर्पयामि नमः।
इति पूजयत्तर्पयेच्च



6. षष्ठावरणम्

ततो -वृत्तमंडले पश्चिमादितः दशदिक्षुक्रमेण -

1. पश्चिमे - हेतुकभैरव श्रीपादुकांपूजयामि तर्पयामि नमः।
2. वायव्ये - वेतालभैरव श्रीपादुकां पूजयामि तर्पयामि नमः
3. उत्तरान्त - त्रिपुरान्तकभैरव श्री पादुकां पूजयामि तर्पयामि नमः
4. ईशान्ये - अग्निजिह्वभैरव श्रीपादुकां पूजयामि तर्पयामिनमः।
5. पूर्वे - कालान्तकभैरव श्रीपादुकां पूजयामि तर्पयामि नमः।
6. आग्नेये – कपालिभैरव श्रीपादुकां पूजयामि तर्पयामि नमः
7. दक्षिणे - एकपादभैरव श्रीपादुकां पूजयामि तर्पयामि नमः।
8. नैरृऋते - भीमरूपभैरव श्रीपादुकां पूजयामि तर्पयामिनमः
9. ऊर्ध्वे - मलयभैरव श्रीपादुकां पूजयामि तर्पयामि नमः।
10. अधः - हाटकेश्वरभैरव श्रीपादुकां पूजयामि तर्पयामि नमः।
इति पूजयेत्तर्पयेच्च।



7. सप्तमावरणम्

- ततो अष्टयोनिषु - पूर्वादितः - अष्टदिक्षुक्रमेण।

1. ओं ऐं ह्रीं श्रीं - स्तंभिनी श्रीपादुकां पूजयामि तर्पयामि नमः।
2. ओं ऐं ह्रीं श्रीं - क्षोभिणी श्रीपादुकां पूजयामि तर्पयामि नमः।
3. ओं ऐं ह्रीं श्रीं - द्राविणि श्रीपादुकां पूजयामि तर्पयामि नमः।
4. ओं ऐं ह्रीं श्रीं - भ्रामणी श्रीपादुकां पूजयामि तर्पयामि नमः।
5. ओं ऐं ह्रीं श्रीं - रौद्री श्रीपादुकां पूजयामि तर्पयामि नमः।
6. ओं ऐं ह्रीं श्रीं - संहारिणी श्रीपादुकां पूजयामि तर्पयामि नमः।
7. ओं ऐं ह्रीं श्रीं - मोदिनी श्रीपादुकां पूजयामि तर्पयामि नमः
8. ओं ऐं ह्रीं श्रीं - जृंभिनी श्रीपादुकां पूजयामि तर्पयामि नमः।
इति पूजयेत् तर्पयेत् च।।

8. अष्टमावरणम् - षट्कोणेषु – षडङ्गस्थानेषु – क्रमेण -

1. ओं ऐं ह्रीं श्रीं आग्नेये - हृदय श्रीपादुकां पूजयामि तर्पयामि नमः।
2. ओं ऐं ह्रीं श्रीं ईशाने - शिरः श्रीपादुकां पूजयामि तर्पयामि नमः।
3. ओं ऐं ह्रीं श्रीं नैर्ऋते - शिखा श्रीपादुकां पूजयामि तर्पयामि नमः।
4. ओं ऐं ह्रीं श्रीं वायव्ये - कवच श्रीपादुकां पूजयामि तर्पयामि नमः।
5. ओं ऐं ह्रीं श्रीं मध्ये - नेत्र श्रीपादुकां पूजयामि तर्पयामिनमः।
6. ओं ऐं ह्रीं श्रीं दिक्षु - अस्त्र -श्रीपादुकां पूजयामि तर्पयामि नमः -

इति पूजयेत्तर्पयेच्च



9. नवमावरणम्

- ततः- त्रिकोणे – अग्रभागादि क्रमेण -

1. आग्रे - ओं ऐं ह्रीं श्रीं - काली श्रीपादुकां पूजयामि तर्पयामि नमः -
2. ईशाने -ओं ऐं ह्रीं श्रीं - भद्रकाली श्रीपादुकां पूजयामि तर्पयामि नमः -
3. आग्नेये - ओं ऐं ह्रीं श्रीं - नित्याकाली श्रीपादुकां पूजयामि तर्पयामि नमः-

इति पूजयेत्तर्पयेच्च। ततो बिन्दौ मूलमुच्चार्य्य –श्री आनन्द भैरवसहितां श्रीमच्छ्री प्रत्यङ्गिरापरां वामपादुकां पूजयामि तर्पयामि नमः इति पूजयेत्तर्पयेच्च।

10. दशमावरणम्

पुनः - चतुरश्रे –

1. पश्चिमे - बां वटुकाय नमः
2. उत्तरे - यां योगिनीभ्यो नमः
3. पूर्वे - क्षां क्षेत्रपालाय नमः
4. दक्षे - गं गणपतये नमः

इति पूजयेत्तर्पयेच्च

11. एकादशावाणम्

1. वायव्ये - (वसुधा यै नमः) वसुभ्यो नमः 2. ईशाने - द्वादशादित्येभ्यो नमः 3. आग्नेये - एकादशरुद्रेभ्यो नमः 4. नैर्ऋते - सर्वेभ्यो भूतेभ्योनमः - इति पूजयेत्तर्पयेच्च।

12. द्वादशावरणम्-

ततो देवीसमीपे दक्षहस्ते - असि श्रीपादुकां पूजयामि तर्पयामिनमः - वामहस्ते - चर्म श्रीपादुकां पूजयामि तर्पयामि नमः - पुनरपि - बिंदौ - पूर्ववत् - मूलेन देवीं प्रत्यङ्गिरां संपूज्य - संतर्प्य -मुद्राःप्रदर्श्य -पुष्पांञ्जलित्रयेण संपूज्य -नित्यहोम माचरेत्।।

दक्षहस्ते त्रिशूलश्री पाकुकां पूजयांमितर्पयामि नमः

वामहस्ते कपाल श्रीपादुकां पूजयांमितर्पयामि नमः

प्रत्यङ्गिरा आवरण देवतार्चनम्

बाह्यवृत्ते -

ओं ह्रीं क्षं असितांग भैरवाय नमः।
ओं ह्रीं क्षं रुरु भैरवाय नमः।
ओं ह्रीं क्षं चण्ड भैरवाय नमः।
ओं ह्रीं क्षं क्रोध भैरवाय नमः।
ओं ह्रीं क्षं उन्मत्त भैरवाय नमः।
ओं ह्रीं क्षं कपाल भैरवाय नमः।
ओं ह्रीं क्षं भीषण भैरवाय नमः।
ओं ह्रीं क्षं संहार भैरवाय नमः।।

अष्ट दलेषु

ओं ह्रीं क्षं ब्राह्म्यै नमः।
ओं ह्रीं क्षं माहेश्वर्यै नमः।
ओं ह्रीं क्षं कौमार्यै नमः।
ओं ह्रीं क्षं वैष्णव्यै नमः।
ओं ह्रीं क्षं इन्द्राण्यै नमः।
ओं ह्रीं क्षं नारसिह्म्यै नमः।
ओं ह्रीं क्षं चामुण्डायै नमः।
ओं ह्रीं क्षं महालक्ष्म्यै नमः।

अष्ट दलाग्रेषु - ग्रन्थिषु -

ओं ह्रीं क्षं कामरूप पीठाय नमः।
ओं ह्रीं क्षं मलयगिरि पीठाय नमः।
ओं ह्रीं क्षं कोल्लापुरि पीठाय नमः।
ओं ह्रीं क्षं कालान्तक पीठाय नमः।
ओं ह्रीं क्षं चौंहार पीठाय नमः।
ओं ह्रीं क्षं जालन्धर पीठाय नमः।
ओं ह्रीं क्षं ओढ्याण पीठाय नमः।
ओं ह्रीं क्षं देवकोट पीठाय नमः।

वृत्त मण्डले

ओं ह्रीं क्षं हेतुक भैरवाय नमः।

ओं ह्रीं क्षं वेताल भैरवाय नमः।

ओं ह्रीं क्षं त्रिपुरान्तक भैरवाय नमः।

ओं ह्रीं क्षं अग्निजिह्व भैरवाय नमः।

ओं ह्रीं क्षं कालान्तक भैरवाय नमः।

ओं ह्रीं क्षं एकपाद भैरवाय नमः।

ओं ह्रीं क्षं कपाल भैरवाय नमः।

ओं ह्रीं क्षं भीमरूप भैरवाय नमः।

ओं ह्रीं क्षं मलय भैरवाय नमः।

ओं ह्रीं क्षं हाटकेश भैरवाय नमः।

अष्ट कोणेषु

ओं ह्रीं क्षं स्तम्भिनी भैरव्यै नमः।

ओं ह्रीं क्षं क्षोभिणी भैरव्यै नमः।

ओं ह्रीं क्षं द्राविणी भैरव्यै नमः।

ओं ह्रीं क्षं भ्रामणी भैरव्यै नमः।

ओं ह्रीं क्षं मोदिनी भैरव्यै नमः।

ओं ह्रीं क्षं जृम्भिनी भैरव्यै नमः।

ओं ह्रीं क्षं रौद्री भैरव्यै नमः।

ओं ह्रीं क्षं संहारिणी भैरव्यै नमः।

त्रिकोण परितः अथवा

ओं ह्रीं क्षं - ह्रीं क्षं - हृदयाय नमः।

ओं ह्रीं क्षं - भक्ष ज्वालाजिह्वे - शिरसे नमः।

ओं ह्रीं क्षं - करालदंष्ट्रे - शिखायै नमः।

ओं ह्रीं क्षं - प्रत्यंगिरे - कवचाय नमः।
ओं ह्रीं क्षं क्षं ह्रीं नेत्रत्रयाय नमः।
ओं ह्रीं क्षं -हुं फट् -अस्त्राय नमः।

षट्कोणस्थानेषु -

ओं ह्रीं क्षं वामिन्यै नमः।
ओं ह्रीं क्षं बलिन्यै नमः।
ओं ह्रीं क्षं चक्रिण्यै नमः।
ओं ह्रीं क्षं खड्गिन्यै नमः।
ओं ह्रीं क्षं पाशिन्यै नमः।
ओं ह्रीं क्षं गुम्फिन्यै नमः।

त्रिकोणे

ओं ह्रीं क्षं काळ्यै नमः
ओं ह्रीं क्षं भद्रकाळ्यै नमः
ओं ह्रीं क्षं नित्यकाळ्यै नमः
बिन्दौ- श्री भैरवसहित प्रत्यङ्गिरायै नमः। पुनः मूलेन त्रिवारं पुष्पाञ्जलिना - पूजयेत्।।

भूपुरे –

ओं ह्रीं क्षं वटुकाय नमः
ओं ह्रीं क्षं योगिनीभ्यो नमः
ओं ह्रीं क्षं क्षेत्रपालाय नमः
ओं ह्रीं क्षं गणपतये नमः
ओं ह्रीं क्षं सुधायै नमः
ओं ह्रीं क्षं द्वादशादित्येभ्यो नमः
ओं ह्रीं क्षं एकादशरुद्रेभ्यो नमः
ओं ह्रीं क्षं सर्व भूतेभ्यो नमः

इति पूजयेत् ततः सहस्रनामाष्टोत्तरशतनामभिः - करवीरकुसुमैः -भगवतीं प्रत्यङ्गिरां - समभ्यर्च्य – धूपदीपनैवेद्यादिकं दत्वा - अन्ते बलिदानं कुर्यात्।।

७

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

प्रत्यङ्गिरा होम विषयाः

विभागः - 10

नवदिन शान्तिहोम नवकुण्डपक्ष कलासूत्र यागशाला

(प्रत्यङ्गिरास्त्र लक्षावृत्तिहोमाङ्ग सप्तप्रकारयुत पदविन्यासः)



भूमौ षोडशसूत्राणि – सूत्रान्तरं सार्धहस्तप्रमाणं 36 अङ्गुलमात्राणि । 225 पदानि यागभूमिविस्तीर्णं सार्धद्वाविंशति हस्त (अडि) प्रमाणम् । पदैकस्य क्षेत्रांशं सार्धैक अडिप्रमाणम्। मध्ये नवपदे प्रधानवेदीकार्या । सूत्रावृतयोर्बाह्ये सदाशिव पदावृतौ नव कुण्डानि । बाह्यावृतौ त्रिपदद्वारपार्श्वयोः परिवार सप्तविंशति कलशवेदी सार्धपदविस्तृता। कुण्डाकृतिस्तु वेदाश्रा – अश्वत्थपत्राभा –त्रिकोणाकारा वा कार्या । स्तम्भानि 32 पदत्रयान्तरे सूत्रबाह्ये स्तम्भस्थानम् स्तम्भोन्नतम् दशहस्त प्रमाणम्।

श्री भद्रकाली नैमित्तिकार्चनार्ह - मनुसूत्र यागशाला

(नवकुण्डपक्ष प्रतिष्ठोत्सवाङ्ग पञ्चप्राकारयुक्ता)



भूमौ चतुर्दशसूत्राणिसंपाद्य - सूत्रान्तरं सार्धहस्तमानं - कोष्ठानि - मध्ये नवकोष्ठमानेनमहाकुम्भपूजावेदीकार्या - तत्परित: एकावृति: आचार्य सञ्चार पदानि - तब्दाह्य मूर्तिपानांवीथी - तद्बाह्ये मानुषपदे नव पञ्चैका भेदेन कुण्डानि कल्प्यानि - तद्बाह्ये परिचारक द्रव्यविनियोग आवृतिपदानि - तद्बाह्ये - पैशाचपदेपरिवारकलश स्थानानि संकल्प्य -

प्रत्यङ्गिराहोम प्रयोगः

(तान्त्रिकाग्निकार्य प्रयोगः)

कुण्डसंस्कारः

तत्र – स्थण्डिले वा - कुण्डे वा - अग्निकार्यं कुर्यात् - तद्यथा - मूलेन निरीक्ष्य – (ओं ह्रीं प्रत्यंगिरायै हुं फट् स्वाहा - इतिमूलमन्त्रः)

"ओं ह्रः अस्त्रायफट्" इति अस्त्रेण प्रोक्ष्य – ओं हूं इति कुशैस्संन्ताढ्य- ओं ह्रीं मित्युच्चरन् कुशमूलेन प्रागग्रोदगग्रक्रमेण कुण्डमध्ये – रेखात्रयं – विलिख्य – ऐं - इति प्रोक्ष्य – तत्र षट्रेखासु – ओं ब्रह्मणे नमः - ओं धर्मायनमः - ओं यमाय नमः - ओं रुद्राय नमः - ओं विष्णवे नमः - ओं इन्द्राय नमः - इति संपूज्य- कुण्डमध्ये - कुशैः - प्रत्यंगिरायाः - बिन्दु त्रिकोण षट्कोण भूपुरयुतं चक्रं - विधाय –मनसा विभाव्य –कुशान् त्यक्त्वा – त्रिवारं व्याहृतित्रय मुच्चार्य - अग्निं आनीय चक्रमध्ये त्रिकोणे ह्रीं विलिख्य – तत्र ओं मण्डूकादि परतत्वान्त पीठदेवताभ्यो नमः - इति - ओं जयादि पीठशक्तिभ्यो नमः इति - अग्निस्थापनदेशे - सर्वोपचारार्थे - गन्धाक्षतपुष्पाणि समर्प्य।-



अग्नेः पित्रोः पूजनम्

तन्मध्ये - ओं वागीश्वरी वागीश्वर योगपीठात्मने नमः -इति गन्धाक्षतपुष्पै रभ्यर्च्य – ओं अग्नये योगपीठात्मने नमः - इति गन्धादिभि रभ्यर्च्य – जगत्पितरौ ध्यायेत् –

वागीश्वरीं ऋतुस्नातां समस्ताभरणान्विताम्।
वागीश्वरेण संयुक्तां नमा म्यखिल सिद्धये।।

पित्रो स्संयोगं विभाव्य – गन्धाक्षतपुष्पै स्संपूज्य।

गर्भाग्नि संस्कारः

ओं फट् इति अग्नि मानीय – कुण्डस्य बाह्ये संस्थाप्य - ओं हूं इति ज्वलिताङ्गारात् क्रव्यादांशत्वेन किञ्चिदादाय - वायव्यकोणे परित्यज्य – शेषं अग्निदेवांशं परिकल्प्य – ओं फडिति संप्रोक्ष्य – ओं अमग्नयेनमः इत्यभ्यर्च्य – ओं यं इति द्वादशवार मभिमन्त्र्य - संशोष्य – ओंरमिति षोडशवारं जपन् - संदह्य – ओं वमिति - मत्स्यमुद्रया अमृतीकृत्य – ओं ह्रमिति – वह्निं पूरकेन गृहीत्वा – निज भ्रूमध्य

बिन्दुस्थ अग्निना कुम्भकेन संयोज्य – रेचकेन निस्सार्य - ऐक्यं विभाव्य – ओंरमिति अग्नौ वह्निचैतन्यं परिकलप्य – ओं हूं वह्निचैतन्याय नमः - इति पात्रस्थे विन्यस्य -संपूज्य – प्रत्यंगिरामूलेमन्त्रेण - दशवारमभिमन्त्र्य – ओं वं इति षोडशवारं जप्त्वा - मूलेन – धेनुमुद्रया अमृतीकृत्य – ओं हूं इत्यवकुण्ठनं विधाय-योनिमुद्रां धेनुमुद्रां च प्रदर्श्य – अग्निं आदाय – कुण्डस्योपरि प्रदक्षिणं त्रिवारं परिभ्रारम्य –देवीं चिन्तयेत्-

शय्यागतां ऋतुस्नातां नीलेन्दीवर धारिणीम्।
देवेन भुज्यमानां तां संस्मरेत् योनिमण्डले।।

एवं पितरौ संचिन्त्य- जानुभ्यां धरातलं स्पर्शयन् – आत्मानं शिवं इति ध्यायन् - अग्निं शिवबीजमिति चिन्तयन् - देवीयोन्यां - मूलमन्त्रेण आत्मसंमुखं भूर्भुवस्सुवरोमिति - वह्निं प्रतिष्ठाप्य - ततो ओं ह्रीं ह्रौं वागीश्वरी वागीश्वराभ्यां नमः इति आज्येन आचमनीयं दत्वा देव्यां वह्निरूपं गर्भं ध्यात्वा – तत् गर्भरक्षार्थं काष्ठैः आच्छाद्य – गन्धाक्षतपुष्पै रभ्यर्च्य ओं चित्पिङ्गल हनहन दहदह पचपच सर्वाज्ञा आज्ञापय स्वाहा - इति मन्त्रेण सदिन्धनै राच्छाद्य - ओं ह्रीं ह्रीं ज्वल ज्वल प्रज्वल प्रज्वल हूंफट् स्वाहा - इति ज्वालिनीमुद्रया हुंकारेण - अस्त्रेण -वह्निं प्रज्वाल्य – वह्निं प्रार्थयेत्-

वह्निं प्रज्वललितं वन्दे जातवेदं हुताशनम्।
सुवर्ण वर्ण ममलं समिद्धं विश्वतोमुखम्।।

ओं अग्ने त्वं मङ्गलाग्नि नामासि इति उक्त्वा - ओं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय साधय स्वाहा - इति नामकरणं विधाय - संपूज्य – प्रादेशमात्रसमिधं अग्नौ तूषणीं हुत्वा – ततः - तान्त्रिकविधानेन गणेशवन्दन - दिग्बन्धनपूर्वकं - भूतशुद्धि प्राणायामं, मातृकान्यासं - मूलमन्त्रन्यासं च यथा देहे तथा वह्नौ -विधाय – वह्निजिह्वान्यासं कर्मदेवतानुसारं कुर्यात्। तद्यथा -



वह्निजिह्वा न्यासः

सात्विक न्यासः			राजस न्यासः			तामस न्यासः		
ओं	स्रूं हिरण्यायै नमः	लिङ्गे	ओं	स्रूं पद्मरागायै नमः	लिंगे	ओं	स्रूं विश्वमूर्त्यै नमः	लिंगे
ओं	ष्रूं गगनायै नमः	पायौ	ओं	ष्रूं सुवर्णायै नमः	पायौ	ओं	ष्रूं स्फुलिंगिन्यैनमः	पायौ
ओं	श्रूं रक्तायै नमः	मूर्ध्नि	ओं	श्रूं भद्रलोहितायै नमः	मूर्धि	ओं	श्रूं धूम्रवर्णायैनमः	मूर्ध्नि
ओं	व्रूं कृष्णायै नमः	वक्रे	ओं	व्रूं लोहितायै नमः	वक्रे	ओं	व्रूं मनोजवायै नमः	वक्रे
ओं	ल्रूं सुप्रभायै नमः	घ्राणे	ओं	ल्रूं श्वेतायै नमः	घ्राणे	ओं	ल्रूं लोहितायै नमः	घ्राणे
ओं	प्रूं बहुरूपायै नमः	नेत्रे	ओं	प्रूं धूमिन्यै नमः	नेत्रे	ओं	प्रूं करालायै नमः	नेत्रे
ओं	य्रूं अतिरक्तायै नमः	सर्वांगे	ओं	य्रूं करालिकायै नमः	सर्वांगे	ओं	य्रूं कालिकायै नमः	सर्वाङ्गे

अग्न्यधिष्ठाता न्यासः

ओं स्प्रूं अमर्त्याय नमः लिंगे

ओं षप्रूं पित्रे नमः पायौ

ओं श्प्रूं गन्धर्वाय नमः मूर्ध्नि

ओं व्प्रूं यक्षाय नमः वक्त्रे

ओं ल्प्रूं नागाय नमः घ्राणे

ओं प्रूं पिशाचाय नमः नेत्रे

ओं य्प्रूं राक्षसाय नमः सर्वाङ्गे

अग्निमन्त्र ऋष्यादिन्यासः विनियोगः

अग्निमन्त्रस्य भृगुः ऋषिः - गायत्री छन्दः - अग्नि र्देवता – रं बीजं – स्वाहा शक्तिः - अग्नि यजने विनियोगः।

शिरसि – भृगुऋषये नमः ।

मुखे – गायत्री छन्दसे नमः ।

हृदये - अग्निर्देवतायै नमः ।

गुह्ये - रं बीजाय नमः ।

पादयोः - स्वाहा शक्तये नमः।

सर्वांगे – ओं अग्नये नमः। इति न्यस्त्वा -

अग्निनाममन्त्र करन्यरसः

ओं सहस्त्रार्चिषे अंगुष्ठाभ्यां नमः

ओं स्वस्तिपूर्णाय तर्जनीभ्यां नमः

ओं उत्तिष्ठपुरुषाय मध्यमाभ्यां नमः

ओं धूम्रव्यापिने अनामिकाभ्यां नमः

ओं सप्तजिह्वाय कनिष्ठिकाभ्यां नमः

ओं धनुर्धराय – करतल – करपृष्ठाभ्यां नमः - इति करन्यासः

अग्नि नाममन्त्र षडङ्गन्यासः

ओं सहस्रार्चिषे - हृदयाय नमः

ओं स्वस्तिपूर्णाय - शिरसे स्वाहा

ओं उत्तिष्ठपुरुषाय - शिखायै वषट्

ओं धूम्रव्यापिने - कवचाय हुम्।

ओं सप्तजिह्वाय - नेत्रत्रयाय वौषट्।

ओं धनुर्धराय - अस्त्राय फट्। एवंकरन्यासश्च।

अग्नेः अष्टमूर्ति न्यासः

ओं अग्नये - जातवेदसे नमः - मूर्ध्नि

ओं अग्नये - सप्तजिह्वाय नमः - दक्षांसे

ओं अग्नये - हव्यवाहनाय नमः - दक्षपार्श्वे।

ओं अग्नये - अश्वोदरजाय नमः - दक्षकट्याम्

ओं अग्नये - वैश्वानराय नमः - लिङ्गे

ओं अग्नये - कौमारतेजसे नमः - वामकट्याम्।

ओं अग्नये - विश्वमुखाय नमः - वामपार्श्वे

ओं अग्नये - देवमुखाय नमः - वामांसे।

अग्नेः पीठन्यास पूजा

ओं पीतायै नमः -ओं श्वेतायै नमः - ओं अरुणायै नमः - ओं कृष्णायै नमः - ओं धूम्रायै नमः - ओं तीव्रायै नमः ओं स्फुलिंगिन्यै नमः - ओं रुचिरायै नमः - ओं ज्वालिन्यै नमः ओं रे वह्ने योंगपीठात्मने नमः - इतिसंपूज्य तत्र वह्निं ध्यायेत्–

इष्टां शक्तिं स्वस्तिका भीति मुच्चैः -
दीर्घैं र्दोर्भि धारयन्तं जपाभम्।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं -
ध्यायेत् वह्निं बद्धमौलिं जटाभिः।।

एवं स्वाभीष्टवत् मूर्तिं ध्यात्वा – ओं रं आत्ममूर्तये - वह्नये नमः इति संपूज्य – गन्धपुष्पाक्षतै रभ्यर्च्य - सम्मान्यार्घ्यजलेन अग्नेः परितः परिषिञ्चय – परिस्तरणानि उत्तरपूर्वाग्राणि - संस्थाप्य।

पश्चात् (पूर्वंविहाय - दक्षिणपश्चिमोत्तरेषु - पलाशखण्ड रक्तवस्त्रवेष्टित) परिधीन् संस्थाप्य - तेषु दक्षिणे - ओं ब्रह्माणे नमः - पश्चिमे - ओं विष्णवे नमः - उत्तरे - ओं रुद्राय नमः - इति संपूज्य - पुनः तेष्वेव क्रमेण – ओं वामायै नमः – ओं ज्येष्ठायै नमः – ओं रौद्रै नमः – अम्बिकायै नमः – ओं रं वह्नये नमः। इति परिकल्पितासनं संपूज्य - वह्निमध्ये - प्रत्यंगिराचक्ररूपं परिकल्प्य – तन्मध्ये – आधारशक्त्यादि वह्निमण्डलान्त – पीठपूजां कुर्यात् - तद्यथा -

देवीपीठपूजा

ओं ऐं ह्रीं श्रीं मं मण्डूकाय नमः इत्यारभ्य पूर्वोक्त पीठपूजावत् – परतत्व सर्वशक्ति कमलासनान्तं संपूज्य – तत्रकलाः विन्यसेत् - ओं दशकलात्मने अग्निमण्डलाय नमः - तत्र दशकालाः पूजयेत्। तद्यथा -

ओं ऐं ह्रीं श्रीं धूम्रार्चिषे नमः
ओं ऐं ह्रीं श्रीं ऊष्मायै नमः
ओं ऐं ह्रीं श्रीं ज्वलिन्यै नमः
ओं ऐं ह्रीं श्रीं ज्वालिन्यै नमः
ओं ऐं ह्रीं श्रीं विस्फुलिङ्गिन्यै नमः
ओं ऐं ह्रीं श्रीं सुश्रियै नमः
ओं ऐं ह्रीं श्रीं सुरूपायै नमः
ओं ऐं ह्रीं श्रीं कपिलायै नमः
ओं ऐं ह्रीं श्रीं हव्यवाहनायै नमः
ओं ऐं ह्रीं श्रीं कव्यवाहनायै नमः - एवं अग्नेः दशकलाः संपूज्य - ततः -

ओं द्वादशकलात्मने सूर्यमण्डलाय नमः - तत्र – द्वादशकालाः यजेत्। तद्यथा -
ओं ऐं ह्रीं श्रीं तपिन्यै नमः
ओं ऐं ह्रीं श्रीं तापिन्यै नमः
ओं ऐं ह्रीं श्रीं धूम्रायै नमः
ओं ऐं ह्रीं श्रीं मरीच्यै नमः

ओं ऐं ह्रीं श्रीं ज्वालिन्यै नमः

ओं ऐं ह्रीं श्रीं रुच्यै नमः

ओं ऐं ह्रीं श्रीं सुषुम्नायै नमः

ओं ऐं ह्रीं श्रीं भोगदायै नमः

ओं ऐं ह्रीं श्रीं विश्वायै नमः

ओं ऐं ह्रीं श्रीं बोधिन्यै नमः

ओं ऐं ह्रीं श्रीं धारिण्यै नमः

ओं ऐं ह्रीं श्रीं क्षमायै नमः इति रवेःद्वादशकालाः संपूज्य - ततः तत्रैव - ओं षोडशकलात्मने चन्द्रमण्डलाय नमः इतिसंपूज्य - तत्र – षोडशकलाः पूजयेत् - तद्यथा -

ओं ऐं ह्रीं श्रीं अमृतायै नमः

ओं ऐं ह्रीं श्रीं मानदायै नमः

ओं ऐं ह्रीं श्रीं पूषायै नमः

ओं ऐं ह्रीं श्रीं तुष्ट्यै नमः

ओं ऐं ह्रीं श्रीं पुष्ट्यै नमः

ओं ऐं ह्रीं श्रीं रत्यै नमः

ओं ऐं ह्रीं श्रीं शशिन्यै नमः

ओं ऐं ह्रीं श्रीं धृत्यै नमः

ओं ऐं ह्रीं श्रीं चन्द्रिकायै नमः

ओं ऐं ह्रीं श्रीं कान्त्यै नमः

ओं ऐं ह्रीं श्रीं ज्योत्स्नायै नमः

ओं ऐं ह्रीं श्रीं श्रियै नमः

ओं ऐं ह्रीं श्रीं प्रीत्यै नमः

ओं ऐं ह्रीं श्रीं अङ्गदायै नमः

ओं ऐं ह्रीं श्रीं पूर्णायै नमः

ओं ऐं ह्रीं श्रीं पूर्णामृतायै नमः

तत्रैव - तन्मध्ये - देव्यासनार्चनं कुर्यात् - तद्यथा -

ओं ऐं ह्रीं श्रीं सत्वाय नमः

ओं ऐं ह्रीं श्रीं रजसे नमः

ओं ऐं ह्रीं श्रीं तमसे नमः

ओं ऐं ह्रीं श्रीं आत्मने नमः

ओं ऐं ह्रीं श्रीं अन्तरात्मने नमः

ओं ऐं ह्रीं श्रीं परमात्मने नमः

ओं ऐं ह्रीं श्रीं ज्ञानात्मने नमः

ओं ऐं ह्रीं श्रीं मायातत्वाय नमः

ओं ऐं ह्रीं श्रीं कलातत्वाय नमः

ओं ऐं ह्रीं श्रीं विद्यातत्वाय नमः

ओं ऐं ह्रीं श्रीं परतत्वाय नमः

इति संपूज्य – ततः पीठशक्तीः पूजयेत् – तद्यथा -

ओं ऐं ह्रीं श्रीं जयायै नमः

ओं ऐं ह्रीं श्रीं विजयायै नमः

ओं ऐं ह्रीं श्रीं अजितायै नमः

ओं ऐं ह्रीं श्रीं अपराजितायै नमः

ओं ऐं ह्रीं श्रीं नित्यायै नमः

ओं ऐं ह्रीं श्रीं विलासिन्यै नमः

ओं ऐं ह्रीं श्रीं दोग्ध्यै नमः

ओं ऐं ह्रीं श्रीं अघोरायै नमः

ओं ऐं ह्रीं श्रीं मङ्गलायै नमः

ओं ऐं ह्रीं श्रीं देवीपीठाय नमः

ओं ऐं ह्रीं श्रीं मण्डूकादि परतत्वान्त पीठदेवताभ्यो नमः - ओं जयादिशक्तिभ्यो नमः - ओं देवीपीठाय नमः - इत्यासनार्चनं कृत्वा - तत्र प्राण प्रतिष्ठां कुर्यात्।

वह्नेः प्राणप्रतिष्ठा

वह्निमध्ये - प्राणशक्तिं ध्यात्वा - मानसोपचारपूजां विधाय - ओं रं वह्नियोगपीठाय नमः - ओं सर्वशक्ति कमलासनाय नमः - प्रत्यङ्गिरामूलमन्त्रेण – वह्निमूर्तिं परिकल्प्य – ततः - ओं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधयसाधय स्वाहा - इति मन्त्रेण भगवन् अग्ने - इह आगच्छ आगच्छ – इह तिष्ठ तिष्ठ - ओं रं अग्ने आवाहितो भव - संस्थापितो भव - इत्युच्चार्य - आवाहनी स्थापनी मुद्रे प्रदर्श्य। अग्नेः प्राणप्रतिष्ठां कुर्यात्। ओं ऐं ह्रीं - श्रीं - आं ह्रीं क्रों - यं रं लं वं शं षं सं हं ळं क्षं - सोऽहं - हंसः - रं वह्नेः प्राणाः रं वह्नेः जीवः इह स्थितः रं वह्नेः सर्वेन्द्रियाणि - वाङ्मनश्चक्षुश्श्रोत्र जिह्वाघ्राण पाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा। पञ्चदशवार प्रणवेन रमित्यग्नि बीजेन च वह्नेः गर्भाधानादि पञ्चदश संस्कारान् - संपाद्य। ओं वैश्वानर – जातवेद –इहावह –लोहिताक्ष- सर्वकर्माणि साधय साधय स्वाहा - इदं पाद्यार्घ्याचमनीयं - स्नानीयं – पुन राचमनीयं – तोय गन्ध पुष्प धूप दीप नैवेद्य फल ताम्बूल दक्षिणादि उपचारान्विधाय – ओं रं अग्नये नमः - इति मन्त्रेण लाजपुष्पै रञ्जलित्रयं दत्वा - ततो - अग्नेःआवरणपूजा अग्नेः आवरणपूजां चक्रवत्कुर्यात् – तद्यथा - प्रथमावरणे - मध्य त्रिकोणे – पूर्वोक्तवत्सात्विकजिह्वाः विन्यस्य – ओं स्म्रूं हिरण्यायै नमः लिंगे - ओं ष्म्रूं गगनायै नमः -पायौ - ओं श्म्रूं रक्तायै नमः मूर्ध्नि – ओं व्म्रूं कृष्णायै नमः - वक्त्रे - ओं ल्म्रूं सुप्रभायै नमः घ्राणे –ओं प्म्रूं बहुरूपायै नमः नेत्रे - ओं य्म्रूं अतिरिक्तायै नमः - सर्वांगे – इतिसंपूज्य - द्वितीयावरणे –षट्कोणेषु – ओं सहस्रार्चिषे हृदयाय नमः - ओं स्वस्तिपूर्णाय शिरसे स्वाहा – ओं उत्तिष्ठपुरुषाय शिखायै वषट् - ओं धूम्रव्यापिने कवचाय हुम् – ओं सप्तजिह्वाय नेत्रत्रयाय वौषट् -ओं धनुर्धराय अस्त्राय फट् – इति संपूज्य – ततो तृतीयावरणे – पद्माष्टपत्रेषु प्रदक्षिणक्रमेण –

ओं रं अग्नये जातवेदसे नमः - ओं रं अग्नये सप्तजिह्वाय नमः

ओं रं अग्नये हव्यवाहनाय नमः - ओं रं अग्नये अश्वोदरजाय नमः

ओं रं अग्नये वैश्वानराय नमः - ओं रं अग्नये कौमारतेजसे नमः

ओं रं अग्नये विश्वमुखाय नमः - ओं रं अग्नये देवमुखाय नमः

इतिसंपूज्य – चतुर्थावरणे - इन्द्रादीन् - पञ्चमावरणे - वज्रादीन् च स्वस्वदिक्षु - समभ्यर्च्य – पुष्पाञ्जलि मादाय - ओं वैश्वानर जातवेदसे – इहावहा लोहिताक्ष सर्वकर्माणि साधय साधय स्वाहा - साङ्गाय - सायुधाय - सशक्तिकाय - सपरिवाराय - सावरणाय - वह्नये – श्रीपादुकां पूजयामि नमः - इति पुष्पाञ्जलिं दद्यात्। ततः -

पात्रसाधनम्

स्ववामपार्श्वे - पूर्वाग्रान् कुशा नास्तीर्य – तदुपरि अस्त्रमन्त्र प्रक्षाळित स्रुक्स्रुवौ – प्रणीता प्रोक्षणी पात्रे – आज्यपात्र चरुपात्रे – अधोमुखौ संस्थाप्य – ओं हुं फडिति पात्राणि प्रक्षाल्य – ओंनमः इति सामान्यार्घ्यजलेन संप्रोक्ष्य – ओ ह्रीमिति शुद्धजलं प्रोक्षणीपात्रे आपूर्य। ओं ह्रीमिति पात्रद्वन्द्वानि संपूज्य – प्रणीतापात्रतीर्थे - गङ्गादितीर्थमापूर्य –

ओं गङ्गे च यमुने चैव गोदावरि सरस्वति ।

नर्मदे सिप्धु कावेरि जलऽस्मिन् सन्निधिं कुरु।।

इतिमन्त्रेण शङ्खमुद्रया - अन्तरिक्ष सूर्यमण्डलात् तीर्थमावाह्य – ओं हुं फट् - इति अङ्कुशमुद्रया संरक्ष्य – ओं हुंफडिति कवचमुद्रया ऽवकुण्ठ्य – ओं ह्रीं इति तस्मिन्तीर्थे –गन्धपुष्पाक्षतादि निक्षिप्य – ओं ह्रमिति करतल पताकमुद्रया स्पृशन् अभिमन्त्र्य - ह्रीमिति मूलेन धेनुमुद्रया - अमृतीकृत्य –ततः प्रणीतापात्रं सामान्यार्घ्योदकोन आपूर्य – प्रणीतापात्रजलात् प्रोक्षणीपात्रे संसिच्य – ह्रीमिति मूलेन – प्रणीतापात्रजलेन प्रोक्षणीपात्रमापूर्य। ह्रीमितिमूलेन -प्रोक्षणीपात्रजलेन - यागद्रव्याणि संप्रोक्ष्य - ब्रह्माणं वृणुयात् -

ब्रह्मार्चनम् (ब्रह्मा नियमनम्)

स्वदक्षिणपार्श्वे - (कुण्डदक्षिणे - ब्रह्मकूर्चं - विन्यस्य) कुशपुष्पाक्षतोपेतं - आसनं परिकल्प्य - (ब्रह्मदेवरूपिणं - उत्तराभिमुखं - उपविष्टं - ब्राह्मणं प्रति – ओं अद्य ----- गोत्रः ----- प्रवरः----- शर्मोऽहं श्रीमहाप्रत्यंगिरा यज्ञकर्माङ्गभूते अस्मिन् होमकर्मणि .... गोत्रं ..... प्रवरं ..... शर्माणं भवन्तं - अहं वृणे इति उदीरयेत्। सोऽपि “ब्रह्मात्मको ब्राह्मणः - वृतोऽस्मि इति प्रतिवचनं कुर्यात्। ततः तं वस्त्रोत्तरीय गन्धपुष्प फलताम्बूल दक्षिणादिना संपूज्य।

स्रुक्स्रुवसंस्कारः

ततः - स्रुक्स्रुवौ - ऊर्ध्वमुखौ गृहीत्वा – अग्नौ अधोमुखौ प्रताप्य –उभौ वामकरे धृत्वा - दक्षिणहस्ते कुश मादाय - कुशाग्रेण तदग्रभागं – कुशमध्येन तयोर्मध्यभागं - कुशमूलेन तयोः मूलभागं संशोध्य – प्रोक्षणीपात्र जलेनतौ संप्रोक्ष्य – अग्नौ प्रताप्य –प्रदक्षिण माभ्राम्य – कुशा नग्नौ क्षिप्त्वा स्वदक्षिणभागे -कुशोपरि स्रुक्स्रुवौ संस्थाप्य तयोः – पुष्पं दद्यात्।

आज्यसंस्काराः

ततो आज्यपात्र मादाय - ओ हुं फडिति मूलेननिरीक्ष्य – आज्यपात्रदोषा नपनीय – मूलेन प्रोक्षणीपात्रजलेन संप्रोक्ष्य – ओं यमिति वायुबीजेन सन्ताड्य – ओं ह्रूं मिति अभ्युक्षणं चकृत्वा –एवं संस्कारचतुष्टयं कृत्वा – कुण्डाग्नेः किञ्चिदङ्गारान् आहृत्य - बाह्ये वायुकोणे संस्थाप्य- तदुपरि अज्यस्थालीं आज्येन संस्थाप्य – ओं नम इति आज्यं प्रताप्य – ओं ह्रूमिति घृताक्त कुशत्रयं –समिधत्रयं वा अग्नौ क्षिप्त्वा ओं अस्त्राय फट् - इति मुष्टिमात्र प्रज्वलित कुशा नादाय - अग्निं प्रदक्षिणं संप्रदर्श्य –अभिद्योतनं - कृत्वा - तत्कुशान् अग्नौ क्षिपेत्। पुनः उद्योदनार्थं अङ्गारोपरि विन्यस्थं -आज्यपात्रं स्वस्याग्रे - संस्थाप्य - तदङ्गारं - अङ्गौ प्रक्षिप्य – ततो मार्जनाय हस्तौ जलेन संशोध्य – प्रादेशमात्रं कुशपवित्रं कराभ्या मादाय अस्त्रायफडितिमन्त्रेण - वह्निसंमुखं - आज्यं त्रिरुत्पूय –एवमुत्प्लवनं विधाय - पवित्रं स्थानान्तरे - विन्यस्य –पुनः तद्वत्कुशद्वय पवित्रेन - ओं नमइति आत्मसंमुखं घृतसंप्लवनं च कृत्वा – पश्चात् - प्रादेशमात्रं - मध्यग्रन्थि - कुशद्वयं आज्यपात्रे निक्षिप्य – आज्ये - दक्षिणपार्श्वे - शुक्लपक्षं – वामपार्श्वे – कृष्णपक्ष मितिविभाव्य – वामे - इडानाडीं दक्षिणे पिङ्गलानाडीं च संभाव्य- द्वयोर्मध्ये - सुषुम्नां सञ्चिन्त्य – ओं नमइतिमन्त्रेण - दक्षिणभागात् स्रुवेन आज्यमादाय ओं अग्नयेस्वाहा इति अग्नेर्दक्षिण नेत्रे हुत्वा - शेषमाज्यं पात्रदक्षिणपार्श्वे निक्षिप्य। तद्वत् ओं नमइति - पात्र वामभागात् आज्यमादाय - ओं सोमाय स्वाहा इति - अग्नेः वामनेत्रे हुत्वा – शेषमाज्यं पात्रे वामपार्श्वे संयोज्य। ततः ओं नमइति - मध्यभागात् आज्यमादाय - ओं अग्नयेस्विष्टकृते स्वाहा – इतिहुत्वा शेषमाज्यं मध्यभागे - संपाताहुतिं विधाय –आज्यं धेनुमुद्रया अमृतीकृत्य –अभिमन्त्रयेत्।

अग्नेः षोडश संस्काराः

ततः पञ्चाहुती दंद्यात् – ओं स्वाहा – ओं भूः स्वाहा – ओं भुवः स्वाहा – ओं स्वःस्वाहा- ओं भूर्भुवःस्वः स्वाहा। ततः ओं वैश्वानरजातवेदसे इहावह लोहिताक्ष सर्वकर्माणि साधय साधय स्वाहा – इतिमन्त्रेण - आहुतित्रयं दत्वा - अग्नेः षोडशसंस्कारान् प्रत्येकं अष्टवार आहुतीभिः कुर्यात्। तद्यथा =

ओं अग्नेः गर्भाधानं सम्पादयामि स्वाहा -

ओं अग्नेः पुंसवनं सम्पादयामि स्वाहा -

ओं अग्नेः सीमन्तोन्नयनं सम्पादयामि स्वाहा -

ओं अग्ने: जातकर्म सम्पादयामि स्वाहा -

ओं अग्ने: नाभिनाळच्छेदनं सम्पादयामि स्वाहा –इति घृताक्त पञ्चसमिधः हुत्वा -

ओं अग्ने: सूतकं शोधयामि स्वाहा -

ओं अग्ने: त्वं प्रत्यङ्गिरा नामासि स्वाहा - (अत्रइष्टदेवतायाः नामकरणं कार्यम्)

ओं अग्ने: नामकरणं सम्पादयामि स्वाहा -

ओं अग्ने: निष्क्रामणं सम्पादयामि स्वाहा -

ओं अग्ने: अन्नप्राशनं सम्पादयामि स्वाहा -

ओं अग्ने: चूडाकरणं सम्पादयामि स्वाहा -

ओं अग्ने: उपनयनं सम्पादयामि स्वाहा -

ओं अग्ने: महानाम्न्यव्रतं सम्पादयामि स्वाहा -

ओं अग्ने: महाव्रतं सम्पादयामि स्वाहा -

ओं अग्ने: उपनिषद्व्रतं सम्पादयामि स्वाहा -

ओं अग्ने: शुक्रियव्रतं सम्पादयामि स्वाहा -

ओं अग्ने: गोदानव्रतं सम्पादयामि स्वाहा -

ओं अग्ने: समावर्तनं सम्पादयामि स्वाहा -

ओं अग्ने: विवाहं सम्पादयामि स्वाहा –

अग्ने: पित्रोः विसर्जनम्

ततः मूलाग्रयोः घृतसंप्लुतैः समिद्भिः - ओं ह्रौं ह्रीं वागीश्वर वागीश्वरीभ्यां स्वाहा - इतिमन्त्रेण – वागीश्वरी वागीश्वरयोः आहुतित्रयं दत्वा - तौगन्धपुष्पादिभिः - पञ्चोपचारैस्संपूज्य-तौ उद्वास्य मनसा – स्वहृदि संयोजयेत्। पश्चात् अग्ने: सप्तजिह्वादि पञ्च आवरणदेवतानां - सकृदाहुतिं कुर्यात्। तदन्ते स्रचौ स्रुवेन अज्यं चतुर्वारं - गृहीत्वा – तदुपरि - स्रुवं – अधोमुखं - संस्थाप्य - तदग्रे पुष्पं - विन्यस्य - वौषडन्तेन अग्निमन्त्रेण – पूर्णाहुतिं विदद्यात्। तद्यथा –ओं वैश्वानर जातवदसे इहावह लोहिताक्ष सर्वकर्माणि साधय साधय - साङ्गाय सपरिवाराय सावरणाय सायुधाय सशक्तिकाय वन्हये वौषट् - इति पूर्णाहुतिं जुहुयात्।।

होमारम्भः

ततः गणपति मूलमन्त्रं दशधाविभज्य-तैः मन्त्रभागैः गणपतेः आहुति दशकं - दद्यात् - (ओं स्वाहा – श्रीं स्वाहा - ह्रीं स्वाहा – क्लीं स्वाहा – ग्लौं स्वाहा - गं स्वाहा – गणपतये स्वाहा – वरवरद स्वाहा – सर्वजनंमे स्वाहा – वशमानय स्वाहा) ततः संपूर्णमन्त्रेण आहुति चतुष्टयं हुत्वा – ओं मण्डुकादि परतत्वान्त सर्वमङ्गलायै नमः इति गन्धपुष्पाक्षतै रभ्यच्य। ततो वह्नौ देवीं प्रत्यङ्गिरां ध्यायेत्।

प्रत्यङ्गिरा होमः - देव्याहुतिः

सिंहीं सिंहमुखीं सखीं भगवतः श्री भैरवोल्लसत्
शूल स्थूल कपाल पाश डमरू व्यग्राग्र हस्ताम्बुजाम्।
दंष्ट्रा कोटि विशंक टास्य कुहरा मारक्त नेत्र त्रयां
बालेन्दु ज्वल मौळिकां भगवतीं प्रत्यङ्गिरां भावये।।

इति विभाव्य – मूलमन्त्रेण प्रत्यङ्गिरां आवाह्य- आवाहनादिकं कृत्वा – आवाहनादि दशमुद्राः प्रदर्श्य – चरुपात्रस्थ हविषा - देव्या मूलमन्त्रेण - हुत्वा – ततः यथाविहित आहुतिसंख्यया - समिदन्नाज्यद्रव्यैः - सहस्रं द्रव्यंप्रति शतं वाजुहुयात्।। ततः देव्याः आवरणदेवताभ्यो प्रत्येकं सकृदाहुति र्दद्यात् (तद्यथा)

प्रत्यङ्गिरा आवरण देवता होमः

प्रथमावरणे मध्यबिन्दौ – ओं क्षं ह्रीं श्री भैरवसहित प्रत्यङ्गिरायै स्वाहा –
इतिमन्त्रेण आहुतित्रयं दत्वा -
मध्यत्रिकोणेषु – ओं ऐं ह्रीं श्रीं काल्यै स्वाहा – इति एकाहुतिः -
ओं ऐं ह्रीं श्रीं भद्रकाल्यै स्वाहा – इति एकाहुतिः -
ओं ऐं ह्रीं श्रीं महाकाल्यै स्वाहा – इति एकाहुतिः - एवं आहुतित्रयं हुत्वा -

द्वितीयावरणे षट्कोणेषु -

ओं ऐं ह्रीं श्रीं हृदयदेव्यै वामिन्यै स्वाहा
ओं ऐं ह्रीं श्रीं शिरोदेव्यै नीलिन्यै स्वाहा
ओं ऐं ह्रीं श्रीं शिखादेव्यै चक्रिण्यै स्वाहा
ओं ऐं ह्रीं श्रीं कवचदेव्यै खङ्गिन्यै स्वाहा

ओं ऐं ह्रीं श्रीं नेत्रदेव्यै पाशिन्यै स्वाहा

ओं ऐं ह्रीं श्रीं अस्त्रदेव्यै गुम्फिन्यै स्वाहा ।

तृतीयावरणे – अष्टकोणेषु –

स्वस्य - अग्रादिक्रमेण अष्टदिक्षु -

ओं ऐं ह्रीं श्रीं स्तम्भिन्यै स्वाहा

ओं ऐं ह्रीं श्रीं क्षोभिण्यै स्वाहा

ओं ऐं ह्रीं श्रीं द्राविण्यै स्वाहा

ओं ऐं ह्रीं श्रीं भ्रामिण्यै स्वाहा

ओं ऐं ह्रीं श्रीं मोदिन्यै स्वाहा

ओं ऐं ह्रीं श्रीं जृम्भिन्यै स्वाहा

ओं ऐं ह्रीं श्रीं रौद्र्यै स्वाहा

ओं ऐं ह्रीं श्रीं संहारिण्यै स्वाहा

चतुर्थावरणे- वृत्तमण्डले

अग्रभागादि दशदिक्षु क्रमेण -

ओं ऐं ह्रीं श्रीं - क्षं – हेतुक भरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं - वेताल भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं – त्रिपुरान्तक भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं – अग्निजिह्व भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं - कालान्तक भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं - एकपाद भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं – कपाल भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं - भीमरूप भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं - मलय भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं - क्षं - हाटकेश्वर भैरवाय स्वाहा

पञ्चमावरणे – अष्टदलमूलेषु ग्रन्थिस्थानेषु क्रमेण -

ओं ऐं ह्रीं श्रीं क्षं कामरुप पीठाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं मलयगिरि पीठाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं कोल्लापुरी पीठाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं कालान्तक पीठाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं सौहार पीठाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं जालन्धर पीठाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं ओड्याण पीठाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवकूट पीठाय स्वाहा



षष्ठावरणे – अष्टदलामध्ये भागेषु अग्रादिक्रमेण -

ओं ऐं ह्रीं श्रीं क्षं ब्राह्म्यै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं माहेश्वर्यै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं कौमार्यै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं वैष्णव्यै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं वाराह्यै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं नारसिंह्यै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं इन्द्राण्यै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं चामुण्डायै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं महालक्ष्म्यै स्वाहा

सप्तमावरणे- पद्माष्ठदलाग्रेषु – अग्रादिक्रमेण -

ओं ऐं ह्रीं श्रीं क्षं असिताङ्ग भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं रुरु भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं क्रोध भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं उन्मत्त भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं कपाल भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं भीषण भैरवाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं संहार भैरवाय स्वाहा

अष्टमावरणे – बाह्यवृत्तत्रयदेशे अन्तः भूपुरे -

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय इन्द्राय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय अग्नये स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय यमाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय वरुणाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय वायवे स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय कुबेराय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय ईशानाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय ब्रह्मणे स्वाहा

ओं ऐं ह्रीं श्रीं क्षं देवीपरिवाराय अनन्ताय स्वाहा

नवमावरणे – बाह्यभूपुररेखायाम् पूर्वादिक्रमेण –

पूर्वदिक्पाल इन्द्रहेतये वज्राय हुंफट् स्वाहा

वह्निदिक्पाल अग्निहेतये शक्तये हुंफट् स्वाहा

दक्षिणदिक्पाल यमहेतये दण्डाय हुंफट् स्वाहा

दक्षिणपश्चिमदिक्पाल निरृतिहेतये खड्गाय हुंफट् स्वाहा

पश्चिमदिक्पक्षालवरुणहेतये पाशाय हुंफट् स्वाहा

उत्तरपश्चिमदिक्पाल वायुहेतये अङ्कुशाय हुंफट् स्वाहा

उत्तरदिक्पाल कुबेरहेतये गदायै हुंफट् स्वाहा

उत्तरपूर्वाशापाल ईशानायुधाय त्रिशूलाय हुंफट् स्वाहा

ईशानदक्षिण ऊर्ध्व लोकेश ब्रह्मायुधाय पद्माय हुंफट् स्वाहा

नैरृत्युत्तरंस्थाधोलोकेशविष्णुहेतये चक्रायहुंफट् स्वाहा।

देव्याः निजकर धृतआयुध हवनम्

ओं देवी दक्षिणहस्तस्थ त्रिशूलाय स्वाहा

ओं देवी वामहस्तस्थ कपालाय स्वाहा / चर्माय स्वाहा।

ओं देवी वामहस्तस्थ डमरुकाय स्वाहा / मुण्डशीर्षाय स्वाहा।

ओं देवी दक्षिणहस्तस्थ खड्गाय स्वाहा

ओ दैवीवामहस्तस्थ नागपाशाय स्वाहा - एवं - धनुषे स्वाहा, बाणाय स्वाहा, खेटकाय स्वाहा – दण्डाय स्वाहा – इति उक्तरूपध्यानवत् विम्बस्थ आयुधानां नाममन्त्रैः जुहुयात्।

वटुकादिहोमः हुतसंख्यायाः देवी तत् दशांशेन जुहुयात् -

ओं ऐं ह्रीं श्रीं क्षं वं वटुकाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं यां योगिनीभ्यस्स्वाहा

ओं ऐं ह्रीं श्रीं क्षं क्षां क्षेत्रपालाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं गं गणपतये स्वाहा

ओं ऐं ह्रीं श्रीं क्षं सुधायै स्वाहा

ओं ऐं ह्रीं श्रीं क्षं द्वादशादित्येभ्यस्स्वाहा

ओं ऐं ह्रीं श्रीं क्षं एकादश रुद्रेभ्यस्स्वाहा

ओं ऐं ह्रीं श्रीं क्षं स्त्रूं सिंहाय वाहनाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं असिने स्वाहा

ओं ऐं ह्रीं श्रीं क्षं कपालाय स्वाहा

ओं ऐं ह्रीं श्रीं क्षं सर्वभूतेभ्यः स्वाहा – ततः पूर्ववत् पूर्णाहुतिं दद्यात्।

प्रत्यङ्गिराहोम पूर्णाहुतिः

प्रत्यङ्गिरा मूलमन्त्रेण नवाहुती र्हुत्वा – प्रायश्चित्ताहुतिं कृत्वा – पूर्णाहुतिं विधाय – ओं भूः स्वाहा - ओं भुवः स्वाहा - ओं सुवस्स्वाहा - ओं भूर्भुवस्स्वः स्वाहा – इति प्रायश्चित्तं व्याहृतीभिर्हुत्वा - परिषिच्य - देवीं कुशपुष्पाक्षतैस्सह – कुण्डात् – प्रधानमूर्तौ नियोज्य – ततः संहारमुद्रया अग्निं विसृजेत्। ततो देव्यै आचमनादिकं दत्वा सर्वोपचारैस्संपूज्य – देव्याः दर्पणछत्र चामरादिकं प्रदर्श्य देवीं - सन्तोष्यं – स्तोत्रवन्दनं – (प्रदक्षिण नमस्कारादिकं) कृत्वा दण्डवत् प्रणम्य – देव्यै आचमनादिकं पुष्पाञ्जलिं च विधाय – ततो ब्रह्मार्पणाख्येन मनुना आत्मानमर्पयेत्। तद्यथा –

नित्यहोम बलिक्रम:

यथा अग्नौ जेल वा चक्रं विलिख्य – विभाव्यच - तत्र होमं कृत्वा – 1. ओं प्राणाय स्वाहा - 2. ओं व्यानाय स्वाहा – 3. ओं उदानाय स्वाहा - 4. ओं अपानाय स्वाहा – 5. ओं समानाय स्वाहा 6. मूलेन च हुत्वा - षडंगाहुती: कुर्यात्। तत: मूलेन -अस्यै देव्यै हुत्वा - स्वहृदि विसृज्य

बलिदान प्रयोग :

1. ईशाने – बलिमण्डलं कृत्वा - वडुकंध्यात्वा - ओं बां बटुकाय नम: - इतिसंपूज्य - वटुक एह्येहि देवीपुत्र - बटुकनाथ -कपिलजटाभारभास्वर - त्रिनेत्र - ज्वालामुख सर्वविघ्नान् नाशय नाशय - सर्वोपचारसहितं बलिं गृह्ण स्वाहा - इति वटुकबलिंदत्वा -

2. आग्नेय्यां - योगिनीभ्यो नम:- इति ध्यात्वा संपूज्या – प्रार्थयेत् -

ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगन तले भूतले निष्कले वा -
पाताले वा तले वा पवन सलिलयो र्यत्र कुत्र स्थितौ वा।
क्षेत्रे पीठोप पीठादिषु च कृत पदा धूप दीपादिकेन
प्रीता देव्य: सदा न: शुभ बलि विधिना पातु वीरेन्द्र वन्द्या ।।

यां योगिनीभ्यो नम: स्वाहा - सर्वयोगिनी ह्रीं फट् स्वाहा -
इति योगिनीबलिं दत्वा ।

3. नैऋते – क्षेत्रपालंध्यात्वा - संपूज्य - क्षां क्षीं क्षूं क्षैं क्षौं क्ष: - क्षेत्रपाल - अतिबलिसहित –बलिं गृह्ण गृह्ण स्वाहा - इति क्षेत्रपालबलि दद्यात्।

4. वायव्ये - गणपतिं ध्यात्वा संपूज्य - गां गीं गूं - गणपतये - वरवरद - सर्वजनं मे - वशमानय - बलिं गृह्ण गृह्ण स्वाहा। इति गणपतिबलिं एवंबलि चतुष्टयं विरचय्य – (अत्र छागादि बलिमपि दत्वा) – देवीं तोषयेत्। तत: गुरुदेव्यौ ध्यायन् - यथाशक्ति मूलमन्त्रजपं विधाय - पुनरपि - प्राणायामऋष्यादि न्यास - करांगन्यासानन्तरं – जपंकृत्वा देव्यै जपसमर्पणं कुर्यात्।

गुह्यातिगुह्य गोप्त्री त्वं गृहाणा स्मत्कृतं जपम्।
सिद्धि र्भवतु मे देवि त्वत्प्रसादान्महेश्वरि।।

इत्यनेन मन्त्रेण तेजोमयं जपफलं देवीवामहस्ते समर्प्य - कवच – स्तोत्रं - नामसहस्त्र स्तोत्रादिकं पठित्वा - अष्टांगं प्रणिपत्य – देवीं प्रदक्षिणीकृत्य -सामयिकैःसह मण्डलवन्दनं विधाय – प्रशान्तिं प्रार्थयेत्।।

नन्दन्तु साधकाः सर्वे विनश्यन्तु विदूषकाः।
अवस्था शांभवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा।।

इत्यादिशान्तिं पठित्वा – ऐशान्यां – देव्याः - पूजिटपुष्पगन्धादि - निर्माल्येन – ओं निर्माल्यवासिन्यै नमः इति संपूज्य निर्माल्य -

आत्मार्णणम्

ततः इतः पूर्वं – जाग्रत्स्वप्न - सुषुप्त्यवस्था - मनसा - वाचा - उदरेण शिश्ना प्राण देह धर्मादि कारणतो युक्तं - यत्कृतं तत्सर्वं मदीयं - श्रीप्रत्यङ्गिराचरणे समर्पणमस्तु - ओंतत्सत् इतिसमर्प्य –सुखं विहरेदिति शिवं – भद्रम्।।

इति श्री रुद्रयामलेतंत्रे उमामहेश्वर संवादे - पंचांगखंडे - प्रत्यङ्गिरा सपर्यापद्धतिः समाप्ता।।

देव्यै आत्मार्पणमन्त्रः

ओं इतः पूर्वं पापबुद्धिं देवधर्माधिकारतो - जाग्रत् स्वप्न सुषुप्त्यवस्थासु - मनसा वाचा हस्ताभ्यां - पद्भ्या मुदरेण शिश्ना - यत्स्मृतं यदुक्तं यत्कृतं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा - मां मदीयं च सकलं देव्यै ते समर्पये – ओं तत्सत्। ततः प्राणायामादिकं विधाय – पुष्पाक्षतादिभिः सम्पूज्य - क्षमापयेत्।

क्षमाप्रार्थना

अज्ञानाद्द विस्मृतेर्भीत्या यन्नयून मधिकं कृतम्।
विपरीतं च तत्सर्वं क्षमस्व परमेश्वरि।
मन्त्रहीनं क्रियाहीनं विधिहीनं सुरेश्वरि।
संपूजिता मया देवि तस्मात् त्वं वरदा भव।
आवाहनं च पूजां चत्वन्महात्मयं जपं तथा।
विसर्जनं न जानामि कालिके त्वं क्षमस्व मे।
यदक्षरं पदभ्रष्टं स्वर व्यञ्जन वर्जितम्।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि।।



यस्याः स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु।
न्यूनं संपूर्णतां याति प्रसीद परमेश्वरि।।
कोमेश्वरि जगन्मातः सच्चिदानन्दविग्रहे।
गृहाणार्चा मिमां सर्वां प्रसीद परमेश्वरि।

इत्येतैः मन्त्रैः पुष्पाञ्जलिना क्षमापयेत्। ततो योनिमुद्रां बद्धवा - प्रणम्य -

ओं गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि।
पूजाराधन काले च पुनरा गमनायच।।

इति मूलमन्त्रं पठन् - संहारमुद्रया देवीं विसृज्य –स्वहृदये स्थापयेत्।

देव्याः उद्वासने प्रार्थना



ज्ञानतो ऽज्ञानतो वाऽपि यन्मया ऽऽचरितं शिवे।
तव कृत्य मिति ज्ञात्वा क्षमस्व परमेश्वरि।।

रश्मिरूपा महादेव्यः पूजिता याश्च देवताः।
कालिकाया वपुष्यत्र लीनाःसन्तु सुखावहाः।।

तदा - सर्वासां आवरणदेवतानां श्रीप्रत्यङ्गिराकाल्याः अङ्गे - लयं विभाव्य - खेचरीं वदुद्वास्य – निर्वाणमुद्रया - श्री यन्त्रस्थं पुष्प मुत्थाप्य - नासिकया आघ्राय - च स्व शिरसि धारयेत्।
हृत्पद्म कर्णिका मध्ये भैरवेन सह भैरवी।
प्रविश त्वं महादेवि सर्वै रावरणै स्सह।

तेजोरूपेण परिणतां - भगवतीं प्रत्यङ्गिरां - पूर्ववत् स्वहृदयं नीत्वा-तत्र च - मूर्तिं पञ्चधा उपचर्य पुनरात्माभिन्नं संविद्रूपेण विभावयेत्।

एषा भक्त्या तव विरचिता या मया देविपूजा -
स्वीकृत्यैनां सपदि सकलान् मेऽपराधान् क्षमस्व।
न्यूनं यत्तत् तव करुणया पूर्णता मेतु सद्यः
सानन्दं मे हृदय कमले ते ऽस्तु नित्यं निवासः ।। इति देवीं प्रार्थयेत्।।

चण्डेश्वरी पूजा

ततो ऐशान्यां दिशि 'ओं ह्रीं चण्डेश्वर्यै नमः'

इति चण्डेश्वरीं संपूज्य –

चण्डेश्वरि महादेवि निर्माल्यै श्चन्दनादिभिः -
लेह्यचोष्यान्नपानादि निर्माल्यस्त्रग्विलेपनैः -
निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया।।

इतिमन्त्रेण चण्डेश्वर्यै निर्माल्यं दद्यात्। ततः तत्रैव उच्छिष्ट चाण्डालिनीं संपूज्य-तदुच्छिष्टनै वेद्यासव मुच्छिष्टचाण्डाल्यै दद्यात्। ततो ब्राह्मणान् कुमारीश्च संभोज्य-स्वयं प्रसादं भुञ्जीत। इति प्रत्यङ्गिरा पूजापद्धति स्समाप्ता।

मूलाधारे कुण्डलीध्यान कारिका

ध्यायेत् कुण्डलिनीं सूक्ष्मां मूलाधार निवासिनीम्।
प्रसुप्त भुजगाकारां विद्युत्पटल सन्निभाम्।
ता मिष्ट देवतारूपां सार्ध त्रिवलयान्विताम्।
कोटि सौदामिनीभासां स्वयम्भू लिङ्ग वेष्टिनीम्।
तामुत्थाप्य महादेवीं हंसमन्त्रेण साधकः।
उद्यत् दिनकर द्योतां यावत् छावस दृढासनः।
अशेषाशुभ शान्त्यर्थं। समाहितमना: चिरम्।
तत्प्रभा पटलव्याप्तं शरीर मपि चिन्तयेत्।
सुषुम्ना वर्त्म नैवैनां परब्रह्मणि योजयेत्। (कालीतन्त्रे प्रोक्ताकारिका)

कुण्डलिनीप्रयोगः

मूलाधारे – ध्वजाधो गुदोर्ध्वे चतुश्शोणपत्राढ्ये चं वं शं षं सं इतिवर्णसहिते पद्मे – प्रसुप्त भुजगाकारां स्वयम्भूलिङ्ग वेष्टिनीं - ध्यात्वा – मूलाधारात् कुण्डलिनीं – हंसमन्त्रेणोत्थाप्य – सुषुम्नामार्गेण परग्रह्मणि संगमय्य – तत श्चन्द्रमण्डलान्तर्गत - अमृतधारां निपीय - तया लोलीभूतां – चैतन्यमयीं चरणयुगलान्त र्विगलितैः अमृतनिवहैः प्रपञ्चं सिञ्चन्तीं मूलाधारं - आनयेत् – एवं नाभौ ध्यात्वा आत्मानं शुद्धचैतन्या नन्दमयं देवतारूपं भावयेत्।

ततो द्वादश दल हृदयसरसिजे –षड्बिन्दुलाञ्छित कादिचान्तसहितं गत्वा – प्रदीपकलिकाकरां जीवरूपां ध्यात्वा ततः प्रदीपकलिका माकृष्य - स्वमुखे – निक्षिप्तवतीं परब्रह्मणि सङ्गमय्य पुन र्हृदयदेश मानीय - ततः तन्मुखात् प्रदीपकलिकां विनिष्कृष्य मूलाधारे संस्थापयेता। तां प्रदीपकलिकां देवतारुपां ध्यायेत्।

१

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

देवी प्रीत्यर्चन विषयाः

विभागः - 11



कुमारी पूजाविधिः, लक्षणं च

यजमानः पूजयेत् च कन्यानां दशकं शुभम्।
द्विवर्षाद्या दशाब्दान्ताः कुमारीः परिपूजयेत्।।
नाधिकाङ्गी न हीनाङ्गी कुष्ठिनीं च व्रणाङ्किताम्।
अन्धां काणां केकरां च कुरूपां रोगयुक्तनुम्।
दासीजातां रोगयुक्तां दुष्टां कन्यां न पूजयेत्।।
एतैर्मन्त्रैः पुराणोक्तैः स्नातां कन्यां प्रपूजयेत्।
गन्धैः पुष्पैः भक्ष्यभोज्यै र्वस्त्रै राभरणै रपि।। (मन्त्रमहोदधौ)

कुमारी पूजाप्रयोगः

अथ गुरुः देव्याग्रे – स्नातां – वस्त्राभरण पुष्पमालादियुक्तां - दशाब्दान्तवयस्कां - कन्यां - समलङ्कृते दारुपीठे निवेश्य – सङ्कल्प्य संपूजयेत्। तत्र सङ्कल्पः - अद्य पूर्वोक्त - एवङ्गुणविशेषेण विशिष्टायां – अस्यां - शुभतिथौ - अखिलाण्डकोटिब्रह्माण्डनायक्याः - भगवत्याः - प्रत्यङ्गिरायाः शरत्काले - अनुष्टितेऽस्मिन् - मातृयज्ञकर्मणि – संपूर्ण - सफलसिध्यर्थं - सुवासिनीपूजां - कुमारीपूजां – वटुकपूजां च करिष्ये – इति सङ्कल्प्य – आदौ भूतोच्चाटनं कुर्यात्।

कुमार्या सहितास्सर्वे तया देवीस्वरूपया।
दर्शनार्थं समायाति यावन्तो देवयोनयः।
प्रेता भूता पिशाचाश्च गन्धर्वा गुह्यका अपि।
राक्षसा दानवा यक्षाः ये चान्ये क्रूरकर्मिणः।
सह प्रविश्य कौमार्याः मण्डपं शारदार्चनम्।
लुम्पन्ति च कुमार्यार्चां पूजां विध्वंसयन्ति च।
अतो उच्चारद्वयं कार्यं विघ्नस्योच्चारणं प्रिये।। (कालीपुराणे)
इति काळी पूराणोक्तत्वात् आदौ भूतो च्चारणं कुर्यात्। तद्यथा

अपसर्पन्तु ये भूताः ये भूता भुवि संस्थिताः।
ये भूताः विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया।।

इतिवदन् सितसर्षपान् मन्त्रितान् अस्त्राय हुंफट् इति विकीर्य - कृणुष्वभाज इतिमन्त्रेण-

अपहता असुरा रक्षांसि
पिशाचा ये क्षयन्ति पृथिवी मनु।
अन्यत्रेतो गच्छन्तु यत्रैषां गतं मनः ।

इति मन्त्रघोष पुरस्सरं उच्चाटयेत्। ततः सामान्यार्घ्यपात्रस्थजलं – आपोवाइद मितिमन्त्रेण सप्तप्रणवेनाभिमन्त्र्य – तज्जलेन प्रोक्ष्य – एकैकां कुमारीं पूजाकाले अस्पृशन्नेव यजेत्।।

कुमारी पूजामन्त्राः (शिवेन प्रोक्तः श्लोकः) (यामळे)

मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम्।
नवदुर्गात्मिकां साक्षात् कन्यां आवाहयाम्यहम्।।

इतिमन्त्रेणैव सर्वाःकमारीः आवाह्य सर्वोपचारै रभ्यर्च्य प्रार्थयेत्।

1. प्रथमदिने– कुमारीं पूजयेत् (द्विवर्षाकन्या)

जगत्पूज्ये जगद्वन्द्ये सर्व शक्ति स्वरूपिणि।
पूजां गृहाण कौमारी जगन्मात र्नमो ऽस्तु ते।।

''कृणुष्वपाज'' इतिमन्त्रेण – ''अपहताअसुरा'' इति अक्षतान् विकीर्य।

2. द्वितीयदिवसे - त्रिपुरां पूजयेत् (त्रयाहनाकन्या)

त्रिपुरां त्रिपुराधारां ज्ञानमार्ग स्वरूपिणीम्।
त्रैलोक्य वन्दितां देवीं त्रिपुरां पूजयाम्यहम्।।

3. तृतीयदिने –कल्याणीं पूजयेत्।। (चतुर्हायना)

कालातीतां कालमूर्तिं करुणा हृदयां शिवाम्।
कल्याण जननीं नित्यां कल्याणीं पूजया म्यहम्।।

4. चतुर्थदिने – रोहिणीं ध्यात्वा पूजंयेत् (पञ्चवयस्का)

अणिमादि गुणाधारां अकारा द्यक्षरात्मिकाम्।
अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजया म्यहम्।।

5. पञ्चमदिने – काळीं ध्यात्वा यजेत् (षट्हायना)

कामचारीं काळरात्रीं कालचक्र स्वरूपिणीम्।
कामदां करुणाधारां काळीं संपूजया म्यहम्।।

6. षष्ठदिने- चण्डिकां ध्यात्वार्ययेत् (सप्तहायना)

चण्डवीरां चण्डमायां चण्ड मुण्ड प्रमर्दिनीम्।

पूजयामि महादेवीं चण्डिकां चण्ड विक्रमाम्।।

7. सप्तमदिने – शाम्भवीं यजेत् (अष्टवर्षा)

सदानन्द करीं शान्तां सर्व देव नमस्कृताम्।

सर्वभूता त्मिकां देवीं शाम्भवीं पूजया म्यहम्।

8. अष्टमदिने – दुर्गांध्यात्वायजेत् (नवहायना)

दुर्गमे दुस्तरे कार्ये भवदुःख विनाशिनि।

पूजयामि सदा भक्त्या दुर्गां दुर्गार्ति नाशिनीम्।।

9. नवमदिने – सुभद्रां ध्यात्वार्चयेत् (दशवयस्का)

सुन्दरीं स्वर्णवर्णाभां सर्वसौभाग्य दायिनीम्।

सुभद्र जननीं देवीं सुभद्रां पूजयाम्यहम्।।

एवं नवकुमारीः संचिन्त्य – पाद्याचमनार्ध्याणि समर्प्य – गन्ध वस्त्र कुसुमाक्षतादि दत्वा – फल भक्ष्यादिकं दत्वा – तद्यथा – वस्त्राभरण फलभक्ष्यादिविशिष्टं ताम्बूलं आदाय -

हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः।

अनन्त पुण्य फलदं अतश्शान्तिं प्रयच्छमे।। इतिउक्त्वा

तस्मिन् जलं दत्वा – भूमौ तज्जलं नीत्वा - तत्-कुमार्यै दद्यात्।

अद्य प्रथमदिवसकृत - पूजाजपहोमादिकर्मणः - सुपूर्णफल - प्राप्त्यर्थं - इदं वस्त्रं सकञ्चुकं - शोभनद्रव्यसहितं - सदक्षिणाकं - सताम्बूलं - देवीस्वरूपिण्यै - कुमार्यै - (सुवासिन्यै)

तुभ्य महं संप्रददे - न मम- इतिउक्त्वा – कुमारीहस्ते –भक्त्या - समर्पयेत्।

एवं प्रत्यहं तत्तत्दिनोक्तवयस्कां कन्यां तत्तन्नाम्ना संपूजयेत्।।

पूजान्ते प्रार्थनां कृत्वा – शुभाक्षतान् स्वीकुर्यात्।।

सुवासिनीपूजा (पतिपुत्रवतीं सतींयजेत्)

सुवासिनीपूजा मन्त्रः

मन्त्राक्षरमयीं देवीं मातृणां रूपधारिणीम्।
नवदुर्गात्मिकां साक्षात् देवी मावाह्याम्यहम्।।

सुवासिनीदेवी पादुकाध्यानम्

रक्तोत्पला रक्तनिभान्विताभ्यां
ध्वजोर्ध्व रेखा कुलिशाङ्कि ताभ्याम्।
अशेष बृन्दारक वन्दिताभ्यां
नमो भवानी पद पङ्कजाभ्याम्।।

इति पादपद्मद्वये - गन्धपुष्पाक्षतादिभिस्संपूज्य - कन्यार्चने पूर्वोक्त वत् वस्त्रकञ्चुक शोभनद्रव्याभरण फलभक्ष्य ताम्बूलादिकं - दक्षिणासहितं समर्पयित्वा - मङ्गळनीराजनादिकं विधाय - स्तुत्वा - नमस्कृत्य प्रार्थयेत्। आशिषाक्षतान् ताभ्यः स्वीकुर्यात्।।

1. विश्वरूपे च विश्वेशे विश्वशक्ति समन्विते।
प्रसीद परमानन्दे श्यामे दवि नमोऽस्तु ते।।

2. काळी कालयते सर्वं ब्रह्माण्डं स चराचरम्।
कल्पान्त समये या तां कालिकां प्रणमाम्यहम्।

3. प्रणतानां प्रसीदत्वेदेविविश्वार्तिहारिणि।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव।।

4. केनोपमा भवतु तेऽस्य पराक्रमस्य - वीर्यं च शत्रु भयहार्यधिकारि कुत्र।
चित्ते कृपा समर निष्ठुरता च दृष्टा - त्वय्येव देवि वरदे भुवन त्रयेपि।।

5. देवि प्रपन्ना र्तिहरे प्रसीद -प्रसीदमातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहिविश्वं - त्वमीश्वरी देवि चराचरस्य।।

6. आधारभूता जगतस्त्वमेका महीस्वरुपेणयतःस्थितासि।
अपांस्वरुपस्थितया त्वयैतदाप्यायते कृत्स्न मलङ्घ्यवीर्ये।।

ततो बालकं पीठे निवेश्य - तं वटुकभैरवमितिभावयन्
क्रमेणवटुकपूजां वस्त्रादिनाताम्बूलदक्षिणा सहितं
वटादिभक्ष्यसहितं वायनदानं च कुर्यात् ।।

बिल्ववृक्ष पूजा

निर्दिष्टदिवसात् पूर्वेद्युः सायं बिल्ववृक्षं अभिषिच्य – अलंकृत्य - श्रीसूक्तैः - श्री वाणी चण्डिकाः त्रिशक्तीः संपूज्य - उत्तरशाखां छित्वा - संगृह्य सोपचारैः - समानीय - संस्थाप्य - तस्यां चण्डिकां - कालिकां वा समभ्यर्चयेत्।।

नवपत्रिकार्चनविधिः (शारदार्चने)

सप्तम्यां मूल युक्तायां पत्रिकायाः प्रवेशनम्।
पत्री प्रवेशात् पूर्वेद्युः सायाह्ने बिल्व वासिनीम्।
चण्डीं आमन्त्रयेत् विद्वान् नात्र षष्ठी पुरस्क्रिया।

नवपत्रिकग्रहणविधिः (दमनपूजावत् कृत्यम्)

रम्भा कचु हरिद्रा च जयन्ती बिल्व दाडिमौ।
अशाको मानकं चैव धान्यादिः नवपत्रिका।।
समूला पत्रिकाग्राह्याः हरिद्रा धान्यकं विना।।

(इत्युक्तवत् हरिद्राकन्द धान्यपुञ्जेन सह – कदळी दाडिमी शमी छात्री इक्षु क्रमुक विल्वाशोक जयन्ती द्रुमादि नवपत्रिकाः ग्राह्याः)

पूजान्ते एतैःपत्रैस्सह अञ्जनं परिकल्प्य - देव्याः लोचनयोः स्समर्प्य - नीराजनादिभिः दृष्टिदोषान् व्यपोह्य – कूष्माण्डबलिं कृत्वा – देवीं स्तुत्वा – प्रार्थयेत्।।

सप्तकन्यका नामानि

भट्टारकी तु प्रथमा द्वितीया देवकन्यका।
तृतीया पद्मकन्या तु चतुर्था सिन्धुकन्यका।
अगजा पञ्चमी चैव वनकन्या तु षष्ठका।
सप्तमा सुमती कन्या इत्येते सप्तकन्यकाः।।

सप्तकन्यका ध्यानानि

1. भट्टारकीकन्या (राजकन्या) ओं ह्रीं श्रीं क्लीं भट्टारक्यै नमः इतिमूलम्।

आदिशक्त्यास्तु जनिता चित्रभावेन पङ्कजा।
लम्बितं वामहस्ते तु भूषणं पुष्परागकम्।
इभकुम्भ स्तनीं चैव चन्द्रबिम्ब मुखान्विताम्।
कन्यां भट्टारकीं ध्यायेत् आवाह्येवं प्रपूजयेत्।।

2. देवकन्या ध्यानम् (सुरकन्या) ओं ह्रीं श्रीं क्लीं देवकन्यायै नमः इतिमूलम्।

स्वर्गलोकोद्भवां कन्यां तटिद्वर्णां स्मिताननाम्।
कल्पप्रसून सव्यां तु लम्बिता मपसव्यके।
स्वर्णालङ्कृत भूषाढ्यं सितवस्त्रेण वेष्टितम्।
दिव्यां तु देवकन्यां तां ध्यात्वाऽवाह्य यजेत् बुधः।।

3. पद्मकन्या ध्यानम् (नागकन्या) ओं ह्रीं श्रीं क्लीं पद्मकन्यायै नमः इतिमूलम्।

शेषलोकोद्भवां कन्यां केतकीं दक्षहस्तके।
लम्बितं वामहस्ते तु श्वेताभा मेक वक्रकाम्।
माणिक्याभरणै र्भूष्यां रक्तवस्त्रेण शोभिताम्।
बद्धवेणीं पद्मकन्यां ध्याये दावाहयेत् बुधः।।

4. सिन्धुकन्याध्यानम् (समुद्रकन्या) ओं ह्रीं श्रीं क्लीं सिन्धुकन्यायै नमः इतिमूलम्।

रत्नाकरोद्भवा नीला दक्षाब्जा वामलम्बिनी।
नीलाम्बरी बद्धकेशी जलमौक्तिक भूषिता।
करुणाकर लोलाक्षी कस्तूरी तिलकोज्वला।
एकानना सिन्धुकन्या ध्याये दावाह्य पूजयेत्।।

5. गिरिकन्या ध्यानम् (अद्रिकन्या) ओं ह्रीं श्रीं क्लीं अगजायै नमः इतिमूलमन्त्रः

एकवक्त्रां शैलसुतां प्रवाळाभां शिवार्चनीम्।
काषायवस्त्र संयुक्तां भूषितां वेणु मौक्तिकाम्।
बद्धवेणीं पद्महस्तां वामे लम्बित दोर्लताम्।
अगजां सौम्यवदनां ध्यात्वाऽवाह्य यजेद्बुधः।।

6. वनकन्याध्यानम् (आरण्यकन्या) ओं ह्रीं श्रीं क्लीं वनकन्यायै नमः इतिमूलम्।

श्यामाभा मेकवक्त्रान्तु श्याम वस्त्रोत्तरीयकाम्।
मल्लिका दक्षहस्तां तु वामहस्ते तु लम्बिनीम्।
दन्ताभरण भूष्यां तु पुत्रिकां वन मातरम्।
वनकन्यां बद्धवेणीं ध्यात्वा ऽवाह्य यजेद्बुधः।।

7.भूमिकन्याध्यानम् (वसुमतीकन्या) ओं ह्रीं श्रीं क्लीं क्ष्माकन्यायै नमः इतिमूलम्।

उद्भवा धरणी तन्वी स्वर्णाभरण मेखला।
वैडूर्याभरणै र्भूष्या श्यामाभा चैक वक्त्रका।
द्विभुजोत्पल हस्ताढ्या सितवस्त्रेण वेष्टिता।
नाना वसुमती कन्या ध्येया संपूजयेत् सदा।।

कन्यागायत्री मन्त्रः। सप्तकन्यानां समानः

पुष्पहस्तायै विद्महे सौम्यरूपायै धीमहि तन्नो कन्या प्रचोदयात्।।

कन्यकास्तुतिः
कन्यां कम्रानननां दिव्यां सर्वावयव शोभिताम्।
सौम्यां पुष्पकरां वन्दे वाञ्छितार्थ प्रसिद्धये।।

कन्यापूजाक्रमः

सुमङ्गलस्नाताः - दुकूलवसनान्विताः - सर्वालङ्कारशोभिताः - सलक्षणाः - सप्तकन्याः - दारुपीठे उपवेश्य - षडुत्थासनपूर्वं - उक्तवत् ध्यात्वा – प्रोक्तमूल नाममन्त्रेण कान्याः - आवाह्य –कुसुमोदकैः षोडशोपचारैः स्सपूज्य – वस्त्राभरण सुगन्ध कुसुमादिकं स्त्रैण सौन्दर्य शोभनद्रव्यजातं च दत्वा –फल भक्ष्य ताम्बूलादिकं दत्वा – आरात्रिकं कृत्वा -कन्याकराक्षतै राशीस्स्वीकृत्य ताः - विसर्जयेत्।। इति सप्तकन्यकार्चनं समाप्तम्।।

உ

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

प्रत्यङ्गिराहोम बलिदान विषयाः

विभागः - 12

खड्गेशार्चनम्

सप्तधान्य स्थण्डिलोपरि - चतुषपादीं दारुपीठं विन्यस्य – तत्पीठे – रक्तवस्त्रोपरि तण्डुलं न्यस्त्वा – तस्मिन् साष्टपत्रकर्णिकं पद्मं आलिख्य – तत्कर्णिकायां खड्गं संस्थाप्य – खड्गमूले षडुत्थासनं स्थिरासनं संपूज्य – ओं हां अनन्ताय नमः - ओं धर्माय नमः ओं ज्ञानाय नमः ओं वैराग्यायनमः ओं ऐश्वर्याय नमः ओं हां पद्माय नमः इति संपूज्य- तत्र पद्मासने पूर्वादीशान्तदलाग्रेषु ओं ह्रीं देव्यै नमः - ओं ह्रीं वाग्देव्यै नमः - ओं ह्रीं पार्वत्यै नमः - ओं ह्रीं कृत्तिकायै नमः - ओं ह्रीं महालक्ष्म्यै नमः - ओं ह्रीं रक्तशक्त्यै नमः - ओं ह्रीं काल्यै नमः - ओं ह्रीं चण्डिकायै नमः। इति संपूज्य –

कर्णिकायां – ईशाने पीठ शक्त्यै नमः -



रक्तवर्णांज्वलत्केशीं खड्गखेटकधारिणीम्।
ध्यात्वापीठेश्वरीं देवीं गन्धपुष्पादिनार्चयेत् ।।

सर्वशक्तिकमलासनाय नमः - तन्मध्ये -

ओं हां खड्गेशासनायनमः -

ओं हां खड्गेशमूर्तये नमः - ध्यानम् -

करवाळ कपालोद्यद् धृत शार्दूल वाससम्।
अट्टहास हसद्वक्त्रं कर्पूर मुख वासितम्।
रक्तकुण्डल केयूरं ज्वलत्पावक सन्निभम्।
खड्गेशं कृष्णवर्णं तु भावयेत् देशिकोत्तमः।।

इति ध्यात्वा ओं हां ह्रौं खं खड्गेशाय नमः । इतिमन्त्रेण आवाह्य – आवाह्य - स्थापनादिकं विधाय – षडङ्गानि विन्यास्य – परमीकृत्य- रक्षावकुण्ठने कृत्वा धेनुमुद्रां खड्गमुद्रां च दर्शयित्वा – पाद्याचमनार्घ्यानि दत्वा – पुष्पाञ्जलित्रयेन तत्वत्रयेनाभ्यर्च्य – चन्दनाक्षत दूर्वा श्रीपुष्प करवीर सुमनादिकं मनसा भक्त्या निवेद्य – आचमनार्घ्यौच दत्वा – मनोरथमुद्रां दर्शयेत्। ततो लयाङ्ग - मभ्यर्च्य-तत्परितः ओं हां असिताङ्गभैरवायनमः ओं हां रूरूभैरवाय नमः ओं हां चण्डभैरवाय नमः ओं हां क्रोधनभैरवाय नमः - ओं हां उन्मत्तभैरवाय नमः कपाल भैरवाय नमः ओं हां भीषण भैरवाय नमः ओं हां संहार भैरवाय नमः इत्यष्ट भैरवान् संपूज्य –तद्वत् अग्रे नवकोष्टं विधाय – मध्ये रक्षोघ्नं संपूज्य – तद्बहि रष्टकोष्टेषु क्रमेण – ब्रह्म्यादि वीरभद्रान्तं संपूज्य –ओं ह्रीं ब्राह्म्यै नमः ओं ह्रीं माहेश्वर्यै नमः ओं ह्रीं कौमार्यै नमः ओं ह्रीं वैष्णव्यै नमः ओं ह्रीं वाराह्यै नमः ओं ह्रीं माहेन्द्यै नमः ओं ह्रीं चामुण्डायै नमः ओं ह्रीं वीरभद्रायै नमः इत्येताः आवाहनादि सर्वोपचारै रभ्यर्च्य। तद्बाह्यप्रान्ते

- स्वस्वनामभिः पूर्ववत् असिताङ्गादि अष्टभैरवान् संपूज्य – पाद्याचमनार्घ्याणि दत्वा- संपूज्य –रक्तान्नबलिं कूष्माण्डं वा बलिं दत्वा – रक्षोघ्नसूक्तं पठित्वा। स्तोत्रादिना सन्तोष्य –प्रासादमण्डप शुद्ध्यर्थं कुम्भजलैः अस्त्रेण प्रोक्षयेत् - खड्गेश भ्रमणेन - बलिदानेन च रक्षां विभाव्य – स्वस्थाने संस्थाप्य- सुतीक्ष्णदंष्ट्र कालभैरव स्तोत्रादिना सन्तोष्य - खड्गस्थं नवकोष्ठस्थाःसर्वाःदेवताः स्वहृदि संयोजयेत्।

इति यागसंरक्षक रक्षोघ्न खड्गेशार्चनं समाप्तम्

खड्गायुध प्रार्थना (पञ्चश्लोकी)

असि र्विशसनः खड्गः तीक्ष्णधारो दुरासदः।
श्रीगर्भो विजयश्चैव धर्माधार स्तथैव च।। 1

एतानि तव नामानि स्वय मुक्तानि वेधसा।
नक्षत्रं कृत्तिका ते तु गुरु र्देवो महेश्वरः।। 2

रोहिण्यश्च शरीरं ते दैवतं च जनार्दनः।
पिता पितामहो देवः त्वं मां पालय सर्वदा।। 3

नील जीमूत संकाशः तीक्ष्णदंष्ट्रः कृशोदरः।
भाव शुद्धो मर्षणश्च अतितेजा स्तथैव च।। 4

इयं येन धृता क्षोणी हतश्च महिषासुरः।
तीक्ष्ण धाराय शुद्धाय तस्मै खड्गाय ते नमः।। 5

भैरवगायत्री मन्त्रः (अजितागमे तृतीय भागे 56-9)

श्वानवाहाय विद्महे तीक्ष्णदंष्ट्राय
धीमहि तन्नो रुद्रः प्रचोदयात्।



असिअष्टपुष्पार्चनम्
ओं असये नमः
ओं विशसनाय नमः
ओं खड्गाय नमः
ओं तीक्ष्णधाराय नमः
ओं दुरासदाय नमः
ओं श्रीगर्भाय नमः
ओं विजयाय नमः
ओं धर्माधराय नमः   इतिअष्टनामभिरर्चयेत्

सिंहवाहन पूजा क्रमः

श्रीमत्कारणागमोक्तवत् भैरवस्य भैरव्याश्च आलय द्वाराग्रे सिंह वाहनस्य पूजाविधि उच्यते। तद्यथा ओं हां स्रां सिंहासनाय नमः - ओं हां स्रीं सिंहमूर्तये नमः - ध्यानम् कुर्यात् -

श्वेतवर्णं सुवृत्ताक्षं वक्रदन्तं महाबलम्।
जटाभार समायुक्तं लाङ्गूलेन समन्तिम्।
विवृतास्यं वज्रनखं मृगेन्द्रं भीम विग्रहम्।
पञ्चास्यं च चतुष्पादं सिंहराज महं भजे।।

मूलमन्त्रः ओं हां स्रां स्रीं स्रूं सिंहेन्द्राय नमः इति मूलेन आवाहयेत्।

गायत्रीमन्त्रः कण्ठीरवाय विद्महे वक्रदन्ताय धीमहितन्नो
सिंहःप्रचोदयात्।।

इति सिंह गायत्र्या सिंह सर्वेपचारैः अभ्यर्च्य – अष्टपुष्पिकयाभ्यर्चयेत्। तद्यथा -

ओं हां लूं स्रूं – मृगेन्द्राय नमः।
ओं हां रूं स्रूं – केसरिणे नमः।
ओं हां शूं स्रूं – पञ्चास्याय नमः।
ओं हां षूं स्रूं – कण्ठीरवाय नमः।
ओं हां वूं स्रूं – हर्यक्षाय नमः।
ओं हां यूं स्रूं – हरये नमः।
ओं हां सूं स्रूं – दंष्ट्रिणे नमः।
ओं हां हूं स्रूं – जटाधराय नमः।



एवं अष्टपुष्पार्चनं विधाय। प्रार्थनां कुर्यात्।

सिंहवाहन गायत्रीमन्त्रः (अजितागमे)

तीव्रकर्णाय विद्महे धर्म पिण्डाय धीमहि तन्नस्सिंहः प्रचोदयात्।

सिंही सिंहशक्ति गायत्री मन्त्र:

वरश्रोत्रायै विद्महे धर्म पुष्टै च धीमहि तन्नस्सिंही प्रचोदयात्।।
(हास्य सिंही ति विख्याता सिंहस्य शक्ति रुत्तमा)

सिंहस्य अष्टपरिवार नामानि (अजितागमे)

क्वणत्सिंहो लसत्सिंहो नारसिंह स्तथैव च।
नदत्सिंहो नादसिंहो द्रुतसिंहो हरिसिंहक:।
कामसिंहस्तु वै ह्येते सिंहस्य परिवारका:।।

एतान् सिंहेन्द्रस्य परित: अष्टदिक्षु पूजयेत्।

सिंहीशक्ति परिवारिका: (अजिते)

कोपा च मारुता मर्त्या तारकी सर्वमोहिनी।
क्रुद्धी कुहू बली वक्री सिंह्याष्ट परिवारिका:।। (प्रकारान्तमत्रैव)

वरा च वकुली माली मायी सोमी विलासिनी।
मुदती कुन्ददन्ती च सिंह्यष्ट परिवारका:।।

(एतै: सिंहीनामभि: अष्टदिक्षु पूजयेत्)





बलिपीठार्चनप्रयोगः (भद्रकाल्याः)

पीठस्थानम् – महापीठद्वयं कुर्यात् बाह्याभ्यन्तरयो रपि।
गोपुर स्याग्रसंस्थस्य चाभ्यन्तरस्य चावधौ।
गुणहस्तादि तत्स्थानं अथवा तिथि हस्तकम्।। (अजिते)

पीठदेव बलिविधिः - पीठलक्षण मुद्दिष्टं तयो र्देवा नतः श्रुणु।
आद्ये गणेश्वरं विद्धि द्वितये ऽष्टगणा स्स्मृताः।
तयो स्तेभ्यो बलिं दद्यात् नित्ये नैमित्तिके ऽपि च।।

बलिदान क्रमः - पीठाग्रे चास्त्रकं यष्ट्वा महावीठे बलिं क्षिपेत्।

काल्याबलिविधिः - वाह्ये चैव महापीठे मणिकां शक्ति मर्चयेत्।
मेषादि छेदनं कृत्वा मांसं निवेदयेत् ततः।।
प्रत्यहं पूजयेत् पश्चात् द्विकालं वा त्रिकालकम्।
एककाल मथा वापि पूजये दुक्त मार्गतः।

उत्सवकालविधिः – महोत्सवं ततः पश्चात् नवाहं परिकीर्तितम्।
प्रासाद गोपुरादीनि प्रत्येकालय मुत्तमम्।
प्रतिध्वजं प्रकल्प्याथ प्रति संवत्सरोत्सवम्।।
(उत्तर कारणागमे पटले९७)

काल्यादिबलिः - काल्यादि दश देवानां दध्यन्नेन बलिं ददेत्।
महापीठस्य मध्येतु मणिकां शक्ति मर्चयेत्।
दध्यन्नञ्च बलिं दत्वा कूश्माण्डञ्च बलिं ददेत्।
धूप दीपादिकं दत्वा तोषयेत् सर्वदेवताः।। (उत्तरकारणे)

सन्धिबलिक्षेपः - ब्रह्मादीशान पर्यन्तं सन्धिदेवान् स्वमन्त्रकैः।
आवाह्याभ्यर्च्य पुष्पाद्यैः दध्यन्नेन बलिं ददेत्।।
काली देवी गणान् सर्वान् नव सन्धिषु पूजयेत्।
कूश्माण्डञ्च बलिं कृत्वा पारशैवेन पूजयेत्।
स्थापनं उत्सवं शान्तिं आदिशैवेन कारयेत्।।

बलिपीठदेव्यः - बलिपीठं तदाग्रे तु सर्वशक्ति मयं तथा।
आकाशमातरीं पूर्वे दक्षिणे भूतमातरीम्।
लोकमातरीं च पाश्चात्ये सौम्ये च देवमातरीम्।
अनुक्तमातरीं ऊर्ध्वे अग्रपीठे बलिं ददेत्।।
सिंहादि बलिपीठान्तं बलिदेव्यः प्रकीर्तिताः।

अष्टदिग्बलिविधिः - जृम्भिनीं पूर्व दिग्भागे स्तम्भिनी मग्नि गोचरे।
शान्तिमोहिनि दाक्षिण्ये हेतिनीं नैऋते तथा।।
रागिणीं वारुणीपार्श्वे मारुतौ भद्रकामिनीम्।
दुर्गां तु सौम्यदिग्भागे चैशे चण्डेश्वरीं यजेत्।।

सर्वालङ्कृतमण्डपे – स्थण्डिलमध्ये – दारुजां - चतुष्पादीं संस्थाप्य – तदुपरि सलक्षणदारुजं बलिपीठं निधाय - गन्धपुष्पादिभिः अलङ्कृत्य – अर्घ्य जलेन पीठं संप्रोक्ष्य - आधारे - षडुत्थासन मभ्यर्च्य – बलिपीठे – पीठशक्तिं पूजयेत् – ओं ह्रां बलिपीठशक्त्यासनाय नमः बलिपीठशक्ति मूर्तये नमः स्वरूप ध्यायेत् – ध्यानम्।

मुखपञ्च सममौळि समनासिनयनं –
दशकर्ण दशबाहु दशशूल दशदृक्।
गळ मेक हृदयंअति रक्त वर्णं –
द्वय माद मिति भूत बलि पीठ रूपम्।।

काल्याः बलिपीठे मणिकाशक्तिं ध्यायेत् -तद्यथा -

ज्वाला सुकेशां मुख उग्र दन्तां -
सुवेद हस्तां उरगञ्च बाणम्।
चापञ्च पाशं दधतीं द्विपादां -
अतिरक्त वर्णां बलिपीठ शक्तिम्।।



बलिपीठध्यानम्

पञ्चशीर्षं दशाक्षं च दशबाहुं दश श्रवम्।
नीरदाभं बलिभुजं बलिपीठ महं भजे।।

इति ध्यात्वा - ओं ह्रां श्रां मणिकाशक्तये नमः - इति मूलेन आवाह्य।
स्थापनादिकं विधाय - परितः - अष्ट मातृः पूजयेत्। तद्यथा –
पूर्वे - ओं ह्रां आकाशमात्रे नमः - दक्षिणे - ओं ह्रां भूतमात्रे नमः।
पश्चिमे – ओं ह्रां लोकमात्रे नमः - उत्तरे – ओं ह्रां देवमात्रे नमः।
ऊर्ध्वे - ओं ह्रां अनुक्तमात्रे नमः इति सर्वशक्तिमयं बलिपीठं संपूज्य।

बलिं तत्र प्रकुर्वीत यथोक्तं सम्य गाचरेत्।
बलिहीनं यजे द्यत्र तद्ग्रामे सर्व नाशनम्।।
अतः कुर्यात् प्रयत्नेन बलिं सर्वस्य तृप्तये।।
अभावे बलिदाने तु नृप ग्राम क्षयं भवेत्।।

इत्युक्तत्वात् - तत्रबलिपीठं - पुष्पाद्यैरभ्यच्य - नवसन्धिषु सन्धिदेवताः कालीगणदेवताश्च संपूज्य - स्वाहान्त तत्तत् नाममन्त्रेण दध्यन्नेन यथाविधिः वलिर्दद्यात्। काल्यै - आलयाभ्यन्तरे पशुबलिं हित्वा - कूश्माण्डबलिं -मध्वाक्तमाषापूपादिकं वा बलिं दद्यात्। बलिपीठोपरि बलिद्रव्यं निक्षिप्य – विज्ञाप्य -धूपदीपौ दत्वा – तोयबिन्दुं दत्वा- आरात्रिकं दत्वा – विसृजेत् – एवमेवक्रमेण अग्रादिअष्टदिक्षु परितः भद्रकाल्याः परिवारदेवताभ्यो सर्वाभ्यो बलिप्रदानं कृत्वा तोषयेत्।। इति बलिप्रदान प्रयोगःसमाप्तः।

नवसन्धिबलि स्थानेषु बलिदान क्रमः
(श्री प्रत्यंगिरामन्त्रस्य दिक्बन्धनम्   दिक्बलिदान क्रमः)



अस्य श्री प्रत्यंगिरामन्त्रस्य - आंगिरस - प्रत्यंगिरसौ - ऋषी - अनुष्टुप् छन्दः। उग्रकृत्या देवता।। मम सर्वाभीष्ट सिद्ध्यर्थे - सर्वारिष्ट विनाशनार्थे - दिक्षुबलिदाने (जपे) विनियोगः।। क्रां क्रीं क्रूं क्रैं क्रौं क्रः इति कर षडङ्गन्यासौ कृत्वा । तद् यथा -

करन्यासः	अङ्गन्यासः
क्रां अङ्गुष्ठाभ्यां नमः	क्रां हृदयाय नमः
क्रीं तर्जनीभ्यां नमः	क्रीं शिरसे स्वाहा
क्रूं मध्यमाभ्यां नमः	क्रूं शिखायै वषट्
क्रैं अनामिकाभ्यां नमः	क्रैं कवचाय हुम्
क्रौं कनिष्ठिकाभ्यां नमः	क्रौं नेत्रेभ्यो वौषट्
क्रः करतल करपृष्ठाभ्यां नमः	क्रः अस्त्राय फट्

इति अङ्गानि विन्यस्य – पुनः दिग्बन्धनं कुर्यात् तद् यथा – अस्य दिग्बन्धन महा मन्त्रस्य - मरीचिपुत्रः कण्वः ऋषिः - अनुष्टुप् छन्दः - इन्द्रादि लोकपालाः देवताः - सर्वारिष्ट विनाशार्थे - मम - सर्वाभीष्ट सिद्ध्यर्थे – (दिग्बन्धने) बलिदाने – विनियोगः।

1. पूर्वं दिग्बन्धनमन्त्रः / बलिदानमन्त्रः

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्यः।
शं वातो वात्वरपा अपस्त्रिधः। पूर्वं दिग्भागे इन्द्रः सुप्रीतो वरदो भवतु।
इन्द्रं वो विश्वतस्परि हवाहमहे जनेभ्यः । अस्माक मस्तु केवलः ।।

यो मे कुलाभिगमः - धनाभिमानः - प्राणस्य पुरस्तात् अग्रतः - पाप्मा मपकेनेह कर्मणा - इन्द्रः तं देवराजा जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु - कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेद्से सुनवाम सोम मरती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ।।
अनेन बलिदानेन इन्द्रः प्रीयताम्।।

2. आग्नेय दिग्बन्धनमन्त्रः / बलिदानमन्त्रः

शमग्निरग्निभिः स्करत् शन्न स्तपतु सूर्यः ।
शं वातो वात्वरपा अपस्त्रिधः ।। अग्नि दिग्भागे अग्निः सुप्रीतो वरदो भवतु।।
अग्निं दूतं वृणीमहे होतारं विश्व भेषजम् । अस्य यज्ञस्य सुक्रतुम् ।।

यो मे कुलाभिगमः - धनाभिमानः - प्राणस्य पुरस्तात् अग्रतः - पाप्मा मपकेनेह कर्मणा - अग्निः तं तेजो राजा - जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेद्से सुनवाम सोम मराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाण विश्वा नावेव सिन्धुं दुरिताऽ त्यग्निः ।।
अनेन बलिदानेन अग्निः प्रीयताम्।।

3. दक्षिण दिग्बन्धनमन्त्रः / बलिदानमन्त्रः

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्यः।
शं वातो वात्वरपा अपस्त्रिधः। दक्षिण दिग्भागे यमः सुप्रीतो वरदो भवतु।

यमाय सोमं सुनुत यमाय जुहुता हविः।
यमाय यज्ञो गच्छत्यग्नि इतो अतंकृतः।।

यो मे कुलाभिगमः धनाभिमानः प्राणस्य पुरस्तात् अग्रतः पाप्मा मपकेनेह कर्मणा - यमः तं धर्मराजा जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु - कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवाद्ये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेद्से सुनवाम सोम मरती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ।।

अनेन बलिदानेन यमः प्रीयताम्।।

4. नैऋति दिग्बन्धनमन्त्रः / बलिदानमन्त्रः

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्यः।
शं वातो वात्वरपा अपस्त्रिधः।
नैऋति दिग्भागे - निऋतिः सुप्रीतो वरदो भवतु।।

असुन्वन्त मयजमान मिच्चस्तेन स्थेस्या न्तस्करस्यान्वेषि ।
अन्य मस्मदिच्छ सात इत्या नमो देवि निरृते तुभ्य मस्तु ।।

यो मे कुलाभिगमः धनाभिमानः प्राणस्य पुरस्तात् अग्रतः पाप्मा मपकेनेह कर्मणा - निऋतिः तं रक्षो राजा जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्त: ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेद्से सुनवाम सोम मराती यतो निदहाति वेद: ।
स न: पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्नि: ।।

अनेन बलिदानेन निर्ऋत्यृतिः प्रीयताम्।।

5. पश्चिम दिग्बन्धनमन्त्र: / बलिदानमन्त्र:

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्य:।
शं वातो वात्वरपा अपस्त्रिध: । । पश्चिमदिग्भागे वरुण: सुप्रीतो वरदो भवतु।।

इमं मे वरुण श्रुधीहव मध्या च मृडय । त्वाम वस्युराचके ।
तत्वायामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः ।
अहेड मानो वरुणे हबो धुरु शम् समान आयु: प्रमोषीः।।

यो मे कुलाभिगम: धनाभिमान: प्राणस्य पुरस्तात् अग्रत: पाप्मा मपकेनेह कर्मणा - वरुण: तं जलराजा - जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्त्ययनं मम - भद्रं नो अभिवादये नम: - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्त: ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेद्से सुनवाम सोम मराति यतो निदहाति वेद: ।
स न: पर्षदति दुर्गानि विश्वा नावेव सिन्दुं दुरिता त्यग्नि: ।।

अनेन बलिदानेन वरुण: प्रीयताम्।।

6. वायव्य दिग्बन्धनमन्त्र: / बलिदानमन्त्र:

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्य:।
शं वातो वात्वरपा अपस्त्रिध:। वायव्य दिग्भागे वायु: सुप्रीतो वरदो भवतु।

तव वायव स्पृते त्वष्टु र्जामात रद्भुत । अवांस्या वृणीमहे ।।

यो मे कुलाभिगमः धनाभिमानः प्राणस्य पुरस्तात् अग्रतः पाप्मा मपकेनेह कर्मणा - वायुः तं प्राणराजा - जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु - कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेदसे सुनवाम सोम मराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गानि विश्वा नावेव सिन्दुरिताऽत्यग्निः ।।

अनेन बलिदानेन वायुः प्रीयताम्।।

7. उत्तर दिग्बन्धनमन्त्रः / बलिदानमन्त्रः

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्यः।
शं वातो वात्वरपा अपस्निधः। उदीची दिग्भागे सोमः सुप्रीतो वरदो भवतु।

सोमो धेनुं सोमो अर्वन्तमाशुं । सोमो वीरं कर्मन्यं दधातु ।।
सादन्यं विदत्यं सभेयं । पितृ श्रवनं यो ददाश दस्मै ।।

यो मे कुलाभिगमः धनाभिमानः प्राणस्य पुरस्तात् अग्रतः पाप्मा मपकेनेह कर्मणा - सोमः तं ओषधि राजा - जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु - कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेदसे सुनवाम सोम मराति यतो निदहाति वेदः ।
स नः पर्षदति दुर्गानि विश्वा नावेव सिन्दुं दुरिता त्यग्निः ।।

अनेन बलिदानेन सोमः प्रीयताम्।।

8. ऐशान्य दिग्बन्धन मन्त्रः / बलिदानमन्त्रः

शमग्नि रग्निभि स्करत् शन्न स्तपतु सूर्यः।
शं वातो वा त्वरपा अप स्त्रिधः। ऐशान्य दिग्भागे ईशानः सुप्रीतो वरदो भवतु।

तमीशानं जगत स्तस्तुष स्पतिम् । धियं जिन्व महसे हूमहे वयं ।
पूषाणो यथा वेदसा मस द्वृते । रक्षिता पायु रदब्धः स्वस्तये ।।

यो मे कुलाभिगमः धनाभिमानः प्राणस्य पुरस्तात् अग्रतः पाप्मा मपकेनेह कर्मणा - ईशानः तं विद्याराजा - जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु - कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेदसे सुनवाम सोम मराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गा विश्वा नावेव सिन्दुरिता त्यग्निः ।।

अनेन बलिदानेन ईशानः प्रीयताम्।।

9. ऊर्ध्व दिग्बन्धनमन्त्रः / बलिदानमन्त्रः

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्यः।
शं वातो वात्वरपा अपस्त्रिधः। ऊर्ध्वे ब्रह्मा सुप्रीतो वरदो भवतु।

ब्रह्मा देवानां पदवीः कबीनाम् । ऋषि र्विप्राणां महिषो मृगानाम् ।
श्योनो गृध्राणां स्वदिति र्वेनानाम् । सोमः पवित्र मत्ये तिरेभन् ।।

यो मे कुलाभिगमः धनाभिमानः प्राणस्य पुरस्तात् अग्रतः पाप्मा मपकेनेह कर्मणा - ब्रह्मा तं लोकराजा - जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेद्से सुनवाम सोम मराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धु दुरिताऽत्यग्निः ।।

अनेन बलिदानेन ब्रह्मा प्रीयताम्।।

10. अधो दिग्बन्धनमन्त्रः / बलिदानमन्त्रः

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्यः।
शं वातो वात्वरपा अपस्त्रिधः। अधः अनन्तो विष्णुः सुप्रीतो वरदो भवतु।

अधः पश्य मोपरि सन्तरां पादको हरा मातेक ।
शल्पकौ दृशन् स्त्रोहि ब्रह्म बभू विध ।।

नमो अस्तु सर्पेभ्यो ये के च पृथिवी मनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।।

इदं विष्णु र्विचक्रमे त्रेधा निदधे पदम् । समूड मस्य पाँ सुरे ।।

यो मे कुलाभिगमः धनाभिमानः प्राणस्य पुरस्तात् अग्रतः पाप्मा मपकेनेह कर्मणा - अनन्तोविष्णुः तं नागराजा - जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेद्से सुनवाम सोम मराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गान विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ।।

अनेन बलिदानेन अनन्तो विष्णुः प्रीयताम्।।

11. अवान्तर दिग्बन्धनमन्त्रः / बलिदानमन्त्रः

शमग्नि रग्निभिस्करत् शन्न स्तपतु सूर्यः।
शं वातो वात्वरपा अपस्त्रिधः ।।
अवान्तर दिग्भागे परब्रह्मा सुप्रीतो वरदो भवतु।

इदं विष्णु र्विचक्रमे त्रेधा निदधे पदम् । समूड मस्य पाँ सुरे ।।

यो मे कुलाभिगमः धनाभिमानः प्राणस्य पुरस्तात् अग्रतः पाप्मा मपकेनेह कर्मणा परब्रह्मा तं देवराजा - जंभयतु स्तंभयतु मोहयतु मारयतु नाशयतु क्लेशयतु शोषयतु भ्रामयतु कलिं तस्मै प्रयच्छतु - कृतं मम शिवं - मम शुभं - मम शान्तिं - स्वस्ययनं मम - भद्रं नो अभिवादये नमः - मरुता मोजसे स्वाहा ।।

इन्द्रो विश्वस्य राजति । शं नो भव द्विपदे शं चतुष्पदे ।।

यो नो राये दुश्चरितासो अग्रे जहन्मर्तासो अनृतं वदन्तः ।
तेषां वपूंषि अर्चिषा जातवेदश्शुष्कं न वृक्ष मभि सन्दहस्व ।।

जात वेदसे सुनवाम सोम मराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽ त्यग्निः ।।

अनेन बलिदानेन परब्रह्मा प्रीयताम्।।

ततः दुर्गा सूक्तं जपेत् ।।



दुर्गासूक्तजपः

ओं जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः ।
स नः पर्.षदति दुर्गाणि विश्वा नावेव सिन्धुन्दुरिताऽत्यग्निः ॥ 1

तामग्निवर्णान्तपसा ज्वलन्तीं वैरोचनीङ्कर्मफलेषु जुष्टाम् ।
दुर्गान्देवी॒शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ 2

अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ 3

विश्वानि नो दुर्गहा जातवेदस्सिन्धुन्न नावा दुरिताऽतिपर्.षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ 4

पृतना जित॒सहमानमुग्रमग्नि॒ हुवेम परमाथ्सधस्थात् ।
स नः पर्.षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥ 5

रक्षोहाग्निसूक्त जपः

रक्षोहाग्नि सूक्तस्य वामदेव ऋषिः - त्रिष्टुप् छन्दः - रक्षोहाग्नि दैवता।। (1-15)
कुमार ऋषिः - त्रिष्टुप् छन्दः - अग्नि दैवता।। (16-17)

कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवा॒इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्ताऽसि विध्य रक्षसस्तपिष्ठैः ॥ 1

तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपू॒ष्यग्ने जुह्वा पतङ्गानसन्दितो वि सृज विष्वगुल्काः ॥ 2

प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशꣳसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥ 3

उदग्ने तिष्ठ प्रत्याऽऽतनुष्व न्यमित्राꣳ ओषतात् तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥ 4

ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्या न्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥ 5

स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥ 6

सेदग्ने अस्तु सुभगस्सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥ 7

अर्चामि ते सुमतिं घोष्यर्वाक्सन्ते वावाता जरतामियं गीः ।
स्वश्वास्त्वा सुरथा मर्जये मास्मे क्षत्राणि धारयेरनु द्यून् ॥ 8

इह त्वा भूर्या चरे दुपत्मन्दोषावस्तर्दी दिवाꣳसमनु द्यून् ।
क्रीडन्तस्त्वा सुमनसस्सपेमाभि द्युम्ना तस्थिवाꣳसो जनानाम् ॥ 9

यस्त्वा स्वश्वस्सु हिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग् जुजोषत् ॥ 10

महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वन्नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ 11

अस्वप्नजस्तरणयस्सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।
ते पायवस्सध्रियञ्चो निषद्याऽग्ने तव नः पान्त्वमूर ॥ 12

ये पायवो मामतेयन्ते अग्ने पश्यन्तो अन्धन्दुरितादरक्षन् ।
ररक्ष तान्थ्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ 13

त्वया वय७सधन्यस्त्वोतास्तव प्रणीत्याश्याम वाजान् ।
उभा श७सा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥ 14

अया ते अग्ने समिधा विधेम प्रति स्तोम७ शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥ 15

रक्षोहणं वाजिनमाऽऽजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म ।
शिशानो अग्निः क्रतुभिस्समिद्धस्स नो दिवा स रिषः पातु नक्तम् ॥ 16

विज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायास्सहते दुरेवाः शिशीते श्रृङ्गे रक्षसे विनिक्षे॥ 17

उत स्वानासो दिविषन्त्वग्नेस्तिग्मायुधा रक्षसे हन्त वा उ ।
मदे चिदस्य प्ररुजन्ति भामा न वरन्ते परिबाधो अदेवीः॥ 18

कृष्णयजुर्वेद सं.1,का.2,प्र.14,अ

प्रत्यङ्गिरायाः पुनर्ध्यानम् कुर्यात् – तद्यथा – उत्तराङ्गम् -

कृष्णवर्णां बृहत्कण्ठां रक्तकुञ्चित मूर्धजाम् ।
शिरः कपाल मालां च विकेशीं घूर्णिताननाम् ।।
रक्तनेत्रा मतिवृद्धां लम्बजिह्वा मधोमुखीम् ।
ऊर्ध्वे दक्षिण हस्तेन बिभ्राणां च परश्वथम् ।।
अधो दक्षिणहस्तेन धारयन्तीं तथाऽङ्कुशम् ।
ऊर्ध्वे वाम करेणैव बिभ्रतीं पाश मेव च ।।
अधो वाम करेणैव विभ्राणां शूल मूर्धजम् ।

दिग्बन्धन जप विनियोगे - उत्तरोङ्गन्यासादयः कार्यः

एवं ध्यात्वा - पुनरपि प्रत्यङ्गिरा ऋचाम् - ऋष्यादि न्यासं कुर्यात्। तद्यथा - अस्यश्री प्रत्यङ्गिरस मन्त्रस्य – अङ्गिरस प्रत्यङ्गिरसौ ऋषी। द्वात्रिंशत् ऋचां अनुष्टुप् । यथेत्यृचः पङ्क्तिः - अवब्रह्मे त्येकपदा (ब्रह्मइति ऋचः एकपदा) गायत्री छन्दः। यो न इति (इत्यस्याः) त्रिष्टुप् छन्दः। शिष्टानामनुष्टुप् छन्दः। प्रतिकर्ताकृत्या (प्रतिकत्रीकृत्या) देवता। कालाग्निरुद्रः (अधिदेवता) महादेवो देवता। एवं ऋष्यादिकं विधाय –कम् इति बीजम्। अमल इति शक्तिः। उदिति कीलकम्। मम कुलागम धनाभिमान प्राणस्य ये ये प्रतिकूलकारिणः त्रैलोक्यवर्तिनः तेषां केवलं तत्तद् वाङ्मनःकाय चेष्टा विनाशार्थे विनियोगः - पुनरपि ह्रां हृदयाय नमः - ह्रीं शिरसे स्वाहा - ह्रूं शिखायै वषट् - ह्रैं कवचाय हुम् - ह्रौं नेत्रत्रयाय वौषट् - ह्रः अस्त्राय फट् इति अङ्गनि विन्यस्य ध्यायेत् ।। सिंह्मां सिंहमुखीं (4 Lines to be typed) ....।। एवं ध्यात्वा – पुनः परिवार जातवेदोमन्त्रस्य दूर्वासा भगवान् ऋषिः - त्रिष्टुप् छन्दः। जातवेदो देवता। क्षं बीजम्। हुं शक्तिः। फट् कीलकम्। मम सर्वभूत (दुरित) विनाशार्थे विनियोगः - जातवेदो मन्त्रं जपेत्

ओं जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः ।
स नः पर्.षदति दुर्गाणि विश्वा नावेव सिन्धुन्दुरिताऽत्यग्निः ॥

चतुष्षष्टि भैरव बलिमण्डलम्



चतुष्षष्टि भैरव नामावली (रुद्रयामले तन्त्रे)

असिताङ्गो विशालाक्षो मार्ताण्डो मोदकप्रियः।
स्वच्छन्दो विघ्नसन्तुष्टः खेचरः सचराचरः।। 1

रुरुश्च क्रोडदंष्ट्रश्च तथैव च जटाधरः।
विश्वरूपो विरूपाक्षो नानारूपधरः परः।। 2

वज्रहस्तो महाकायः चण्डश्च प्रलयान्तकः।
भूमिकम्पो नीलकण्ठो विष्णुश्च कुलपालकः।। 3

मुण्डमालः कामपालः क्रोधो वै पिङ्गलेक्षणः।
उग्ररूपो धरापालः कुटिलो मन्त्रनायकः।। 4

रुद्रः पितामहाख्यश्च उन्मत्तो बटुनायकः।
शङ्करो भूत वेतालः त्रिनेत्र स्त्रिपुरान्तकः।। 5

वरदः पर्वतावासः कपालः शशिभूषणः।
हस्तिचर्माम्बरधरो योगीशो ब्रह्मराक्षसः।। 6

सर्वज्ञः सर्व देवेशः सर्वभूत हृदि स्थितः।
भीषणाख्यो भयहरः सर्वज्ञाख्य स्तथैव च।। 7

कालाग्नि श्च महा रौद्रो दक्षिणो मुखरो ऽस्थिरः।
संहार श्चातिरिक्ताङ्गः कालाग्निश्च प्रियङ्करः।। 8

घोरनादो विशालाङ्गो योगीशो दक्षसंस्थितः।
चतुष्षष्टी रूपधृग्देवो भैरवः स सदा ऽवतु।। 9

(एतन्नामावल्यां कालाग्निप्रियङ्करः इति एकं नाम संयुक्तं वर्तते)

एतेषां याजन आरम्भे ओं ह्रीं इति - तथा नामान्ते ह्रीं ओं इति च संयोज्य - प्रणवमायासम्पुटीकरणेन - अस्याः चतुष्षष्टि नामावल्याः जपः कार्यः। अथवा आदौ ओं ह्रीं इति अन्ते नमः इति चतुर्थीविभक्त्यन्तनाम्ना च जपपाठपूजादिकं कर्तव्य मिति शाक्तरुद्रयामलतन्त्रम् उपदिशति। रुद्रयामलतन्त्रे परमेश्वरः पार्वत्याः प्रार्थनां प्रति आपदुद्धारक श्रीभैरवस्य सहस्रदशसहस्रनामावळीभ्यो एतानि उद्धृत्य - अष्टोत्तरशतनामानि च प्रोक्तवान्। अतः एतन्नामस्मरणं पठनं च सर्वकामनापूर्तिदं-भोगमोक्षादिसिद्धिदं च भवति इति ज्ञेयम्।।

चतु:षष्टि भैरवार्चनम् (8x8=64)
(आदौ ओं ऐं ह्रीं श्रीं क्षं इति बीजपञ्चकं योज्यम्)

प्रथमाष्टके

1. ओं नीं नीलकण्ठ भैरवाय नमः
2. ओं विं विशालाक्ष भैरवाय नमः
3. ओं मां मार्ताण्डभैरवाय नमः
4. ओं मुं मण्डनप्रभ भैरवाय नमः
5. ओं स्वं स्वच्छन्द भैरवाय नमः
6. ओं अं अतिसन्तुष्ट भैरवाय नमः
7. ओं खें खेचर भैरवाय नमः
8. सं संहार भैरवाय नमः

द्वितीयाष्टके

9. ओं विं विश्वरूपधर भैरवाय नमः
10. ओं विं विरूपाक्ष भैरवाय नमः (विश्वाक्षः)
11. ओं नां नानारूपधर भैरवाय नमः
12. ओं पं परमभैरवाय भैरवः नमः (पद्म)
13. ओं दं दण्डकर्म भैरवाय नमः
14. ओं सुं सुधापात्र भैरवाय नमः

15. ओं क्रीं क्रीडन भैरवाय नमः
16. ओं उं उन्मत्त भैरवाय नमः

तृतीयाष्टके

17. ओं में मेघनाथ भैरवाय नमः
18. ओं मं मनोवेग भैरवाय नमः
19. ओं क्षें क्षेत्रपाल भैरवाय नमः
20. ओं कं कराळ भैरवाय नमः
21. ओं निं निर्भय भैरवाय नमः
22. ओं पिं पिशिताशन भैरवाय नमः
23. ओं प्रें प्रेक्षक भैरवाय नमः (प्रोक्षकः)
24. ओं लों लोकपाल भैरवाय नमः

चतुर्थाष्टके

25. ओं गं गदाधर भैरवाय नमः
26. ओं वं वज्रहस्त भैरवाय नमः
27. ओं मं महाकाल भैरवाय नमः
28. ओं प्रं प्रचण्ड भैरवाय नमः
29. ओं प्रं प्रलय भैरवाय नमः
30. ओं अं अन्तक भैरवाय नमः
31. ओं भूं भूमिकम्पन भैरवाय नमः
32. ओं भीं भीषण भैरवाय नमः

पञ्चमाष्टके

33. ओं सं संहार भैरवाय नमः
34. ओं कुं कुलपालन भैरवाय नमः
35. ओं रुं रुण्डमाल भैरवाय नमः (लोकपालन)
36. ओं प्रं प्रजापालन भैरवाय नमः
37. ओं रं रक्ताङ्ग भैरवाय नमः
38. ओं पिं पिङ्गलेक्षण भैरवाय नमः
39. ओं अं अभ्ररूप भैरवाय नमः
40. ओं धं धरापालन भैरवाय नमः

षष्ठाष्टके

41. ओं कुं कुल भैरवाय नमः (कुटिलः)
42. ओं मं मन्त्रनायक भैरवाय नमः
43. ओं रुं रुद्रभैरवाय नमः
44. ओं पिं पितामह भैरवाय नमः
45. ओं विं विष्णु भैरवाय नमः
46. ओं वं वटुकनाथ भैरवाय नमः
47. ओं कं कपाल भैरवाय नमः
48. ओं भूं भूतवेताल भैरवाय नमः

सप्तमाष्टके

49. ओं त्रिं त्रिनेत्र भैरवाय नमः
50. ओं त्रिं त्रिपुरान्तक भैरवाय नमः
51. ओं वं वरद भैरवाय नमः (अभयः)
52. ओं पं पर्वत भैरवाय नमः (पर्वतवाहनः)
53. ओं शं शशिधर भैरवाय नमः
54. ओं कं कलशभूषण भैरवाय नमः
55. ओं सं सर्वज्ञ भैरवाय नमः
56. ओं सं संवाद भैरवाय नमः (सर्वदेवमय)

अष्टमाष्टके

57. ओं श्मं श्मशानेश्वर भैरवाय नमः (श्मशानेशः)
58. ओं सं सर्वभूत हृदिस्थित भैरवाय नमः
59. ओं घों घोरनाथ भैरवाय नमः
60. ओं भं भयङ्कर भैरवाय नमः
61. ओं भुं भुक्तिमुक्तिफलप्रद भैरवाय नमः
62. ओं कां कालाग्नि भैरवाय नमः
63. ओं मं महारौद्र भैरवाय नमः
64. ओं दं दक्षिणाभिमुखस्थित भैरवाय नमः

इति सर्वोपचारैः चतुष्षष्टिभैरवान् - बल्यन्तं संपूज्य – आरात्रिकं कृत्वा - भैरवेश्वरंस्तोत्रादिकंपठित्वा तोषयेत् - प्रार्थयेच्च।

श्री भैरवाष्टोत्तर शतनाम स्तोत्रम्।

ओं ह्रीं –

भैरवो भूतनाथश्च भूतात्मा भूतभावनः।
क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट्।। 1

श्मशान वासी मांसाशी खर्पराशी स्मरान्तकः।
रक्तपः पानपः सिद्धः सिद्धिदः सिद्ध सेवितः।। 2

कङ्कालः काल शमनः कला काष्टा तनुः कविः।
त्रिनेत्रो बहुनेत्र श्च तथा पिङ्गल लोचनः।। 3

शूलपाणिः खड्गपाणिः कङ्काली धूम्रलोचनः।
अभीरु भैरवीनाथो भूतपो योगिनीपतिः।। 4

धनदो ऽधनहारी च धनवान् प्रतिभानवान्।
नागहारो नागपाशो व्योमकेशः कपालभृत्।। 5

कालः कपालमाली च कमनीयः कलानिधिः।
त्रिलोचनो ज्वलन्नेत्रः त्रिशिखी च त्रिलोचनः।। 6

त्रिनेत्रतनयो डिम्भशान्तः शान्तजन प्रियः।
बटुको बहुवेश श्च खट्वाङ्गो वरधारकः।। 7

भूताध्यक्षः पशुपतिः भिक्षुकः परिचारकः।
धूर्तो दिगम्बरः शूरो हरिणःपाण्डु लोचनः।। 8

प्रशान्तः शान्तिदः शुद्धः शङ्कर प्रिय बान्धवः।
अष्टमूर्ति र्निधीशश्च ज्ञानचक्षु स्तपोमयः।। 9

अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः।
भूधरो भूधराधीशो भूपति र्भूधरात्मजः।। 10

कङ्कालधारी मुण्डी च आन्त्र यज्ञोपवीतवान्।
जृम्भणो मोहनः स्तम्भी मारणः क्षोभण स्तथा।। 11

शुद्धनीलाञ्जन प्रख्यो दैत्यहा मुण्डभूषितः।
बलिभुग् बलिभुङ् नाथो बालो बालपराक्रमः।। 12

सर्वापत् तारणो दुर्गो दुष्ट भूत निषेवितः।
कामी कलानिधिः कान्तः कामिनी वशकृद् वशी।। 13

जगद् रक्षाकरो ऽनन्तो माया मन्त्रौ षधी मयः।
सर्वसिद्धिःप्रदो वैद्यः प्रभविष्णुः करोतु शम्।। 14
(इति रुद्रयामले भैरवस्तोत्रम्संपूर्णम्)

चतुष्षष्टि योगिनी नामानि

देवीनाम्नां अगस्त्यः- ऋषिः - महाविराट् छन्दः - चिन्तामणि विद्येश्वरी देवता। ऐं बीजं - शं शक्तिः - सौं कीलकं - महामाया प्रसादसिद्ध्यर्थे जपे विनियोगः।

दिव्ययोगी महायोगी सिद्धयोगी गणेश्वरी।
प्रेताशी डाकिनी काली कालरात्री निशाचरी। 1

झङ्कारी चोर्ध्ववेताळी ह्रीङ्कारी भूतडम्बरी।
उूर्ध्वकेशी विरूपाक्षी शुष्काङ्गी नरभोजिनी।। 2

राक्षसी घोररक्ताक्षी विश्वरूपी भयङ्करी।
चामुण्डी वीरकौमारी वाराही मुण्डधारिणी।। 3

भ्रामरी रुद्रवेताळी भीष्मरी त्रिपुरान्तकी।
भैरवी ध्वंसिनी क्रोधी दुर्मुखी प्रेतवाहिनी।। 4

खट्वाङ्गी दीर्घलम्बोष्ठी मालिनी मन्त्रयोगिनी।
कौशिकी मर्दिनी यक्षी रोमजङ्घा प्रहारिणी।। 5

कालाग्नि ग्रामणी श्चक्री कङ्काळी भुवनेश्वरी।
फट्कारी वीरभद्रेशी धूम्राक्षी कलहप्रिया।। 6

कण्टकी नाटकी मारी यमदूती कराळिनी।
सहस्राक्षी कामलोला काकदंष्ट्रा त्वधोमुखी।। 7

धूर्जटी विकटी घोरी कपाली विष लङ्घिनी।
चतुःषष्टि स्समाख्याताः योगिन्यो वर सिद्धिदाः।। 8

नित्यं स्मरण मात्रेण सर्व पापक्षयो भवेत्।।

चतुष्षष्टि योगिनी बलिमण्डलम्



चतुष्पष्टि योगिनी पूजा

प्रथमाष्टके

1. ओं जं जयाम्बायै नमः
2. ओं विं विजयाम्बायै नमः
3. ओं जं जयन्त्यम्बायै नमः
4. ओं अं अपराजिताम्बायै नमः
5. ओं दिं दिव्ययोगिन्यम्बायै नमः
6. ओं मं महायोगिन्यम्बायैनमः
7. ओं सिं सिद्धयोगिन्यम्बायै नमः
8. ओं गं गणेश्वरीयोगिन्यम्बायै नमः

द्वितीयाष्टके

9. ओं प्रें प्रेतासनाम्बायै नमः
10. ओं डां डाकिन्यम्बायै नमः
11. ओं कां काल्यम्बायै नमः
12. ओं कां कालराप्रयम्बायै नमः
13. ओं निं निशाचर्यम्बायै नमः
14. ओं टं टंकार्यम्बायै नमः

15. ओं वें वेताल्यम्बायै नमः
16. ओं हुं हुंकार्यम्बायै नमः

तृतीयाष्टके

17. ओं ऊं ऊर्ध्वकेशिन्यम्बायैनमः
18. ओं विं विरूपाक्ष्यम्बायै नमः
19. ओं शुं शुष्काङ्ग्यम्बायै नमः
20. ओं नं नरभोजिन्यम्बायै नमः
21. ओं फं फट्कार्यम्बायै नमः
22. ओं वीं वीरभद्रिण्यम्बायै नमः
23. ओं धूं धूम्राक्ष्यम्बायै नमः
24. ओं कं कलहप्रियाम्बायै नमः

तुरीयाष्टके

25. ओं रां राक्षस्यम्बायै नमः
26. ओं घों घोररक्ताक्ष्यम्बायै नमः
27. ओं विं विश्वरूपाम्बायै नमः
28. ओं अं अभयङ्कर्यम्बायै नमः
29. ओं वीं वीरकौमार्यम्बायै नमः
30. ओं चं चण्डिकाम्बायै नमः
31. ओं वां वाराह्यम्बायै नमः
32. ओं मुं मुण्डधारिण्यम्बायै नमः

पञ्चमाष्टके

33. ओं भं भैरव्यम्बायै नमः
34. ओं ध्वां ध्वाङ्क्षिण्यम्बायै नमः
35. ओं धूं धूम्राङ्ग्यम्बायै नमः
36. ओं प्रें प्रेतवाहिन्यम्बायै नमः
37. ओं खं खड्गिन्यम्बायै नमः
38. ओं दीं दीर्घलम्बोष्ठ्यम्बायै नमः
39. ओं मां मालिन्यम्बायै नमः
40. ओं मं मन्त्रयोगिन्यम्बायै नमः

षष्ठाष्टके

41. ओं कां काल्यम्बायै नमः
42. ओं चं चक्रिण्यम्बायै नमः
43. ओं कं कङ्काल्यम्बायै नमः
44. ओं भुं भुवनेश्वर्यम्बायै नमः
45. ओं त्रों त्रोटक्यम्बायै नमः
46. ओं मं महामार्यम्बायै नमः
47. ओं यं यमदूत्यम्बायै नमः
48. बों कं कराल्यम्बायै नमः

सप्तमाष्टके

49. ओं के केशिन्यम्बायै नमः
50. ओं मं मर्दिन्यम्बायैनमः
51. ओं रों रोमजङ्घ्यम्बायै नमः
52. ओं निं निर्वारण्यम्बायै नमः
53. ओं विं विशाल्यम्बायै नमः
54. ओं कां कार्मुक्यम्बायै नमः
55. ओं दीं दीर्घ्यम्बायैनमः
56. ओं अं अधोमुख्यम्बायै नमः

अष्टमाष्टके

57. ओं मुं मुण्डाग्रधारिण्यम्बायै नमः
58. ओं व्यां व्याघ्र्यम्बायै नमः
59. ओं कां काङ्क्षिण्यम्बायै नमः
60. ओं प्रें प्रेतरूपिण्यम्बायै नमः
61. ओं धूं धूर्जट्यम्बायै नमः
62. ओं धों धोर्यम्बायै नमः
63. ओं कं कराल्यम्बायै नमः
64. ओं विं विश्वलङ्घिन्यम्बायै नमः

इति योगिनीः संपूज्य - धूपदीपनैवेद्यबलिदानं च कृत्वा -आरात्रिकं विधाय - प्रार्थयेत्।।

श्री प्रत्यङ्गिराम्बाया: पूज्य महाचक्रस्वरूपे नवावरण देवतार्चन विवरणम् (खड्गमालामन्त्रोक्तम्)

	यन्त्रे रूपं	चक्रनाम	पूज्यदेवता:	मुद्राशक्ति:	भैरवाष्टगणनाम	योगिनीगणनाम
1.	त्रिचतुरश्ररूपं भूपुरत्मरूपं	त्रैलोक्यसर्व संमोहनचक्रं	वटुकेश्वर्यादय: ऐन्द्र्यादय: वज्रिण्यादय:	सर्वस्तम्भिनी मुद्राशक्ति:	नीलकण्ठादि भैरवा: शक्तय:	जयादियोगिन्य: प्रथमाष्टकोटियोगिनीवृन्दं
2.	त्रिवलयरूपं वृत्तत्रयरूपं	गुरुमण्डलात्मक सृष्टिचक्रम्	कौलानन्दादि गुरुमयीशक्तय:	सर्व संमोहिनी मुद्राशक्ति:	विश्वरूपादि भैरवा: शक्तय:	प्रेतासनादियोगिन्य: द्वितीयाष्टकोटियोगिनीवृन्दं
3.	षोडशदलरूपं	सर्वाकर्षणचक्रं	अष्टभैरवा: - अष्टमातृशक्तय:	सर्व संक्षोभिणी मुद्राशक्ति:	मेघनाथादि भैरवा: शक्तय:	ऊर्ध्वकेशिन्यादिशक्तय: तृतीयाष्टकोटियोगिनीवृन्दं
4.	अष्टदलरूपं	अन्तर्बहिर्महा शत्रुसंहारचक्रं	कामरूपपीठादि अष्टशक्तिपीठेश्वर्य:	सर्व विद्राविनी मुद्राशक्ति:	गदाधरादि भैरवा: शक्तय:	राक्षसीत्यादि अष्टौ तुरीयाष्टकोटियोगिनीवृन्दं

	यन्त्रे रूपं	चक्रनाम	पूज्यदेवता:	मुद्राशक्तिः	भैरवाष्टगणनाम	योगिनीगणनाम
5.	वृत्तमण्डलरूपं	सर्व स्थूल भैदनचक्रं	हेतुकादिदश भैरवशक्तय:	सर्व जृम्भिणी मुद्राशक्तिः	संहारभैरवादि भैरवा: शक्तय:	भैरवीत्यादि अष्टौ पञ्चमाष्टकोटियोगिनीवृन्दं
6.	द्विचतुरश्ररूपं अष्टयोनिरूपं	सर्व सूक्ष्म उच्चाटनचक्रं	स्तम्भिन्यादि अष्टमुद्राशक्तय:	सर्व बीज मुद्रा शक्तिः	कुलभैरवादि भैरवा: शक्तय:	कालीत्यादि शक्तय: षष्ठाष्टकोटियोगिनीवृन्दं
7.	षट्कोणरूपं	सर्वलयाङ्गचक्र	स्वामिन्यादि षडङ्गशक्तय:	सर्व संहारिणी मुद्रा शक्तिः	त्रिनेत्रभैरवादि भैरवा:शक्तय:	केशिन्यादि अष्टशक्तय: सप्तमाष्टकोटियोगिनीवृन्दं
8.	महायोनिरूपं त्रिकोणरूपं	सर्वतिरोधानचक्रं	मधुरकाली, भद्रकाली, नित्याकाली:108 काल्य:	सर्व योनि मुद्रा शक्तिः	ईश्वर भैरवादि भैरवा: शक्तय:	मुण्डाग्रधारिण्यादि अष्टमाष्टकोटियोगिनीवृन्दं
9.	महाबिन्दुरूपं मध्यबिन्दुरूपं	प्रत्यङ्गिराविद्याचक्रं	विजयवीरकालभैरवयुता नवकालीरूपाप्रत्यंगिरा	सर्व त्रिखण्डा मुद्रा शक्तिः	महाचतुष्षष्टि 64 भैरवा: शक्तय:	महाचतुष्षष्टियोगिन्य: कोटियोगिनीवृन्दम्


ह्रीं
ह्रीं

உ

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

शैवागमोक्ताः पूजा & होम विषयाः

विभागः - 13



शिवमयम्

श्री प्रत्यङ्गिरा शान्तिहोम प्रयोगः (शैवागमोक्तः)

कलशस्थापनम्

शुभाशा स्वग्निदेशे वा मण्डपे समलङ्कृते।
स्थण्डिलं तत्र सङ्कल्प्य तन्मध्ये विन्यसेद् घटम्।
परितःकलशा नष्टौ वस्त्र कूर्चादि संयुतान्।
विन्यस्य मध्यमे कुम्भे यजेत् प्रत्यङ्गिराह्वयम्।
वज्रादि परितः कृत्वा पूजयित्वा विशेषतः ।। (कामिकागमे)

शान्तिकार्चन काल विधिः (होम कालविधानम्)

परचक्र प्रमथने महाव्याधि प्रकोपने।
शान्तिके पौष्टिके वश्ये प्रायश्चित्ते विचिन्तयेत्।। (कामिके)

अर्चन विधिः

उत्तरे यागवेद्यां तु दशकुम्भान् न्यसेत् ततः।
प्रत्यङ्गिरां समभ्यर्च्य पीठं च विधि पूर्वकम्।
वज्रादि त्रिशिखान्तञ्च अर्चयित्वा विशेषतः।। (कारणागमे)

प्रत्यङ्गिरा पूजा प्रयोगः

अथ-आचार्यः - सर्वालङ्कारसंयुक्ते - मण्डपे – प्रकल्पितस्थण्डिले - सप्तधान्योपरि - सुवर्णादि विचित्रतर तन्तुभिर्वेष्टितां – स्वश्छ नदीसलिलैश्च पूरितां – कनकोत्पल रत्नौषध सुगन्ध परिमलद्रव्य एलालवङ्ग कुङ्कुम कर्पूरादि वासनारोपितां- चूतपत्र - सुकूर्च नाळिकेराच्छादितां – रक्तवस्त्र पुष्पमालादिभि रलङ्कृतां, ताम्रमयीं - वर्धनीं – लिखिताष्टदल पद्ममध्ये - कर्णिकायां संस्थाप्य – तत्परितः पूर्वाद्यष्टदिक्षु च अष्टकलशान् - कुम्भान् संस्थाप्य –पूजोपकरणान्युपाहृत्य – पूजा मारभेत्। तत्रायं क्रमः - पूर्वं - हरिद्राबिम्बे - गणेश्वर - मभ्यर्च्य – सङ्कल्प्य – विर्विघ्नं - संप्रार्थ्य - कलशतीर्थे - वरुण मभ्यर्च्य – पुण्याहं वाचयित्वा –भूतशुद्ध्यन्तर्यजन हवनादिना - शिवीभूय - पञ्चगव्यार्चनं विशेषार्घ्यंच विधाय – पुण्याह पञ्चगव्यार्घ्य जलैः -यागगृहं - अस्त्रेण संप्रोक्ष्य –

प्रधानकुम्भपूजा

ततः मध्यकुम्भे – षडुत्थासनपूर्वं स्थिरासनं संपूज्य- तदुपरि मध्ये - ओं हां प्रत्यङ्गिरास्त्रासनाय नमः - ओं हां प्रत्यङ्गिरास्त्रमूर्तये नमः - ध्यानम् –

सिंहीं सिंहमुखीं सखीं भगवतः पञ्चाननस्योल्लसत् –
शूल स्थूल कपाल पाश डमरून् व्यग्राग्र हस्ताम्बुजाम्।
दंष्ट्रा कोटि विशङ्कटास्य कुहरां आरक्त नेत्रत्रयीं -
ध्यायेत् शत्रु भया पहार निपुणां प्रत्यङ्गिरां भैरवीम्।। (शाक्ततन्त्रे)

यद्वा –ध्यानान्तरम् –

सिंह वक्रोग्र दंष्ट्राग्नि सप्रभोर्ध्व शिखान्विताम्।
कृष्णाजिन निभां वृत्त रक्त नेत्र त्रयान्विताम्।।
वहन्तीं सव्य हस्ताभ्यां शूलं डमरुकं परम्।
वहन्तीं वाम हस्ताभ्यां मुण्डं शेषे तु पल्लवम्।।
कृष्णाम्बर धरां सासृङ् मांसास्यां नर्तने रताम्।
मौक्तिका भरणै र्युक्तां सर्वा वयव भूषणाम्।।
अट्टहास खो पेतां कृष्णाजिन समन्विताम्।
रोग विघ्नारि संहर्त्रीं ध्यायेत् प्रत्यङ्गिरा महम्।। (कामिकागमे)

इति ध्यात्वा – ओं ह्रीं प्रत्यङ्गिरास्त्राय नमः। इति मूलमन्त्रेण ना = "ओं ह्रीं कृष्णवाससे – सिंहवदने – महावदने – महाभैरवि- सर्वशत्रुकर्म विध्वंसिनि – परमन्त्रच्छेदिनि - सर्वभूतदमनि – सर्वभूतान् बन्ध बन्ध- सर्व विघ्नान् छिन्धि छिन्धि – सर्वव्याधीन् निकृन्त निकृन्त – सर्वदुष्टान् भक्ष भक्ष – ज्वालाजिह्वे – कराळवक्त्रे कराळदंष्ट्रे प्रत्यङ्गिरे ह्रीं स्वाहा" – इति मूलेन वा आवाह्य –स्थापनादिकं कृत्वा- हृदयादि करान्त स्थानेषु - क्रमेण - अङ्गानि विन्यस्य तद्यथा– 1. ओं ह्रीं - कृष्णवाससे - हृदयाय हुंफण्णमः - 2. ओं सिंहवदने महावदने- महाभैरवि – शिरसे हुंफण्णमः 3. ओं सर्व शत्रुकर्म विध्वंसिनि - शिखायै हुंफण्णमः 4. ओं परमन्त्र च्छेदिनि – कवचाय हुंफण्णमः - 5. ओं सर्वभूतदमनि नेत्रभ्यो हुंफण्णमः 6. ओं सर्वभूतान् बन्ध बन्ध –सर्व विघ्नान् छिन्धिछिन्धि - सर्व व्याधीन् निकृन्त निकृन्त- सर्वदुष्टान् भक्षभक्ष – अस्त्राय हुंफण्णमः - इतिविन्यस्य - ओं – ज्वालाजिह्वायै विद्महे कराळ वक्त्रयै धीमहि तन्नो दंष्ट्री प्रचोदयात्। ओं प्रत्यङ्गिरे ह्रीं नमोस्तु ते - इति सावित्र्या शताक्षर्त्या च संपूज्य- मूलमन्त्रेण एकत्वं विधाय –अस्त्रेण संरक्ष्य –कवचेनावकुण्ठ्य - मूलेन अमृतमुद्रां धेनुमुद्रां दर्शयित्वा - व्याळ, बीज, त्रिशूल, त्रिखण्ड, योनि मुद्राः प्रदर्श्य - ततः - हृदा - नमोन्तमूलेन – ओं ह्रां ह्रीं प्रत्यङ्गिरास्त्रायनमः इति पादयोः प्रतिपादं सकृत्पाद्यं दत्वा – स्वधान्तमूलेन ओं ह्रीं प्रत्यङ्गिरास्त्राय स्वाधा इति वक्त्रे आचमनीयं-वौषडन्तमूलन ओं ह्रीं प्रत्यंगिरास्त्राय वौषट् इतिमन्त्रेण – पुष्पदूर्वाक्षतादि दद्यात्। रक्तचन्दनाक्षत दूर्वाश्रीपुष्प पत्र करवीरकुसुम रक्तदुकूलकञ्चुक मेखलोपवीत विचित्रवस्त्राणि मनसा भक्त्या भगवत्यै समर्प्य - तद्वामे - पीठशक्तिस्थाने - कुम्भे - पीठशक्तिं - सिंहं वा पूर्ववत् संपूजयेत्। ततः भगवतीं तत्वत्रयेन - पुष्पाञ्जलित्रयेनाभ्यर्च्य – पूर्ववत् आचमनार्घ्यौच दत्वा – महानैवेद्य आचमन ताम्बूलादिकं दत्वा – मूलमन्त्रजपं देव्यै वामहस्ते निवेद्य। लयाङ्गभोगाङ्गञ्चाभ्यर्च्य। ततः पूर्वादि अष्टदिक्षु स्थितेषु - अष्टकलशेषु पूर्वादि - क्रमेण - वज्रादीन् - आयुधान् पूजयेत्। तद्यथा=

परिवारकुम्भपूजा

पूर्वकुम्भे - ओं ह्रां वज्रासनाय हुंफण्णमः।
ओं ह्रां वज्रमूर्तये हुंफण्णमः। - ध्यानम् –
वज्रं तु पुरुषं स्थूलं दृढं कर्कश विग्रहम्।
बलिनं वज्रमूर्धानं दीप्तं प्राग् दिशि संस्थितम्।।
ओं ह्रां वज्राय हुंफण्णमः इत्यावाह्य अर्घ्यं दत्वा –
सर्वोपचारै स्संपूज्य प्रीत्यै - वज्रमुद्रां दर्शयेत्।।

आग्नेयकुम्भे – ओं हां शक्त्यासनाय हुंफण्णमः।

ओं हां शक्तिमूर्तये हुंफण्णमः। ध्यानम् -

शक्तिंच योषिदाकारा माग्नेय्यां दिशि लोहिताम्।

बिभ्राणां शिरसा शक्तिं त्रिकोणस्थां उपाश्रये।।

ओं हां शक्तये हुंफण्णमः इतिमूलेनावाह्य – अर्घ्यं दत्वा –

गन्ध पुष्पाक्षतैः सर्वोपचारै रभ्यर्च्य – शक्तिमुद्रां दर्शयेत्।

उदषिणकुम्भे – ओं दण्डासनाय हुंफण्णमः।

ओं हां दण्डमूर्तये हुंफण्णमः। ध्यानम् –

दण्डञ्च दक्षिणे भागे कृष्णं पुरुषविग्रहम्।

दण्डालङ्कृत मूर्धानं वन्दे लोहित लोचनम्।।

ओं हां दण्डाय हुंफण्णमः। इतिमूलेनावाह्य – अर्घ्यंदत्वा –

गन्ध पुष्पाक्षतै स्सर्वोपचारै रभ्यच्य तृप्त्यै – दण्डमुद्रां दर्शयेत्।

नैरृतकुम्भे – ओं हां खङ्गासनाय हुंफण्णमः।

ओं हां खङ्गमूर्तये हुंफण्णमः। ध्यानम् –

नैरृत्यां पुरुषाकारं खङ्गं श्याम प्रभान्वितम्।

खङ्गा लङ्कृत मूर्धानं क्रुद्धं क्रूर दृशं भजे।।

ओं हां खङ्गाय हुंफण्णमः इत्यावाह्य –अर्घ्यंदत्वा –

गन्धपुष्पाक्षतैः सर्वोपचारै रभ्यर्च्य - प्रीत्यै खङ्गमुद्रां दर्शयेत्।।

पश्चिम कुम्भे - ओं हां पाशासनाय हुंफण्णमः।

ओं हां पाशमूर्तये हुंफण्णमः।। ध्यानम् –

नाभ्यधो भुजगाकारं तदूर्ध्वं पुरुषा कृतिम्।

पाशं सप्त फणोपेत मूर्धानं पश्चिमे भजे।।

ओं हां पाशाय हुंफण्णमः अत्यावाह्य – अर्घ्यं दत्वा –

गन्धपुष्पाक्षतैः सर्वोपचारैरभ्यर्च्य –प्रीत्यै पाशमुद्रां दर्शयेत्।

वायव्यकुम्भे – ओं हां ध्वजासनाय हुंफण्णमः।
ओं हां ध्वजमूर्तये हुंफण्णमः।। ध्यानम् –
ध्वजं तु पुरुषं पीतं व्यावृतास्यं महाभुजम्।
प्रपद्ये वायुदिग्भागे ध्वजमूर्धान मन्वहम्।।

ओं हां ध्वजाय हुंफण्णमः इत्यावाह्य – अर्घ्यं दत्वा –
गन्धपुष्पाक्षतैः सर्वोपचारैरभ्यर्च्य –ध्वजमुद्रां दर्शयेत्।

उत्तरकुम्भे- ओं हां गदासनाय हुंफण्णमः।
ओं हां गदामूर्तये हुंफण्णमः। ध्यानम् -
गदां पीतप्रभां कन्यां आपीन जघन स्थलाम्।
गदाकार शिरोयुक्तां उत्तरस्यां नतोऽस्म्यहम्।।

ओं हां गदायै हुंफण्णमः इत्यावाह्य –अर्घ्यं दत्वा-
गन्धपुष्पाक्षतैः सर्वोपचारैरभ्यर्च्य – गदामुद्रां दर्शयेत्।

ऐशान्यकुम्भे – ओं हां त्रिशूलासनाय हुंफण्णमः
ओं हां त्रिशूलमूर्तये हुंफण्णमः। ध्यानम् –

त्रिशूलं पुरुषाकारं दिव्यं श्याम कळेबरम्।
त्रिशूलशिरसं शश्वत् नमा मीशान दिक्स्थितम्।।

ओं हां त्रिशूलाय हुंफण्णमः इत्यावाह्य – अर्घ्यं दत्वा –
गन्ध पुष्पाक्षतैः सर्वोपचारै रभ्यर्च्य – शूलमुद्रां दर्शयेत्।

एतेषां दिगीशहेतीनां धूपदीपाचमनार्घ्यंच दत्वा – फलताम्बूलादिकं निवेद्य – पुनः देवीं मूलेन संपूज्य – तां अष्टपुष्पिकयाभ्यर्च्य आरात्रिकं विधाय – मूलमन्त्रजपं समर्प्य देव्यै – अग्निकार्यंकरोमीति विज्ञाप्य आज्ञां - प्रार्थ्य लब्धानुज्ञः अग्निकार्यं कुर्यात्।।

प्रत्यङ्गिरा होमः

प्रत्यङ्गिरायाः अग्रे -वृत्तकुण्डे वा स्थण्डिले वाकुण्डसंस्कारादिकं विधाय - तत्र - शिवाग्निंपरिकल्प्य -स्रुक्स्रवाज्यसंस्कारादिकं विधाय- वह्निमध्ये – पूर्ववत् भगवतीं प्रत्यङ्गिरां सर्वोपचारै स्संपूज्य। चरुहवन प्रायश्चित्तान्त कर्म निर्वृत्य – प्लक्षादिभिः अपामार्ग शमी पलाश वटाश्वत्थ बिल्वखादिरोदुम्बर कुशदूर्वा वकुलवेण्वादिभिः - समिद्भिः - गव्याज्यसिक्त तिलदूर्वाक्षीर चरु मधुत्रय फलत्रय सितसर्षप लवङ्ग जातीपत्र श्रीगन्ध कुङ्कुम गोरोचनाद्यैः - शतं शतं - पञ्चशतं - अष्टाविंशतिवारं वा - प्रत्येकं - तत्तन्मन्त्रेण एतैर्जुहुयात्। (ओं आं ईं ऊं रुदफास्थिश्रृङ्खले सुवृत्तिते नमस्स्वाहा) यद्वा(ओं ह्रींकृष्णवाससे ...... प्रत्यङ्गिरे ह्रीं नमोस्तुते स्वाहा) इति जुहुयात्)

अन्यद्रव्याणि श्रीपत्रादीनि प्रत्यङ्गिरामूलमन्त्रेण हुनेत्। द्रव्यान्ते व्याहृतिं हुत्वा – देव्याः - हृदयादि षडङ्गमन्त्रैः - प्रत्येकं शतं हुत्वा – वज्रादीनां पृथक् पृथक् दशाहुतीर्हुत्वा – अस्त्रेण प्रायश्चित्ताहुतिशतं हुत्वा तन्मन्त्रेण पूर्णाहुतिं दद्यात्। ततः धूपदीपौ दत्वा – अग्निस्थमूर्तिं कुम्भे समारोप्य – देवि प्रत्यङ्गिरे भगवति दोषशान्तिं कुरुकुरु इति विज्ञाप्य – अग्निं सन्तोष्य – शिवाग्निं विसृज्य – भस्मरक्षां स्वीकृत्य – मूलमुच्छरन् - पूजित - तत्कुम्भस्थ तोयैः - त्रिविधलिङ्गशुद्धयर्थं अभिषिञ्चेत्। प्रायश्चित्तविषये - तत्कुम्भस्थमूर्तिं बिम्बे स्वद्वादशान्ते वा संयोजयेत्।। इतिशिवम्।।

होमो वा समिदन्नाज्यैः कुम्भसंस्थापनं विना।
कर्तव्यं शान्तिहोमं च शान्त्युक्त दिन सङ्ख्यया।।

इति वचनप्रकारेण - महाकुम्भस्थापनं हित्वा होममात्रं वा कुर्यादिति।

शान्तिहोमकारिका

एवं शान्ति स्समादिष्टा नवधा सा समीरिता।
एक त्रि पञ्च सप्ताहैः नवाहैश्च द्विसप्तकैः।।
पक्ष त्रिपक्ष नक्षत्रैः अविच्छिन्ना यतस्ततः।
शान्ति रेवं समाख्याता शान्ति होमो विधीयते।। (कामिके)

नित्यहोमं विशेषेण दिनं प्रति दिनं प्रति।
कुण्डसंस्कार मेवोक्तं पूर्वोक्त विधिना हुनेत्।
पूर्वादिषु चतुर्दिक्षु मध्ये चैव विशेषतः।
अष्टाविंशति तन्त्रञ्च कामिकादि जपेत् ततः।
पञ्चब्रह्मं जपेत् चैव ऋग्वेदादीन् जपेत् ततः।
स्तोत्रपाठं तु मध्ये च गीत नृत्तै स्समन्वितम्। (उत्तरकागमे)

एवं शैवागमोक्तप्रकारेण – बहुदिवसपक्षे - शान्तिकदिनसङ्ख्या – कामिकादितन्त्रपठनादिकं च पूर्ववत् कारयित्वा – ब्राह्मणान् भोजयेत्।।

इति सिद्धान्तशैवागमोक्तः शान्तिहोमप्रयोगः संपूर्णः।

याश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गला।
तयोस्सं स्मरणात् पुंसां सर्वतो जय तङ्गलम्।।
ओं शान्तिः शान्तिः शान्तिः।।

प्रत्यङ्गिरा शान्तिक नवाग्नि यज्ञम्

प्रत्यङ्गिरा यागक्रमः
(षड्विधद्रव्यैः षड्वार शताहुति क्रमः)

प्रथमवार शताहुतिक्रमः

प्रथमवारे - विहितसमिद्भिः अष्टोत्तरशताहुती र्जुहुयात् ।
शताहुतिविधौ – अपामार्गसमिद्भिः - (नवयोनिकुण्डेषु – नवविध समिद्भिर्वा –) शताहुतीः निर्दिष्टसंख्यांवा हुत्वा – अन्तेकाम्यलाहुतिंहुत्वां - भगवतीं - शान्तिं प्रार्थयेत्।।प्रतिशताहुति संख्यान्ते मनसा - प्रस्तुति प्रणति प्रार्थनाश्च विदध्यात्।। (प्रतिशताहुत्यन्ते - फलप्रार्थनाविशिष्ट विशेष फलाहुतिं दद्यात् - तद्यथा - ततो लाजपुष्पाञ्जलिकरस्सन् - मूलमन्त्रमुच्छरन् - दद्यात्।)

काम्यफलाहुति मन्त्रः

जयन्ति मङ्गळा काळि भद्रकाळि कपालिनि।
दुर्गा क्षमा शिवा धात्रि स्वधा स्वाहा नमोऽस्तु ते।।

ओं ह्रीं - नमो भगवति – प्रत्यङ्गिरे - सर्वक्षोभनाशं कुरु कुरु - सर्वशत्रुनाशं कुरु कुरु - सर्व पापनाशं कुरु कुरु - सर्वदोष शान्तिं कुरु कुरु - सर्वसम्पत् समृद्धिं कुरु कुरु - तुष्टिं कुरु - पुष्टिं कुरु – वृद्धिं कुरु - सिध्दिं कुरु -सर्वसौभाग्यं कुरु कुरु स्वाहा।।

इति फलाहुतिं दत्वा – देव्यै प्रस्तुतिं कुर्यात्।।

प्रस्तुतिः

श्यामाभां दवेहस्तां त्रिनयन लसितां सिंह वक्रोर्ध्वकेशीं -
शूलं मुण्डं च सर्पं डमरु भुज युतां कुन्तला दुग्र दंष्ट्राम्।
रक्ते ष्वालीड जिह्वां ज्वल दनल़ गायत्रि सावित्रि युक्तां -
ध्यायेत् प्रत्यङ्गिरां तां मरण रिपु विष व्याधि दारिद्र्य नाशाम्।।

दंष्ट्रा कराळ वदने शिरोमाला विभूषणे।
चामुण्डे मुण्ड मथने नारायणि नमोस्तु ते।

इति स्तुत्वा - स्वहृदये – अञ्जलिमुद्रया - प्रणतिं कुर्यात्

प्रणतिः

तापिञ्छ स्निग्धवर्णां दशशत वदनां चन्द्ररेखा वतंसां -
हर्यक्ष स्कन्धरूढां द्विदश शतभुजां हाटवासो वृताङ्गीम् ।
ध्याये ऽहं वैरिलोक द्रुदन परिनतां क्रीड दालोल जिह्वां -
देवीं क्रीडा सुमेतां प्रणत भयहरां रक्षिता शेष लोकाम् ।।

कालि कालि महाकालि कालिके पापनाशिनि।
काली कराली निष्क्रान्ते कालिके त्वां नता वयम्।।

ज्वाला कराळ मत्युग्रं अशेषासुर सूदनम् ।
त्रिशूलं पातु नो भीतेः भद्रकालि नमोस्तु ते ।।

- इति प्रणम्य - मनसा अभीष्ट प्रार्थनां कुर्यात् -

प्रार्थना :-

खड्ग शूल गदादीनि यानि चास्त्रानि ते ऽम्बिके।
करपल्लव संगीनि तै रस्मान् रक्ष सर्वतः।।

खड्गं कपालं डमरुं त्रिशूलं - सं बिभ्रतीं चन्द्रकला वतंसाम्।
पिङ्गोर्ध्व केशीं सित भीम दंष्ट्रां - भूयात् विभूत्यै मम भद्रकाळी।।

द्वितीयवार शताहुतिक्रमः

द्वितीयवारे - विहितान्न कृसरान्न - भक्ष्य भोज्यैः - दधि, मधु, घृत, तिल मिश्रैः - गुलान्नादि

विविधान्नवर्गैः शताहुती निर्दिष्टसङ्ख्यांवाहुत्वाअन्ते

प्रतिशताहुत्यन्ते प्रार्थनाविशिष्ट विशेषफलाहुतिं दद्यात्-)तद्यथा -

(प्रति शताहुत्यन्ते प्रार्थनाविशिष्ट विशेषद्रव्य फलाहुतिमन्त्रः पूर्ववत्)

काम्य फलाहुति मन्त्रः

जयन्ति मङ्गळा काळि भद्रकाळि कपालिनि।
दुर्गा क्षमा शिवा धात्रि स्वधा स्वाहा नमोस्तु ते।।

ओं ह्रीं नमो भगवति – प्रत्यङ्गिरे - सर्वक्षोभनाशं कुरु कुरु - सर्वशत्रुनाशं कुरु कुरु - सर्व पापनाशं कुरु कुरु - सर्वदोष शान्तिं कुरु कुरु - सर्वसम्पत् समृध्दिं कुरु कुरु - तुष्टिं कुरु – पुष्टिं कुरु - वृध्दिं कुरु – सिध्दिं कुरु - सर्वसौभाग्यं कुरु कुरु स्वाहा ।।

इति फलाहुतिं दत्वा - देव्यै प्रस्तुतिं कुर्यात् -

प्रस्तुतिः

सिंहारूढा ऽति कृष्णां त्रिभुवन भयकृत् रूपमुग्रं वहन्ती -
ज्वालावक्त्रा वसाना नववसन युगं नील मण्याभ कान्तिः।
शूलं खड्ग वहन्तीं निजकर युगळे भक्त रक्षैक दक्षा -
सेयं प्रत्यङ्गिरा सं क्षपयतु रिपुभिः निर्मितं वो ऽभिचारम् ।।

सर्वमङ्गळ माङ्गळ्ये शिवे सर्वार्थ साधिके।
शरण्ये त्र्यम्बिके गौरि नारायणि नमोऽस्तु ते।।

इतिस्तुत्वा -स्वहृदये - अञ्जलिमुद्रया प्रणतिंकुर्यात् -

प्रणतिः

उद्धतौ मधु कैटभौ महिषासुरं च निहत्य तं।
धूम्रलोचन चण्ड मुण्डक रक्तबीज मुखांश्च तान्।।
दुष्ट शुम्भ निशुम्भ मर्दिनि नन्दितामर वन्दिते-
विष्टप त्रय तुष्टि कारिणि भद्रकाळि नमो ऽस्तु ते।।

इति प्रणम्य मनसा अभीष्ट प्रार्थनां कुर्यात् -

प्रार्थना -

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टा स्वनेननः पाहि चाप ज्या निस्वनेन च।।

भुजै श्चतुर्भि धृंत तीक्ष्ण बाण - धनु र्वरा भीश्च शवाङ्घ्रि युग्मा।
रक्ताम्बरा रक्त तनु स्त्रिनेत्रा – प्रत्यङ्गिरेयं प्रणतं पुनातु।।

तृतीयवार शताहुतिक्रमः

तृतीयवारे- विहित कपिलायाः - गोसर्पिषा शताहुतीः निर्दिष्टसङ्ख्यां वा हुत्वा - अन्ते - काम्यफलाहुतिं हुत्वा - भगवतींशान्तिं - प्रार्थयेत् -प्रतिशताहुति - सङ्ख्यान्ते मनसा प्रस्तुति - प्रणतिप्रार्थनाश्च विदध्यात्।।

काम्य फलाहुति मन्त्रः

जयन्ति मङ्गला काळि भद्रकाळि कपालिनि।
दुर्गा क्षमा शिवा धात्रि स्वधा स्वाहा नमोस्तु ते।।

ओं ह्रीं नमो भगवति – प्रत्यङ्गिरे - सर्वक्षोभनाशं कुरु कुरु - सर्वशत्रुनाशं कुरु कुरु - सर्व पापनाशं कुरु कुरु - सर्वदोष शान्तिं कुरु कुरु - सर्वसम्पत् समृध्दिं कुरु कुरु - तुष्टिं कुरु – पुष्टिं कुरु - वृध्दिं कुरु – सिध्दिं कुरु - सर्वसौभाग्यं कुरु कुरु स्वाहा ।।

इति फलाहुतिंदत्वा - देव्यै प्रस्तुतिं कुर्यात्।

प्रस्तुतिः

कालाभ्रां श्यामलाङ्गीं विगळित चिकुरां खड्ग मुण्डा भिरामां -
त्रास्य त्राणेष्ट दात्रीं कुणप गण शिरो मालिनीं दीर्घ नेत्राम् ।
संसार स्यैक सारां भव जनन हरां भावितो भावनाभिः -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने कामरूपे कराळे ।।

इतिस्तुत्वा- स्वहृदये अञ्जलिमुद्रया-प्रणतिंकुर्यात्

प्रणतिः

क्षुत्श्यामां कोटराक्षीं प्रळय घनघटां घोररूपां प्रचण्डां -
दिग्वस्त्रां पिङ्ग केशीं डमरु सृणि धृतां खड्ग पाश भयानि।
नागं घण्टां कपालं कर सरसि रुहैः काळिकां कृष्णवर्णां -
ध्यायामि ध्येयमानां सकल सुखकरीं काळिकां तां नमामि।।

सर्वस्य बुद्धि रूपेण जनस्य हृदि सं स्थिते ।
स्वार्गा पवर्गदे देवि नारायणि नमोस्तु ते ।।

प्रत्यङ्गिरे नम स्तुभ्यं सर्व शत्रु विनाशिनि।
भद्रं प्रयच्छ शीघ्रं मे भद्र काळि नमोस्तु ते।।

इतिप्रणम्य -मनसा-अभीष्टप्रार्थनां कुर्यात् -

प्रार्थना

सौंयानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यन्त घोराणि तै रस्मान् रक्ष सर्वतः।।

दुर्गा शूलिनि जातवेदसि महा शात्याह्वये शाबरि -
ज्वाला दुर्गि वरा भिदे लवणगे दीपा भिधे ह्यासूरी ।
एह्यम्बे पुरतो ममा द्य भय कृत् रोगारि पीडा दिमान् -
विध्वस्तान् कुरु देहि सौख्य मतुलं भक्तिं तथा ऽव्याहताम् । ।

तुरीयवार शताहुतिक्रमः

चतुर्थवारे – तिलमाषादि कृष्णधान्यैः शताहुतीःनिर्दिष्टसङ्ख्यां वा हुत्वा -अन्ते काम्यफलाहुतिं हुत्वा -भगवतीं शान्तिं प्रार्थयेत् -प्रतिशताहुति सङ्ख्यान्ते मनसा -प्रस्तुतिप्रणतिप्रार्थनाश्चविदध्यात्।

काम्य फलाहुति मन्त्रः

जयन्ति मङ्गळा काळि भद्रकाळि कपालिनि।
दुर्गा क्षमा शिवा धात्रि स्वधा स्वाहा नमोस्तु ते।।

ओं ह्रीं नमो भगवति – प्रत्यङ्गिरे - सर्वक्षोभनाशं कुरु कुरु - सर्वशत्रुनाशं कुरु कुरु - सर्व पापनाशं कुरु कुरु - सर्वदोष शान्तिं कुरु कुरु - सर्वसम्पत् समृध्दिं कुरु कुरु - तुष्टिं कुरु – पुष्टिं कुरु - वृध्दिं कुरु – सिध्दिं कुरु - सर्वसौभाग्यं कुरु कुरु स्वाहा ।।

इतिफलाहुतिं दत्वा-देव्यै प्रस्तुतिं कुर्यात् -



प्रस्तुतिः

गळद् रक्त मुण्डा वळी कण्ठ माला –
महा घोर रावा सुदंष्ट्रा कराळा।
विवस्त्रा श्मशाना लया मुक्त केशी -
महा काल कामा कुला काळि केयम्।।

दंष्ट्रा कराळ वदने शिरो माला विभूषणे।
चामुण्डे मुण्ड मथने नारायणि नमो स्तुते।।

इति स्तुत्वा स्वहृदये अञ्जलिमुद्रयाप्रणतिं कुर्यात्।

प्रणतिः

मेघाङ्गीं शशि शेखरां त्रिनयनां आनन्द सं वर्दिनीं -
नग्नां वा नृकरां वरां शव शिवा रूढाति तीव्रा रतिम्।
कालस्या वृत्यांकुशं प्रमथतीं सव्ये ह्यभीतिं वरं -
दक्षाधोर्ध्वे कराम्बुजे नर शिरः खड्गं वहन्तीं भजे।।

इति प्रणम्य - मनसा - अभीष्टप्रार्थनां कुर्यात् -

प्रार्थना

श्यामा वत्सतया करोतु कुशलं तारा तनोतु श्रियं -
दीर्घायु र्भुवनेश्वरी वितनुतां विघ्नं हरेत् षोडशी।
भैरव्यस्तु कुला वहा रिपु कुलं सा छिन्नमस्ता हरेत् -
मातङ्गी भगळा मुखी च कमला धूमावती पातु नः।।

सर्वा बाधा प्रशमनं त्रैलोक्यस्या खिलेश्वरि।
एव मेव त्वया कार्यं अस्म द्वैरि विनाशम्।।

पञ्चमवार शताहुति क्रमः

पञ्चमवारे- कन्द मूल फल शाखादिभिः शताहुतीं निर्दिष्ट सङ्ख्यां वा हुत्वा - अन्ते- काम्यफलाहुतिं हुत्वा - भगवतीं शान्तिं प्रार्थयेत् - प्रतिशताहुति सङ्ख्यान्ते -मनसा प्रस्तुति प्रणति प्रार्थनाश्च विदध्यात्।

काम्य फलाहुति मन्त्रः

जयन्ति मङ्गळा काळि भद्रकाळि कपालिनि।
दुर्गा क्षमा शिवा धात्रि स्वधा स्वाहा नमोस्तु ते।।

ओं ह्रीं नमो भगवति – प्रत्यङ्गिरे - सर्वक्षोभनाशं कुरु कुरु - सर्वशत्रुनाशं कुरु कुरु - सर्व पापनाशं कुरु कुरु - सर्वदोष शान्तिं कुरु कुरु - सर्वसम्पत् समृध्दिं कुरु कुरु - तुष्टिं कुरु – पुष्टिं कुरु - वृध्दिं कुरु – सिध्दिं कुरु - सर्वसौभाग्यं कुरु कुरु स्वाहा ।।

इति फलाहुतिं दत्वा - देव्यै - प्रस्तुतिं कुर्यात् -

प्रस्तुतिः

मेघाङ्गीं शशिशेखरां त्रिनयनां रक्ताम्बरं बिभ्रतीं -
पाणिभ्या मभयं वरं च विलस द्रक्तार विन्द स्थिताम्।
नृत्यन्तं पुरतो निपीय मधुरं माध्वीक मद्यं महा -
कालं वीक्ष्य विकासिताननवरां आद्यां भजे कालिकाम् ।।

श्री विद्यां मधुरां काळीं महा प्रत्यङ्गिरां शुभाम्।।
कपाल शूल डमरून् नाग पाशं च बिभ्रतीम्।
सिंहा रूढां ज्वल जिह्वां सर्व सौभाग्य दायिनीम्।
शान्त्यतीतां सदा ध्यायेत् सादाख्य निधि सिद्धये।।

इति स्तुत्वा स्वहृदये अञ्जलिमुद्रया प्रणतिं कुर्यात् -

प्रणतिः

काल पावक सन्निभां कलि तार्ध चन्द्र शिरोरुहां -
फाल नेत्र विभूषणां भय दायि सिंह निषेदुषीम् ।
चक्र शंख कृपाण खेटक चाप बाण करोटिका -
शूल वाहि भुजां भजे विजिता खिला ऽसुर सैनिकाम् ।।

इति प्रणम्य - मनसा - अभीष्टप्रार्थनां कुर्यात् -

प्रार्थना

या माया मधु कैटभ प्रमथिनी या माहिषो न्मूलिनी -
या धूम्रेक्षण चण्ड मुण्ड मथिनी या रक्तबीजाशनी।
शक्तिश्शुम्भ निशुम्भ दुष्ट दळनी या सिद्धि लक्ष्मीः परा -
सा दुर्गा नवकोटि शक्ति सहिता मां पातु विश्वेश्वरी ।।

रूपं देहि जयं देहि यशो देहि द्विषो जहि।
देहि सौभाग्य मारोग्यं देहि मे परमं सुखम्।।

षष्टवार शताहुतिक्रमः

६) षष्टवारे – सुगन्धपरिमल विशेषद्रव्यैः औषधैः शताहुतीः - निर्दिष्टसङ्ख्यां वा हुत्वा - अन्ते - काम्यफलाहुतिं हुत्वा -भगवतीं शान्तिं प्रार्थयेत् - प्रति शताहुतिसङ्ख्यान्ते - मनसा -प्रस्तुति प्रणतिप्रार्थनाश्चविदध्यात्।

काम्य फलाहुति मन्त्रः जयन्ति मङ्गळा काळि भद्रकाळि कपालिनि।
दुर्गा क्षमा शिवा धात्रि स्वधा स्वाहा नमोस्तु ते।।

ओं ह्रीं नमो भगवति – प्रत्यङ्गिरे - सर्वक्षोभनाशं कुरु कुरु - सर्वशत्रुनाशं कुरु कुरु - सर्व पापनाशं कुरु कुरु - सर्वदोष शान्तिं कुरु कुरु - सर्वसम्पत् समृध्दिं कुरु कुरु - तुष्टिं कुरु – पुष्टिं कुरु - वृध्दिं कुरु – सिध्दिं कुरु - सर्वसौभाग्यं कुरु कुरु स्वाहा ।।

इति फलाहुतिंदत्वा - देव्यै - प्रस्तुतिं कुर्यात् -

प्रस्तुतिः त्वं भूमि स्त्वं जलं च त्व मसि हुतवह स्त्वं जगद् वायु रुपा -
त्वं चाकाशं मनश्च प्रकृति रसि महत् पूर्विका ऽपूर्व पूर्वा ।
आत्मा त्वं चासि मातः पर मसि भवती त्वत् परं नैव किञ्चित -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने कामरुपे कराळे ।।

भजे वाम युग्मे शिरो ऽसिं दधाना
वरं दक्ष युग्मे ऽभयं वै तथैव।
सुमध्याऽपि तुङ्ग स्तना भार नम्रा
लसत् रक्त सृक्क द्वया सु स्मितास्या।।

इति स्तुवा स्वहृदये अञ्जलिमुद्रया प्रणतिं कुर्यात् -

प्रणतिः सद्यः छिन्न शिरः कृपाण मभयं हस्तै र्वरं बिभ्रतीं -
घोरास्यां शिरसां स्त्रजा सुरुचिरां उन्मुक्त केशावळिम्।
सृक्का सृक्प्रवहां श्मशान निलयां श्रुत्योः शवा लंकृतिं -
श्यामाङ्गीं कृत मेखलां शवकरैः देवीं भजे कालिकाम्।।

इति प्रणम्य - मनसा - अभीष्टप्रार्थनां कुर्यात्-

प्रार्थना ब्रह्माणी कमलेन्दु सौम्य वदना माहेश्वरी लीलया -
कौमारी रिपु दर्प नाशन करी चक्रा युधा वैष्णवी।
वाराही घन घोर घर्गर मुखी दंष्ट्री च वज्रा युधा -
चामुण्डा गणनाथ रुद्र सहिता रक्षन्तु वो मातरः।।

दशदिक्षु बलिहरणमन्त्रः (अष्टषष्ट्यर्णमन्त्रः६८)

ओं यो मे पूर्वगतः पाप्मामपकेनेह कर्मणा - इन्द्रः

तं देवराजो जंभयतुस्तंभयतुमोहयतुमारयतु नाशयतुक्लेशयतुशोषयतु भ्रामयतु - कलिं तस्मै प्रयच्छतु - कृतं मम शिवं – मम शुभं - मम शान्तिं - मम स्वस्त्ययनं चास्तु भद्रं नो अभिवादये नमः मरुता मोजसे स्वाहा - अनेनमन्त्रेण प्राच्यां बलिं दद्यात्।।

एवमेव अन्यासुदिक्षु चतत्तन्नाम्ना प्रस्तुत्य बलिंदद्यात् - तद्यथा -

संख्या	दिशादिक्	दिङ्मुखं	दिगीशः	शत्रुः	राज्याधिकारी	प्रार्थनाकृत्यम्
1.	पूर्वे प्राच्यां	पूर्वगतः	इन्द्रः	तं रिपुं	देवराजा	रिपुंहरतु मामवतु
2.	दक्षिणपूर्वायां	अग्निगतः	अग्निः	तं रिपुं	तेजो राजा	रिपुंहरतु मामवतु
3.	दक्षिणे अवाच्यां	दक्षिणगतः	यमः	तं रिपुं	धर्म राज	रिपुंहरतु मामवतु
4.	दक्षिण पश्चिमायां	निंर्ऋतिगतः	निर्ऋृतिः	तं रिपुं	रक्षो राज	रिपुंहरतु मामवतु
5.	पश्चिमे प्रतीच्यां	पश्चिमगतः	वरुणः	तं रिपुं	जल राज	रिपुंहरतु मामवतु
6.	उत्तरपश्चिमायां	वायुगतः	वायुः	तं रिपुं	प्राण राजा	रिपुंहरतु मामवतु
7.	उत्दीच्यां उत्तरे	उत्तरगतः	सोमः	तं रिपुं	ओषधि राजा	रिपुंहरतु मामवतु
8.	ऐशान्यां	ईशानगतः	ईशानः	तं रिपुं	विद्या राजा	रिपुंहरतु मामवतु
9.	स्वर्गे ऊर्ध्वेलाके	ऊर्ध्वलोगतः	ब्रह्मा	तं रिपुं	लोक राजा	रिपुंहरतु मामवतु
10.	अधोलोकगतः	विष्णुः	(अनन्तः)	तं रिपुं	नाग राजा	रिपुंहरतु मामवतु
11.	अन्तरालेषु अवान्तरेषु	अवान्तरदिग्गतः	परब्रह्मा	तं रिपुं	देव राजा	रिपुंहरतु मामवतु

७

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

प्रत्यङ्गिराकाली स्तोत्रभागः

विभागः - 14

प्रत्यङ्गिरा स्तोत्रम्

(कुब्जिका शूलपाणि तन्त्रस्थम्)

अस्य श्री प्रत्यङ्गिरास्तोत्र महामन्त्रस्य वामदेव ऋषिः । अनुष्टप् छन्दः । श्री प्रत्यङ्गिरा देवता ॥ क्षं बीजं । फट् शक्तिः । स्वाहा कीलकम् ॥ श्री महाप्रत्यङ्गिरादेवी प्रसादसिध्यर्थे जपे विनियोगः ॥

करन्यासः	अङ्गन्यासः
ओं क्षां अंगुष्ठाभ्यां नमः	ओं क्षां हृदयाय नमः
ओं क्षीं तर्जनीभ्यां नमः	ओं क्षीं शिरसे स्वाहा
ओं क्षूं मध्यमाभ्यां नमः	ओं क्षूं शिखायै वषट्
ओ क्षैं अनामिकाभ्यां नमः	ओं क्षैं कवचाय हुं
ओं क्षौं कनिष्ठिकाभ्यां नमः	ओं क्षौं नेत्रत्रायाय वौषट्
ओं क्षः करतलकरपृष्ठाभ्यां नमः	ओं क्षः अस्त्राय फट्

ओं –भूर्भस्वरोमिति दिग्बन्धः - **ध्यानम्**

ध्यायेत् समस्त शत्रुघ्नीं सर्वसौख्य दयालयाम् ।
कालीं कङ्काल वदनां काल जीमूत सन्निभाम्॥
भीम दंष्ट्रां ज्वलन्नेत्रीं भूयो ज्वाला शिखोज्वलाम्।
अष्ट नाग कृता कल्पां अष्ट दिग्पूर्ण विग्रहाम्॥
सहस्त्र भुज दण्डोध्यत् सहस्त्रायुध शोभिताम्।
विभ्रतीं किंकिणी मालां आपाद दल लंबिकाम्॥
समस्त शत्रु रुधिर पानोन्मत्तां परां शिवाम्।
एवं ध्यात्वा महाकृत्यां जपेन्मन्त्रं यथा विधि॥

ऊर्ध्वं कपालं डमरुं त्रिशूलं
संबिभ्रतीं चन्द्रकला वतंसाम्।
पिङ्गोर्ध्व केशीं सित भीम दंष्ट्रां
भूया द्विभूत्यै मम -दरकाळी ॥

सिंहीं सिंहमुखीं सखीं भगवतः श्री भैरवोल्लसत् ।
शूलस्थूल कपाल पाशडमरुव्याघ्राग्र हस्ताम्भुजाम्।
दंष्ट्राकोटि विशंकटास्य कुहरा मारक्त नेत्रत्रयां
बालेन्दु ज्वल मौलिकां भगवतीं प्रत्यङ्गिरां भावये॥

इतिध्यात्वा - लमित्यादि पञ्चोपचार पूजां कृत्वा - स्तोत्रंप्रपठेत् -

प्रत्यङ्गिरास्तोत्रम् -

मन्दरस्थं सुखासीनं भगवन्तं महेश्वरम्।
समुपागम्य पार्वती भर्तारं परिपृच्छति।।

देव्युवाच -

धारणीया महाविद्या प्रत्यङ्गिरा शुभोदया।
नरनारी हितार्थाय भवानां रक्षणाय च॥
राज्ञां च मण्डलीकानां दीनानां च महेश्वर।
विदुषां च द्विजादीनां विशेषेणार्थ साधिनीम्॥
महाभयेषु घारेषु विद्युदादि भयेषु च।
व्याघ्रदंष्ट्रा कराघाते नदी नद समुद्रके॥
श्मशाने दुर्गमे घारे सङ्ग्रामे शत्रुसंकटे।
आभिचारेषु सर्वेषु रणे राजकुलेषु च॥
धारिता पाठिता देवी समीहित फलप्रदा।
पाठिता साधकेन्द्रेण कारयेत् स्वान्मनोरथान्॥
सौभाग्य जननी नित्यं नृणां वश्यकरी तथा।
तां सुविद्यां सुरश्रेष्ठ कथयस्व वर प्रभो॥

श्री भैरव उवाच।

साधु साधु महाभागे जन्तूनां हितकारिणी ।
त्वद्वाक्येन सुरारिघ्ने कथयामि न संशयः॥
देवी प्रत्यंङ्गिरा विद्या सर्वग्रह निवारिणी।
मर्दनी सर्व दुष्टानां सर्वपाप प्रणाशनी॥

सौभाग्य जननी देवी बलपुष्टिकरी तथा।
चतुष्पथेषु घोरेषु वनेषु उपवनेषु च ॥
राजद्वारे चद्दुर्भिक्षे महाभय उपास्थिते।
पटिताऽपटिता विद्या सर्वसिद्धिकरी स्मृता॥
लिखित्वा च करे कण्ठे बाहौ शिरसि धारयेत्।
मुच्यते सर्वपापेभ्यो मृत्यु र्नास्ति कदाचन॥
धारयेत् योगयुक्तो यः तस्य रक्षा भवेत् ध्रुवम्।
धारिता चार्चिता विद्या प्रत्यंङ्गिरा सुबोधिता॥
गृहे चैवाष्ट सिद्धिश्च देव राक्षस पन्नगाः।
न तस्य पीडां कुर्वन्ति ये चान्ये पीडका ग्रहाः॥
विद्याना मुत्तमा विद्या पाठिता चार्चिता सदा।
यस्यांगस्था महाविद्या प्रत्यंङ्गिरा सुभाषिता॥
सिद्धा सिद्धिप्रदा नित्या विधेयं परमा स्मृता।
श्री माता घोर रूपेण भाषिता घोररूपिणी॥
प्रत्यंङ्गिरा मया प्रोत्ता रिपून् हन्यान्न संशयः।
हरिचन्दन मिश्रेण गोरोचन कुंकुमेन च॥
लिखित्वा भूर्ज पत्रेषु धारणीया सदा नृभिः।
पुष्पैः धूपैश्च चित्रैश्च बल्युपचार भोजनैः॥
पूजयित्वा यथा न्यायं शान्तिकुम्भेन वेष्टयेत्।
धारये द्य इमां विद्यां निश्चिता रिपुनाशिनी॥
विलयं यान्ति रिपवः प्रत्यंगिरा विधानतः।
यद्यत् स्पृशति हस्तेन यद्यत् खादति जिह्वया॥
अमृतं तद्भवेत् सर्वं मृत्यु र्नास्ति कदाचन।
कर्मणा ये जपे द्यस्तु कृत्रिमं दारुणं सदा॥
नृणां रक्षाकरी देवी सर्व सिद्धिकरी स्मृता।
तथा अस्यां पठ्यमानायां जीर्यते नात्र संशयः॥
प्राप्नोति वसुधां सर्वां रिपुहस्त गतश्रिये ।

वशा स्तस्यैव तिष्ठन्ति शत्रवः प्राण हारकाः॥
अभ्यस्य तां याति विद्या सिद्धविद्या प्रसादतः ।
अबला श्च वशा ह्यस्य सुन्दर्यः प्रियदर्शनाः॥
चराचर मिदं सर्वं सशैल वन काननम्।
नर नारी समाकीर्णं बाधकस्य च सुव्रते॥
सर्वत्र वशतां यान्ति यजमानस्य नित्यशः।
गोलकस्य प्रभावेन प्रत्यंगिरा प्रभावतः॥
निर्मितास्त्राऽसुरा सर्वे देवैः विद्याभि मानिभिः।
गोलकं च प्रवक्ष्यामि भैषज्यं ते च सुव्रते ॥
पञ्चवर्णैः पञ्चदलैः द्वारान्तरे द्वारशोभिनी ।
द्वात्रिंशत्पत्रमध्ये तु लिखेन् मन्त्रस्य दैवतम्॥
कूटस्थं कुरुत दिक्षु विदिक्षु बीजपञ्चकम्।
फट्कारेण च संयुक्तं रक्षेच्च साधकोत्तमम्॥
विष्णुक्रान्तं मदनकं कुंकुमं रोचनं तथा।
आरुष्करं विषारिष्टं सिद्धार्थं मालतीं तथा॥
एतत् द्रव्यगणैः विद्यां गोलमध्ये निधापयेत् ।
संभृतं धारयेत् मन्त्री साधको मन्त्रवित्सदा॥
अधुना संप्रवक्ष्यामि प्रत्यंङ्गिरां सुभाषिताम्।
दिव्यै मंन्त्रपदै श्चित्रैः सर्वोपाये स्सुखप्रदैः ॥
पठेत् रक्षा विधानेन मन्त्रराजः प्रकीर्तितः।
अथ नो मन्त्रपदानि वदन्ति। अथ तान्मन्त्रान्युच्यन्ते॥

ओं नमःशिवाय - सहस्र सूर्येक्षणाय - ओं अनादिरूपाय - अनादि पुरुषाय - पुरुहूताय - महाऽभयाय - महाव्यापिने - महेश्वराय - ओं जगत्साक्षिणे - सन्ताप -भूत व्यापिने - महाघारातिघोराय - ओं ओं महाप्रभावं दर्शय दर्शय - ओं ओं हिलि हिलि - ओं ओं हन हन - ओं ओं किलि किलि - ओं ओं मिलि मिलि - ओं ओं पुरि पुरि - विद्युभिज्जह्वे - ज्वल ज्वल - प्रज्वल प्रज्वल - धम धम - बन्ध बन्ध - मथ मथ - प्रमथ प्रमथ – विध्वंसय विध्वंसय - सर्वदुष्टान् ग्रास ग्रास - पिब पिब - नाशय नाशय - त्रासय त्रासय -भ्रामय भ्रामय - दारय- दारय -द्रावय द्रावय - दर दर- विदुर विदुर- रं रं रं रं रं - रक्ष रक्ष -त्वममुं साधकं रक्ष रक्ष - हुं फट् स्वाहा ॥

ऐं ऐं हुं हुं रक्ष रक्ष सर्वभूत भयोपद्रवेभ्यो - महामेघौघ सर्वदावाग्नि विद्युत संवर्धक कपर्दिक दिव्यकनकांबोरुह विकच - पद्ममाला धारिणि - शितिकण्ठाभ- खड्वाङ्ग कपालधृक् - व्याघ्राजिनधृक् परमेश्वरप्रिये - मम शत्रून् - छिन्ध छिन्धि - भिन्दि भिन्दि – विद्रावय विद्रावय - देवता पितृ पिशाचोरग - नागासुर गरुड गन्धर्व किन्नर विद्याधर यक्ष राक्षसान् - ग्रहां च - स्तंभय स्तंभय - ये च धारकस्य - सपरिवारस्य - शत्रव स्तान् - निकृन्तय निकृन्तय - ये च सर्वे - मम अविद्याकर्म कुर्वन्ति - कारयन्ति वा - तेषां बुद्धिं: घातय घातय - ग्रामं घायत घ्मायत - रोमं कीलय कीलय - शत्रून् स्वाहा ओं विश्वमूर्ते - महातेजसे -

ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	विद्यां स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	प्रमुखं स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	नेत्रं स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	उदरं स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	नाभिं स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	गुह्यं स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	पादौ स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	सर्वेन्द्रियाणि स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	कुटुंभानि स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	स्थानानि स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	देशं स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	मण्डलं स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	ग्रामान् स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम शत्रूणां	प्राणान् स्तंभय स्तंभय
ओं ऐं ओं ऐं	ओं ठः ओं ठः	मम धारकस्य	सपरिवारस्य शान्तिं कुरु कुरु स्वाहा॥

ओं ह्रूं ह्रूं फट् स्वाहा ॥
ओं ह्रूं ह्रूं ह्रूं ह्रूं फट् स्वाहा ॥
ओं ओं हुं हुं हुं हुं हुं फट् स्वाहा ॥

ओं ओं ओं यं यं यं यं यं - रं रं रं रं रं - लं लं लं लं लं - वं वं वं वं वं - शं शं शं शं शं - षं षं षं षं षं - सं सं सं सं सं - हं हं हं हं हं - क्षं क्षं क्षं क्षं क्षं - हीं हीं हीं हीं हीं - क्लीं क्लीं क्लीं क्लीं क्लीं - हुं हुं हुं हुं हुं - फट् स्वाहा॥

ओं ऐ ओं ऐं ओं ठः ओं ठः - ओं हुं ओं हुं फट् स्वाहा॥

ओं जुंसः फट् स्वाहा॥

ओं नमो भगवति प्रत्यंगिरे - मम धारकस्य सपरिवारकस्य - सर्वतो रक्षां कुरु कुरु फट् स्वाहा।

ओं ऐं ओं ऐं - ओं ठः ओं ठः - ओं हुं हुं हुं हुं हुं ओं हुं हुं फट् स्वाहा॥

ओं नमो भगवति- दुष्टचाण्डालिनि -त्रिशूल वज्रांकुश शक्ति धारिणि -रुधिर मांस वसा भक्षिणि - शक्ति कपाल खड्वभाङ्ग धारिणि - मम शत्रून् छेदय छेदय - दह दह - हन हन - पच पच - धम धम - मथ मथ - सर्वदुष्टान् ग्रस ग्रस - ओं ओं हुं हुं फट् स्वाहा॥

ओं हुं हुं हुं हुं हुं फट् स्वाहा

ओं ओं हीं दंष्ट्राकरालिनि - ममकृते - मन्त्र यन्त्र तन्त्र प्रयोग विषचूर्ण शस्त्राभिचार सर्वस्तम्भनादिकं - येन कृतं - कारितं - कुरुते - करिष्यति वा तान् सर्वान् हन हन प्रत्यंगिरे त्वं मां धारकस्य सपरिवारं रक्ष रक्ष हुं हुं हुं हुं हुं फट् स्वाहा ॥

ओं ऐं हीं श्रीं स्फ्रें हुं प्रत्यंङ्गिरे मम शरीरं रक्ष रक्ष फट् स्वाहा॥
ओं ऐं हीं श्रीं स्फ्रें हुं माहेश्वरि मम नेत्रं रक्ष रक्ष फट् स्वाहा॥
ओं ऐं हीं श्रीं स्फ्रें हुं ब्रह्मभाणि मम शिरं रक्ष रक्ष फट् स्वाहा॥
ओं ऐं हीं श्रीं स्फ्रें हुं कौमारि मम वक्रं रक्ष रक्ष फट् स्वाहा॥
ओं ऐं हीं श्रीं स्फ्रें हुं वैष्णवि मम कण्ठं रक्ष रक्ष फट् स्वाहा॥
ओं ऐं हीं श्रीं स्फ्रें हुं नारसिंहि मम बाहू रक्ष रक्ष फट् स्वाहा॥
ओं ऐं हीं श्रीं स्फ्रें हुं वाराहि मम हृदयं रक्ष रक्ष फट् स्वाहा॥
ओं ऐं हीं श्रीं स्फ्रें हुं ऐन्दिर मम नाभिं रक्ष रक्ष फट् स्वाहा॥
ओं ऐं हीं श्रीं स्फ्रें हुं चामुण्डे मम गुह्यं रक्ष रक्ष फट् स्वाहा॥

ओं ऐं ह्रीं श्रीं स्फ्रें हुं माहेश्वरि मम जङ्घे रक्ष रक्ष फट् स्वाहा॥
ओं ऐं ह्रीं श्रीं स्फ्रें हुं मोहिनि मम शत्रून् मोहय मोहय स्वाहा॥
ओं ऐं ह्रीं श्रीं स्फ्रें हुं हुं हुं प्रत्यङ्गिरे मम शरीरं रक्ष रक्ष स्वाहा॥

कूटस्थो कुरुते दिक्षु विधिक्षु बीजपञ्चकम्।
फङ्कारेण समोपेतं रक्ष त्वं को त्तमम्। सादकोवत्तमम्॥

स्तंभिनी मोहिनी चैव क्षोभिनी द्राविनी तथा।
जृंभिनी भ्रामरी रौदरी ततो संहारिनी ति च॥

शक्तयः शोषिणी ग्चैव शत्रुपक्ष वियोजिताः।
साधिता साधकेन्द्रेण सर्वशत्रु विनाशिनी॥

ओं ऐं ह्रीं श्रीं स्फ्रें हुं स्तंभिनि मम शत्रून् स्तंभय स्तंभय स्वाहा।
ओं ऐं ह्रीं त्रीं स्फ्रें हुं मोहिनि मम शत्रून् मोहय मोहय स्वाहा।
ओं ऐं ह्रीं श्रीं स्फ्रें हुं क्षोभिनि मम शत्रून् क्षोभय क्षोभय स्वाहा।
ओं ऐं ह्रीं श्रीं स्फ्रें हुं द्राविणि मम शत्रूनू द्रावय दरावय स्वाहा।
ओं ऐं ह्रीं श्रीं स्फ्रें हुं जृंभिनि मम शत्रून् जृंभय जृंभय स्वाहा।
ओं ऐं ह्रीं श्रीं स्फ्रें हुं भ्रामणि मम शत्रून् भ्रामय भ्रामय स्वाहा।
ओं ऐं ह्रीं श्रीं स्फ्रें हुं रौद्रि मम शत्रून् भीषय भीषय स्वाहा॥
ओं ऐं ह्रीं श्रीं स्फ्रें हुं संहारिणि मम शत्रून् संहर संहर स्वाहा॥
ओं ऐं ह्रीं श्रीं स्फ्रें हुं शोषिणि मम शत्रून् शोषय शोषय स्वाहा॥

य इमां धारयेत् विद्यां त्रिसन्ध्यं वापि यः पठेत् ।
सोपि दुष्टान्तको भूत्वा हन्यात् शत्रून् न शंशयः॥
सर्वान् संरक्षये द्विद्या महाभय विपक्तिषु।
महाभयेषु घोरेषु न भयं विद्यते क्वचित्॥
सर्वान्कामा नवाप्नोति मर्त्यो देवि न संशयः ।

ओं ऐं ह्रीं श्रीं स्फ्रें हुं प्रत्यङ्गिरे - विकटदंष्ट्रे - ह्रीं ह्रीं कालि कालि - कारिणि शत्रून् छेदय छेदय - धातय धातय - सर्वन् दुष्टान् मारय मारय - खड्गेन छिन्दय छिन्दय - किलि किलि - शिखि शिखि पिब पिब - रुधिरं स्फ्रें स्फ्रें - किरि किरि - कालि कालि महाकालिमहाकालि - ह्रीं ह्रीं ऐं ऐं फट् स्वाहा ॥

अष्टोत्तर शतं जप्त्वा साक्षात् सिद्धीश्वरो भवेत् ॥
ऋषिस्तु - भैरवो नाम छन्दोनुष्टुप् प्रकीर्तितम्।
देवता कौशिकी प्रोक्ता नाम प्रत्यङ्गिरेव सा।
धूर्बीजेन षडङ्गानि कल्पयेत् साधकोक्त्मः।
सर्वोत्कृष्टै रूपचारैः ध्यायन्प्रत्यंङ्गिरां शुभाम्।
खड्गं कपालं डमरुं त्रिशूलं संबिभ्रती चन्द्रकलावतंसा।
पिंगोर्ध्वकेशी सितभीमदंष्ट्रा भूयाद्विभूत्यै मम भद्रकाळी॥
एवं स्तुभुत्वा जपेन्मन्त्रं एक विंशति वासरम्।
शत्रून्स नाशयेत् पञ्च प्रकारोयं सुनिश्चितम्॥
अथा ष्टम्यां अर्धरात्रौ शरत्काले महानिशि।
आराधिता च सा काळी तत्क्षणात् सिद्धिता भवेत् ॥
सर्वोपचार संपन्ना रक्तवस्त्र फलादिभिः॥

भुवनेशी स्तवराज अष्टकम्

बालरवि द्युति मिन्दुकिरीटां
तुङ्गकुचां नयनत्रय युक्ताम्।
स्मेरमुखीं वरदाङ्कुशपाशा
अभीतिकरां प्रभजे भुवनेशीम्।।

देवी उवाच -

प्रभो श्री भैरवश्रेष्ठ दयालु भक्तवत्सल।
भुवनेशी स्तवं ब्रूहि यद्यहं तव वल्लभा।।

ईश्वरउवाच –

श्रुणु देवि प्रवक्ष्यामि भुवनेश्यष्टकं शुभम्।
येन विज्ञानमात्रेण त्रैलोक्यं वशगं भवेत्।।

नमामि जगताधारां भुवनेशीं भवप्रियाम्।
भुक्ति मुक्तिप्रदां रम्यां रमणीयां शुभावहाम्।।

त्वं स्वाहा त्वं स्वधा देवि त्वं यज्ञा यज्ञनायिका।
त्वं नादस्त्वं तमोहन्त्री व्याप्य व्यापक वर्जिता।।

त्व माधार स्त्वमिज्वाल्य ज्ञानाज्ञेयं परं पदम्।
त्वं शिव स्त्वं अजो विष्णु स्त्वमात्मा परमोव्ययः।।

त्वं कारणं च कार्यं च लक्ष्मी स्त्वं च हुताशनः।
त्वं सोम स्त्वं रविः काल स्त्वं धाता स्त्वं च मारुतः।।

गायत्री त्वं च सावित्री त्वं माया त्वं हरिप्रिया।
त्व मेवैका पराशक्ति स्त्वमेव गुरु रूपधृक्।।

त्वं कला त्वं कलातीता त्वमेव जगतां श्रियः
त्वं सर्वकार्यं सर्वस्य कारणं करुणामयी।

फलश्रुतिः

इद मष्टक माद्यायाः भुवनेश्या वरानने।
त्रिसन्ध्यं श्रद्धया मर्त्यो यः पठेत् प्रीतमानसः।
सिद्धयो वशगा स्तस्य संपदो वशगा गृहे।
(इति रुद्रयामळतन्त्रे भुवनेशीस्तवराजस्समाप्तः)

काली स्तुत्यष्टकम् (ब्रह्मणा प्रोक्तम्)

नमा मिकृष्ण रूपिणीं कृष्णा ऽङ्गयष्टि धारिणीं -
समग्र तत्व सागरा मपार पार गह्वराम्।
शिवा प्रभां समुज्वलां स्फुरत् शशाङ्क शेखरां -
ललाटरत्न भास्करां जगत् प्रदीप्ति भास्कराम्।।

महेन्द्र कश्य पार्चितां सनत् कुमार संस्तुतां
सुरा सुरेन्द्र वन्दितां यथार्थ निर्मला द्भुताम्।
अतर्क रोचि रूर्जितां विकार दोष वर्जितां -
मुमुक्षुभि र्विचिन्तितां विशेष तत्व सूचिताम्।।

मृतास्थि निर्मित स्रजां मृगेन्द्र वाह नाग्रजां -
सुशुद्ध तत्व तोषणां त्रिवेदपार भूषणाम्।

भुजङ्ग हार हारिणीं कपाल खण्ड धारिणीं
सुधार्मि कोप कारिणीं सुरेन्द्र वैरि घातिनीम्।।

कुठार पाश चापिनीं कृतान्त काम भेदिनीं -
शुभां कपाल मालिनीं सुवर्ण कल्प शाखिनीम्।
श्मशान भूमि वासिनीं द्विजेन्द्र मौलि भाविनीं -
तमो ऽन्धकार यामिनीं शिव स्वभाव कामिनीम्।।

सहस्र सूर्य राजिकां धनञ्जयोग्र कारिकां -
सु शुद्ध काल कन्दलां सु भृङ्ग वृन्द मञ्जुलाम्।
प्रजायिनीं प्रजावतीं नमामि मातरं सतीं -
स्व कर्म कारणे गतिं हर प्रियां च पार्वतीम्।।

अनन्त शक्ति कान्तिदां यशोर्थ भुक्ति मुक्तिदां
पुनःपुन र्जगद् हितां नमा म्यहं सुरा र्चिताम्।
जयेश्वरि त्रिलोचने प्रसीद देवि पाहि मां -
जयन्ति ते स्तुवन्ति ये शुभं लभन्त्य मोक्षतः

सदैव ते हत द्विषः परं भवन्ति सज्जुषः -
नराः परे शिवे ऽधुना प्रसाधि मां करोमि किम्।
अतीव मोहि तात्मनो वृथा विचेष्टि तस्य मे -
कुरु प्रसा दितं मनो यथा स्मि जन्म भञ्जनः।।

तथा भवन्तु तावका यथैव घोषि तालकाः -
इमां स्तुतिं ममे रितां पठन्ति कालि साधकाः।
सुदीर्घ मायु कीर्ति वित्त भोग भाग्य युक् तथा -
न ते पुनः सु दुस्तरे पतन्ति मोह गह्वरे।।

(इति ब्रह्मणा प्रोक्ता कालीस्तुतिः समाप्ता)

काळरात्री सप्तश्लोकी (देवीभागवते)

जयस्व देवि चामुण्डे जय भूतापहारिणि।
जय सर्वगते देवि काळरात्रि नमोस्तु ते।। 1

विश्वमूर्तियुते शुद्धे विरूपाक्षि त्रिलोचने।
भीमरूपे शिवे विद्ये महामाये महोदरे।। 2

मनो जये मनो दुर्गे भीमाक्षि क्षुभित क्षये।
महामारि विचित्राङ्गि गीतनृत्यप्रिये शुभे।। 3

विकराळि महाकाळि काळिके पापहारिणि।
पाशहस्ते दण्डहस्ते भीमहस्ते भयानके।। 4

चामुण्डे ज्वलमानास्ये तीक्ष्णदंष्ट्रे महाभये।
शिव यान प्रिये देवि प्रेतासन गते शिवे।। 5

भीमाक्षी भीषणे देवि सर्वभूत भयङ्करि।
कराळि विकराळे च महाकाळि कराळिनि।। 6

काळि कराळ विक्रान्ते काळरात्रि नमोऽस्तुते।
सर्व शस्त्र भृते देवि नाना देव नमस्कृते।। 7

(इति शिवेन प्रोक्तं शिवदूती काळरात्री स्तोत्रं संपूर्णम्)

कालिकाष्टकम् (शङ्कराचार्य कृतम्)

ध्यानम् –

गलद् रक्त मुण्डा वली कण्ठ माला - महा घोर रावा सुदंष्ट्रा कराला।
विवस्त्रा श्मशाना लया मुक्तकेशी - महाकाल कामा कुला कालिकेयम्।।

भुजे वाम युग्मे शिरोऽसिं दधाना – वरं दक्ष युग्मे ऽभयं वै तथैव।
सम ध्यापि तुङ्ग स्तना भार नम्रा – लसद् रक्त सृक्क द्वया सुस्मि तास्या।।

शव द्वन्द्व कर्णा वतंसा सुकेशी – लसत् प्रेत पाणि प्रयु क्तैक काञ्ची।
शवा कार मञ्चा धिरूढा शिवाभिः - चतु र्दिक्षु शब्दाय मानाभि रेजे।।

स्तुतिः

विरिञ्च्यादि देवा स्त्रय स्ते गुणां स्त्रीन् – समा राध्य कालीं प्रधाना बभूवुः।
अनादिं सुरादिं मखादिं भवादिं – स्वरूपं त्वदीयं न विन्दन्ति देवाः। 1

जगन् मोह नीयं तु वाग्वादि नीयं – सुहृद् षिणी शत्रु संहार णीयम्।
वच स्तम्भ नीयं किमु च्चाठनीयं – स्वरूपं त्वदीयं न विन्दन्ति देवाः।। 2

इयं स्वर्ग दात्री पुनः कल्प वल्ली –मनो जांस्तु कामान् यथार्थं प्रकुर्यात् ।
तथा ते कृतार्थाः भवन्तीति नित्यं – स्वरूपं त्वदीयं न विन्दन्ति देवाः।। 3

सुरा पान मत्ता सु भक्ता नुरक्ता - लसत् पूत चित्ते सदा ऽऽविर्भवस्ते।
जपध्यान पूजा सुधा धौत पङ्का - स्वरूपं त्वदीयं न विन्दन्ति देवाः 4

चिदा नन्द कन्दं हसन् मन्द मन्दं – शर च्चन्द्र कोटि प्रभा पुञ्ज बिम्बम्।
मुनीनां कवीनां हृदि द्योत यन्तं – स्वरूपं त्वदीयं न विन्दन्ति देवाः।। 5

महा मेघ काली सुरक्ता पि शुभ्रा – कदा चिद् विचित्रा कृति र्योग माया।
न बाला न वृद्धा न कामा तुरा ऽपि – स्वरूपं त्वदीयं न विन्दन्ति देवाः।। 6

क्षम स्वाप राधं महा गुप्त भावं - मया लोक मध्ये प्रकाशी कृतं यत्।
तव ध्यान पूतेन चापल्य भावात् - स्वरूपं त्वदीयं न विन्दन्ति देवाः।। 7

यदि ध्यान युक्तं पठेद् यो मनुष्यः - तदा सर्व लोके विशालो भवेच्च।
गृहे चाष्ट सिद्धि र्मृते चापि मुक्तिः - स्वरूपं त्वदीयं न विन्दन्तिदेवाः।। 8
(इति श्री मच्छङ्कराचार्य विरचितं कालिकाष्टकं स्तोत्रं संपूर्णम्)

काली क्षमापण स्तोत्रम् (स्तुति पञ्चदशी)

प्राग्देहस्थो यदाऽहं तव चरण युगं नाश्रितो नार्चितो ऽहं -
तेना द्या कीति वर्गैं र्जठरज दहनै र्बाध्य मानो बलिष्ठैः।
क्षिप्त्वा जन्मान्त रान्नः पुन रिह भविता क्वाश्रयः क्वापि सेवा -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने कामरूपे कराले।। 1

बाल्ये बाला भिलाषै र्जडित जडमतिः बाल लीला प्रसक्तो
न त्वां जानामि मातः कलि कलुष हरां भोग मोक्ष प्रदात्रीम्।
नाचारो नैव पूजा न च यजन कथा न स्मृति र्नैव सेवा -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने कामरूपे कराले।। 2

प्राप्तोऽहं यौवनं चेद् विष धर सदृशै रिन्द्रियै र्दष्ट गात्रो -
नष्ट प्रज्ञः पर स्त्री पर धन हरणे सर्वदा साभि लाषः।
त्वत् पादा म्भोज युग्मं क्षणमपि मनसा न स्मृतोऽहं कदापि -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने कामरूपे कराले।। 3

प्रौढो भिक्षा भिलाषी सुत दुहितृ कलत्रार्थ मन्नादि चेष्टः -
क्व प्राप्स्ये कुत्र यामी त्यनुदिन मनिशं चिन्तया मग्न देहः।
नो ते ध्यानं न चास्था न च भजन विधि र्नाम सङ्कीर्तनं वा -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने कामरूपे कराले।। 4

वृद्धत्वे बुद्धिहीनः कृश विवश तनु श्श्वास कासाति सारैः -
कर्मा नर्हो ऽक्षि हीनः प्रगलित दशनः क्षुत् पिपासाभि भूतः।
पश्चा त्तापेन दग्धो मरण मनुदिनं ध्येय मात्रं न चान्यत् -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने कामरूपे कराले।। 5

कृत्वा स्नानं दिनादौ क्वचिदपि सलिलं नो कृतं नैव पुष्पं -
ते नैवे द्यादिकं च क्वचि दपि नकृतं नापि भावो न भक्तिः।
न न्यासो नैव पूजा न च गुण कथनं नापि चार्चा कृता ते -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने कामरूपे कराले।। 6

जानामि त्वां न चाहं भव भय हरणीं सर्व सिद्धि प्रदात्रीं -
नित्या नन्दो दयाढ्यां त्रितय गुणमयीं नित्यशुद्धो दयाढ्याम्।
मिथ्या कर्माभि लाषै रनु दिन मभितः पीडितो दुःख सङ्घैः -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने काम रूपे कराले।। 7

कालाभ्रां श्यामलाङ्गीं विगलित चिकुरां खड्ग मुण्डाभि रामां -
त्रास त्राणेष्ट दात्रीं कुणप गणशिरो मालिनीं दीर्घ नेत्राम्।
संसार स्यैक सारां भव जनन हरां भावितो भावनाभिः -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने काम रूपे कराले।। 8

ब्रह्मा विष्णु स्तथेशः परिणमति सदा त्वत् पदाम्भोज युग्मं -
भाग्या भावा न्नचाहं भव जननि भवत् पाद युग्मं भजामि।
नित्यं लोभ प्रलोभैः कृत विवश मतिः कामुक स्त्वां प्रयाचे -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने काम रूपे कराले।। 9

राग द्वेषैः प्रमत्तः कलुष युत तनुः कामना भोग लुब्धः -
कार्या कार्या विचारी कुल मति रहितः कौलसङ्घै र्विहीनः।
क्व ध्यानं ते क्व च मनु जपनं नैव किञ्चित् कृतो ऽहं -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने काम रूपे कराले।। 10

रोगी दुःखी दरिद्रः परवश कृपणः पांशुलः पापचेताः -
निद्राऽऽलस्य प्रसक्तः सुजठर भरणे व्याकुलः कल्पितात्मा।
किं ते पूजा विधानं त्वयि क्वचनु मतिः क्वा नुरागः क्व चास्था -
क्षन्तव्यो मेऽपराधः प्रकटित वदने काम रूपे कराले।। 11

मिथ्या व्यामोह रागैः परिवृत मनसः क्लेश सङ्घा न्वितस्य -
क्षुन्नि द्रौघा न्वितस्य स्मरण विरहिणः पाप कर्म प्रवृत्तेः।
दारि द्र्यस्य क्व धर्मः क्व जननि रुचिः क्व स्थितिः साधु सङ्घैः -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने काम रूपे कराले।। 12

मात स्तातस्य देहात् जननि जठरगः संस्थित स्त्वद्वशे ऽहं -
त्वं हर्त्री कार यित्री करण गुण मयी कर्म हेतु स्वरूपा।
त्वं बुद्धि श्चित्त संस्था ऽप्यह मिति भवती सर्व मेतत् -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने काम रूपे कराले।। 13

त्वं भूमि स्त्वं जलं च त्वमसि हुतवह स्त्वं जगद् वायु रूपा -
त्वं चाकाशं मनश्च प्रकृति रसि महत् पूर्विका ऽपूर्व पूर्वा।
आत्मा त्वं चासि मातः पर मसि भवती त्वत्परं नैव किञ्चित् -
क्षन्तव्यो मे ऽपराधः प्रकटित वदने काम रूपे कराले।। 14

त्वं काली त्वं च तारा त्वमसि गिरि सुता सुन्दरी भैरवी त्वं -
त्वं दुर्गा छिन्नमस्ता त्वमसि च भुवना त्वं हि लक्ष्मी शिवा त्वम्।
धूमा मातङ्गिनी त्वं त्व मसि च बगला मङ्गलादि स्तवाख्या -
क्षन्तव्यो मेऽपराधः प्रकटित वदने काम रूपे कराले।। 15

फलश्रुतिः

स्तोत्रे नानेन देवीं परि णमति जनो यःसदा भक्ति युक्तः -
दुष्कृत्या दुर्गसङ्घं परि तरति शतं विघ्नता नाश मेति।
नाधि र्व्याधिः कदाचित् भवति यदि पुन स्सर्वदा सापराधः -
सर्वं तत् कामरूपे त्रिभुवन जननि क्षामयेः पुत्रबुध्या ।।

ज्ञाता वक्ता कवीशो भवति धनपतिः दानशीलो दयात्मा -
निष्पापी निष्कलङ्की कुलपति कुशलः सत्यवाक् धार्मिक श्च।
नित्या नन्दो दयाढ्यः पशुगण विमुखः सत्पथा चार शीलः -
संसा राब्धिं सुखेन प्रतरति गिरिजा पादयुग्मा वलम्बात् ।।

(इति काळी क्षमापणस्तुतिः समाप्ता)

प्रत्यङ्गिरा स्तवः

प्रत्यङ्गिरा चतुर्दश नामानि (शत्रुघ्नानि)

शत्रुविद्वंसिनी राष्ट्री त्रिशिरा रक्तलोचनी।।
अग्निज्वाला रौद्रमुखी घोरदंष्ट्री त्रिशूलिनी।।
महादेवी महाकाली भक्तानुग्रह कारिणी।
दिगम्बरी मुक्तकेशी रक्तपानमदोन्मदी।।
एतै र्नामपदै र्घोरैः शत्रूनुच्चाटयेत् झहि।
इमं स्तवं जपेन् नित्यं सर्व शत्रु विनाशनम्।।

सहस्रवारं जप्त्वा तु कार्यसिद्धि र्न संशयः।।

काळी स्तुति पञ्चकम्

नमामि कालिकां देवीं कलि कल्मष नाशिनीम्।
नमामि शम्भुपत्नीं च नमामि भव सुन्दरीम्।। 1

आद्यां देवीं नम स्कृत्य नम स्त्रैलोक्य मोहिनीम्।
नमामि सत्य सङ्कल्पां सर्व पर्वत वासिनीम्।। 2

नमामि भुवनेशानीं भैरवीं शम्भु गेहिनीम्।
पार्वतीं च नमस्कृत्य नमो नित्यं नगात्मजे।। 3

मातः त्वदीय चरणं शरणं सुराणां
ध्याना स्पदं दिशति वाञ्छित वाञ्छनीयम्।
येषां हृदि स्फुरति तत् चरणारविन्दं
धन्यास्त एव नियतं सुरलोक पूज्याः।। 4

गन्धैः शुभैः कुङ्कुम पङ्क लेपैः -
मात स्त्वदीयं चरणं सुभक्ताः।
स्मरन्ति श्रृण्वन्ति लुठन्ति धीराः -
तेषां जरा नैव भवेद्‌ भवानि।। 5

உ

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

अर्चनायाः नामावलि भागः

विभागः - 15

श्री प्रत्यङ्गिरा सहस्त्र नामावळिः (1000 नामानि)

अस्य श्री प्रत्यङ्गिरा सहस्त्रनाम महामन्त्रस्य भैरव ऋषिः - अनुष्टप् छन्दः - श्री प्रत्यङ्गिरा देवता – सर्वकार्यसंसिद्धये - सर्वसंपत्तिहेतवे जपे विनियोगः ह्रीं बीजम् – श्रीं शक्ति–: - स्वाहा कीलकम् – विद्या सिध्यर्थे जपे विनियोगः- क्षां क्षीं क्षूं क्षैं क्षौं क्षः इत्यक्षरैः कराङ्गन्यासौ कृत्वा –ध्यानं कुर्यात्

सिंहीं सिंहमुखीं सखीं भगवतः श्री भैरवोल्लसत् -
शूल स्थूल कपाल पाश डमरु व्यग्राग्र हस्ताम्बुजाम् ।
दंष्ट्रा कोटि विशंक टास्य कुहरा मारक्त नेत्र त्रयां -
बालेन्दु ज्वल मौळिकां भगवतीं प्रत्यङ्गिरां भावये ।।

स्वहृदये लमित्यादिभिः - पञ्चोपचारपूजां विधाय - विशेष करवीरकुसुमादिभिः - कुङ्कुमादिना - सहस्त्रनाममन्त्रैः - अर्चयेत्।

आदौ ओं ऐं ह्रीं श्रीं ग्लौं इति पञ्चबीजानि अन्ते नमः इतिच सहस्त्रेषु योजनीयानि।

देव्यै
प्रत्यङ्गिरायै
सेव्यायै
शिरसायै
शशिशेखरायै
समायै
असमायै
धर्मिण्यै
समस्त सुरसेमुष्यै
सर्व संपत्ति जनन्यै 10
समधायै
सिन्धु सेविन्यै
शम्भु सीमन्तिन्यै

सोमा राध्यायै
वसुधायै
अरसायै
रसायै
रसवत्यै
वेळायै
वन्यायै 20
वनमालिन्यै
वनजाक्ष्यै
वनचर्यै
वन्यै
वन विनोदिन्यै
वेगिन्यै

वेगदायै

वेग बलायै

स्थान बलायै

अधिकायै 30

कलायै

कला प्रियायै

कौल्यै

कोमलायै

काल कामिन्यै

कमलायै

कमलास्यायै

कलास्यायै (कमलस्थायै)

कमलावत्यै (कलावत्यै)

कुलीनायै 40

कुटिलायै

कान्तायै

कोकिलायै

कुल भाषिण्यै

कीर केल्यै

कलायै

काल्यै

कपालिन्यै

कालिकायै

केशिन्यै (कोशिन्यै) 50

कुशावर्त्तायै

कौशाम्ब्यै

केशव प्रियायै

काश्यै

काशापहायै

कांशी संकाशायै

केश दायिन्यै

कुण्डल्यै

कुण्डलिस्थायै

कुण्डलाङ्गद मण्डितायै 60

कुशायै

पाश्यै

कुमुदिन्यै

कुमुद प्रति वर्द्धिन्यै

कुन्द प्रियायै

कुन्द रुच्यै

कुरङ्गमद मोदिन्यै (मोहिन्यै)

कुरङ्ग नयनायै

कुन्दायै

कुरुविन्दा भिनन्दिन्यै 70

कुसुम्भ कुसुमायै

किञ्चित् क्वणत्किङ्किणिकायै

कटव्यै

कठोरायै

करणायै
कण्ठायै
कौमुद्यै
कम्बुकण्ठिन्यै
कपर्दिन्यै
कपटिन्यै 80
कठिन्यै
कालकण्ठकायै
किबृहस्तायै (कीर हस्तायै)
कुमार्यै
कुरुन्दायै
कुसुम प्रियायै
कुञ्जर स्थायै
कुञ्जरदायै
कुंभिण्यै
कुम्भस्तन द्वयायै 90
कुम्भिगायै
करभोरवे
कदलीदल शालिन्यै
कुपितायै
कोठरस्थायै
कंकाल्यै
कन्द शेदरायै (कन्द्रेशयायै)
एकान्त वासिन्यै
किञ्चि त्कम्पमान शिरोरुहायै
कादम्बर्यै 100
कदम्बस्थायै
कुङ्कुम प्रेम धारिण्यै
कुटुम्बिन्यै
क्रिया युक्तायै (प्रिया युक्तायै)
क्रतवे
क्रतुकर्यै
क्रियायै
कात्यायन्यै
कृत्तिकायै
कार्तिकेय प्रवर्तिन्यै 110
काम पत्न्यै
काम धात्र्यै
कामेश्यै
काम वन्दितायै
काम रूपायै
काम गत्यै
कामाक्ष्यै
काम मोहितायै
खड्गिन्यै
खचर्यै 120
खञ्जायै
खञ्जरीटेक्षणायै

खलायै
खरगायै
खर नासायै
खरास्यायै
खेलन प्रियायै
खरांशवे
खेटिण्यै
खट्वायै 130
खरधारिण्यै
खट्वाङ्ग धारिण्यै
खल खण्डिन्यै
विख्यात्यै
खण्डितायै
खण्डव्यै
स्थिरायै
खड्गासनायै
खड्गरूपायै
खड्गदश्यै 140
खड्गमण्डलायै
खड्गहस्तायै
खड्गवेगायै
खड्गेश्यै
खण्डितासुरायै
खट्वाङ्ग्यै

खड्ग खेलायै
खड्ग तीक्ष्णायै
खड्गगायै
खण्ड प्रियायै 150
खण्ड खाद्यायै
सेन्दु खण्डायै
खञ्जन्यै
गङ्गायै
गोदावर्यै
गौर्यै
गोमत्यै
गौतम्यै
गयायै
गवे 160
गज्यै (गजिन्यै)
गगनायै
गारुड्यै
गरुड ध्वजायै
गीतायै
गीत प्रियायै
गोत्रायै
गोत्रक्षय कर्यै
गदायै
गिरिभूपाल दुहितायै 170

गोगायै
गोकुल वर्धिन्यै नमः
घन स्तन्यै
घन रुच्यै
घनोरवे
घन निस्स्वनायै
घूत्कारिण्यै
घूत्कर्यै
घुघूक परिवारितायै
घण्टानाद प्रियायै 180
घण्टायै
घनायै
घोट प्रवाहिन्यै
घोर रूपायै
घोरायै
घून्यै
प्रीत्यै
घनाञ्जन्यै
घृताच्यै
घनमुष्ट्यै 190
घटायै
घण्टायै
घटा मृतायै
घटा स्यायै

घट नादायै
घात पात निवारिण्यै
चञ्चरीकायै
चकोर्यै
चामुण्डायै
चीर धारिण्यै 200
चातुर्यै
चपलायै
चारवे
चलायै
चेलायै
चलाचलायै
चतुरायै (चतस्रायै)
चिरन्तनायै (अचलायै)
चाकायै
चियायै 210
चामीकर छवये
चापिन्यै
चपलायै
चम्पवे
चिन्तायै (चित्यै)
चिन्तामण्यै
चितायै
चातुर्वर्णमय्यै

चञ्चलायै
चौरायै 220
चापायै
चमत्कृत्यै
चक्रवर्ति वध्वै
चक्रायै
चक्राङ्गायै
चक्र मोदिन्यै
चतसे
चर्यै
चित्तवृत्यै
अचेतायै 230
चेतनप्रदायै
चाम्पेय्यै
चम्पक प्रीत्यै
चण्ड्यै
चण्डाल वासिन्यै
चिरञ्जीवितदायै
चित्तायै
तरुमूल निवासिन्यै
छरिकायै
छत्र मध्यस्थायै 240
छिद्रायै
छेदकर्यै

छिदायै
छुच्छुन्दर्यै
पालयित्र्यै (पलप्रीत्यै)
सुन्दरीभ निभ स्वनायै
छलिन्यै
छलविदे
छिन्नायै
छिटिकायै 250
छेककृते
छद्मिन्यै
छान्दस्यै
छायायै
छायाकृते
छाद्यै (छादये)
जयायै
जयदायै
जात्यै
जृम्भिण्यै 260
जामला युतायै
जपापुष्प प्रियायै
जायायै
जाप्यायै
जाप्यजगत्यै
जन्यै

जम्बू प्रियायै
जय स्थायै
जङ्गमायै
जङ्गम प्रियायै 270
जन्तवे
जन्तु प्रधानायै
जरत्कर्णायै
जरद्गवायै
जात्यै
प्रियायै
जीवनस्था (जीतनस्था)
जीमूत सदृश च्छवये
जन्यायै
ज़न हितायै 280
जायायै
जम्भायै
जम्भिल शालिन्यै
जवदायै
जव वद्वाहायै
जमान्यै
ज्वरहायै
ज्वर्यै (ज्वरायै)
झञ्झानिल मय्यै
झञ्झायै 290

झणत्कार करा चलायै
झिण्टीशायै
झस्य कृतवे
झम्पायै
यम त्रास निवारिण्यै
टङ्कार स्थायै
टङ्क धरायै
टङ्कार कारणायै
टस्यै
ठकुरायै 300
ठीत्कृतये
ठिण्ठीर वसनावृतायै
ठण्ठानिल मय्यै
ठण्ठायै
ठणत्कार करायै
ठसायै
डाकिन्यै
डामरायै
डिण्डिम ध्वनि नादिन्यै
डक्का प्रिय स्वनायै 310
ढक्कायै
तपिन्यै
तापिन्यै
तरुण्यै

तुन्दिलायै
तुन्दायै
तापस्यै
तपः प्रियायै
ताम्रायै
ताम्राम्बरायै 320
ताल्यै
तालीदल विभूषण्यै
तुरङ्गायै
त्वरितायै
तोतायै
तोतलायै
तादिन्यै
तुलायै
तापत्रय हरायै
तारायै 330
ताल केश्यै
तमालिन्यै
तमाल दलव च्छायायै
ताल स्वनवत्यै
तम्यै
तामस्यै
तमिस्त्रयै
तीव्रायै
तीव्र पराक्रमायै
तटस्थायै 340
तिल तैलाक्तायै
तारिण्यै
तपन द्युत्यै
तिलोत्तमायै
तिलक कृते
तारकाधीश शेखरायै
तिलपुष्प प्रियायै
तारायै
तारकेश कुटुंबिन्यै
स्थाणुपत्न्यै 350
स्थितिकर्यै
स्थलस्थायै
स्थलवर्द्धिन्यै
स्थित्यै
स्थैर्यायै
स्थविष्ठायै
स्थावत्यै (स्थावरायै)
स्थूल विग्रहायै
दन्तिन्यै
दण्डिन्यै 360
दीनायै
दरिद्रायै

दीन वत्सलायै
देव्यै
देव वध्वे
दैत्य दमिन्यै
दन्त भूषणायै
दया वत्यै
दम वत्यै
दम दायै 370
दाडिम स्तन्यै
दन्तशूक निभायै
दैत्य दारिण्यै
देवता ननायै
दोला क्रीडायै
दयाळवे (दलायुषे)
दंपतिभ्यां
देवता मय्यै
दशायै
दीप स्थितायै 380
दोषायै
दोष हायै
दोष कारिण्यै
दुर्गायै
दुर्गार्त्ति शमन्यै
दुर्गमायै

दुर्ग वासिन्यै
दुर्गन्ध नाशिन्यै
दुःस्थायै
दुस्वप्न शम कारिण्यै 390
दुर्वारायै
दुन्दुभि ध्वानायै
दूरगायै
दूर वासिन्यै
दर दायै
दर हायै
दात्र्यै
दया दायै
दुहितायै
दशायै 400
धुरन्धरायै
धुरीणायै
धौरेय्यै
धन दायिन्यै
धीरायै
सुधीरायै (अधीरायै)
धरित्र्यै (धीरधरित्र्यै)
धर्मदायै (धर्मिण्यै)
धीर मानसायै
धनु र्धरायै 410

धमिन्यै (धर्मिण्यै)
धूर्त्तायै
धूर्त्त परिग्रहायै
धूम वर्णायै
धूम पानायै
धूमलायै
धूम मोदिन्यै
नळिन्यै
नन्दन्यै
नन्दायै 420
नन्दिन्यै
नन्द बालिकायै
नवीनायै
नर्मदायै
नर्म्यै
नेम्यै
नियमायै
निश्चयायै
निर्मलायै
निगमा चारायै 430
निम्नगायै
नग्निकायै
निम्यै
नालायै

निरन्तरायै
निघ्न्यै
निर्लोपायै
निर्गुणायै
नत्यै
नील ग्रीवायै 440
निरीहायै
निरञ्जन जन्यै
नव्यै
नवनीत प्रियायै
नार्यै
नरकार्णव तारिण्यै
नारायण्यै
निरा कारायै
निपुणायै
निपुण प्रियायै 450
निशायै
निद्रायै
नरेन्द्र स्थायै
नमितायै
अनमितायै
निर्गुण्डिकायै
निर्गुण्डायै
निर्मोम्सायै

नासिकाभिधायै

पताकिन्यै 460

पताकायै

पलप्रीत्यै

यशस्विन्यै

पीनायै

पीन स्तनायै

पत्न्यै

पवनाशन शायिन्यै

परायै

परा कलायै

पाकायै 470

पाक कृत्यायै

रति प्रियायै

पवन स्थायै

सुपवनायै

तापस्यै

प्रीति वर्द्धिन्यै

पशुवृद्धिकर्यै

पुष्ट्यै

पोषण्यै

पुष्प वर्द्धिन्यै (पुष्टिवर्द्धिन्यै) 480

पुष्पिण्यै

पुस्तक करायै

पुन्नाग तल वासिन्यै

पुरन्दर प्रियायै

प्रीत्यै

पुरमार्ग निवासिन्यै

पेशायै

पाश करायै

पाश बन्धहायै

पाम्शुलायै 490

पशवे

पटायै

पटाशायै

परशु धारिण्यै

पाशिन्यै

पापघ्न्यै

पति पत्न्यै

पतितायै

अपतितायै

पिशाच्यै (पिडार्यै) 500

पिशाचघ्न्यै

पिशिताशन तोषितायै

पान दायै

पान पात्रायै

पानदान करोद्यतायै

पेषायै

प्रसिद्ध्यै
पीयूषायै
पूर्णायै
पूर्ण मनोरथायै 510
पतद्गर्भायै
पतद्गात्रायै
पौनः पुन्यायै
पुरायै
पंङ्किलायै
पंङ्क मग्नायै
पाम्यै
पापञ्जर स्थितायै
पञ्चमायै
पञ्च यामायै 520
पञ्चतायै
पञ्चम प्रियायै
पञ्च मुद्रायै
पुण्डरीकायै
पिङ्गलायै
पिङ्ग लोचनायै
प्रियङ्गु मञ्जर्यै
पिण्ड्यै
पण्डितायै
पाण्डुर प्रभायै 530

प्रेता सनायै
प्रियालु स्थायै
पाण्डुघ्न्यै
पीतसा पहायै
फलिन्यै
फल दात्र्यै
फल श्रियै
फणि भूषणायै
फूत्कार कारिण्यै
स्फारायै 540
फुल्लायै
फुल्लाम्बुजासनायै
फिरङ्ग हायै
स्फीत मत्यै
स्फीत्यै
स्फीति कर्यै
वनमायायै
बलारातये
बलिन्यै
बल वर्द्धिन्यै 550
वेणु वाद्यायै (वेणुवातायै)
वन चर्यै
वीरायै
वीर जनन्यै (बीजमय्यै)

विद्यायै
विद्या प्रदायै
विद्या बोधिन्यै
वेद दायिन्यै
बुधमात्रे
बुद्धायै 560
वनमाला वत्यै
वरायै
वरदायै
वारुण्यै
वीणायै
वीणा वादन तत्परायै
विनोदिन्यै
विनोद स्थायै
वैष्णव्यै
विष्णु वल्लभायै 570
विद्यायै
वैद्य चिकित्सायै
विवशायै
विश्व विश्रुतायै
वितन्त्रायै
विह्वलायै
वेलायै
विरावायै

विरति ज्वरायै
विविधार्क करायै 580
बीरायै
बिम्बोष्ठ्यै
बिम्ब वत्सलायै
विन्ध्य स्थायै
वार वन्द्यायै (वीर वन्द्यायै)
वर्यै
यानपरायै
विदे
वेदान्त वेद्यायै
वैद्यायै 590
वेदास्यायै
विजय प्रदायै
विरोध वर्द्धिन्यै
वन्ध्यायै
बन्ध्यायै
बन्ध निवारिण्यै
भगिन्यै (भयिन्यै)
भगमालायै
भवान्यै
भय भाविन्यै 600
भीमायै
भीमा ननायै

भौम्यै (भैम्यै)
भङ्गुरायै
भीम दर्शनायै
भिल्यै
भल्ल धरायै
भीरवे
भेरुण्ड्यै
भिये 610
भया पहायै
भग सर्पिण्यै
भगायै
भग रूपायै
भगा लयायै
भगा सनायै
भगा मोदायै
भेर्यै
भङ्कार रञ्जिन्यै
भीषणायै 620
भीषणा रावायै
भगवत्यै
भूषणायै
भारद्वाज्यै
भोग दात्र्यै
भवघ्न्यै

भूति भूषणायै
भूति दायै
भूमि दात्र्यै
भूपतित्व प्रदायिन्यै (प्रसादिन्यै) 630
भ्रमर्यै
भ्रामर्यै
नीलायै
भूपाल मुकुट स्थितायै
मतायै
मनोहर मनायै
मानिन्यै
मोहिन्यै
मह्यै
महा लक्ष्म्यै 640
मद क्षीबायै (मदश्रीभायै)
मदीयायै
मदिला लयायै (महिमा लयायै)
मदोद्धतायै (मदोद्गतायै)
मतङ्ग स्थायै
माधव्यै
मधु मन्थिन्यै (मधु मर्दिन्यै)
मेधायै
मेधा कर्यै
मेध्यायै 650

मध्यायै
मध्य वय स्थितायै
मध्यपा
मांसलायै
मत्स्य मोदिन्यै
मैथुनो द्धतायै
मुद्रायै
मुद्रावत्यै
मात्रे
मायायै 660
महिम मन्दिरायै
महा मायायै
महा विद्यायै
महा मार्यै
महेश्वर्यै
महादेव वध्वे
मान्यायै
मधुरायै
वीर मण्डलायै
मेदस्विन्यै 670
मीलद् श्रिये
महिषासुर मर्दिन्यै
मण्डप स्थायै
मठ स्थायै

मदिरायै (मदिरागम गर्वितायै)
मद गर्वितायै (आगत ग र्वितायै)
मोक्षदायै (मोनदायै)
मुण्ड मालायै
मालायै
माला विलासिन्यै 680
मातङ्गिन्यै
मातङ्ग्यै
मातङ्ग तनयायै
मधु स्रवायै
मधु रसायै
मधूक कुसुम प्रियायै
यामिन्यै
यामिनीनाथ भूषायै
यावक रञ्जितायै
यवांकुर प्रियायै 690
यामायै
यवन्यै
यवना धिपायै
यम घ्न्यै
यम कन्यायै
यजमान स्वरूपिण्यै
यज्ञायै
यज्वने (यज्वायै)

यजुषे
याज्व्यै 700
यशो निकर कारिण्यै
यज्ञसूत्र प्रदायै
यष्ट्रै
यज्ञकर्म कर्त्र्यै
यशस्विन्यै
यकार स्थायै
यूप स्तम्भ निवासिन्यै
रञ्जितायै
राजपत्न्यै
रमायै 710
रेखायै
रवये
रण्यै
रजो वत्यै
रजश्चित्रायै (रज स्थिरायै)
रजन्यै
रजनी पतये
रागिण्यै
राज्य नीराज्यायै
राज्य दायै 720
राज्य वर्द्धिन्यै
राजन्वत्यै

राज नीत्यै
रजत वासिन्यै
रमण्यै
रमणीयायै
रामायै
रामावत्यै
रत्यै
रेतोवत्यै 730
रतोत्साहायै
रोगहृदे
रोग कारिण्यै
रङ्गायै
रङ्ग वत्यै
रागायै
राग ज्ञायै
राग कृते
रणायै
रञ्जिकायै 740
रञ्जका रञ्जायै
रञ्जिन्यै
रक्त लोचनायै
रक्त चर्म धरायै (रक्तवासिन्यै)
रक्तायै
रक्त स्थायै

रक्त वादिन्यै		विङ्कायै	
रम्भायै		विङ्क स्थायै	
रंभाफल प्रीतायै		विङ्क वत्सलायै	
रम्भोरवे	750	वद्यै	(विदये)
राघव प्रियायै		विलग्नायै	
रङ्ग भृते		विप्रायै	
रङ्ग मधुरायै		विघ्यै	(विधये)
रोदस्यै		विधि कर्यै	
रोदसी ग्रहायै		विधायै	
रोध कृते		शङ्खिन्यै	780
रोध हन्त्र्यै		शङ्ख वलयायै	
रोग भृते		शंख माला वत्यै	
रोग नाशिन्यै		शम्यै	
वन्द्यै	760	शङ्खपात्रा शन्यै	
वन्दि स्तुतायै		शङ्खायै	(शंखाशंखायै)
बन्धवे		आशङ्खायै	(अशंखायै)
बन्धूक कुसुमा धरायै		शंख गलायै	
वन्दितायै	(वन्दीत्रायै)	शश्यै	(शशिन्यै)
वन्दितां मात्रे		शङ्ख्यै	(शम्व्यै)
बिन्दुरायै	(विदुरायै)	शरावत्यै	790
बैन्दव्यै		श्यामायै	
विधायै		श्यामांग्यै	
विङ्क्यै		श्याम लोचनायै	
विङ्क पलायै	(विकंपलायै) 770	श्मशान स्थायै	

श्मशानायै
श्मशान स्थल भूषणायै
शमदायै
शम हन्त्र्यै
शाकिन्यै
शङ्कवे 800
शेखरायै
शान्त्यै
शान्ति प्रदायै
शेषायै
शेष स्थायै
शेष दायिन्यै
शेमुष्यै (शेमुख्यै)
शोषिण्यै
शीर्यै
शौरये 810
शौर्यायै
शरायै
शिर्यै
शाप हायै
शाप हानीशायै
शम्पायै
शपथ दायिन्यै
शृङ्गिण्यै

शृङ्ग फलभुजे
शंकर्यै 820
शांकरी चयायै
शङ्कायै
शंका पहायै
संस्थायै
शाश्वत्यै
शीतलायै
शिवायै
शिव स्थायै
शव भुक्तायै
शव वर्णायै (शिववर्णायै) 830
शिवोदर्यै
शायिन्यै
शाव शयनायै
शिंशपायै
शिशुपालिन्यै
शव कुण्डलिन्यै
शैवायै
शङ्करायै
शिशिरायै
शिरायै 840
शव काञ्च्यै
शव श्रीकायै

शव मालायै
शवा कृतये
शयन्यै
शङ्कु वायै
शक्त्यै
शन्तन्वै
शील दायिन्यै
सिन्धवे 850
सरस्वती सिन्धवे
सुन्दर्यै
सुन्दरा ननायै
साधवे
सिध्यै
सिद्धि दात्र्यै
सिद्धायै
सिद्ध सरस्वत्यै
सन्तत्यै
संपदायै 860
संपदे (संपदांसंपदे)
संविदे
सरति दायिन्यै
सपत्न्यै
सरसायै
सारायै
सरस्वति कर्यै
स्वधायै
सरस्यै (सरसे)
समायै (सरस्समायै) 870
समानायै
समा राध्यायै
समस्तदायै
समिद्धायै (समिदायै)
समदायै
सम्मायै (साम्ने)
संमोहायै
सम दर्शनायै
समित्यै
समिधायै 880
सीमायै (सीम्ने)
सवित्र्यै
सविधायै
सत्यै
सवन्यै
सवना धारायै
सावनायै
समरायै
सम्यै
सिमिरायै 890

सततायै
साध्व्यै
सद्ध्री चिन्त्यायै (सध्रीच्यै)
सहायिन्यै
हंस्यै
हंसगत्यै
हंसायै
हंसोज्ज्वल निचोल युजे
हलिन्यै
हलदायै 900
हालायै
हर श्रियै
हर वल्लभायै
हेलायै
हेलावत्यै
हेषायै
हेष स्थायै
हेष वर्द्धिन्यै
हन्तायै
हन्त्यै (हतये) 910
हतायै
हत्याहायै
हन्त ताप हारिण्यै
हंकार्यै
हन्त कृते
हंकायै
हीहायै
हातायै (हाहायै)
हताहतायै
हेम प्रदायै 920
हंस वत्यै
हार्यै
हातरि संमतायै
होर्यै
होत्र्यै
होलिकायै
होमायै
होम हविषे
हरयै
हारिण्यै 930
हरिणी नेत्रायै
हिमाचल निवासिन्यै
लम्बोदर्यै
लम्बकर्णा
लंबिकायै
लम्ब विग्रहायै
लीलायै
लीलावत्यै

लोलायै
ललन्यै 940
ललितायै
लतायै
ललाम लोचनायै
लोच्यायै
लोलाक्ष्यै
लक्षणायै
ललायै
लम्पत्यै
लुम्पत्यै
लम्पायै 950
लोपामुद्रायै
ललन्तिन्यै
लन्तिकायै
लम्बिकायै
लम्बायै
लघिमायै
लघु मध्यमायै
लघीयस्यै
लघुदय्यै (लघु दयायै)
लूतायै 960
लूता निवारिण्यै
लोमभृते
लोम लोप्तायै
लुलुत्यै
लुलुसन्तत्यै
लुलाय स्थायै
लहर्यै
लंकापुर पुरन्दर्यै
लक्ष्म्यै
लक्ष्मी प्रदायै 970
लक्ष्यायै
लक्षायै
बलमति प्रदायै
क्षुण्णायै
क्षुपायै
क्षणायै
क्षीणायै
क्षमायै
क्षान्त्यै
क्षणावत्यै 980
क्षामायै
क्षामोदर्यै
क्षीमायै
क्षौमभृते
क्षत्रियाङ्गनायै
क्षयायै

क्षयकर्यै

क्षीरायै

क्षीरदायै

क्षीर सागरायै 990

क्षेमङ्कर्यै

क्षयाकार्यै

क्षयदायै

क्षणदायै

क्षत्यै

क्षुरन्त्यै

क्षुद्रिकायै

क्षुद्रायै

क्षुत्क्षामायै

क्षरपातकायै 1000

ओं ह्रीं प्रत्यङ्गिरादेव्यै नमोनमः

ओं नमो काल्यै

कालीनाम - शताष्टक - ककारादि नामावळिः (108)

आदौ प्रणवं अन्ते नमः इतिच सर्वत्र योजयेत्

काल्यै
कपालिन्यै
कान्तायै
कामदायै
कामसुन्दर्यै
कालरात्र्यै
कालिकायै
कालभैरव पूजितायै
कुरुकुल्लायै
कामिन्यै 10
कमनीय स्वभाविन्यै
कुलीनायै
कुल कर्त्र्यै
कुलवर्त्म प्रकाशिन्यै
कस्तूरीरस नीलायै
काम्यायै
कामस्वरूपिण्यै
ककारवर्ण निलयायै
कामधेनवे
करालिकायै 20

कुलकान्तायै
कराळास्यायै
कामार्तायै
कलावत्यै
कृशोदर्यै
कामाख्यायै
कौमार्यै
कुलपालिकायै
कुलजायै
कुल मन्यायै 30
कलहायै
कुलपूजितायै
कामेश्वर्यै
काम कान्तायै
कुञ्जरेश्वर गामिन्यै
काम दात्र्यै
कामहर्त्र्यै
कृष्णायै
कपर्दिन्यै

कुमुदायै 40
कृष्णदेहायै
कालिन्द्यै
कुलपूजितायै
काश्यप्यै
कृष्णमात्रे
कुलिशाङ्ग्यै
कलायै
क्रीं रूपायै
कुगम्यायै
कमलायै 50
कृष्ण पूजितायै
कृशाङ्ग्यै
किन्नर्यै
कर्त्र्यै
कलकण्ठ्यै
कार्तिक्यै
कम्बु कण्ठ्यै
कौलिन्यै
कुमुदायै
काम जीविन्यै 60

कुलस्त्रियै
कीर्तिकायै
कृत्यायै
कीर्त्यै
कुल पालिकायै
कामदेव कलायै
कल्पलतायै
कामाङ्ग वर्द्धिन्यै
कुन्तायै
कुमुद प्रीतायै 70
कदम्ब कुसुमोत्सुकायै
कादम्बिन्यै
कमलिन्यै
कृष्णानन्द प्रदायिन्यै
कुमारी पूजन रतायै
कुमारीगण शोभितायै (सेवितायै)
कुमारी रञ्जन रतायै
कुमारीव्रत धारिण्यै
कङ्काल्यै
कमनीयायै 80

कामशास्त्र विशारदायै
कपाल खट्वाङ्ग धरायै
कालभैरव रूपिण्यै
कोटर्यै
कोटराक्ष्यै
काश्यै
कैलास वासिन्यै
कात्यायन्यै
कार्य कार्यै
काव्य शास्त्र प्रमोदिन्यै 90
कामाकर्षण रूपायै
कामपीठ निवासिन्यै
कङ्गिन्यै
काकिन्यै
क्रीडायै
कुत्सितायै
कलह प्रियायै
कुण्ड गोलोद्भव प्राणायै
कौशिक्यै
कीर्ति वर्द्धिन्यै 100
कुम्भ स्तन्यै
कलाक्षायै
काव्यायै
कोकनद् प्रियायै
कान्तार वासिन्यै
कान्त्यै
कठिनायै
कृष्णवल्लभायै 108

(इति कालीतन्त्रस्था नामावलिः समाप्ता)

ओं नमो भैरव्यै

भैरवी अष्टोत्तरशत नामावळिः (108)

आदौ ओमिति अन्ते नम इतिच सर्वत्र योजयेत्

भैरव्यै
भैरवाराध्यायै
भूतिदायै
भूतभावनायै
कार्यायै
ब्राह्म्यै
कामधेनवे
सर्वसम्प त्प्रदायिन्यै
त्रैलोक्य वन्दितादेव्यै
महिषासुर मर्दिन्यै 10
मोहिन्यै
मालतीमालायै
महापातक नाशिन्यै
क्रोधिन्यै
क्रोध निलयायै
क्रोध रक्तेक्षणायै
कुहे
त्रिपुरायै
त्रिपुराधारायै
त्रिनेत्रायै 20

भीमभैरव्यै
देवक्यै
देवमात्रे
देवदुष्ट विनाशिन्यै
दामोदर प्रियायै
दीर्घायै
दुर्गायै
दुर्गति नाशिन्यै
लम्बोदर्यै
लम्बकर्णायै 30
प्रलम्बित पयोधरायै
प्रत्यङ्गिरायै
प्रतिपदायै
प्रणत क्लेश नाशिन्यै
प्रभावत्यै
गुणवत्यै
गुणमात्रे
गुहेश्वर्यै
क्षीराब्धि तनयायै
क्षेम्यायै 40

जगत् त्राण विधायिन्यै
महामायैं
महामोहायै
महाक्रोधायै
महा नद्यै
महापातक संहत्र्यै
महामोह प्रदायिन्यै
विकराळायै
महाकालायै
कालरूपायै 50
कलावत्यै
कपाल खट्वाङ्ग धरायै
खड्गायै
खर्पर धारिण्यै
कुमार्यैं
कुङ्कुम प्रीतायै
कुङ्कुमारुण रञ्जितायै
कौमोदक्यै
कुमुदिन्यै
कीर्त्यैं 60
कीर्ति प्रदायिन्यै
नवीनायै

नीरदायै
नित्यायै
नन्दिकेश्वर पालिन्यै
घर्घरायै
घर्घरा रावायै
घोरायै
घोर स्वरूपिण्यै
कलिघ्न्यै 70
कलि धर्मघ्न्यै
कलि कौतुक नाशिन्यै
किशोर्यैं
केशव प्रीतायै
क्लेश सङ्घ निवारिण्यै
महोत्तमायै
महा मत्तायै
महा विद्यायै
महीमय्यै
महा यज्ञायै नमः 80
महा वाण्यै
महा मन्दर धारिण्यै
मोक्षदायै
मोहदायै

मोहायै

भुक्तिदायै

मुक्ति दायिन्यै

अट्टाट्टहास निरतायै

क्वणन् नूपुर धारिण्यै

दीर्घ दंष्ट्रायै नमः 90

दीर्घ मुख्यै

दीर्घ घोणायै

दीर्घिकायै

दनुजान्तकर्यै

दुष्टायै

दुःख दारिद्य भञ्जिन्यै

दुराचारायै

दोषघ्न्यै

दमपल्यै

दयापरायै नमः 100

मनोभवायै

मनुमय्यै

मनुवंश प्रवर्द्धिन्यै

श्यामायै

श्यामतनवे

शोभायै

सौम्यायै

शम्भु विलासिन्यै नमः 108

ओं क्षं ह्रीं महा भैरव्यम्बायै नमोनमः

(इति श्री भैरवी अष्टोत्तरशतनामावलिः संपूर्णा)

ओं नमोः प्रत्यङ्गिरायै

श्री प्रत्यङ्गिरा अष्टोत्तर शतनामावळिः (108)

आदौ प्रणवं अन्ते नमः इतिच सर्वत्र योजनीयानि

प्रत्यङ्गिरायै
ओङ्कार रूपिण्यै
ओङ्कार प्रियायै
विश्वरूपायै
विरूपाक्ष प्रियायै
जटाजूट धारिण्यै
कपाल माला लङ्कृतायै
नागेन्द्र भूषणायै
नाग यज्ञोपवीत धारिण्यै
सकल राक्षस नाशिन्यै 10
श्मशान वासिन्यै
कुञ्जित केशिन्यै
कपाल खट्वाङ्ग धारिण्यै
रक्तनेत्र ज्वालिन्यै
चतुर्भुजायै
चन्द्र सहोदर्यै
ज्वाला कराळ वदनायै
भद्रकाल्यै
हेमवत्यै
नारायण समाश्रितायै 20
सिंहमुख्यै
महिषासुर मर्दिन्यै
धूम्र लोचनायै
शंकर प्राण वल्लभायै
लक्ष्मी वाणी सेवितायै
कृपा रूपिण्यै
कृष्णाङ्ग्यै
प्रेत वाहनायै
प्रेतभोगिन्यै
शिवानुग्रह वल्लभायै 30
पञ्च प्रेतासनायै
महा काल्यै
वन वासिन्यै
अणिमादि गुणाश्रयायै
रक्त प्रियायै
शाक मांस प्रियायै
नरशिरो माला लंकृतायै
अट्टहासिन्यै
कराळ वदनायै
ललज्जिह्वायै 40

ह्रीं कारायै

ह्रीं विभूत्यै

शत्रु नाशिन्यै

भूत नाशिन्यै

सकल दुरित विनाशिन्यै

सकलापन् नाशिन्यै

अष्टभैरव सेवितायै

ब्रह्म विष्णु शिवात्मिकायै

भुवनेश्वर्यै

डाकिनी परिसेवितायै 50

रक्तान्न प्रियायै

मांस निष्ठायै

मधुपान प्रियोल्लासिन्यै

डमरुक धारिण्यै

भक्त प्रियायै

परमन्त्र विदारिण्यै

परयन्त्र विनाशिन्यै

परकृत्य विध्वंसिन्यै

महा प्रज्ञायै

महा चलायै 60

कुमारकल्प सेवितायै

वाहनायै

सिंहवाहिन्यै

सिंह गर्जिन्यै

पूर्णचन्द्र निभायै

त्रिनेत्रायै

भण्डासुर निषेवितायै

प्रसन्न रूप धारिण्यै

भुक्ति मुक्ति फल प्रदायै

नवग्रह रूपधारिण्यै 70

कामधेनु प्रगर्भायै

योगमाया युगन्धरायै

गुह्य विद्यायै

महा विद्यायै

सिद्ध विद्यायै

खड्ग मण्डल सुपूज्यायै

सालग्राम निवासिन्यै

योनि रूपिण्यै

नवयोनि चक्रात्मिकायै

श्री चक्र सुचारिण्यै 80

राजराज सुपूजितायै

निग्रहा नुग्रहायै

शापानुग्रह कारिण्यै

बालेन्दुमौलि सेवितायै

गंगाधरा लिङ्गितायै

वीर रूपायै

वराभय प्रदायै

वसुदेव विशालाक्ष्यै

पर्वतस्तन मण्डलायै

हिमाद्रि निवासिन्यै 90

दुर्गा रूपायै

दुर्गा दुःखार्ति हारिण्यै

ईषणत्रय नाशिन्यै

महा भीषणायै

कैवल्य फल प्रदायै

आत्म संरक्षिण्यै

सकलशत्रु विनाशिन्यै

सकलारिष्ट विनाशिन्यै

नागपाश धारिण्यै

सकल विघ्न विनाशिन्यै 100

परमन्त्र यन्त्र तन्त्राकर्षिण्यै

सर्वदुष्ट प्रदुष्ट शिरश्छेदिन्यै

महामन्त्र यन्त्र तन्त्रा क्षिण्यै

नील कण्ठिन्यै

घोर रूपिण्यै

ह्रीं विभूत्यै

विजयांबायै

धूर्जटिन्यै 108

क्षं ह्रीं महाभैरव प्रियायै -
प्रत्यङ्गिरायै नमो

ओं नमश्शिवाभ्याम्

प्रत्यङ्गिरा सपर्या सर्वस्वम्

अनुबन्धविषयाः

विभागः - 16

अनुबन्धविषयाः

अथ प्रत्यङ्गिरादि मन्त्रप्रसङ्गात् - प्रत्यङ्गिरसः - कृत्याशान्तिफल प्रधानत्वात् - तत्प्रसङ्गात् - कृत्याग्रहाणां लक्षणविशेषाः - प्रयोगसारोक्तप्रकारेण - अत्र - लिख्यन्ते।।

ग्रहभेद अष्टादश नामानि

अमरा राक्षसा यक्षा नागा भूताः सुराः कृशाः।
गन्धर्वाः पितरो गुह्याः पिशाचाः ब्रह्मराक्षसाः।
विनायकाः कुमाराश्च निस्तेजा भस्मकाः तथा।
प्रलापाः काश्मला श्चेति दशाष्टौ ते महाग्रहाः।।

चरन्ति स्वेच्छया लोके कोटिभेदै र्व्यवस्थिताः।
पूजोपहार हवन व्याक्षेपे णोप मोहिताः।
गृह्णन्ति मानवा नेते वक्ष्ये तेषां गुणानपि।।

अष्टादश ग्रहगणस्य - गुणरूपाणि ।

लुब्धं मूर्खं भयार्तं ह्रपित मतिशठं पूर्व वैरानुबद्धं -
नष्टद्रव्यं वियुक्तं प्रतिहत मशुचिं प्राप्तकालं सरोगम्।
हासान्तं कान्तदेहं निधि विलयकरं कातरं भूषिताङ्गं -
रात्रा वेकाकिनं तं स्मर मथन गणा स्ते पुमांसं ग्रसन्ति।।

तैला भ्यक्तां प्रसूता मभिनव सुरतां मद्य मांसा नुरक्तां -
नग्ना मुन्मत्त सत्वां स्मर शर विवशां मुह्य मानां विहारैः।
रथ्या श्रृङ्गाट कस्थां ऋतु समय रतां पुंश्च लीकां रुदन्तीं -
एकान्तां कान्तदेहां स्त्रिय मपि विषमां गुह्यकास्ते ग्रसन्ति।।

सौम्यो रक्ताननो हृष्टः प्रशस्त वचनः शुचिः।
स्वल्प मूत्र पुरीष श्च धीरो देवग्रहः स्मृतः।। 1

स्वमांसाद स्सुरा सिक्तः चपलः पिङ्गलो ऽशुचिः।
शून्या लय स्थितो हृष्टः बलवान् राक्षसग्रहः।। 2

धीर स्त्यागी मनोवेगी कामी रक्ता ननेक्षण:।
भोगान्धो गन्धवाहाशी ज्ञेयो यक्षग्रह: क्षमी।। 3

दुग्ध मद्य प्रिय: श्राव्य: लोलजिह्वो नगाश्रय:।
रक्ताक्ष स्सिन्धु तोयार्थी वक्री नागग्रहो मत:।। 4

परिहारप्रियो नित्यं निद्रालु भौजने रत:।
द्रुमाधिरोही दुर्वक्र: क्रोधी भूतग्रहो विदु:।। 5

क्रूरदृष्टि र्भयोद्रिक्त: प्रभूताशी सविस्मय:।
द्विज वैद्य सुरद्वेषी गुरुमायो(अ)ऽसुर ग्रह:।। 6

विविक्त सेवी शुष्काङ्गो बुभुक्षु र्दारुण ध्वनि:।
दिक्षु प्रसारि सोद्वेग: वैद्यो मौनी कुशग्रह:। 7

गन्धमाल्य प्रियो हृष्टो वक्रवाद्य प्रियो रत:।
गीत नृत्यपरो रागी ज्ञेयो गान्धर्वको ग्रह:।। 8

तिल माष गुळा कांक्षी प्रेतकार्य परायण:।
शान्तो ऽपराह्ण सञ्चारी बोद्धव्योऽयं पितृग्रह:।। 9

स्मेरास्य श्चोन्मुखी मौनी बद्धमुष्टि र्दिगीक्षण:।।
जान्वाश्रयी क्रूरदृष्टि: ज्ञेयो गुह्यग्रहोज्वल:।। 10

प्रलापो निष्ठुरालापो हीनश्शून्य रतिश्शठ:।
दुर्गन्धलेपो मलिन: स्यात् पिशाच ग्रहोऽशुभ:।। 11

ताम्रदृक् वेद वाक्यज्ञ :ब्रह्मचारी द्विज प्रिय:।
वैद्यापहासी शुद्धात्मा ग्रह स्स्यात् ब्रह्मराक्षस:।। 12

फूत्कार निरतोद्गारी मृष्टवाद रजो बली।
दशनैं दशनादंशी क्ररो वैनायको ग्रह:।। 13

उत्सङ्ग शयनासक्त: पांसु क्रीडा परस्सदा।
स्निग्ध वाक्यो महोत्साही स्यात् कुमारग्रहो मृदु:।। 14

निस्पृहो विह्वलो वक्ता निर्निमेषा वलोकनः।
निराकृत भिषग्वाक्यः निस्तेजाख्यो ग्रहः स्मृतः।। 15

त्वगस्थि भूतो बुभुक्षुः शीताङ्ग स्तिर्य गीक्षणः।
असदर्था भिधायी च निर्मलो भस्मक ग्रहः।। 16

नृत्तक स्सहसा हासी बहुवक्ता प्रभूत भुक्।
शुष्काङ्गो जृम्भण परः स्यात् प्रलाप ग्रहो ऽस्थिरः।। 17

रागी परार्थ हृत् क्रुद्धः स्त्री द्रोही कलह प्रियः।
बह्वाशी भीषणो लुब्धः स्तब्ध वाक् कश्मलग्रहः।। 18

अष्टादश ग्रहा ह्येते लक्षणै स्सह दर्शिताः।
तेष्वेव जातिभेदांश्च लक्षयेत् वर्ण लक्षणैः।।

क्षुत्तृष्णा ज्वर दाह शीर्षक रुजा युक्तस्तु पूजाप्रियः -
सो द्वेग स्सुरत प्रियः सुवचन श्शुद्धो विह रोत्सुकः।
हृष्ट स्साहसिकः प्रकम्पित शिरो व्यापाद नार्थी तथा –
त्रेधा ते समुदीरिताः ग्रहगणाः तेष्वन्त्य उक्तं त्यजेत्।।

लिङ्गै र्ग्रहान् समुप लक्ष्य यथा क्रमेण -
मन्त्री विमृश्य विदधातु तथा चिकित्साम्।
पूजा विधान विधि पूर्वक मिष्ट सिद्धि –
लाभाय सङ्गत मनाः सकल क्रियाभिः।।

भूतलक्षणम्

मन्त्री दृष्ट्वा ग्रहाविष्टं पुरः पृच्छेद् अनाकुलः।
संस्कृत्य मन्त्रपूतेन वारिणा दैवतं स्मरन्।।

पटेना न्तरितं कृत्वा पूज्य गन्धा क्षता दिभिः।
को भवान् क्वाथ संस्थानं प्राप्तस्त्वं केन हेतुना।।

ब्रूहि सत्या भिधानेन ते शिवा ज्ञेति निश्चयः।
रात्रि त्रयं परी क्ष्यैवं भूयः कर्म समारभेत्।।

आख्याय वाञ्छितं यस्तु समये तिष्ठति ग्रहः
तत्र पूजा यथा प्रोक्ता दण्डो ऽन्यत्र प्रशस्यते।।

पायसेन च मांसेन ज्ञात्वा भूतो दितं यथा।
तन्त्रोक्ते मण्डपे भूम्यां प्रासादे वा विशेषतः।।

भूतेश्वरं महादेवं पूजयेत् खड्ग रावणम्।
ग्रहा स्तत्रा नुगच्छन्ति सौम्या दण्डै रथापरे।।

दशविध भूतावेश प्रकारः

आवेश बन्धन विदारण शूल भेद –
च्छेदा ङ्गदाह दमन क्रमणा ऽक्षि वेधाः।
हृत् तापनं च दश दण्ड विधाः प्रसिद्धाः -
तन्त्रेषु मन्त्र विहिता वृषकेतनेन।। (प्रयोगसारे -प्रोक्तः)

अपस्मार लक्षणम्

क्षेत्रगो विस्मृतो यो सा वपस्मारः प्रकीर्तितः।
स पार्व दिवसे ष्वेव प्रायो व्यक्तिं समेष्यति।।

विस्त्र स्ताङ्गः पतति सहसा भूतले नष्ट संज्ञः-
फेनो द्गारी रटति पुरुषः स्वर्ण कण्ठ श्चिराय।
व्यावृत्ताक्षो दशति दशनान् पीतवर्णः प्रमादी-
भोज्या सक्तो विकृत वदनः स्या दपस्मार एषः।। (प्रयोगसारे -प्रोक्तम्)

अपस्मारस्य - द्वादश शक्तयः

श्वसना विमना निद्रा जृम्भिका दशना तथा।
त्रासिनी मोहिनी चाथ रोदिनी क्रोधिनी तथा।
तापिनी शोषिणी चाथ ध्वंसिनी चेति कीर्तिताः।।
दूत्यो द्वादश विख्याताः अपस्मारस्य सुप्रियाः।।
एता स्समस्ता व्यस्ता श्च संश्रयन्ति नरं किल।
स्वाख्याना र्थवर्ती चेष्टां तत्राभि व्यञ्जयन्ति च।
अपस्मारो पभेदा स्ते ततो द्वादश कीर्तिताः।
शमापाया दपस्मारे कूश्माण्ड बलि माहरेत्।
सुदर्शनेन जुहुयात् तिलैः क्रोधाग्निना ऽथवा।
प्रत्यक्षर सहस्रेण घोरापस्मार शान्तये।।

काम्यार्चनादौ मुद्रायाः मुख्यता

अर्चने जपकाले तु ध्याने काम्ये च कर्मणि।
तत्तन्मुद्राः प्रयोक्तव्याःदेवता सन्निधायकाः।

शान्तिस्तवः

संपूजकानां परिपालकानां –
यतेन्द्रियाणाञ्च तपोधनानाम्।
देशस्य राष्ट्रस्य कुलस्य राज्ञां-
करोतु शान्तिं भगवान् कुलेशः।।

शैव आशीर्वादश्लोकाः

स्वस्तिः प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेन महीं महीशाः।
गो ब्राह्मणेभ्यः शुभ मस्तु नित्यं
लोका स्समस्ताः स्सुखिनो भवन्तु।। 1

आयुष्य विद्यां च यथासुखं च
धर्मार्भलाभो बहुपुत्रतां च।
शत्रुक्षयं राजसु पूज्यतां च
सानुग्रहाः सार्वकालं भजन्तु।। 2



पाणिग्रहे पर्वतराजपुत्र्याः
पादाम्बुजं पाणिसरोरुहाभ्याम्।
अश्मान मारोपयितुस्स्मरारेः
मन्दस्मितं मङ्गळमातनोतु। 3

राजा धर्ममतिः प्रजाः सुचरिताः पूजाधनाः सज्जनाः
षट्कर्मप्रवरा द्विजाः प्रतिदिनं विद्याऽनवद्या सदा।
वाणी सन्निहिता संदा कविमुखे सानन्द मव्याकुला
सर्वे सन्तु शिवार्चनादिनिरताः सौजन्य सन्तोषिणः।। 4

श्रीकण्ठः खण्डितारि श्चिरमवतु भवन्तः सन्तुसन्तस्समृद्धाः
गावो दोहं हुहन्तां बहविधविभवैः भान्तुवर्णास्सुपूर्णाः।
द्यौर्दुगधां वृष्टिमुष्टांभवतुवसुमती सर्वसस्य प्रशस्ता
लोकश्शोकानभिज्ञः भवतुविजयतां शैवशाशः कृतार्थः।। 5

रूपं संपद् दीर्घमायु सुगुणं विद्या विवेकं धने
ज्ञानं शौर्य मुदार मङ्गळकरं प्रोडाङ्गना सङ्गमम्।
अन्नं वस्त्र सुगन्ध भूषणधरं छायादि कीर्तिप्रदं
दिव्यान्दोळन वाहनादिच फलं भोगं शिवार्चाफलम्।। 6

कारुण्यैकनिधिं च सर्वजगतां गङ्गाधरं सुन्दरं
पद्माक्षं स्मितचारु चन्द्रवदनं श्री चन्द्रमौलीश्वरम्।
ये स्मरन्ति दिने कदापि कृपया तस्यैव विल्वावने
ते जन्या: भुवि मङ्गलं खलु भजन्त्यायासलेशं विना।। 7

यावत् वीचित तरङ्गान् वहति सुरनदी जान्हवी पुण्यतोये
याव त्याकाशमर्ग स्तपति दिनकरो भास्करो लोकपाल:।
याव द्वज्रेन्दुनील स्फटिक मणिशिला वर्तते मेरुश्रृङ्गे
तावत् त्वं कुलपुत्र पौत्रसहितो लक्ष्म्या चिरं जीवतु।। 8

अपुत्रा: पुत्रिणस्सन्तु पुत्रिणस्सन्तु पौत्रिण:।
अधना स्सधनास्सन्तु जीवन्तु शरदां शतम्।। 9

काले वर्षतु पर्जन्य: पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहित: ब्राह्मणास्सन्तु निर्भया:।। 10



வாழ்த்து

வாழ்கவே வாழ்க! என்நந்தி திருவடி
வாழ்கவே வாழ்க! மல மறுத் தான்பதம்
வாழ்கவே வாழ்க! மெய்ஞானத்தவன்தாள்
வாழ்கவே வாழ்க! மலமிலாதான் பாதமே. (குருமூர்த்தி)

வாழ்க அந்தணர் வானவ ரானினம்
வீழ்க தண்புனல் வேந்தனு மோங்குக
ஆழ்க தீயதுஎல்லாம் அரன் நாமமே
சூழ்க வையகமுந் துயர் தீர்கவே. (திருஞானசம்பந்தர்)

வான்முகில் வழாது பெய்க மவளம் சுறக்கமன்னன்
கோன்முறை அரசு செய்க குறைவிலாதுயிர்கள் வாழ்க
நான்மறை அறங்கள் ஓங்க, நற்றவம் வேள்வி மல்க,
மேன்மைகொள் சைவநீதி விளங்குக உலகமெல்லாம்.
(தெய்வச்சேக்கிழார்)

ஆறிரு தடந்தோள் வாழ்க, ஆறுமுகம் வாழ்க வெற்பைக்
கூறுசெய் தனிவேல் வாழ்க, குக்குடம் வாழ்க, செவ்வேள்
ஏறிய மஞ்ஞை வாழ்க, யானை தன்அணங்கு வாழ்க
மாறிலா வள்ளி வாழ்க, வாழ்க சீர் அடியா ரெல்லாம்.
(கச்சியப்ப சிவாசார்யர்)

மழை வழங்குக, மன்னவன் ஒங்குக,
பிழையில் பல்வளம் எங்கும் பெருகுக,
தழைக அஞ்செழுத்து ஓசை தரையெலாம்
பழைய வைதிக சைவம் பரக்கவே. (கோயிற்புராணம்)

வைய நீடுக மாமழை மன்னுக.
மெய் விரும்பிய அன்பர் விளங்குக.
சைவ நன்னெறி தாந்தழைத் தோங்குக.
தெய்வ வெண்திரு நீறு சிறக்கவே.

வாழ்க சைவம்! திருச்சிற்றம்பலம்! வாழ்கசீரடியாரெல்லாம்!

உ

ஸ்ரீகுருப்யோநம:

சென்னை-சிவத்திரு. வி. சோமசேகர சிவாசார்யார் தொகுத்து வெளிவந்துள்ள ஸமய நூல்களை ஆஸ்தீக அன்பர்கள் வாங்கிப் பயனடையவும்

1. விபூதி மகிமை (கையிருப்பு இல்லை)
2. உருவத்தில் இறைவன் (கையிருப்பு இல்லை)
3. நவராத்ரிதேவியர் துதித்திரட்டு (கையிருப்பு இல்லை)
4. நூதனாலய பஞ்சஸம்ஸ்காரவிளக்கம் (கையிருப்பு இல்லை)
5. ஆலயாகார அர்த்தவிவரணம் (கையிருப்பு இல்லை)
6. காக்கும் காளியின் காருண்ய மஹிமை (கையிருப்பு இல்லை)
7. **சைவாகமத்தில் சிவயோகநெறி (தமிழில் 100 பக்கம்) ரூ.100.00**
   (சிவயோகப் பயிற்சிசெய்யும் விதிமுறைகள், அதன் எட்டு உறுப்புக்கிரியைகள்,செய்முறைகள்,ஆகமச்சான்றுகளுடன் விளக்கும் நூல்)
8. **திவ்யாபிஷேக விதி (தமிழில் 136 பக்கம்) ரூ.150.00**

   (தெய்வங்களுக்கான திருமஞ்ஜன விதிமுறைகள், அபிஷேகத்தின் பொருட்கள், இலக்கணங்கள், 36 வகைகள், பயன்கள் இவற்றை ஆகம சான்றுடன் விளக்கும் நூல்.)
9. **புஷ்ப்பார்ச்சன விதி (தமிழில் 124 பக்கம்) ரூ.150.00**

   (இறைவழிபாட்டிற்கு ஏற்ற 200 மலர்வகைகள், காலங்களுக்கு உரியவை, மலர்களின் சேமிப்புமுறை, பயன்பாட்டுமுறை, மலர்வகைகளின் பயன்கள் இவற்றை சான்றுடன் விளக்கும் நூல்)
10. **உத்ஸவபேதக் கிரியாபோதம் (தமிழில் 172 பக்கம்) ரூ.300.00**

    (சைவாலய விழாவகைகளின் செயல்முறைகள். பெருவிழாவின் 24 வகைகள், விழாக்கிரியைகள், தெய்வப்புறப்பாட்டுமுறை, ஹோமபலிதான முறைகள், விழாக்கால பரிஹாரக்கிரியைகள் இவற்றை சான்றுகளுடன் விளக்கும் ஆய்வுப்புத்தகம்)

11. நக்ஷத்திர சாந்தி விதானம் (தமிழில் 300 பக்கம்) ரூ.600.00

(27 நட்சத்திரங்களின் பரிஹார சிறப்புஹோமங்கள், சாந்தி விதிமுறைகள், பிறந்த நாளில் செய்யத்தக்க வழிபாட்டுவகைகள், தானவகைகள் இவற்றை சான்றுகளுடனும், விஷயங்களை அட்டவணையில் விளக்கும் ஆய்வுப்புத்தகம்)

12. ஹோம லக்ஷண ஸங்கிரஹம் (தமிழில் 326 பக்கம்) ரூ.300.00

(இறைவேள்விகளின் இலக்கணங்கள், 36வகையில் அக்னியின் உருவப்படங்கள், யாகசாலைகள், குண்டங்கள், 16வகைஹோமங்கள், ஹோமப்பொருட்கள், ஹோமகாலத்திய பரிஹாரக்கிரியைகள் இவற்றை சான்றுடன் விளக்கும் ஆய்வுப்புத்தகம்)

13. புவனேச்வரீ பூஜாகல்பம் (தமிழில் 175 பக்கம்) ரூ.300/–

(தேவீஉபாசனாமுறை, தத்துவவிளக்கம், புவனேச்வரீபூசையின் செய்முறை, ஸ்ரீசக்ரதேவிகளின் அரியபல துதிகள், பலவகை நாமார்ச்சனைகள், அடங்கிய வீட்டுப்பூசைக்கான நூல்.)

14. சிவாகம கட்டுரைத் திரட்டு (பாகம் 13) (தமிழில் 136 பக்கம்) ரூ.200/–

(சைவாகமங்களில் ஆறுஅறிஞர்களின் ஆறுதலைப்புகளைப் பற்றிய சான்றுடன் கூடிய 6 சிறப்புக்கட்டுரைகளின் தொகுப்புத்தமிழ்நூல் வரிசையில்1)

15. சண்டீயாக மஹிமை விளக்கம் (தமிழில்) ரூ.300/–

(சண்டீதேவியின் மஹமைகள், சண்டீயாக வகைகள், சண்டீஹோமத்திற்கான பொருட்கள், செய்முறைகள், சண்டீதுர்கையின் அரியபல துதிகள், பலவகை நாமார்ச்சனைகள் அடங்கிய தமிழ்நூல்)

16. திவ்ய ஸ்தவ கதம்பம் (பக்கம்–150) ரூ.200.00
(தமிழ்.& கிரந்தஎழுத்தில்) (தெய்வத்துதித் திரட்டு)

கிரந்தஎழுத்தில் மூலமானதுதிகளும், அவைக்கு சமஸ்கிருதம் மற்றும் தமிழ் இருமொழிகளில் பதவுரையும் கொண்டுள்ள 200 துதிகள் உள்ளநூல்.

17. காளீ பூஜா ப்ரபாவம் (பக்கம்–380) ரூ.450.00
(காளீ வழிபாட்டுப் பெருமைகள்)

காளீஉபாஸனை முறை, உருவதத்துவ விளக்கம், ஆலயபூஜை விதிமுறைகள், 1008,300,108, நாமாவளிகள், துதிகள், யந்திரபூஜைமுறைகள் அடங்கிய நூல்.

18. சுபாஷித ரத்னமாலா – நற்கூற்று மணிமாலை ரூ.400.00
(மூலமும் – உரையும் முற்றிலும் தமிழ்எழுத்தில்)
இராமாயணம், மஹாபாரதம், ஸ்மிருதிகள், புராணங்கள், காவியங்களிலிருந்து தொகுக்கப்பட்ட 1008 நீதிசாஸ்த்திர உபதேச நல்மொழிகளை கருத்துரையுடன் கொண்டுள்ளநூல்.

19. சிவாகம ஸூக்தி மஞ்ஜரீ (சிவாகம நல்மொழிப் பூங்கொத்து) ரூ.200.00
சைவாகமங்களில் அனைவரும் அறியவேண்டிய நல்மொழிகளை, தனித்தனி தலைப்புகளில் தமிழில் மூலசுலோக சான்றும் அவைக்கு தமிழில்கருத்துரையும் கொண்ட 324 தருமங்களின் தொகுப்புநூல்.

20. சைவ நிர்வசனவசனாமிருதம். (பக்கம்–114) ரூ.200/–
(சைவாகம பரிபாஷைச் சொற்பொருள் விளக்கம்) (தேவநாகரீ மட்டும்)
அரியசொற்களுக்கு பெயரின் சான்றுடன் காரணவிவரங்களைக் கூறும்நூல்.

21. சிவஸ்தோத்ர முக்தாவளீ (கிரந்தலிபி) (பக்கம்–104) ரூ.100/–
சிவத்தோத்திரங்களின் தொகுப்பு

22. ஸ்ரீநவதுர்கா (ஜபவிதி) நாகரலிபி & தமிழ்

23. பிரத்யங்கிரா ஜபவிதி (நாகரலிபி)

24. சிவசக்தி ஸ்தோத்ரமாலா. தேவநாகரி (பக்கம்–320) ரூ.200/–
க்ஷேத்திரசிவலிங்க மாஹேச்வரமூர்த்திகள் மற்றும் பரிவாரதெய்வங்களின் துதிகளுடனும், தமிழ்உரையுடன் கூடிய சிவமஹிம்ன துதிகளுடனும் உள்ளது.

25. பத்ரகாளீ தீபபூஜையும் தேவீபாராயண துதிதிரட்டும்.
(தமிழ்) (பக்கம்–160) ரூ.150/–

26. பிரத்யங்கிரா ஸபர்யா ஸர்வஸ்வம் (நாகரலிபி) (பக்கம்–592) ரூ.600/–
தேவீபிரத்யங்கிரா பைரவர் முதலான தெய்வங்களின், மந்திரங்கள், புரச்சரணவிதிகள், யந்திரம், பூஜை, யாகம் செய்முறைகள், அஷ்டகர்மபிரயோக விதிகள், கவசஸஹஸ்ர நாமதுதிகள் பிரார்த்தனைகளை உள்ளடக்கியது.

27. பிரத்யங்கிரா சகஸ்ரநாமாவளி (நாகரலிபி மற்றும் கிரந்தலிபி)
(காளிதுதி, 108 நாமாவளிகள், பைரவிதுதி, 108 நாமாவளிகள், பிரத்யங்கிரா தேவியின் ஸகஸ்ரநாமாதுதிகள், 1000 நாமாவளிகள், கவசம், மூலமந்திர ஜபவிதிகள் அடங்கியது.) (பக்கம்–148) ரூ.200/–

28. கோயில்விழாக்களின் வாஹனஉலா (ஆலய உத்ஸவ வாஹன யானக்ரமம்)
ஒன்பது வகைக் கோயில்களின் தெய்வவிழாவின் வீதி உலா புறப்பாட்டு விதிமுறைகள், ஸேவாகாலத் திருமுறைத்துதிகள், 50வாஹன விளக்கப்படங்கள் அடங்கிய நூல்) (பக்கம்–256) ரூ.400/–

29. ஆகமம் ஆலயம் ஆதிசைவர் (பாகம்–2) – சைவாகம மரபுசார்ந்த ஐயத்தெளிவுதரும் வினாவிடைகளின் தொகுப்பு நூல்.

30. ஆலயதேவதா ப்ரதிஷ்டாயந்திர தகடு ஒன்று கிரந்தஎழுத்தில் ரூ.1000.00
(சைவைணவக் கோயிலின் தெய்வச்சிலைகளுக்கான ஆகம பிரதிஷ்டைக்கான தகட்டு யந்திரங்கள், தாமிரக்தகட்டில்அளவு இஞ்ச் 3 x 3 அல்லது 5 x 5 ல் ஆகமவிதிமுறைப்படி எழுதியவை, உரிய மந்திரவகைகளுடன் கூடியவை உரிவைக்கு மட்டுமே கிடைக்கும்.

ஸ்ரீ சதுஸ்ஸிம்ஹ ரதாரூடா ப்ரத்யங்கிராதேவீ

நூல் தொகுப்பாசிரியர்

சிவஸ்ரீ. வி. சோமசேகர சிவாசார்யார்

சென்னை, மஹரிஷி வேதாகம பாடசாலையின் முன்னாள் ஆகம பண்டிதரும், மகாபலிபுரம் அரசினர் கோயில் கட்டிடக்கலை மற்றும் சிற்பக்கலைக் கல்லூரியின் முன்னாள் ஆகமவிரிவுரையாளரும், கும்பாபிஷேகங்கள், ஆகமகருத்தரங்குகள், விசேஷயாகங்கள், பலவற்றை பலமுறை தலைமையேற்று நிகழ்த்தியவரும், கனடாவில் இந்துக்கோயிலின் முன்னாள் தலைமை அர்ச்சகரும், பாடசாலைகளின் ஆண்டுத் தேர்வுகளில் பலமுறை பரிக்ஷாதிகாரியாக பணியாற்றியவரும், சிவாகம வித்யா பீடத்தின் ஸ்தாபகரும், சமய போதகராக இருந்து பல மாணவர்களை உருவாக்கியவரும், சைவநெறி தழைக்கத் தொண்டாற்றி வருபவரும், சென்னை சிவாசாரியார் அறக்கட்டளையின் கௌரவ ஆலோசகரும், அதன் சைவாகம கலாச்சார வித்யா கேந்திரத்தின் குருமுதல்வரும், சென்னையில் 8 ஆண்டுகள் மாதந்தோறும் 96 சிவாகம சிறப்புச் சொற்பொழிவு நிகழ்ச்சிகளைத் தொடர்ந்து நடத்தியவரும், சமயம் சார்ந்த 27-க்கும் மேற்பட்ட விளக்க நூல்களை தொகுத்து வெளியிட்டவரும் ஆவார்.